सामाजिक-विज्ञानम्

भारतं समकालिकविश्वञ्च - 1

नवमकक्ष्यायै इतिहासस्य पाठ्यपुस्तकम्

सामाजिक-विज्ञानम्

भारतम् अथ च समकालीनं विश्वम्- 1

नवमकक्ष्यायै इतिहासस्य पाठ्यपुस्तकम्



विद्यया ऽमृतमश्नुते

एन सी ई आर टी
NCERT

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्

NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING

दिसम्बरमासः 2016 इत्यस्मात् संस्करणात्
अस्माभिः संस्कृतानुवादः कृतः ।

आमुखम्

राष्ट्रिय-पाठ्यचर्यायाः रूपरेखा (2005) ज्ञापयति यत् बालकानां यत् विद्यालयीयं जीवनम् अस्ति तद् विद्यालयीयं जीवनं बाह्य-जीवनेन सह योजनीयम् । अयं सिद्धान्तः पुस्तकीयस्य ज्ञानस्य तस्य न्यायस्य विपरीतः अस्ति यस्य प्रभाववशात् अस्माकं व्यवस्था अद्यावधिः विद्यालयस्य गृहस्य च मध्ये अन्तरालं कल्पितवती । नूतनायां राष्ट्रिय-पाठ्यचर्यायाम् आधारितः पाठ्यक्रमः पाठ्यपुस्तकानि च अस्मिन् आधारभूते विचारे क्रियान्वयनस्य प्रयासः अस्ति । एतस्मिन् प्रयासे प्रत्येकं विषयं एकया दृढया भित्त्या आवरणस्य अथ च सूचनायाः संस्मारणस्य च प्रवृतेः विरोधः अपि सम्मिलितः अस्ति । आशासे यत् एते उपायाः अस्मान् राष्ट्रिय-शिक्षा-नीतौ (1986) वर्णितानां बालकेन्द्रितानां व्यवस्थानां दिशि अत्यधिकं दूरं यावत् नेष्यन्ति ।

एतस्य प्रयत्नस्य साफल्यम् अधुना एतस्मिन् तथ्ये आश्रितम् अस्ति यत् विद्यालयानाम् आचार्याः अध्यापकाः च बालकेभ्यः कल्पनाशीलानां गतिविधीनां प्रश्नानां च साहाय्येन शिक्षणस्य काले स्वस्य अनुभवैः चिन्तनस्य च अवसरान् कल्पयन्ति । अस्माकम् एतत् मन्तव्यं स्यात् यत् यदि समय स्थानं स्वतन्त्रतां च बालकेभ्यः प्रयच्छामः तर्हि बालकाः ज्येष्ठैः प्रदत्ताभिः सूचना-सामग्रीभिः सह युक्त्वा सङ्घर्षं च कृत्वा नूतनस्य ज्ञानस्य सर्जनं कुर्वन्ति । शिक्षायाः विविधानां साधनानाम् एवञ्च स्रोतसाम् अवहेलनस्य प्रमुखं कारणं पाठ्यपुस्तकं परीक्षायाः एकमात्रम् आधारस्य निर्माणस्य प्रवृत्तिः अस्ति । सर्जनस्य प्रारम्भस्य च विकासार्थम् आवश्यकम् अस्ति यत् बालकाः शिक्षणस्य प्रक्रियायां सहभागिनः सन्ति इति अङ्गीकुर्युः अपि च तान् सहभागिनः कुर्वन्तु, ते बालकाः ज्ञानस्य निर्धारित-मात्रायाः ग्राहकाः सन्ति इति मतं त्यजन्तु ।

एते उद्देश्याः विद्यालयस्य दैनिके जीवने कार्यशैल्यां च अत्यधिकस्य परिवर्तनस्य याचनां कुर्वन्ति । दैनन्दिन्यां समय-सारण्यां स्थिति-स्थापकत्वं (लचीलापन) तावदेव आवश्यकम् अस्ति यावत् वार्षिकस्य कालन्धरस्य क्रियान्वयने जागरूकता, यतः शिक्षणस्य कृते नियतदिनानां सङ्ख्या वास्तविकं रूपं स्वीकुर्यात् । शिक्षणस्य मूल्याङ्कनस्य च विधयः अपि एनं विषयं निर्धारितं करिष्यन्ति यत् इदं पाठ्यपुस्तकं विद्यालये बालानां जीवनानि मानसिकस्य उद्वेगस्य खिन्नतायाः च स्थाने, हर्षस्य वातावरणस्य निर्माणे कियता प्रभाविरूपेण चरितार्थं भविष्यति । भारस्य समस्यायाः समाधानार्थं पाठ्यक्रमस्य निर्मातारः विभिन्नेषु चरणेषु ज्ञानस्य पुनर्निर्धारणस्य समये बालानां मनोविज्ञानं मनसि निधाय एवञ्च अध्यापनस्य कृते उपलब्धः समयः कियान् अस्ति इति एतस्य विषयस्य अवधानं पूर्वापेक्षया अधिकेन सचेतरूपेण करणस्य प्रयासः कृतः । एषः प्रयासः इतोऽपि गभीरतया स्यात् एतदर्थम् इदं पाठ्यपुस्तकं चिन्तनस्य विषयस्य कृते, आश्चर्यस्य कृते, लघुषु समूहेषु वार्तालापस्य चर्चायाः कृते च, हस्ताभ्यां क्रियामाणानां गतिविधीनां कृते प्राथमिकतां प्रयच्छति ।

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् एतस्य पुस्तकस्य रचनायाः कृते निर्मितस्य पाठ्यपुस्तक-निर्माण-समितेः परिश्रमस्य कृते कृतज्ञतां प्रकटीकरोति । परिषद् सामाजिक-विज्ञानम् इति पाठ्यपुस्तकस्य परामर्शदातृ-समितेः अध्यक्षस्य प्रोफेसर-हरि-वासुदेवन-महोदयस्य तथा च एतस्य पाठ्यपुस्तकस्य समितेः मुख्यः परामर्शदातुः नीलाद्रिभट्टाचार्यस्य विशेषरूपेण कृतज्ञा अस्ति । एतस्य पाठ्यपुस्तकस्य विकासे बहुभिः शिक्षकैः योगदानं कृतम्, एतद् योगदानं सफलीकर्तुं वयं तेषां प्राचार्याणाम् अपि कृतज्ञा स्मः । वयं तानि सर्वाणि सङ्घटनानि संस्थाः च प्रति कृतज्ञाः स्मः ये अस्माकं स्वस्य सामग्र्या सहयोगिभ्यः साहाय्यस्य स्वीकरणे च उदारतापूर्वकं सहयोगं कृतवन्तः ।

वयं माध्यमिक-शिक्षा-विभागस्य तथा च उच्चशिक्षाविभागस्य मानव-संसाधन-विकास-मन्त्रालय-द्वारा नियुक्तस्य प्रोफेसर-मृणाल-मोरी-महोदयस्य अपि च प्रोफेसर-जी.पी.देशपाण्डे-महोदयस्य अध्यक्षतायां निर्मितायां निरीक्षण-समितेः सदस्यानां कृते ये स्वकीयं मूल्यवन्तं समयं सहयोगं च दत्तवन्तः तेषां कृते वयं धन्यवादस्य ज्ञापनं कुर्मः। व्यवस्थागतानां परिष्काराणां कृते प्रकाशनेषु च नैरन्तर्येण तस्मिन् परिष्कारे नावीन्यम् आनेतुं समर्पिता परिषद् टिप्पणीनां परामर्शानां च स्वागतं करिष्यति, यतः भाविसंशोधनेषु सहायता लभ्येत।

निदेशकः

राष्ट्रिय-शैक्षिकानुसन्धानं

प्रशिक्षण-परिषद् च

नवदेहली

20 नवम्बरः 2005

इतिहासः परिवर्तमानः संसारः च

दैनन्दिन-जीवने यदा वयं वार्ता-पत्राणां माध्यमेन सम्पूर्णे संसारे जातानां घटनानां विषये पठामः तदा प्रायः वयं धैर्येण ताभिः घटनाभिः सम्बद्धस्य तात्कालिकस्य विस्तृतस्य इतिहासस्य विषये न चिन्तयामः । वस्तूनि अस्माकं समक्षे एव परिवर्तमानानि भवन्ति परन्तु वयं कदापि एतत् न चिन्तयामः यत् तानि वस्तूनि किमर्थं परिवर्तन्ते ? परन्तु प्रायः वयम् एतस्मिन् तथ्ये अपि अवधानवन्तः न भवामः यत् पूर्वं वस्तूनि एवंविधानि न आसन् । एवंविधानां परिवर्तनानां विषये नैरन्तर्येण अवधानम् अपि च एतत् अवगमनं यत् परिवर्तनानि किमर्थं कथं च भवन्ति ? एतस्मिन् विषये च अपि अवधानं यत् अधुना यस्मिन् संसारे वयं जीवामः तस्य अस्तित्वं च कथं कृत्वा जातम् उपर्युक्तः एवम्भूतः इतिहासः अस्ति । नवमी-दशमी-कक्ष्ययोः इतिहासस्य पाठ्यपुस्तकानां पाठ्यसामग्री विशेषरूपेण "समकालिक-विश्वम्" कथं निर्मितम् अस्ति इति एतं विषयम् आधारीकृत्य एव रचिता अस्ति । गतयोः सप्तमी-अष्टमी-कक्ष्ययोः भवन्तः भारतस्य इतिहासस्य विषये पठितवन्तः । अग्रिमयोः द्वयोः वर्षयोः नवमी-दशमी-कक्ष्ययोः इतिहासस्य पाठ्यपुस्तकैः भवन्तः इदम् अपि अवगमिष्यन्ति यत् कथं भारतस्य अतीतस्य कथा संसारस्य व्यापकेन इतिहासेन सह सम्बद्धा अस्ति इति । यावत्पर्यन्तं वयम् एतस्मिन् विषये न विचारयिष्यामः तावत् पर्यन्तं इदं तथ्यं समीचीनतया न अवगमिष्यामः यत् भारते किं कथं च भवति स्म इति ? इदं तथ्यम् एतस्मात् कारणात् अपि महत्त्वपूर्णं भवति यत् अद्य सम्पूर्णाः अर्थव्यवस्थाः समाजः च अनुदिनं गभीरतया परस्परं सम्बद्धाः भवन्ति । इतिहासः सदैव भौगोलिक-सीमासु बद्ध्वा न द्रष्टुं शक्यते ।

एवमेव राष्ट्रिय-भौगोलिक-सीमाः एव स्वाध्यायस्य एकमात्रं केन्द्रबिन्दु-रूपाः सन्ति इति मन्तव्यं समीचीनं न भविष्यति । अनेकधाः एतादृशाः अवसराः अपि आयान्ति यदा एकस्मिन् लघुक्षेत्रे ग्रामे कस्याञ्चित् मरुस्थलीय-पट्टिकायां कस्मिंश्चित् वने अथवा कस्मिंश्चित् पर्वते केन्द्रिते कृते सति वयं जनानां जीवनेषु विद्यमानां महतीं विविधताम् इतिहासं च सरलतया अवगन्तुं शक्नुमः इति एवंविधेन उपर्युक्त-चिन्तनेन कस्यचित् राष्ट्रस्य इतिहासः निर्मीयते । न तु वयं जनैः विना राष्ट्रस्य विषये चर्चयितुं शक्नुमः न च एव राष्ट्रेन विना कस्यचित् क्षेत्रस्य विषये वार्तालापं कर्तुं शक्नुमः । फ्रांसीय-इतिहासकारस्य फर्नाण्ड-ब्रादेलस्य शब्दैः वयम् इदम् अपि वक्तुं शक्नुमः यत् "विश्वं विना राष्ट्रस्य विषये वार्तालापः न कर्तुं शक्यते " ।

अग्रिमयोः द्वयोः वर्षयोः भवन्तः यानि पाठ्यपुस्तकानि पठिष्यन्ति तेषु विभिन्नस्तरैः एतम् उपर्युक्तं लक्ष्यं साधयितुं प्रयासः कृतः अस्ति । एतस्मिन् काले वयं तेषां विशिष्ट-समुदायानां क्षेत्राणां च अध्ययनं कुर्वाणाः राष्ट्रस्य इतिहासं यावत् तथा च भारतस्य यूरोपस्य च इतिहासात् आरभ्य अफ्रीकायाः इण्डोनेशियायाः च घटनाक्रमान् यावत् गमिष्यामः । अस्माकम् अध्ययनस्य केन्द्रं विषयस्य अनुसारं परिवर्तयिष्यते ।

एते विषयाः के सन्ति ? तथा च ते कथं व्यवस्थिताः कृताः ? विषयवस्तुनः चयनं केन आधारेण कृतम् अस्ति ?

अधुना यावत् आधुनिक-विश्वस्य इतिहासः प्रायः पाश्चात्य-विश्वस्य इतिहासे आश्रितः आसीत् । एतस्मात् इत्थं प्रतिभाति यत् सर्वाणि परिवर्तनानि सम्पूर्णः विकासः च केवलं पश्चिमदेशेषु एव जातः स्यात् । एवं प्रतिभाति यत् अन्येषां देशानाम् इतिहासः किञ्चित् कालानन्तरं स्थायित्वं गतः स्यात्, अपि च गतिहीनत्वं जडत्वं च गतं स्यात् । अस्मिन् इतिहासे पश्चिमस्थाः जनाः उद्यमशीलाः रचनात्मकाः वैज्ञानिकाः मेधायुक्ताः परिश्रमशीलाः कुशलाः तत्पराः च दृश्यन्ते । अपरस्मिन् पक्षे पूर्व-समाजस्य अथवा अफ्रीकायाः दक्षिणामेरिकायाः च जनाः परम्परानिष्ठाः आलस्ययुक्ताः अन्धविश्वासिनः

अपरिवर्तनशीलाः च सन्ति इति रूपेण ते दर्श्यन्ते ।

इतिहासकाराः अनेकेभ्यः वर्षेभ्यः एताः मान्यताः अभिलक्ष्य प्रश्नचिह्नं कुर्वन्ति । अधुना वयं समीचीनतया अवगतवन्तः यत् प्रत्येकस्य समाजस्य स्वस्य परिवर्तनस्य इतिहासः भवति । अतः आधुनिकविश्वस्य रचनाम् अवगन्तुम् अस्माभिः एतस्मिन् तथ्ये अपि अवधानं करणीयं भविष्यति यत् विभिन्नैः समाजैः एतादृशानि परिवर्तनानि कथम् अनुभूतानि ? तथा च तानि परिवर्तनानि कया दृष्ट्या दृष्टानि सन्ति ? अस्माभिः द्रष्टव्यं भविष्यति यत् विभिन्नदेशानाम् इतिहासः कथं परस्परं संबद्धः भवति । कथं कस्मिंश्चित् एकस्मिन् समाजे जातपरिवर्तनानां प्रभावः अन्यस्मिन् समाजे द्रष्टुं शक्यते? कथं भारतस्य अन्येषां च उपनिवेशानां घटनाः यूरोपं प्रभावितवत्यः । आशयः अयम् अस्ति यत् समकालिक-विश्वस्य रूपं स्वरूपं च केवलं पश्चिमतः निश्चितं नास्ति ।

समकालिक-विश्वस्य इतिहासः केवलम् उद्योगस्य वाणिज्यस्य विज्ञानस्य प्रौद्योगिक्याः रेलयानस्य राजमार्गाणां च इतिहासः नास्ति । अनेन सह एव अयं वनस्पतीनां पशुचारकानां प्रव्रजन-शीलानां शिल्पकानां लघुकृषकाणां च अपि इतिहासः अस्ति । एतैः सर्वैः सामाजिकसमूहैः अद्यतन-संसारः अद्यतनवत् कर्तुं स्वकीयं योगदानं प्रदत्तम् । अस्मिन् वर्षे भवन्तः एतस्य विविधता-पूर्णस्य संसारस्य विषये पठन्ति ।

नवम-दशम-कक्ष्ययोः द्वयोः पुस्तकयोः त्रयः खण्डाः अष्टौ अध्यायाः च सन्ति । आशास्महे यत् भवन्तः सर्वान् अध्यायान् सानन्दं पठिष्यन्ति । परन्तु परीक्षायाः दृष्ट्या भवद्भिः केवलं पञ्च पञ्च अध्यायाः एव पठितव्याः तत्र च प्रथमखण्डात् द्वितीयखण्डात् च द्वौ द्वौ अध्यायौ, तृतीयखण्डात् च एकः अध्यायः स्वीकृतः अस्ति ।

द्वयोः पुस्तकयोः प्रथमे खण्डे एवंविधानां घटनानां प्रक्रियाणां च समावेशः कृतः अस्ति तेन आधुनिकविश्वम् अवगन्तुं सारल्यं भविष्यति इति दृष्ट्या एतत् कार्यम् अतिमहत्त्वपूर्णम् अस्ति । अस्मिन् वर्षे प्रथमे खण्डे भवन्तः फ्रांसीयक्रान्तेः रूसीय-क्रान्तेः नात्सी-वादस्य च विषये पठिष्यन्ति। अग्रिमे वर्षे भवन्तः भारते अन्येषु च देशेषु राष्ट्रवादस्य उपनिवेशवाद-विरोधिनाम् आन्दोलनानां च विषये अवगमिष्यन्ति ।

द्वितीय-खण्डे नाटकीयघटनासु दृष्टिपातं कुर्वन्तः वयं जनानां जीवनसम्बद्धानां सामान्य-तथ्यानां तेषाम् आर्थिक-गतिविधीनाम् आजीविकायाः च स्वरूपस्य विषये अवगमिष्यामः । एतस्मिन् भागे भवन्तः द्रक्ष्यन्ति यत् जनजातीय-समुदायानां पशुचारकाणां कृषकाणां च दृष्ट्या समकालिक-विश्वस्य कः अभिप्रायः आसीत् । ते एतेषां परिवर्तनानां सामुख्यं कथं कृतवन्तः तथा च ते कथं तैः परिवर्तनैः प्रभाविताः आसन् ? अग्रिमे वर्षे भवन्तः औद्योगिकीकरणस्य नगरीकरणस्य पुञ्जीवादस्य उपनिवेशवादस्य च विषये विस्तरेण अवगमिष्यन्ति ।

तृतीयखण्डेन भवन्तः दैनिक-जीवन-सम्बद्धेन इतिहासेन परिचिताः भवन्ति । एतस्मिन् भागे भवन्तः क्रीडायाः परिधानस्य च इतिहासस्य तथा च मुद्रणाध्ययनस्य उपन्यासस्य वार्तापत्राणां च विकासस्य विषये पठिष्यन्ति । भवन्तः प्रष्टुं शक्नुवन्ति यत् अस्माभिः किमर्थं क्रीडादिकस्य परिधानादिकस्य च इतिहासः किमर्थम् अध्येतव्यः ? किं वयं तेषां विषये प्रतिदिनं वार्तापत्राणां पत्रिकाणां च माध्यमेन न पठामः ? निःसन्देहं वयम् एतेषां वस्तूनां विषये बहुकिमपि जानीमः पठामः च । परन्तु एतेषां विषये वयं यत्किमपि पठामः तेन एतेषाम् उपर्युक्तानां वस्तूनाम् इतिहासस्य च विषये किमपि विशिष्टं न अवगन्तुं पारयामः । अस्माभिः इदं न ज्ञायते यत् एतानि वस्तूनि कथं विकसितानि ? किमर्थं च परिवर्तन्ते । यदा वयं स्वपार्श्वस्थानां वस्तूनां विषये इतिहासस्य दृष्ट्या प्रश्नकरणं शिक्षामहे तदा इतिहासः कञ्चित् नूतनम् अर्थं गृह्णाति । वयं दैनन्दिनानि सामान्यवस्तूनि अपि पृथक्-दृष्ट्या द्रष्टुम् अवसरं प्राप्नुमः । वयम् अनुभवामः यत् यानि वस्तूनि वयं सामान्यानि इति चिन्तयामः तेषाम् अपि कश्चन इतिहासः अस्ति यः च अस्माकं कृते महत्त्वपूर्णः अस्ति ।

समकालिक-संसारः कथम् अस्तित्वम् आगतः, एतम् इतिहासम् अवगन्तुं वयं भारतात् आरभ्य अफ्रीकातः यूरोपतः च इण्डोनेशिया-पर्यन्तस्य इतिहासस्य अध्ययनं करिष्यामः । अस्मिन् क्रमे वयं महतीनां घटनानां विषये अपि पठिष्यामः । एतासां यात्राणां काले भवन्तः अनुभविष्यन्ति यत् इतिहासः अपि कियान् रोचकः भवितुं शक्नोति, यस्मिन् संसारे वयं निवसामः तम् अवगन्तुं कियान् सहायकः भवितुं शक्नोति ।

नीलाद्रि-भट्टाचार्यः
मुख्यपरामर्शदाता – इतिहासस्य

भारतीय- संविधानम्

उद्देशिका

वयं भारतीयाः, भारतदेशम् एकं **सम्पूर्ण-प्रभुत्व-सम्पन्नम्, समाजवादि, पन्थ-निरपेक्षम्, लोकतन्त्रात्मक-गणराज्यं** निर्मातुं तथा च तस्य समस्तनागरिकानां कृते;

सामाजिकम् आर्थिकं तथा च राजनैतिकं **न्यायम्**,

विचारस्य अभिव्यक्तेः विश्वासस्य धर्मस्य

उपासनायाः च **स्वतन्त्रताम्**,

प्रतिष्ठायायाः अवसरस्य च **समतां**

प्रापयितुं

तथा च तेषु **सर्वेषु**

मानवीयगौरवस्य तथा च **राष्ट्रैयैकतायाः अखण्डतायाश्च**

सुनिश्चयकर्त्रीं **बन्धुतां** संवर्धयितुं.....

दृढसंकल्पाः भूत्वा **अस्यां स्वसंविधानसभायाम्** अद्य नवम्बरमासस्य 26तमे दिनाङ्के 1949 तमे ख्रीस्ताब्दे (मार्गशीर्षे शुक्लसप्तम्यां 2006 तमे विक्रमसंवत्सरे) **एतत् संविधानम् अङ्गीकुर्मः अधिनियमितं तथा च आत्मार्पितं कुर्मः ।**

---

1. संविधानाधिनियमः (द्वाचत्वारिंशं संशोधनम्) 1976 इत्यस्य द्वितीय-धारायाः द्वारा (3.1.1977तः) " प्रभुत्व-सम्पन्नलोकतन्त्रात्मक-गणराज्यम्" इत्यस्य स्थाने प्रतिस्थापितम् ।
2. संविधानाधिनियमः (द्वाचत्वारिंशं संशोधनम्) 1976 इत्यस्य द्वितीय-धारायाः द्वारा (3.1.1977तः) " राष्ट्रस्य एकताः" इत्यस्य स्थाने प्रतिस्थापितम् ।

पाठ्यपुस्तक-विकास-समितिः

अध्यक्षः,सामाजिक-विज्ञान-पाठ्यपुस्तक-परामर्शदातृ-समितिः

हरिवासुदेवनः, प्रोफेसरः इतिहास-विभागः, कलकत्ता-विश्वविद्यालयः, कोलकाता (अध्यायः -2)।

मुख्य-परामर्शदाता

नीलाद्रिभट्टाचार्यः, प्रोफेसरः, ऐतिहासिक-अध्ययन-केन्द्रम, समाजविज्ञान-संस्थानम्, जवाहर-लालनेहरू-विश्वविद्यालयः,नवदेहली (अध्यायः 5,6)।

सदस्याः

मोनिका-जुनेजा,प्रोफेसरः,मारिया-गोएप्पेर्ट-मेयरः, अतिथि-आचार्यः ,हिस्टोरिचेस-सेमिनारः, हनोवर-विश्वविद्यालयः, जर्मनी (अध्यायः – 1)।

वंदना-जोशी, प्रवक्त्री,श्री-वेङ्कटेश्वर-महाविद्यालयः, देहली-विश्वविद्यालयः, नवदेहली (अध्यायः - 3)

नन्दिनी-सुन्दरः, आचार्या, समाजशास्त्र–विभागः, देहली-स्कूल-आफ-इकनॉमिक्सः, देहली-विश्वविद्यालयः, नवदेहली (अध्यायः - 4)।

मुकुल-केसवनः, आचार्यः, इतिहास-विभागः, जामिया-मिल्लिया-इस्लामिया, नवदेहली (अध्यायः - 7)।

जानकी-नायर, आचार्या, सेण्टर-फार-स्टडीज-इन-सोशल-सांइसेज, कोलकाता (अध्यायः - 8)।

रेखा-कृष्णनः, हेड-आफ-सीनियर-स्कूल,वसन्त-वैली-विद्यालयः, नवदेहली।

रश्मि-पालीवालः, एकलव्यः, होशंगावादः, मध्यप्रदेशः।

अजयदाण्डेकरः, विजिटिंग.फेलो, टाटा-इंस्टीट्यूट-ऑफ-सोशल-सांइसेज,मुंबई।

प्रीतीश-आचार्या, रीडर, रीजनल-इंस्टीट्यूट-ऑफ-एजुकेशन,भुवनेश्वरः, उडीसा।

हिन्दी-अनुवादः

योगेन्द्र–दत्तः, सराय-सी.एस.डी.एस., देहली (अध्यायः 2,3,5)

रविकान्तः,सराय- सी.एस.डी.एस., देहली (अध्यायः 7,8)

नरेश-गोस्वामी, स्वतन्त्रानुवादकः शोधकर्ता च (अध्यायः -6)

शिवानन्दोपाध्यायः, शोधार्थी, हिन्दी,जनेवि, नवदेहली (अध्यायः – 1)

कमलकुमारमिश्रः, स्वतन्त्र-शोधार्थी, सराय- सी.एस.डी.एस., देहली (अध्यायः - 4)

सदस्य-संयोजकः

किरण-देवेन्द्रः, प्रोफेसरः, प्राथमिक-शिक्षा-विभागः, एन.सी.ई.आर.टी., नवदेहली।

कृतज्ञता-ज्ञापनम्

इदं पुस्तकम् अनेकेषाम् इतिहासकाराणां शिक्षकाणां शिक्षाविदां सामूहिकप्रयासेन पुस्तकाकारं प्राप्नोत्। प्रत्येकम् अध्यायस्य लेखनेन तद्विषयकचर्चायां संशोधनेन च अनेके मासाः अतीताः। पाठसम्बद्धचर्चासु सहभागिनां सर्वेषां मित्राणां कृते वयं धन्यवादं विज्ञापयितुम् इच्छामः।

अनेकैः जनैः पुस्तकस्य पृथक् पृथक् अध्यायाः पठिताः। विशेषतया वयं समीक्षण-समितेः सदस्यानां कृते धन्यवादं विज्ञापयितुम् इच्छामः,यैः विभिन्नाध्यायानां प्रारम्भिकपाठान् अभिलक्ष्य टिप्पण्यः प्रदत्ताः। नारायणी-गुप्ता कुमकुम-रायः इत्येताभ्यां निरन्तरं प्रोत्साहनं साहाय्यं च प्रदत्तम्। रिचर्ड-इवांसः नात्सीवादस्य विषये लिखितम् अध्यायम् अपठत्। एतेभ्यः सर्वेभ्यः धन्यवादः। पाण्डुलिपिविषये अस्माभिः ये अपि परामर्शाः प्राप्ताः तान् सर्वान् अपि सम्मेलयितुम् अस्माभिः यथासम्भवं प्रयासः कृतः। अनेकेषां जनानां संस्थानानां च साहाय्यं विना एतेषां पुस्तकानाम् एवंविधं प्रारूपं सम्भवं न आसीत्। मासाई-एसोशिएशन,नार्थ-डकोटा-स्टेट-यूनिवर्सिटी-लायब्रेरी, युनाइटेड-स्टेट्स-हालोकास्ट-म्यूजियम, यूनेस्को पारजार-प्रोजेक्ट, महिला-विकास-अध्ययन-केन्द्रं देहली इत्यनेन अस्माकम् आग्रहानुसारं स्व-अभिलेखागारेभ्यः आवश्यकानि चित्राणि अन्यसामग्री च उपलब्धा कारिता। कानिचन चित्राणि लायब्रेरी-ऑफ-कांग्रेस-प्रिंट्स-एण्ड-फोटोग्राफ-डिविजन, ज्यू-इश-हिस्टारिकल-इंस्टीट्यूट्, वारसा, पोलैण्ड, रवीन्द्र-भवन-फोटो-आर्काइव्ज, विश्वभारती-विश्वविद्यालयः, शान्तिनिकेतनम् इत्यस्मात् च संगृहीतानि सन्ति। संजय-बरनेला, मुकुट-माङ्गलिकस्य वसन्त-सबरवालस्य च पार्श्वे पशुचारकाणां वनाश्रितसमुदायानां च यः चित्र-संग्रहः आसीत् तस्य संग्रहस्य प्रयोगाय अस्मभ्यम् आज्ञा प्रदत्ता। परिधानीय-सम्बद्धे इतिहासे केन्द्रिताय अध्यायाय चित्राणाम् उपलब्धये अस्माभिः मालविका-कार्लेकरेण सम्पर्कः साधितः। तथा च क्रिकेटसम्बद्ध-चित्राणां कृते वयं रामगुहावर्यात् साहाय्यं स्वीकृतवन्तः। अनीश-विनायकः चित्र-सम्बद्ध-शोध-कार्ये साहाय्यम् अकरोत्। वयं सराय-सी.एस.डी.एस-सम्बद्ध-मित्रेभ्यः धन्यवादं विज्ञापयितुम् इच्छामः ये पुस्तकविषये जात-चर्चासु सक्रियां भूमिकाम् ऊढवन्तः।

एवंविधस्य विषयवस्तुनः अनुवादः सदा सरलः न भवति, विशेषतया यदा पुस्तकम् अल्पायुषां विद्यार्थिनां कृते स्यात्। एतत् आह्वानं पश्यता अनुवादकदलेन शब्दानां चयनं भाषिकप्रवाहम् अवधारणात्मकम् अभिव्यक्तिं च अभिलक्ष्य गहनः विचारः विमर्शः च कृतः तथा च अनेकान् महत्त्वपूर्णान् प्रश्नान् अधिकृत्य परिचर्चा आरब्धा। आलोक-रायः , नरेन्द्रव्यासः राजेन्द्रप्रसाद-तिवारी च अनुवाद-विषये अमूल्य-टिप्पणीः दत्तवन्तः। हयात-सिंह-नेगी संशोधनं कृतवान्। संजय-शर्मा एतस्य पुस्तकस्य सज्जायाः प्रत्येकं चरणे सहभागी आसीत्। तेन न केवलं सम्पूर्णस्य पुस्तकस्य अनुवादः परिशीलितः अपि तु प्रति-संपादनम्(कापी-एडिशन) विषयवस्तुनः संशोधनं च कृतम्। हिन्दी-माध्यम-विद्यार्थिनां कृते विषयस्य अवगमनं सरलया सहजतया च भवेत् एतदर्थं याः परिप्रश्नात्मिक्यः परिचर्चात्मिक्यः च गोष्ठ्यः जाताः तत्रापि संजय-शर्मा सोत्साहं भागम् अवहत् सः च तत्र तत्र महत्त्वपूर्णान् परामर्शान् अपि दत्तवान्। अन्तिमचरणेषु परिषदः भाषाविभागस्य हिन्दी-प्रकोष्ठस्य अध्यक्षः प्रो.रामजन्मशर्मा शैलीगत-परामर्शं दत्त्वा पुस्तकस्य गुणवत्तायाः वर्धने साहाय्यं कृतवान्। परिषदः पक्षतः डी.टी.पी. ऑपरेटर-अरविन्द-शर्मा विजयकुमारः कॉपी-एडिटर(संपादकः) सतीश-झा च इत्येते स्वकीयं पूर्णं योगदानं दत्तवन्तः। एतावति स्वल्पे काले एतानि सर्वाणि मित्राणि कार्यं प्रपूरितवन्तः संपादितवन्तः अपि च एतां संपूर्णां योजनां रुच्या स्वीकृतवन्तः एतदर्थं च तान् प्रति वयं कृतज्ञताम् अभिव्यक्तां कुर्मः।

ये अपि जनाः एतस्य पुस्तकस्य निर्माणे स्वयोगदानं दत्तवन्तः तेषां सर्वेषां जनानां नामानि पुस्तकस्य अन्ते दातुम् अस्माभिः यथासामर्थ्यं प्रयासः कृतः। यदि अनवधानात् अस्मरणात् च कस्यापि नाम परित्यक्तं स्यात् तर्हि तदर्थं वयं सर्वैः मित्रैः क्षन्तव्याः।

विषय-सूची

आमुखम्	iii
परिवर्तमानः इतिहासः संसारः च	v
खण्डः 1 - घटनाः प्रक्रियाः च	**1-74**
1. फ्रांस-क्रान्तिः	3
2. यूरोपे समाजवादः रूसीया क्रान्तिः च	25
3. नात्सीवादस्य हिटलरस्य च प्रादुर्भावः	49
खण्डः – 2 –जीविका, अर्थव्यवस्था समाजः च	**75-138**
4. वन्यसमाजः उपनिवेशवादः च	77
5. आधुनिकविश्वे पशुचारकाः	97
6. कृषकाः कृषिजीविनः च	117
खण्डः – 3 - दैनिकजीवनम्, संस्कृतिः राजनीतिः च	**139-178**
7. इतिहासः क्रीडा च - क्रिकेट्-क्रीडायाः कथा	141
8. वेशस्य सामाजिकः इतिहासः	159
कृतज्ञता-ज्ञापनम्	179

अनुवादकः - रूपलालशर्मा

खण्डः – 1

घटनाः प्रक्रियाः च

अस्मिन् खण्डे भवन्तः फ्रांसीय-आन्दोलनस्य रूसीय-आन्दोलनस्य नात्सि-वादस्य च प्रादुर्भावस्य इतिहासं पठिष्यन्ति। आधुनिक-विश्वस्य रचनायाम् एतासां तिसृणां घटनानां महत्त्वपूर्णं योगदानम् अस्ति।

प्रथमे अध्याये फ्रांसीयान्दोलनस्य विषयः वर्णितः अस्ति। अद्य वयं मुक्तिं स्वतन्त्रतां समानतां च सरलां सुलभां सामान्यां च इति मत्वा व्यवहरामः। परन्तु अस्माभिः स्मर्तव्यं यत् एतासां सर्वासां घटनानाम् अपि कश्चन इतिहासः अस्ति इति। फ्रांसीय-क्रान्तेः माध्यमेन भवन्तः अस्य इतिहासस्य किञ्चित् भागम् अवगन्तुं साहाय्यं प्राप्स्यन्ति। फ्रांसे फ्रांसीय-क्रान्त्याः राजतन्त्रः सर्वथा समाप्तः आसीत्। विशेषाधिकारेषु आधारितया व्यवस्थया शासनस्य काचित् नूतना व्यवस्था प्रादुर्भूता। क्रान्तिकाले सज्जीकृतं मानवाधिकार-घोषणापत्रं कस्यचित् नूतनयुगस्य आगमनस्य द्योतकम् आसीत्। सर्वेषां समानाः अधिकाराः भवन्ति। तथा च प्रत्येकं जनः समानतायै अभिवादं कर्तुं शक्नोति - एतादृशं चिन्तनं राजनीतेः नूतन-परिभाषायाः भागभूतं जातम्। समानतायाः स्वतन्त्रतायाः च एवंविधं चिन्तनं नूतनयुगस्य केन्द्रीयः विचारः आसीत्, परन्तु विभिन्नदेशेषु एवंविधाः विचाराः विविधप्रकारेण अवगताः साधिताः च। भारतस्य चीनस्य अफ्रीकायाः दक्षिण-अमेरिकायाः च उपनिवेशवाद-विरोधिभिः आन्दोलनैः अनेके एवंविधाः विचाराः उद्भाविताः ये अतीव रचनात्मकाः मौलिकाः च आसन्। परन्तु तत्र तथाविधेषु आन्दोलनेषु प्रयुक्ताः याः लोकोक्तयः, या च भाषा आसीत् सा भाषा वैधानिकी अस्ति इति अष्टादश-शताब्दस्य उत्तरार्द्धस्य घटनाभ्यः एव मान्यता तस्यै लभ्यते स्म।

द्वितीयाध्याये भवन्तः यूरोपे समाजवादस्य आगमनस्य तस्य च नाटकीय-घटनाक्रमस्य विषये पठिष्यन्ति यस्मात् कारणात् रूसस्य शासकः जारनिकोलस-द्वितीयः सत्तां परित्यक्तुं बाध्य जातः आसीत्। रूसीयक्रान्त्या समाजपरिवर्तनस्य कस्यचित् नवस्य उपायस्य सृष्टेः प्रयासः कृतः। एतस्याः क्रान्तेः क्रान्तिकारिणः आर्थिक-समानतायाः श्रमिकाणां कृषकाणां च उन्नत्यै विषयम् उपस्थापितवन्तः। अस्मिन् अध्याये भवन्तः नव-सोवियत-सर्वकारेण प्रारभ्यमाणानां परिवर्तनानां विषये भवन्तः अवगमिष्यन्ति अपि च तस्य सर्वकारस्य पुरतः आगतानां समस्यानां समाधानाय सर्वकारेण कृतानाम् उपायानां विषये अवगमिष्यन्ति। सोवियत-रूसस्य सर्वकारः कृषेः औद्योगिकीकरणस्य यान्त्रिकीकरणस्य च कार्यक्रमं तु दृढतया अग्रे अवर्धत परन्तु सः एव सर्वकारः नागरिकाणां बहूनाम् एवंविधानाम् अधिकाराणां हननम् अपि अकरोत् ये अधिकाराः सदैव केषाञ्चिद् अपि लोकतान्त्रिक-समाजानां संचालनाय अनिवार्याः भवन्ति। पुनरपि समाजवादस्य उद्घोषः विभिन्नदेशानाम् उपनिवेशवाद-विरोधिनः आन्दोलनस्य भागभूतः जातः। अद्य सोवियतसङ्घः विखण्डितः जातः अपि च समाजवादः सङ्कटे अस्ति, परन्तु विंशतितम-शताब्दस्य दृष्ट्या समकालिक-विश्वस्य स्वरूपं निश्चेतुम् इयं काचित् बलवती शक्तिः आसीत्।

तृतीयाध्याये भवन्तः जर्मनीदेशस्य विषये अवगमिष्यन्ति । अस्मिन् अध्याये हिटलरस्य उदयस्य नात्सीवादस्य च राजनीतेः विश्लेषणं कृतम् अस्ति । अत्र भवन्तः नात्सी इत्यस्य जर्मनीदेशस्थानां स्त्रीणां शिशूनां च दशायाः विद्यालयानां यातना-गृहाणां च विषये पठिष्यन्ति । अनेन अध्ययनेन भवन्तः अवगमिष्यन्ति यत् नात्सिवादेन कथं विभिन्नाः अल्पसङ्ख्याक-समूहाः जीवनस्य अधिकारात् वञ्चिताः, केन प्रकारेण नात्सि-महोदयेन यहूदीनां नाशाय यहूदिजन-विरोधिन्यः भावनाः उद्वेलिताः तथा च तेन लोकतन्त्रं समाजवादं च विरुध्य किञ्चन मारकयुद्धम् आरब्धम् । नात्सीवादस्य प्रादुर्भावस्य कथा केवलं कासाञ्चित विशिष्टानां घटनानां सत्ताप्राप्तेः, पैशाचिकी-रूपेच्छायाः, हत्या-प्रकरणानां, मृत्योः च एव कथा नास्ति, अपि तु इयं काचित् विविधस्तरीयायाः विस्तृतायाः हृदयविदारिकायाः व्यवस्थायाः कथा अस्ति । भारते अपि केचन जनाः हिटलरस्य विचारैः प्रभाविताः जाताः परन्तु अधिकतराः जनाः नात्सिवादस्य प्रादुर्भावात् भयम् एव अनुभूतवन्तः ।

आधुनिक-संसारस्य इतिहासः केवलं स्वतन्त्रतायाः लोकतन्त्रस्य च विकासस्य एव कथा नास्ति । इयं हिंसायाः निरङ्कुशतायाः मृत्योः महाविनाशस्य च अपि कथा अस्ति ।

फ्रांस-क्रान्तिः

जुलै-मासस्य चतुर्दश-दिनाङ्के एकोन-नवत्यधिक-सप्तदश-शत-तमे वर्षे (14-7-1789) प्रातःकाले पेरिस-नगरे आतङ्कस्य वातावरणम् आसीत् । सेना नगरं प्रविशतु इति सम्राजा सेना आदिष्टा । लोकापवादः आसीत् यत् नागरिकान् उद्दिश्य सेना गुलिकाप्रहारं कुर्यात् इति आदेशं सम्राट् सेनायै दास्यति इति । प्रायः सप्तसहस्रं (7000) पुरुषाः स्त्रियः च टाउनहाल इत्यस्य समीपे एकत्र अभवन् । ते काञ्चित् जनसेनां सङ्घटयितुं निर्णीतवन्तः । शस्त्रास्त्राणि अन्वेष्टुं ते जनाः अनेकानि सर्वकारीय-भवनानि बलात् प्रविष्टवन्तः ।

अन्ततः शताधिकजनानां कश्चित् समूहः पेरिसनगरस्य पूर्वभागं प्रति चलितुम् आरब्धवान् । जनसमूहः बास्तील(Bastille)-दुर्गस्थं कारागारं त्रोटितवन्तः यत्र प्रभूतं विस्फोटक-सामग्र्याः प्राप्तेः सम्भावना आसीत् । अस्त्र-शस्त्राणाम् अधिग्रहणस्य अस्मिन् सशस्त्रयुद्धे बास्तीलस्य सेनानायकः मारितः । अपि च कारातः बन्दिनः मोचिताः । यद्यपि बन्दिनः सप्तसङ्ख्याकाः आसन् । बास्तील-दुर्गः सम्राजः निरङ्कुश-शक्तीनां प्रतीकभूतः आसीत् अतः जनानां घृणास्पदः आसीत् । एतस्मात् कारणात् एव जनैः सः दुर्गः ध्वंसितः, ध्वंसितस्य तस्य दुर्गस्य च अवशेषाः विपण्यां तादृशेभ्यः जनेभ्यः क्रीताः ये ध्वंसितदुर्गस्य खण्डान् स्मृतिचिह्नरूपेण स्थापयितुम् इच्छन्ति स्म ।

अस्याः घटनायाः परं बहूनि दिनानि यावत् पेरिसस्य देशस्य च ग्रामीणक्षेत्रेषु बहुकालं यावत् सङ्घर्षः जातः । प्रायः जनता पर्युषित-रोटिकानां महार्घता-कारणात् विरोधं करोति स्म । अनन्तरकाले इतिहासकाराः तदानीन्तनस्य कालस्य सिंहावलोकनं कृत्वा अवदन् यत् फ्रांसस्य सम्राजः मृत्युदण्डः एवंविधानाम् एव घटनानां परिणतिरूपः आसीत् इति । यद्यपि तस्मिन् काले प्रायः जनाः एवंविधं परिणामं प्रति न आशासते स्म । इत्थं कथं किमर्थं च अभवत् ?



चित्रम् – 1 – बास्तीलस्य ध्वंसः
बास्तील-ध्वंसात् परं चित्रकाराः एतस्याः घटनायाः स्मरणार्थम् अनेकानि चित्राणि रचितवन्तः ।

1 अष्टादश-शताब्द्याः उत्तरार्धे फ्रांस-समाजः

चतुःसप्तत्यधिक-सप्त-दश-शत-तमे (1774) वर्षे बूर्बों राजवंशस्य लुयी-षोडश इति फ्रांसस्य राजसिंहासने आसीनः। तस्मिन् काले सः विंशति-वर्षीयः आसीत्। तस्य विवाहः आस्ट्रियायाः राजकुमार्या मेरी-एन्तोएनेत इत्यनया सह अभवत्। राज्यारोहणस्य काले तस्य राजकोषः रिक्तः आसीत्। चिरकालं यावत् जातयुद्धानां कारणात् फ्रांसस्य वित्तीय-संसाधनानि नष्टानि जातानि। वर्सायस्य (Versailles) विशाल-भवनस्य राज-सभायाः च चाकचक्यार्थं धनस्य अपि आवश्यकता आसीत्। लुयि-षोडश इत्यस्य शासनकाले फ्रांसेन अमेरिकायाः ये त्रयोदश (13) उपनिवेशाः ब्रिटेनेन अधिकृताः आसन् तान् उपनिवेशान् मोचयितुं फ्रांसेन अमेरिकायाः साहाय्यं कृतम् अपि च ब्रिटेनः फ्रांसस्य अमेरिकायाः च सामूहिकशत्रुः आसीत्। अस्मात् युद्धात् फ्रांसस्य दशार्बुद-**लिब्र**-मुद्राधिकस्य ऋणम् इतोऽपि वर्धितं पूर्वतः एव तस्योपरि अर्बुद-द्वय-लिब्र-मुद्राणाम् ऋणम् आसीत्। उत्तमर्णाः अधुना सर्वकारं प्रतिशतं दशमितं कुसीदम् अधियाचितुम् आरब्धवन्तः, परिणामतः बाध्यतावशात् फ्रांसीय-सर्वकारः निज-आयव्यय-विवरण-पत्रान्तर्गतस्य धनस्य अधिकं भागम् अनुदिनं वर्धमानम् ऋणं प्रत्यर्पयितुम् प्रयुङ्क्ते स्म। फ्रांस-सर्वकारस्य स्वस्य नियमितः व्ययः अपि आसीत् तद्यथा - सेनायाः प्रबन्धनं राजसभायाः सज्जाव्यवस्था सर्वकारीय-कार्यालयानां विश्वविद्यालयानां च सञ्चालनं इति एतस्मात् कारणात् फ्रांससर्वकारः राजस्वं वर्धितुं बाध्यः जातः परन्तु अयम् उपायः अपि अपर्याप्तः आसीत्। अष्टादश-शताब्दे फ्रांसीय-समाजः त्रिषु स्तरेषु विभक्तः आसीत् तत्र च तृतीयस्य **स्तरस्य** जनाः अर्थात् साधारण-जनाः एव करम् अर्पयन्ति स्म।

वर्गेषु विभक्तः फ्रांसीय-समाजः मध्यकालिक-सामन्ती-व्यवस्थायाः अङ्ग-भूतः आसीत्। 'प्राचीन-राजतन्त्रम् इति पदस्य प्रयोगः सामान्यतः एकोन-नवत्यधिक-सप्तदश-शत-तम- वर्षात् (1789) पूर्वं यः फ्रांसीयसमाजः संस्थाः च आसन् तासां कृते भवति स्म। द्वितीयं चित्रं फ्रांसीयसमाजस्य वर्गव्यवस्थां दर्शयति। सम्पूर्णे समाजे प्रायः नवति-प्रतिशतं कृषकाः आसन्। परन्तु भूस्वामिनां कृषकाणां सङ्ख्या अतीव न्यूना आसीत्। प्रायः षष्टि-प्रतिशतं भूमौ कुलीनानां चर्च इत्यस्य तृतीय-स्तरस्य धनाढ्यानाम् च अधिकारः आसीत्। आद्योः द्वयोः स्तरयोः कुलीनवर्गस्य **पादरी-वर्गस्य** च जनानां केचन विशिष्टाः अधिकाराः जन्मनः एव आसन्।

एतेषु अधिकारेषु सर्वाधिकः महत्त्वपूर्णः विशेषाधिकारः आसीत् राज्याय प्रदीयमानेषु करेषु मुक्तता इति। कुलीनवर्गेण केचन अन्ये अपि सामन्ती-विशेषाधिकाराः प्राप्ताः आसन्। कुलीनवर्गः कृषकेभ्यः सामन्तीकरान् सङ्गृह्णन्ति स्म। कृषकाः स्वीय-स्वामिनः सेवां कुर्वन्ति स्म अपि च स्वामिनः गृहेषु क्षेत्रेषु सैन्य-सेवाः दातुं राजमार्गादि-निर्माण-कार्येषु च अपि सहयोगं कर्तुं बाध्याः आसन्। चर्च इत्यपि कृषकेभ्यः कराणां कञ्चित् भागं **टाइद** (Tithe,धार्मिक-करः) इति रूपेण संगृह्णाति स्म। उपरिष्टात् तृतीयस्य स्तरस्य समग्रैः जनैः सर्वकाराय तु करः प्रत्यर्पणीयः एव भवति स्म। एतेषु करेषु **टाइल** (Taille, प्रत्यक्ष-करः) इति अपि च अनेके अप्रत्यक्ष-कराः अपि सम्मिलिताः आसन्।

अप्रत्यक्षकरः लवण-ताम्बूलपत्र-प्रभृतिषु दैनन्दिन-उपभोगस्य वस्तुषु नियोज्यते स्म। अनेन प्रकारेण राज्यस्य वित्तीय-कार्य-प्रणाल्याः सम्पूर्णं भारं कराणां माध्यमेन जनता एव वहति स्म।

चित्रम् – 2 – एस्टेट्स इत्यस्य समाजः,
सावधानं पश्यन्तु यत् तृतीय-एस्टेट्-मध्ये केचन जनाः निर्धनाः सन्ति केचन च धनिकाः सन्ति।

नवीनाः (पारिभाषिकाः) शब्दाः

लिब्रे इति - फ्रांस-देशीया काचित् मुद्रा इति, या 1794 तमे वर्षे व्यवहारात् अपकृता।

एस्टेट (स्तरः) इति - क्रान्तेः पूर्वं फ्रांसीय-समाजस्य सत्तायाः सामाजिक-पदस्य च अभिव्यञ्जिका काचित् श्रेणी-विशेषा।

पादरी इति वर्गः -चर्च इत्यस्य विशिष्ट-कार्याणां सम्पादक-समूहः।

टाइद इति – चर्च इत्यनेन गृह्यमाणः करः। अयं करः कृषेः उत्पादनस्य दशमितभागः इव भवति स्म।

टाइल - साक्षात् राज्याय अर्प्यमाणः करः।

वराकः निर्धनः अन्नं फलं धनं शाकं सर्वं चापि आनयति। स्थूलः भूपतिः सर्वं स्वीकर्तुं सज्जीभूय तिष्ठति। परन्तु भूपतिः कञ्चित् अपि दृष्टिपातं तस्मिन् निर्धने न कृतवान्।

क्रियाकलापः

ज्ञापयन्तु यत् चित्रकारः कुलीन-जनस्य चित्रणम् लूतायाः रूपेण कृतवान् अपि च कृषकस्य चित्रणं मक्षिकायाः रूपेण कृतवान् अस्ति।

कुलीनः जनः लूता इव अस्ति कृषकः च मक्षिका-रूपः अस्ति।

असुराय यावदपि ददातु तस्य लोभः तावान् एव वर्धते।

तृतीयं चित्रम् – 3 , लूता मक्षिका च।
किञ्चित् **अनाम** उत्कीर्ण-चित्रम्।

1.1 जीवनस्य सङ्घर्षः

फ्रांसस्य जनसङ्ख्या (1715) पञ्चदशाधिकसप्तदशशततमे ख्रिस्ताब्दे 2.3 कोटिमिता आसीत् या (1789)एकोननवत्यधिकसप्तदशशततमे ख्रिस्ताब्दे वर्धित्वा 2.8 कोटिमिता जाता। परिणामतः अन्नम् आवश्यकतानुगुणं न लभ्यते स्म यतो हि अन्नस्य उत्पादनं न्यूनम् आसीत्, अन्नस्य च आवश्यकता तीव्रतया वर्धिता। अधिकतराणां जनानां मुख्यं खाद्यं (पावरोटी) पर्युषित-रोटिका इति आसीत्, पर्युषित-रोटिकायाः मूल्यस्य अपि तीव्रतया वर्धनम् अभवत्। अधिकतराः कर्मकराः उद्योगागारेषु श्रमं कुर्वन्ति स्म श्रमिकाणां च पारिश्रमिकस्य निश्चयं स्वामिनः कुर्वन्ति स्म। परं महार्घतायाः अनुरूपं पारिश्रमिकं न वर्धते स्म। परिणामतः निर्धन-धनिकयोः मध्ये अन्तरं वर्धमानम् आसीत्। परिस्थितयः इतोऽपि असमीचीनतराः तदा भवन्ति स्म यदा अनावृष्टेः हिमपातस्य च कारणात् उत्पादनम् अतीव न्यूनं भवति स्म। एतस्मात् कारणात् भोज्यवस्तूनाम् अभावः अपि उत्पद्यते स्म। एवंविधाः **जीविका-सङ्कटाः** प्राचीन-राजतन्त्रस्य काले फ्रांसे प्रायः भवन्ति स्म।

नवीनाः शब्दाः

जीविका-सङ्कटम् – यस्यां प्रचण्ड-दुरवस्थायां जीवनोपयोगीनि न्यूनतम-साधनानि अपि नष्टतां प्रति गन्तुम् आरभन्ते।
अनाम – यस्य नाम अवगतं नास्ति।

1.2 जीविकायाः सङ्कटं कथम् उत्पद्यते



चित्रम् – 4, जीविका-सङ्कटस्य चक्रम्

1.3 प्रगतिशीलः मध्यवर्गः विशेष-अधिकाराणां समाप्तेः कल्पनाम् अकरोत् ।

पूर्वम् अपि राजस्व-वर्धनस्य दुर्भिक्षस्य च काले कृषकाः कर्मकराः च विद्रोहं कृतवन्तः । परं तेषां पार्श्वे सामाजिक-व्यवस्थायाम् आर्थिकव्यवस्थायां च आधारभूतं परिवर्तनम् आनेतुं न तु साधनानि आसन्, न च कोऽपि कार्यक्रमः आसीत् । एवंविधं दायित्वं तृतीयस्य स्तरस्य ते समूहाः स्वीकृतवन्तः ये समृद्धाः शिक्षिताः च भूत्वा नूतनानां विचाराणां सम्पर्के आगताः आसन् ।

अष्टादशशताब्दे कस्यचित् नूतनस्य सामाजिक-समूहस्य प्रादुर्भावः जातः तस्य समूहस्य नाम मध्यवर्गः इति आसीत् । तेन समूहेन विस्तृतस्य पारेसमुद्रं वाणिज्यस्य कार्पास-कौशेयवस्त्राणां च उत्पादनबलेन सम्पत्तेः अर्जनं कृतम् आसीत् । कार्पासवस्त्राणां कौशेयवस्त्राणां च निर्यातः क्रियते स्म अथवा समाजस्य समृद्धजनाः तानि वस्त्राणि क्रीणन्ति स्म । तृतीये एस्टेट इत्यस्मिन् एतेषां वणिजः निर्मातृजनान् च अतिरिच्य प्रशासनिकाधिकारिणः अधिवक्तारः व्यवसायिकजनाः अपि सम्मिलिताः आसन् । एते सर्वे अपि शिक्षिताः आसन् तथा च एतेषां मतम् आसीत् यत् समाजस्य कस्यापि समूहस्य पार्श्वे जन्मना विशेषाधिकाराः न भवेयुः । कस्यापि जनस्य सामाजिक-प्रतिष्ठायाः आधारः तस्य योग्यता एव भवेत् । स्वतन्त्रतायाः समाननियमानां समानावसराणां विचारे आधारितस्य समाजस्य इयं परिकल्पना जानलाक-ज्यांजाक-रूसो-प्रभृतिभिः दार्शनिकैः प्रस्तुता आसीत् । स्वीये टू *ट्रीटा-इजेज ऑफ गवर्नमेंट* इत्यस्मिन् लाकमहोदयः नृपस्य दिव्याः निरंकुशाः च अधिकाराः सन्ति इति सिद्धान्तस्य खण्डनं कृतवान् । रूसोमहोदयः

क्रियाविधिः

अधःप्रदत्तेषु शब्देषु समीचीनं शब्दं चित्वा चतुर्थस्य चित्रस्य रिक्तस्थानानि पूरयन्तु – **खाद्योपद्रवाः, अन्नाभावः, मृतकानां सङ्ख्यायां वृद्धिः, खाद्यवस्तूनां वर्धमानानि मूल्यानि , कृशकायः ।**

अपि एतम् एव विचारम् अग्रे वर्धयन् जनतायाः तस्य प्रतिनिधीनां च मध्ये कस्यचित् सामाजिकानुबन्धे आधारितस्य सर्वकारस्य प्रस्तावं स्थापितवान् । मान्तेस्क्यूमहोदयः "द स्पिरिट आफ द लाज" इति नामधेये ग्रन्थे सर्वकारस्य आभ्यन्तरे विधायिकायाः कार्यपालिकायाः न्यायपालिकायाः च मध्ये सत्ताविभाजनस्य विषये उक्तवान् । यदा संयुक्त-राज्यामेरिकायां त्रयोदशोपनिवेशैः ब्रिटेनतः वयं स्वतन्त्राः इति घोषितं, तदा तत्र एवंविधः एव सर्वकारः जातः । फ्रांसस्य राजनैतिक-चिन्तकेभ्यः अमेरिकीय-संविधानं तत्र च प्रदत्तानां व्यक्तिगताधिकाराणां प्रतिभूतिः इति प्रेरणायाः किञ्चित् महत्त्वपूर्णं स्रोतः आसीत् ।

दार्शनिकानाम् एतेषु विचारेषु अनेकेषु सदनेषु सैलान इत्यस्य गोष्ठीषु विशिष्टचर्चा भवति स्म तथा च पुस्तकानां समाचारपत्राणां च माध्यमेन एतद्विधानां चर्चागोष्ठीनां व्यापकः प्रचारः प्रसारः च अभवत् । पुस्तकानि वार्त्तापत्राणि च जनानां मध्ये उच्चस्वरेण पठ्यन्ते स्म यतः निरक्षराः अपि तेषां पुस्तकादीनाम् अभिप्रायम् अवगन्तुं समर्थाः भवेयुः । तस्मिन् एव काले लुई-षोडशद्वारा राज्यस्य व्ययसम्बद्धाः आवश्यकताः पूरयितुं पुनः कराधानस्य वार्त्तया विशेषाधिकार-युक्त-व्यवस्थायाः विरोधे जनाक्रोशः प्रादुर्भूतः ।

स्रोतः (क)

प्राचीन-राजतन्त्रे जातानाम् अनुभवानां वृत्तान्तः

1. जार्ज-दान्तनः क्रान्तिकारि-राजनीतौ सक्रियः आसीत् सः कदाचित् स्व-अध्ययनसमाप्तेः परं कालं स्मरन् त्रयोनवत्यधिकसप्तदशशततमे(1793) वर्षे स्वमित्राय पत्रम् अलिखत् –
   अहं प्लेसिसस्य आवासीय-महाविद्यालये आसम् । तत्र अहम् अनेकेषां महत्त्वपूर्णजनानां सान्निध्यं प्राप्तवान् । अध्ययनस्य समाप्तेः परम् अवृत्तिकेषु दिनेषु अहं वृत्तिम् अन्वेष्टुम् आरब्धवान् । पेरिसस्य न्यायालये वृत्तिः न प्राप्तुं शक्यते स्म । सेनायां वृत्तेः विकल्पः अपि मम कृते नासीत् यतो हि न अहं जन्मनः कुलीनः आसम् न च मम कोऽपि संरक्षकः आसीत् । चर्च-गृहे अपि मह्यं कोऽपि स्थानं न दत्तवान् । अहं किमपि पदम् अपि न क्रेतुं शक्नोमि स्म यतो हि मम कोशे सू'मुद्रापरिमितम् (फ्रांसीयं नाणकम्) अपि धनं नासीत् । पुरातनमित्राणि अपि पराङ्गमुखानि जातानि । तत्रत्या व्यवस्थया वयं पाठिताः शिक्षिताः वा परन्तु अस्माकं प्रतिभायाः प्रयोगस्य अवसराः न कल्पिताः ।
2. आर्थर-यंग-नामकः कश्चन आङ्गलीयः सप्ताशीत्यधिकसप्तदशशततम-वर्षात् आरभ्य एकोननवत्यधिकसप्तदशशततमवर्षावधौ (1787-1789) फ्रांसे यात्राम् अकरोत् तथा च स्वयात्रायाः विस्तृत-वृत्तान्तम् अपि अलिखत् । अस्मिन् वृत्तान्ते तस्य इदं टिप्पणी रुचिकरा अस्ति –
   विशेषतया सेवा-संलग्नैः स्वीयैः क्रीतदासैः सह यः दुर्व्यवहारं करोति सः जनः अवजानातु यत् अनेन प्रकारेण सः निजजीवनम् एव एतादृश्यां स्थितौ निपातयति या स्थितिः तस्याः स्थितेः सर्वथा भिन्नाः स्यात् यस्यां सः मुक्तजनानां सेवाः स्वीकृतवान् स्यात् अपि च तैः जनैः सह अपि समीचीनं व्यवहारं अकरिष्यत् । ये स्वपीडितानां करुणक्रन्दनं शृण्वन्तः अपि भोज्य-व्यञ्जनानां रसास्वादनं रुच्या स्वीकुर्वन्ति ते उपद्रवकाले स्वीयपुत्र्याः अपहरणस्य, पुत्रस्य च शिरश्छेदनस्य दुःखं न अनुभवेयुः ।

स्रोतः

क्रियाकलापः

अत्र यंग-महोदयः कं सन्देशं दातुम् इच्छति ? गुलाम इत्येतैः (क्रीतदासाः) तस्य कः आशयः अस्ति ? सः कस्य आलोचनां करोति ? (1787) सप्ताशीत्यधिकसप्तदशशततम-वर्षे सः केषां सङ्कटानां पूर्वानुमानं करोति ?

।।इति प्रथमः पाठः ।।

2 क्रान्तेः आरम्भः

गतभागे भवन्तः दृष्टवन्तः यत् कैः कारणैः लुई-षोडशः करान् वर्धितवान् इति। किं भवन्तः चिन्तयितुं शक्नुवन्ति यत् सः कथम् एतत् कृतवान् स्यात् ? इति । प्राचीन-राजतन्त्रस्य अन्तर्गतं फ्रांसीयः सम्राट् निज-इच्छानुसारं राजस्व-स्थापनं न कर्तुं शक्नोति स्म । एतदर्थं तेन एस्टेट्स-जेनराल इत्यस्याः (प्रतिनिधि-सभा) उपवेशनम् आहूय नूतनकर-आधानस्य स्वस्य प्रस्तावानां कृते स्वीकृतिः तत्र ग्रहीतव्या भवति स्म। एस्टेट्स-जेनराल इति काचित् राजनैतिक-संस्था आसीत् यत्र त्रयः अपि एस्टेट इति स्वीयान् स्वीयान् प्रतिनिधीः तत्र प्रेषयन्ति स्म। परन्तु सम्राट् एव एतं निर्णयं करोति स्म यत् एतस्याः संस्थायाः उपवेशनं कदा भवेत् ? एतस्याः अन्तिमम् उपवेशनं (1614) चतुर्दशाधिकषोडशशततमे वर्षे आहूतम् आसीत्।

फ्रांसीयः सम्राट् लुई-षोडशः मई-मासस्य पञ्चमे दिनाङ्के (1789) एकोननवत्यधिकसप्तदशशततमे वर्षे नूतनकराणाम् अनुमोदनाय प्रस्तावस्य अनुमोदनाय एस्टेट्स-जेनराल इत्यस्य उपनवेशनम् आहूतवान्। प्रतिनिधीनाम् आतिथ्याय वर्साय-नगरस्य किञ्चित् सुन्दरभवनं सज्जितं कृतम्। प्रथमेन द्वितीयेन च एस्टेट इत्यनेन एतस्मिन् उपवेशने स्वीयाः त्रिशतं त्रिशतं प्रतिनिधयः प्रेषिताः ते प्रतिनिधयः सम्मुख-पङ्क्ति-आकारेण उपवेशिताः । तृतीयस्य एस्टेट इत्यस्य षट्शतं प्रतिनिधयः तेषां पृष्ठे स्थापिताः । तृतीयस्य एस्टेट इत्यस्य प्रतिनिधित्वम् एतस्य अपेक्षया समृद्धवर्गः शिक्षितवर्गः च करोति स्म। कृषकाणां महिलानां शिल्पकाराणां च सभायां प्रवेशः वर्जितः आसीत्। पुनरपि प्रायः चत्वारिंशत्-सहस्रं पत्राणां माध्यमेन तेषां दुषणानां याचनानां च सूची कृता , प्रतिनिधयः आत्मना सह तां सूचीम् अपि आनीय आगतवन्तः आसन्।

एस्टेट्स-जेनराल इत्यस्य नियमानुसारं प्रत्येकं वर्गाय समानतायाः अधिकारः आसीत्। अस्मिन् चक्रे अपि लुई-षोडशः एतस्याः प्रथायाः एव पालनाय दृढप्रतिज्ञः आसीत्। परन्तु तृतीयवर्गस्य प्रतिनिधीनां याचना आसीत् यत् अधुना सम्पूर्णसभया मतदानं करणीयं यस्मिन् प्रत्येकं सदस्यः मतदानाय अधिकृतः भविष्यति इति । अयं कश्चित् लोकतान्त्रिकसिद्धान्तः आसीत् उदाहरणार्थं रूसोमहोदयः स्वपुस्तके , द सोशल कान्ट्रैक्ट इत्यस्मिन् प्रस्तुतवान् आसीत्। यदा सम्राट् एतं प्रस्तावम् अस्वीकृतवान् तदा तृतीय-एस्टेट इत्यस्य प्रतिनिधयः विरोधं कुर्वन्तः सभातः बहिः अगच्छन्।

तृतीयस्य एस्टेट इत्यस्य प्रतिनिधयः आत्मानं सम्पूर्णस्य फ्रांसीयराष्ट्रस्य प्रवक्तारः मन्यन्ते स्म। जूनमासस्य विंशति-दिनाङ्के एते प्रतिनिधयः वर्साय-नगरस्य इन्डोर-टेनिस-कोर्ट इत्यस्मिन् सम्मिलिताः। ते आत्मानं (नेशनल असेंबली) राष्ट्रियपरिषद् इति घोषितवन्तः अपि च शपथं कृतवन्तः यत् यावत्पर्यन्तं सम्राजः शक्तीः न्यूनीकर्तुं किञ्चित् संविधानं न सज्जीभविष्यति तावत्पर्यन्तं परिषद् भङ्गा न भविष्यति । तेषां नेतृत्वं मिराब्यो आबेसिए च अकुरुताम्। मिराब्यो-महोदयस्य जन्म कस्मिंश्चित् कुलीने परिवारे अभवत् परन्तु सः सामन्ती-विशेषाधिकार-युक्तस्य समाजस्य समाप्तिः आवश्यकी इति विचारेण मतैक्यं भजते स्म। तेन कस्याश्चित् पत्रिकायाः प्रकाशनं कृतम् अपि च वर्साय इत्यस्मिन् आगतस्य जनसम्मर्दस्य समक्षे उग्रं भाषणं कृतम्। आबे-सिए-महोदयः मूलतः (पादरी) ख्रिस्तमत-पुरोहितः आसीत् अपि च सः तृतीयम् एस्टेट इति किम् ? इति शीर्षकेण काञ्चित् अतीव प्रभावकारिणीं (पैम्पलेट) प्रचार-पुस्तिकाम् अलिखत्।

काश्चन महत्त्वपूर्णाः तिथयः

1774

लु-यि-षोडशः फ्रांसस्य राजा जायते। राजकोषः रिक्तः जातः अपि च राजतान्त्रिके समाजे अतीव असन्तोषः जायते स्म।

1789

एस्टेट्स-जेनरालस्य आह्वानम्। तृतीयस्य एस्टेट इति(नैशनल-असेंबली) राष्ट्रियपरिषदः सङ्घटनं करोति । बास्तीलस्य आक्रमणम्, ग्रामीणक्षेत्रे कृषकाणां विद्रोहः।

1791

सम्राजः शक्तीः नियन्त्रयितुं सर्वेभ्यः मनुष्येभ्यः च मूलभूत-अधिकारान् प्रदातुं संविधानं निर्मीयते।

1792 – 93

फ्रांस-देशः गणराज्यं जायते, नृपस्य शिरश्छेदं कृत्वा सः हन्यते।
जैकोबिन-गणराज्यस्य पतनम् , फ्रांसे "डिरेक्ट्री" इत्यस्य शासनम्।

1804

नेपोलियनः फ्रांसस्य सम्राट् भवति ,यूरोपस्य विशालस्य भूभागस्य अधिग्रहणं करोति।

1815

वाटरलू इत्यस्मिन् नेपोलियनस्य पराजयः।

क्रियाविधिः

तृतीयस्य एस्टेट इत्यस्य प्रतिनिधयः मध्ये कस्याश्चित् उत्पीठिकायाः उपरि स्थितं सभाध्यक्षं बेयलिं प्रति हस्तौ उत्तोलयन्तः शपथं कुर्वन्ति। किं भवन्तः मन्यन्ते यत् किं तस्मिन् काले बेयली निर्वाचित-प्रतिनिधीः प्रति पृष्ठं कृत्वा अर्थात् पराङ्मुखः भूत्वा स्थितः स्यात्। बेयलि-महोदयस्य एतादृशस्य चित्रणस्य मूले डेविडस्य कः अभिप्रायः स्यात्।

चित्रम् – 5, टेनिस-क्रीडाङ्गणे शपथसमारोहः
कस्मैचित् विशालतमाय चित्राय जाक-लुई-डेविड-द्वारा निर्मितम् आरम्भिकं रेखाङ्कनम्। इदं चित्रं (नेशनल असेंबली) राष्ट्रियपरिषदि स्थापनीयम् आसीत्।

यस्मिन् काले राष्ट्रियपरिषद् संविधान-प्रारूपस्य सज्जीकरणे व्यस्ता आसीत् तस्मिन् काले सम्पूर्ण-फ्रांसः आन्दोलितः भवति स्म। प्रचण्ड-शैत्य-कारणात् सस्यं नष्टं जातम्, पर्युषित-रोटिकायाः (पावरोटी इत्यस्य) मूल्यं च अतीव वर्धते स्म। बेकरी इत्यस्य स्वामिनः स्थितेः लाभं स्वीकुर्वन्तः सङ्ग्रहे संलग्नाः आसन्। बेकरी इत्यस्य आपणेषु महिलाः अनेकाः होराः यावत् प्रतीक्षायाम् आसन् अन्ततः यदा ताः रोटिकाः न प्राप्तवत्यः तदा कुपितवत्यः अपि च तेन महिलासम्मर्देन आपणस्य उपरि आक्रमणं कृतम्। अपरस्मिन् पक्षे सम्राट् सेनां पेरिसं प्रवेष्टुम् आदिष्टवान्। क्रुद्ध-सम्मर्देन जुलाई-मासस्य चतुर्दशदिनाङ्के बास्तीले आक्रमणं कृत्वा बास्तीलः सर्वथा नाशितः।

ग्रामीणक्षेत्रेषु प्रतिग्रामम् इयं सूचना जनश्रुतिः वा प्रसृता यत् जागीर इत्यस्य स्वामिभिः भाटकेन यष्टिपुरुषाणां समूहाः आहूताः सन्ति ते यष्टिधारिसमूहाः पक्व-सस्यानि नाशयितुं प्रारब्धवन्तः। अनेकेषु जनपदेषु भयाक्रान्ताः भूत्वा कृषकाः खनित्रैः ग्रामीणदुर्गेषु (Chateau) आक्रमणं कृतवन्तः। ते अन्नभाण्डागारान् लुण्ठितवन्तः अपि च ते राजस्व- सम्बद्धान् अभिलेखान् अपि प्रज्वाल्य भस्म कृतवन्तः। कुलीनाः व्यापक-सङ्ख्यायां स्वसम्पत्तीः (जागीर इति) परित्यज्य पलायितवन्तः। अनेके तु प्रतिवेशि-देशान् प्रति गतवन्तः।

निजविद्रोहि-प्रजायाः शक्तेः अनुमोदनं कृत्वा लुई-षोडशः अन्ततः राष्ट्रियपरिषदे मान्यतां दत्तवान्। अपि च इदम् अपि अङ्गीकृतवान् यत् अधुना आरभ्य तस्य सत्तायां संविधानस्य नियन्त्रणं भविष्यति। अगस्तमासस्य चतुर्थे दिनाङ्के (1789) एकोन-नवत्यधिक-सप्तदश-शततम-वर्षस्य रात्रिकाले परिषदा कर-व्यवस्थायाः कर्त्तव्य-युक्तायाः बन्धनयुक्तायाः च सामन्ती-व्यवस्थायाः च उन्मूलनस्य आदेशः पारितः। (पादरी) ख्रिस्त-पुरोहित-वर्गस्य जनानाम् अपि ये विशेषाधिकाराः तेषाम् आसन् तान् परित्यक्तुम् अपि ते बाध्याः कृताः। धार्मिक-करः समाप्तः अपि च चर्च-गृहस्य स्वामित्वयुक्ता भूमिः अधिगृहीता। अनेन प्रकारेण न्यूनातिन्यूनं विंशति-अर्बुद-लिव्र-मुद्रा-परिमित-सम्पत्तिः सर्वकारस्य अधीनस्था



चित्रम् – 6 – भय-वातावरणस्य प्रसारः
मानचित्रेण ज्ञायते यत् कथं कृषकसमूहाः एकस्मात् स्थानात् अपरस्मिन् स्थाने निरन्तरं प्रसृताः।

जाता।

राष्ट्रियपरिषदा (1791)एकनवत्यधिक-सप्तदश-शततमे वर्षे संविधानस्य प्रारूपं सम्पूर्णीकृतम्। एतस्य मुख्यः उद्देश्यः आसीत् – सम्राजः शक्तीनां सीमितीकरणम् इति। कस्यचित् एकस्य जनस्य हस्ते अधुना एतासां शक्तीनां केन्द्रं नासीत् परन्तु अधुना शक्तीनां विकेन्द्रीकरणं विभिन्नसंस्थानां यथा – विधायिकायाः कार्यपालिकायाः न्यायपालिकायाः च मध्ये स्थानन्तरितम्। अनेन प्रकारेण फ्रांसदेशे संवैधानिक-राजतन्त्रस्य आधारशिला स्थापिता जाता। सप्तमेन चित्रेण दर्शयते यत् नूतनराजनैतिक-व्यवस्था कथं कार्यं करोति स्म।



चित्रम् – 7- (1791) एकनवत्यधिक-सप्तदश-शततम-वर्षीयस्य संविधानस्य अन्तर्गतं राजनैतिक-व्यवस्था।

(1791) एकनवत्यधिक-सप्तदश-शततम-वर्षीयेण संविधानेन अधिनियमनिर्माणस्य अधिकारः राष्ट्रियपरिषदे समर्पितम्। राष्ट्रियपरिषद् अप्रत्यक्षरूपेण चीयते स्म। सर्वप्रथमं नागराः कस्यचित् निर्वाचकसमूहस्य चयनं कुर्वन्ति स्म सः समूहः एव पुनः परिषदः सदस्यान् चिनोति स्म। सर्वेभ्यः नागरेभ्यः मतदानस्य अधिकारः नासीत्। पञ्चविंशतिवर्षीयेभ्यः अधिकवयसः एवंविधाः पुरुषाः एव सक्रियाः नागराः भवन्ति स्म इति व्यवस्था आसीत् तेभ्यः एव मतं दातुम् अधिकारः आसीत्, तथाविधाः वयस्काः पुरुषाः एव ये दिनत्रयस्य श्रमस्य समम् एव करम् अर्पयन्ति स्म। तेभ्यः एव मतं दातुम् अधिकारः आसीत्। शिष्टाः पुरुषाः महिलाः च निष्क्रिय-नागर-रूपेण वर्गीकृताः आसन्। निर्वाचकयोग्यतां प्राप्तुम् अपि च परिषदः सदस्यतार्थं जनानां करदातृणाम् उच्चतम-श्रेण्यां भवनम् आवश्यकम् आसीत्।

चित्रम् 8 – " पुरुषः जनाधिकार-घोषणापत्रस्य नवत्यधिक-सप्तदशशततमे (1790) वर्षे ले-बार्बिये-द्वारा निर्मितं चित्रम् । वामपक्षीया आकृतिः फ्रांसं दक्षिणपक्षीया च आकृतिः अधिनियमं निरूपयति ।

संविधानं "पुरुषः तथा च जनाधिकार-घोषणापत्रेण" सह प्रारब्धम् । जीवनस्य अधिकारः , अभिव्यक्तेः स्वतन्त्रतायाः च अधिकारः, अधिनियम-दृशा समानतायाः अधिकारः " नैसर्गिकस्य अहरणीयस्य च अधिकारस्य रूपेण स्थापितः अर्थात् एतादृशाः अधिकाराः प्रत्येकं जनाय जन्मना प्राप्ताः आसन् अपि च एवंविधाः अधिकाराः न परिहर्तुं शक्यन्ते । राज्यस्य एतत् अपि कर्त्तव्यं मतं यत् राज्यं प्रत्येकम् अपि जनस्य नागरस्य च नैसर्गिक-अधिकाराणां रक्षां कुर्यात् ।

स्रोतः (ख)

क्रान्तिकारिपत्रकारेण ज्याँ-पाल-मरा (Jean-Paul Marat) इत्यनेन स्ववार्त्तापत्रे लामि द-पप्ल(जनतायाः मित्रम्) इत्यस्मिन् राष्ट्रिय-परिषदा सज्जीकृते संविधाने इयं टिप्पणी कृता –

" जनतायाः प्रतिनिधित्वस्य कार्यभारः धनाढ्येभ्यः अर्पितः.... निर्धनानां शोषितानां च दशा केवलं शान्तिपूर्णैः उपायैः न कदापि परिष्कृता भवितुं शक्यते ।

इदम् एतस्य तथ्यस्य दृढं प्रमाणम् अस्ति यत् धनाढ्यवर्गः कथम् अधिनियमं प्रभावितं करोति । पुनरपि एते अधिनियमाः तावत्पर्यन्तं चलिष्यन्ति यावत्पर्यन्तं जनाः एतान् पालयिष्यन्ति । येन प्रकारेण कुलीनानां प्रभुत्वं नाशितवन्तः तथा एव कस्मिंश्चिद् दिने सा एव स्थितिः धनाढ्यानां करिष्यन्ति ।

वार्त्तापत्रात् लामि द पप्ल इत्यस्माद् उद्धृतम् ।

स्रोतः ग

पुरुषः तथा च जनाधिकार-घोषणापत्रम्

1. मनुष्याः स्वतन्त्राः जायन्ते, स्वतन्त्राः तिष्ठन्ति अपि च तेषाम् अधिकाराः अपि समानाः भवन्ति ।
2. प्रत्येकं राजनैतिकसङ्घटनस्य लक्ष्यं मनुष्यस्य नैसर्गिकस्य अहरणीयाधिकाराणां च संरक्षणम् अस्ति । एते अधिकाराः सन्ति – स्वतन्त्रतायाः सम्पत्तेः सुरक्षायाः शोषणस्य च प्रतिरोधस्य अधिकाराः ।
3. समग्र-संप्रभुतायाः स्रोतः राज्ये एव निहितम् अस्ति, कश्चित् अपि जनः अथवा समूहः एतादृशम् अनधिकारं न प्रयोक्तुं शक्यति यस्मै जनतायाः सत्तायाः स्वीकृतिः न प्राप्ता स्यात् ।
4. स्वतन्त्रतायाः आशयः अयम् अस्ति यत् शक्तिः अन्येषां कृते हानिप्रदा न भवेत् ।
5. समाजाय यत् हानिप्रदं कृत्यं स्यात् तादृशस्य कृत्यस्य प्रतिबन्धन-अधिकारः अधिनियमस्य पार्श्वे अस्ति ।
6. अधिनियमः सामान्यायाः इच्छायाः अभिव्यक्तिः अस्ति । सर्वेषां नागराणां व्यक्तिगतरूपेण अथवा स्वप्रतिनिधीनां माध्यमेन एतस्य निर्माणस्य प्रक्रियायां भागग्रहणस्य अधिकारः अस्ति । अधिनियमदृष्ट्या सर्वे जनाः समानाः सन्ति ।
7. अधिनियम-सम्मत-प्रक्रियां विना कोऽपि जनः दोषी इति न मन्तुं शक्यते न चैव तस्य निग्रहणं काराबद्धः च स न कर्तुं शक्यते ।
8. प्रत्येकं जनः वक्तुं लेखितुं प्रकाशयितुं च स्वतन्त्रः अस्ति, परन्तु अधिनियम-व्यवस्थया निर्धारित-प्रक्रियायाः अन्तर्गतम् एवंविधायाः स्वतन्त्रतायाः दुरुपयोगस्य च दायित्वम् अपि तस्य एव भविष्यति ।
9. सार्वजनिक-सेनायाः प्रशासनस्य व्ययाय किञ्चित् सामान्य-कराधानम् अपरिहार्यम् अस्ति , सर्वेषु जनेषु तेषाम् आयानुसारं समानरूपेण कराधानं स्यात् ।
10. यतो हि सम्पत्तेः अधिकारः कश्चित् पावनः अनुल्लङ्घनीयः च अधिकारः अस्ति अतः कश्चिद् अपि जनः एतस्मात् अधिकारात् वञ्चितः न कर्तुं शक्यते । यावत्पर्यन्तं विधिद्वारा स्थापितायाः प्रक्रियायाः अन्तर्गतं सार्वजनिक-आवश्यकतायाः कृते सम्पत्तेः अधिग्रहणं न आवश्यकं स्यात् । एवंविधे प्रकरणे अग्रिम-क्षतिपूर्त्ति-धनम् अवश्यम् एव दातव्यं स्यात् ।

राजनैतिक-प्रतीकानाम् अर्थाः

अष्टादश-शताब्द्याम् अधिकतराः स्त्रीपुरुषाः अधीताः न आसन् । अतः महत्त्वपूर्ण-विचाराणां प्रचारं कर्तुं मुद्रितशब्दानाम् अपेक्षया आकृतीनां प्रतीकानां च प्रयोगः क्रियते स्म । ले-बार्बिये-महोदयः स्वचित्रकलायाम् अधिकाराणां घोषणापत्रं जनान् यावत् प्रापयितुं प्रतीकानां प्रयोगं कृतवान् । एतान् प्रतीकान् अवगन्तुं प्रयत्नं कुर्वन्तु ।

खण्डित-शृङ्खला – दासान् बद्धुं शृङ्खलानां प्रयोगः भवति स्म । खण्डित-कर-शृङ्खला तेषां स्वतन्त्रतायाः प्रतीकभूता अस्ति ।

दण्डानां कुन्ताकार-गुच्छः – एकाकिनं दण्डं सरलतया त्रोटयितुं शक्नुमः परन्तु सम्पूर्ण-सङ्घातरूपं न सरलतया त्रोटयितुं शक्नुमः । ऐक्ये एव बलम् अस्ति ।





त्रिभुज-आभ्यन्तरे प्रकाशकं नेत्रम् – सर्वदर्शि नेत्रं ज्ञानस्य प्रतीकम् अस्ति । सूर्यस्य किरणाः अज्ञानरूपिणं तमः अपाकरिष्यन्ति ।

राजदण्डः – राजसत्तायाः प्रतीकः ।



स्वपुच्छं स्वीये मुखे गृह्णानः सर्पः – समानतायाः प्रतीकः । अङ्गुलीयकस्य कश्चित् अपि प्रान्तभागः न भवति ।

रक्त-फ्राइजियन-शिरोवस्त्रम् – यदा दासाः स्वतन्त्राः जाताः ततः परं ते एतादृशं शिरोवस्त्रं धरन्ति स्म ।

नील-श्वेत-रक्ताः – फ्रांसस्य राष्ट्रियवर्णाः ।

डैनो इत्येतैः समन्विता स्त्री – अधिनियमस्य मानवीयरूपम् ।

विधि-पट्टः – अधिनियमः सर्वेषां कृते समानः अस्ति तस्य च दृष्टौ सर्वे समानाः सन्ति ।



॥ इति द्वितीयः पाठः ॥

क्रियाविधिः

1. प्रथमायां मञ्जूषायां स्वतन्त्रतायाः समानतायाः बन्धुत्वस्य च प्रतीकान् परिचिन्वन्तु ।
2. ले-बार्बिये-महोदयस्य "पुरुषः तथा च जनाधिकार-घोषणापत्रम् इत्यस्मिन् अष्टमे चित्रे चित्रित-प्रतीकानां व्याख्यानं कुर्वन्ति ।
3. 1791तमवर्षस्य संविधाने नागरेभ्यः प्रदत्तानां राजनैतिकाधिकाराणां घोषणापत्रस्य (स्रोतः ग) प्रथमानुच्छेदे षष्ठे अनुच्छेदे च प्रदत्तैः अधिकारैः सह तुलनां कुर्वन्तु । किं द्वौ अपि अभिलेखौ परस्परम् अनुरूपौ स्तः ? किं द्वाभ्याम् अभिलेखाभ्याम् एकस्य एव विचारस्य बोधः भवति ।
4. 1791 तमेन संविधानेन फ्रांसीयसमाजस्य के के समूहाः लाभान्विताः अभविष्यन् ? एतस्मात् के समूहाः असन्तुष्टाः भवितुं शक्नुवन्ति स्म ? मरा-महोदयेन भविष्यतः विषये किं किम् अनुमितम् (स्रोतः ख)आसीत् ।
5. फ्रांसस्य घटनाभिः निरंकुश-राजतन्त्र-युक्तानां प्रशा-आस्ट्रिया-हंगरी-स्पेन-आदिदेशेषु जातानां प्रभावाणां कल्पनां कुर्वन्तु । फ्रांसे जातानां घटनानां विषये श्रुत्वा नृपाः वणिजः कृषकाः कुलीनाः ख्रिस्तपुरोहिताः च कां प्रतिक्रियां दत्तवन्तः स्युः ?

3 फ्रांसे राजतन्त्रस्य उन्मूलनं गणतन्त्रस्य च स्थापना

फ्रांस-देशस्य स्थितिः आगामिषु वर्षेषु अपि अवसादपूर्णा आसीत् । यद्यपि लुई-षोडशः संविधाने हस्ताक्षरम् अकरोत् ,परन्तु प्रशायाः नृपेण सह अपि तस्य गुप्तवार्ता चलति स्म । फ्रांसस्य घटनाभिः अन्येषां प्रतिवेशि-राष्ट्राणां शासकाः अपि चिन्तिताः आसन् । अतः 1789 तमवर्षस्य ग्रीष्मकालात् परं जायमानानाम् एतद्विधानां घटनानां नियन्त्रणाय एते शासकाः सेनाः प्रेषयितुं योजनां कृतवन्तः आसन् । परन्तु यावत्पर्यन्तम् एतासां योजनानां क्रियान्वयनम् अभविष्यत् तावत्पर्यन्तम् अप्रैल्-मासस्य 1792तमे वर्षे नैशनल-असेंबली इत्यनेन प्रशायाः आस्ट्रियादेशस्य च विरोधे युद्धस्य घोषणायाः प्रस्तावः पारितः । प्रान्तेभ्यः सहस्रशः स्वयंसेविनः सेनायां प्रवेश-ग्रहणाय एकत्र जाताः । एतत् युद्धं यूरोपीयनृपाणां कुलीनानां च विरोधे जनतायाः युद्धम् अस्ति इति स्वयं-सेवि-सैनिकाः चिन्तितवन्तः । तेषां स्वयंसेवि-सैनिकाः देशभक्तेः यानि गीतानि गायन्ति स्म, तेषु गीतेषु कवेः राजेट-दि-लाइल इत्यनेन रचितं मार्सिले इति एतत् अपि आसीत् । इदं गीतं प्रथमवारं मार्सिलेस इत्यस्य स्वयंसेविनः पेरिसं प्रति गच्छन्तः गीतवन्तः आसन् । अतः एतस्य गीतस्य नाम मार्सिले इति अभवत् अधुना एतत् गीतं फ्रांसस्य राष्ट्रगानरूपेण वर्तते ।

क्रान्तिकारि-युद्धेभ्यः जनतया अतीव क्षतिः आर्थिक-कष्टानि च अपि सोढानि । पुरुषेषु सर्वेषु युद्धेषु गतेषु सत्सु गृह्यस्य कुटुम्बस्य भोजनव्यवस्थायाः च दायित्वं महिलानां भवति स्म। देशस्य अधिकांशजनाः एवम् अनुभवन्ति स्म यत् अधुना अस्य क्रान्तेः प्रक्रमस्य निरन्तरं वर्धापनस्य आवश्यकता अस्ति इति इत्थं ते चिन्तितवन्तः । यतो हि 1791तमेन संविधानेन केवलं धनाढ्यैः एव राजनैतिक-अधिकाराः प्राप्ताः आसन् । जनाः राजनैतिकेषु क्लब इत्येषु आश्रयं स्वीकृत्य तत्र सर्वकारीय-नीतीनां स्वकार्ययोजनानां च विषये चर्चां कुर्वन्ति स्म । एतेषु जैकोबिन-क्लब इति सफलतमम् आसीत् । यस्य नाम पेरिसस्य भूतपूर्वस्य कान्वेण्ट आफ सेण्ट जेकब इत्यस्य नाम्ना आसीत् । अधुना एतत् अस्य राजनैतिकसमूहस्य स्थानं (प्रमुख-केन्द्रम्)जातम् । तस्मिन् सम्पूर्ण-अवधौ महिलाः अपि सक्रियाः आसन् अपि च ताः अपि स्वकेन्द्रान् स्थापितवत्यः । एकस्य अध्यायस्य चतुर्थे खण्डे भवन्तः तासां गतिविधीनां याचनानां च विषये इतोऽपि अवगमिष्यन्ति ।

जैकोबिन-क्लब इत्यस्य सदस्याः मुख्यतः समाजस्य न्यून-समृद्धवर्गस्य आसन् । एतेषु लघु-आपणिकाः शिल्पकाराः यथा पादत्राण-निर्मातारः, पेस्ट्री इत्यस्य निर्मातारः, घटीनिर्मातारः, मुद्रकाः, भृत्याः श्रमिकाः च सम्मिलिताः आसन् । तेषां सर्वेषां शिल्पकाराणां नेता मैक्समिलियन-रोबेस्प्येरः आसीत् । जैकोबिनो इत्यस्य केनचित् वर्गेण शिल्पकाराणाम् इव सरेख-ऊरुकस्य धारणस्य निर्णयं कृतवन्तः । एतादृशं ते किमर्थं कृतवन्तः इति जिज्ञासायाम् उच्यते यत् ते समाजस्य शृङ्गार-प्रिय-वर्गेभ्यः तत्रापि विशेषतया आजानु (ब्रीचेस्) ऊरुकम् इति ये धरन्ति स्म, तेभ्यः कुलीनेभ्यः आत्मानं पृथक्-कर्तुम् इच्छन्ति स्म अतः ते तथा कुर्वन्ति स्म । अयं चापि (ब्रीचेस्) आजानुवस्त्रस्य धारकानां कुलीनानां सत्तासमाप्तेः घोषणायाः तेषाम् उपायः आसीत् ।

नूतना-शब्दाः

कान्वेण्ट – धार्मिकजीवनाय समर्पित-समूहस्य भवनम् ।

चित्रम्- 9 – सौं कुलात् (ब्रीचेस् इत्यनेन रहितौ) दम्पती

चित्रम् – 10 – नानीन-वालैं, लिबर्टी (स्वतन्त्रता),
इदं चित्रं कयाचित् महिला-चित्रकारेण रचितेषु दुर्लभ-चित्रेषु किञ्चन अस्ति । क्रान्तिकारि-घटनाक्रमात् परं महिलाभ्यः एतत् सम्भवं जातं यत् ताः महिलाः स्थापित-चित्रकारैः सह प्रशिक्षणं प्राप्नुयुः अपि च प्रत्येकं द्वयोः वर्षयोः प्रदर्श्यमानायां चित्र-प्रदर्शन्यां स्वचित्राणि प्रदर्शयितुं शक्नुयुः । इदं चित्रं स्वतन्त्रतायाः नारीरूपकम् अस्ति अर्थात् नार्याः आकृतिः स्वतन्त्रतायाः प्रतीकभूता अस्ति ।

अतः जैकोबिनों इत्याख्याः जनाः 'सौं कुलात' इति नाम्ना ज्ञाताः यस्य शाब्दिकः अर्थः भवति – जानु-रहिताः जनाः । सौं-कुलॉत-पुरुषाः रक्तवर्णीयं शिरोवस्त्रम् अपि धरन्ति स्म तत् शिरोवस्त्रं स्वतन्त्रतायाः प्रतीकभूतम् आसीत् । परन्तु महिलाभ्यः एवम् अनुमतिः न आसीत् ।

1792 तमवर्षस्य ग्रीष्मकाले जैकोबिनों इत्याख्याः जनाः खाद्यपदार्थानां महार्घतायाः, अभावस्य च कारणात् रुष्टान् पेरिसवासिनः आदाय कस्यचित् महतः हिंसकविद्रोहस्य योजनां कृतवन्तः । अगस्त-मासस्य प्रातः ते ट्यूलेरिए इत्यस्य राजभवने आक्रमणं कृतवन्तः । नृपस्य रक्षकाः हताः, नृपः च अपि तैः चिरकालं यावत् बन्धकः कृतः । नूतनतया निर्वाचनं कारितम् , एकविंशतितः(21) अधिक-वर्षीयेभ्यः सर्वेभ्यः पुरुषेभ्यः मतदानस्य अधिकारः दत्तः, कामं तेषां पार्श्वे संपत्तिः स्यात् न वा स्यात् ।

नवनिर्वाचित-परिषदः कन्वेन्शन इति नाम कृतम् । सितम्बरमासस्य 21दिनाङ्के 1792 तमवर्षे च अनेन राजतन्त्रस्य समाप्तिः कृता । अपि च फ्रान्स-देशः गणतन्त्रम् अस्ति इति घोषितः । यथा भवन्तः जानन्ति यत् गणतन्त्रं सर्वकारस्य तद्विधं रूपम् अस्ति यत्र सर्वकारस्य तस्य च प्रमुखानां निर्वाचनं जनता करोति । एतद् वंशानुगतं राजशासनं नास्ति । भवन्तः केषाञ्चित् अन्येषां गणतान्त्रिकदेशानां विषये अवगन्तुं प्रयत्नं कुर्वन्तु अपि च पश्यन्तु यत् ते कदा कथं च गणतान्त्रिकाः देशाः जाताः ।

क्रियाविधिः

एतत् चित्रम् अवधानेन पश्यन्तु अपि च तेषां वस्तूनां सूचीं कुर्वन्तु यानि वस्तूनि भवन्तः राजनैतिक-प्रतीकानां रूपेण प्रथम-मञ्जूषायां दृष्टवन्तः (रक्तशिरोवस्त्रम्, खण्डिता शृङ्खला, दण्डानां कुन्ताकार-चयः, अधिकाराणां घोषणापत्रम्)। (पिरामिड) त्रिशङ्कु इति समानतायाः प्रतीकः अस्ति यः तत्र प्रायः कस्यचित् त्रिभुजः रूपेण दर्श्यते स्म । एतेषां प्रतीकानां साहाय्येन एतस्य चित्रस्य व्याख्यानं कुर्वन्तु । स्वतन्त्रतायाः प्रतिमूर्त्याः एतस्याः महिलायाः मूर्त्याः विषये भवतां विचाराः के सन्ति ।

लुई-षोडशाय न्यायालयेन देशद्रोहस्य आरोपेण मृत्युदण्डः श्रावितः । जनवरीमासस्य (21) एकविंशतिदिनाङ्के त्रिनवत्यधिकसप्तदशशततमे (1792)वर्षे च प्लेस-डी-ला-कान्कार्ड इत्यस्मिन् तस्मै सार्वजनिकरूपेण मृत्युदण्डः प्रदत्तः । किञ्चित् कालानन्तरं राज्ञ्याः मेरी-एन्तोएनेत इत्यस्याः अपि सः एव परिणामः अभवत् ।

नूतन-शब्दः

देशद्रोहः – स्वदेशेन अथवा सर्वकारेण सह विश्वासघातपूर्णः व्यवहारः ।

3.1 आतङ्कराजः

1793 तमवर्षात् आरभ्य 1794तमवर्षावधिं यावत् आतङ्कस्य युगम् इति उच्यते । रोबेस्प्येर-महोदयः दण्डस्य नियन्त्रणस्य च दृढनीतिम् अङ्गीकृतवान् । तस्य अनुसारं गणतन्त्रस्य ये के अपि शत्रवः आसन् यथा – कुलीनाः ख्रिस्तपुरोहिताः च , तस्य कार्यशैलीं प्रति ये असहमतिं प्रकटयन्ति स्म तादृशाः, अन्येषां राजनैतिकदलानां सदस्याः, इति एतान् सर्वान् जनान् निगृह्य सः कारागारे बद्धान् अकरोत् अपि च केनचित् क्रान्तिकारिणा न्यायालयेन तेषु अभियोगः चालितः । यदि न्यायालयः तादृशान् जनान् दोषिणः इति घोषयति स्म तदा तेषां जनानां शिरश्छेदनं गिलोटिन् इत्येतम् आरुह्य क्रियते स्म । गिलोटिन् इति कञ्चित् यन्त्रम् आसीत् तत् द्वयोः स्तम्भयोः मध्ये लम्बमानं क्रकच-यन्त्रम् आसीत् यस्मिन् यन्त्रे अपराधिनः शिरः संस्थाप्य शरीरात् पृथक् क्रियते स्म । डा.गिलोटिनः तस्य यन्त्रस्य निर्माणं कृतवान् अतः एतस्य यन्त्रस्य नाम अपि तस्य नाम्नः अनुरूपं कृतम् आसीत् ।

रोबेस्प्येर-सर्वकारेण अधिनियमं निर्माय श्रमस्य मूल्यानां च अधिकतमसीमा सुनिश्चिता । मांसस्य पर्युषितरोटिकायाः च अल्पमूल्येन वितरणं कृतम् । कृषकाः स्वीयम् अन्नं नगरं नयेयुः अपि च ते तत्र सर्वकारेण यत् मूल्यं निश्चितं तेन मूल्येन एव ते विक्रयणं कुर्युः इति एतदर्थं ते बाध्याः कृताः । अपेक्षाकृतः महार्घस्य श्वेत-गोधूम-चूर्णस्य प्रयोगे प्रतिबन्धः स्थापितः । सर्वे जनाः अखण्ड-गोधूम-निर्मितं समता-रोटिकां खादेयुः यतो हि सा रोटिका समतायाः प्रतीकभूता मन्यते स्म,इति नियमः अनिवार्यत्वेन सर्वैः पालनीयः । वार्तालापे सम्बोधने चापि समानतापूर्णस्य व्यवहारस्य क्रियान्वयनं भवेत् इति प्रयासः कृतः । परम्परागतस्य मान्स्यूर (महाशय इत्यस्य) अपि च मदाम(महोदया इत्यस्य) स्थाने अधुना सर्वेभ्यः फ्रांसीयपुरुषेभ्यः महिलाभ्यः च सितोयेन (नागरिकः)इति अपि च अनेन एव प्रकारेण सितोयीन (नागरिका) इति नाम्ना तयोः सम्बोधनम् आरब्धम् । ख्रिस्तालयाः पिहिताः, ख्रिस्तालयानां स्थाने भवनानि सेनावासाः कार्यालयाः च कृताः ।

रोबेस्प्येर-महोदयः स्वनीतीनां क्रियान्वयनं तथा दृढतया कृतवान् यत् तस्य समर्थकाः अपि त्राहि त्राहि इति कृतवन्तः । अन्ततः जुलाई-मासे 1794 तमवर्षे च न्यायालयेन सः दोषी अस्ति इति घोषितः अपि च सः गृहीत्वा अग्रिमे एव दिने गिलोटिन इति यन्त्रेण सः मृत्युदण्डेन दण्डितः ।

क्रियाविधिः

डेस्मालिन्स-महोदयस्य रोबेस्प्येर-महोदयस्य च विचाराणां परस्परं तुलनां कुर्वन्तु । राज्यशक्तेः प्रयोगेण द्वयोः किं तात्पर्यम् अस्ति ? "निरङ्कुशतां विरुध्य स्वतन्त्रतायाः युद्धम्" इत्यनेन रोबेस्प्येर-महोदयस्य कः अभिप्रायः अस्ति ? डेस्मालिन्स-महोदयः स्वतन्त्रतां कथं पश्यति ? एकदा पुनः ग इति स्रोतः पश्यन्तु । व्यक्तिगत-अधिकाराणां विषये संविधाने कानि कानि प्रावधानानि आसन् ? एतस्मिन् विषये स्वकक्षायां परस्परं चर्चां कुर्वन्तु ।

स्रोतः (घ)

स्वतन्त्रता(लिबर्टी) इत्यनेन कः अभिप्रायः ? द्वौ परस्परविरोधिनौ विचारौ –

क्रान्तिकारी पत्रकारः कैमिल-डेस्मालिन्स-महोदयः 1793तमवर्षे इदम् अलिखत् । एतस्य पत्रस्य लेखनस्य केभ्यश्चित् दिनेभ्यः परम् आतङ्कराज-अवधौ सः अपि मृत्युदण्डेन दण्डितः ।

केषाञ्चित् जनानां मान्यता अस्ति यत् स्वतन्त्रता कस्यचित् शिशोः इव अस्ति । यथा परिपक्व-अवस्थायाः प्राप्तिं यावत् अनुशासनस्य नितराम् आवश्यकता भवति । परन्तु सत्यं किञ्चित् पृथक् अस्ति । स्वतन्त्रता एव सुखं शान्तिः च अस्ति, विवेकः अस्ति, समानता न्यायः च अस्ति, इदम् अधिकाराणां घोषणापत्रम् अस्ति ---। भवान् प्रायः स्वीयानां सर्वेषां शत्रूणां शिरश्छेदनं कर्तुम् इच्छति । किम् एतस्मात् परं काचित् मूर्खता भवितुं शक्नोति किं कस्यचिद् अपि जनस्य दशाधिकान् घनिष्ठ-सम्बन्धिनः शत्रून् अकृत्वा , तस्य मृत्युदण्डेन मारणं शक्यं भवति । फरवरीमासस्य

7दिनाङ्के 1794तमवर्षे च रोबेस्प्येर-महोदयः कन्वेंशन इत्यस्मिन् भाषणम् अकरोत् तत् भाषणं ल मानीतेर-यूनिवर्सेल इत्यस्मिन् वार्तापत्रे प्रकाशितम् ।

तस्य एव भाषणस्य कश्चित् अंशः

– "लोकतन्त्रस्य स्थापनाय सुदृढीकरणाय च संविधान-सम्मतस्य शान्तिपूर्णस्य शासनस्य कृते अस्माभिः सर्वादौ अत्याचारिणीं निरङ्कुशतां विरुध्य स्वतन्त्रतायाः युद्धम् अन्तिम-परिणतिं यावत् प्रापयितव्यं भविष्यति । गणतन्त्रस्य गृह्यानां बाह्यानां च शत्रूणां विनाशः आवश्यकः अस्ति । अन्यथा वयं स्वयमेव नष्टाः भविष्यामः ।

क्रान्तिकाले लोकतान्त्रिक-सर्वकारः आतङ्कस्य आश्रयं नेतुं शक्नोति । आतङ्कः केवलं दृढः त्वरितः अनम्यन्यायः च अस्ति । .... यस्य प्रयोगः पितृभूमेः अत्यावश्यकीः आवश्यकताः पूरयितुं करिष्यते । आतङ्कस्य माध्यमेन स्वतन्त्रतायाः शत्रूणां नियन्त्रणं गणतन्त्रस्य संस्थापकस्य अधिकारः अस्ति" ।

चित्रम् – 11 – क्रान्तिकारि-सर्वकारः अनेकप्रकारेण जनतायाः सहानूभूतिं प्राप्तुम् इष्टवान् – तेषु अन्यतमम् एतत्प्रकारकाणाम् उत्सवानाम् आयोजनम् आसीत्। कस्यचित् गौरवमयस्य इतिहासस्य आभां संप्रेषयितुं प्राचीन-यूनानस्य रोमस्य सभ्यतानां प्रतीकानां प्रयोगः कृतः । मञ्चस्य मध्ये स्तम्भानाम् उपरि स्थितः क्लासिकी-मण्डप इति अस्थायिसामग्र्या निर्मितः आसीत्। यः यदा कदापि त्रोटयितुं शक्यते स्म।

3.2 डिरेक्ट्री-शासितः फ्रांसः

जैकोबिन-सर्वकारस्य पतनस्य परं मध्यवर्गस्य सम्पन्नवर्गस्य पार्श्वे सत्ता समागता । नूतन-संविधानस्य अन्तर्गतं सम्पत्तिहीनः वर्गः मताधिकारात् वञ्चितः । अस्मिन् संविधाने द्वयोः विधानपरिषदोः प्रावधानम् आसीत् । एताभ्यां परिषद्भ्यां पञ्चसदस्यीयायाः कस्याश्चित् कार्यपालिकायाः डिरेक्ट्री इत्यस्याः नियुक्तिः कृता । एतस्य प्रावधानस्य माध्यमेन जैकोबिनों-समूहस्य शासनकाल-युक्तां काञ्चित् व्यक्ति-केन्द्रित- कार्यपालिकां प्रति विमुखतायाः प्रयासः कृतः । परन्तु डिरेक्टर इत्येतेषां कलहः प्रायः विधान-परिषदा सह भवति स्म, तदा च परिषद् तान् निरस्तीकर्तुं चेष्टां करोति स्म । डिरेक्ट्री इत्यस्य राजनैतिक-अस्थिरतया सैनिक-नृपस्य (तानाशाहस्य) नेपोलियन-बोनापार्ट-वर्यस्य उदयस्य मार्गः प्रशस्तः कृतः ।

सर्वकारस्य स्वरूपे एतेषां सर्वेषां परिवर्तनानां काले स्वतन्त्रता, विधिसम्मत-समानता अपि च बन्धुत्वप्रेरक-आदर्शाः जाताः । एतैः मूल्यैः आगामिनि शताब्दे न केवलं फ्रांसस्य अपि तु अवशिष्टस्य यूरोपस्य राजनैतिकानि आन्दोलनानि अपि प्रेरितानि ।

।। इति तृतीयः पाठः ।।

क्रियाविधिः

अत्र चित्रितस्य जनसमूहस्य तस्य वेशभूषायाः भूमिकायाः क्रियाकलापस्य च वर्णनं कुर्वन्तु। अनेन चित्रेण क्रान्तिकारिणः उत्सवस्य कीदृशी छविः जायते ?

4

किं क्रान्तिः महिलाभ्यः अपि जाता ?

चित्रम् – 12 – वर्साय-नगरं प्रति गच्छन्त्यः पेरिसस्य महिलाः ,
इदं चित्रम् अक्तूबरमासस्य पञ्चदिनाङ्कस्य 1789तमवर्षस्य घटनानाम् अनेकेषु चित्रेषु अन्यतमम् अस्ति । तस्मिन् दिने महिलाः पेरिसतः वर्सायं गत्वा नृपम् आत्मना सह आनीय प्रत्यागतवत्यः आसन् ।

महिलाः आरम्भात् एव फ्रांसीयसमाजे एतावन्तं प्रमुखं परिवर्तनम् आनेतुं गतिविधिषु सक्रियरूपेण सम्मिलिताः आसन् । ताः आशावत्यः आसन् यत् तासां सहभागिता क्रान्तिकारि-सर्वकारं तासां जीवनं परिष्कर्तुं दृढप्रयासान् कर्तुं च प्रेरयिष्यति । तृतीयस्य एस्टेट इत्यस्य अधिकतराः महिलाः जीविकां निर्वोढुं कार्यं कुर्वन्ति स्म । ताः सीवनं वयनं वस्त्रप्रक्षालनं च कुर्वन्ति स्म, विपणिषु फलानि पुष्पाणि शाकानि च विक्रीणन्ते स्म अथवा सम्पन्नगृहेषु गृह्यकार्याणि कुर्वन्ति स्म । अधिकतर-महिलानां पार्श्वे पठनस्य लेखनस्य व्यवसायिक-प्रशिक्षणस्य च अवसराः नासन् । केवलं कुलीनानां बालिकाः अथवा तृतीयस्य एस्टेट इत्यस्य धनाढ्य-कुटुम्बस्य बालिकाः एव कान्वेण्ट इत्यस्मिन् पठितुं पारयन्ति स्म, तदनन्तरं तादृशीनां बालिकानां विवाहः क्रियते स्म । व्यवसायिक-महिलाभिः स्व-कुटुम्बस्य पालनं पोषणं च अपि करणीयं भवति स्म – यथा – भोजनस्य पाकः, जलस्य आनयनम्, पङ्क्तिबद्धाभिः भूत्वा पर्युषित-रोटिकानाम् आनयनम् अपि च बालानां संरक्षणादिकार्यं करणीयं भवति स्म । महिलानां पारिश्रमिकं पुरुषाणां तुलनया न्यूनम् आसीत् ।

महिलाभिः स्व-हितानि संरक्षयितुम् अपि च तेषां हितानां विषये चर्चयितुं स्वयम् एव राजनैतिक-क्लब(केन्द्रम् इति) इति आरब्धं वार्तापत्राणि चापि प्रकाशितानि । फ्रांसस्य विभिन्नेषु नगरेषु महिलानां प्रायः (60) षष्टिः क्लब इति एतानि आस्तित्वम् आगतानि ।

क्रियाविधिः

द्वादशचित्रे अङ्कितानां महिलानां तासां क्रियाणां भावानां तासां हस्तेषु विद्यमानानां वस्तूनां च विवरणं यच्छन्तु । सावधानं पश्यन्तु यत् किं ताः एकस्मात् एव सामाजिकवर्गात् सम्बद्धाः प्रतिभाति ? चित्रकारेण एतस्याम् आकृतौ के के प्रतीकाः सम्मेलिताः ? एतेषां प्रतीकानां कः अभिप्रायः अस्ति ? किं महिलाः दृष्ट्वा अनुभूयते यत् ताः सार्वजनिक-रूपेण तदेव कुर्वन्ति याः आशाः ताभ्यः क्रियन्ते स्म ? भवन्तः किं चिन्तयन्ति – चित्रकारः महिलानां समर्थने अस्ति उत तासां विरोधे अस्ति ? कक्षायां स्वीयं परामर्शम् अभिलक्ष्य विचारं विमर्शनं च कुर्वन्तु ।

तेषु क्लब (नैशसमाजेषु) इत्येतेषु 'द-सोलाइटी आफ रेवलूशनरी एंड रिपब्लिकन विमेन' इति प्रसिद्धतमं क्लब इति आसीत्। तासां महिलानां प्रमुखा अभ्यर्थना इयम् आसीत् यत् महिलाः अपि पुरुषान् इव राजनैतिकान् अधिकारान् प्राप्नुयुः। महिलाः एतत् तथ्यं प्रति नैराश्ययुक्ताः आसन् यत् 1791 तमस्य संविधानस्य अनुसारं ताः निष्क्रियाः नागराः सन्ति इति प्रतिपादितम् आसीत् । महिलाः मताधिकारस्य विधानपरिषदे चयनस्य राजनैतिक-पदानां च याचना कृता। एतादृशीनां महिलानां मान्यता आसीत् यत् यदि उपर्युक्ता याचना पूर्तिं गच्छति तर्हि एव नूतने सर्वकारे तासां हितानां प्रतिनिधित्वं भवितुं शक्ष्यति।

प्रारम्भिकेषु वर्षेषु क्रान्तिकारि-सर्वकारेण महिलानां जीवन-परिवर्तकानाम् अधिनियमानां क्रियान्वयनं स्थापनं च कृतम् । सर्वकारीय-विद्यालयानां स्थापनेन सह एव सर्वासां बालिकानां कृते विद्यालयीया शिक्षा अपि अनिवार्या कृता । अधुना बालिकानां पितरः तासाम् इच्छायाः विरोधे परिणयाय ताः बाध्याः न कर्तुं शक्नुवन्ति स्म। परिणयः स्वैच्छिकः अनुबन्धः स्वीकृतः अपि च जन-अधिनियमानाम् अन्तर्गतं परिणयस्य पञ्जीकरणं कर्तुम् आरब्धम्। सम्बन्धविच्छेदः अपि अधिनियमीय-व्यवस्थायाः अन्तर्गतः स्थापितः अपि च पुरुषः महिला च द्वौ अपि सम्बन्धविच्छेदं कर्तुं प्रार्थनापत्रं दातुं शक्नुतः इति एवंविधः अधिकारः द्वयोः कृते एव प्रदत्तः। अधुना महिलाः व्यवसायिक-प्रशिक्षणं प्राप्तुं शक्नुवन्ति स्म , कलाम् अभिज्ञातुं शक्नुवन्ति स्म अपि च स्वीयं कमपि व्यवसायम् आरब्धुं शक्नुवन्ति स्म।

तथापि राजनैतिकेभ्यः अधिकारेभ्यः महिलानां सङ्घर्षः चलति स्म। आतङ्क-राजस्य काले सर्वकारेण महिला-केन्द्राणि (क्लब इति) प्रतिबन्धितुम् अपि च तासु राजनैतिक-गतिविधिषु प्रतिबन्धस्थापकः अधिनियमः क्रियान्वयितः । अनेकाः प्रसिद्धाः आन्दोलनकर्त्र्यः महिलाः निगडिताः अपि च तासु काश्चन मृत्युदण्डेन अपि दण्डिताः।

मताधिकाराय समान-वेतनाय च महिलानाम् आन्दोलनम् अग्रिमशताब्दे अपि अनेक-देशेषु अभवत्। मताधिकाराय सङ्घर्षः एकोनविंशतिशताब्दस्य प्रारम्भं यावत् अन्ताराष्ट्रिय-मताधिकार-आन्दोलनस्य माध्यमेन निरन्तरम् अचलत् । क्रान्तिकारिणः आन्दोलनस्य काले फ्रांसीय-महिलानां राजनैतिक-वातावरणं प्रेरक-स्मृत्याः रूपेण सजीवं स्थापितम्। अन्ततः 1946तमवर्षे फ्रांसस्य महिलाः मताधिकारं प्राप्तवत्यः।

स्रोतः च इति

क्रान्तिकारिण्याः महिलायाः ओलम्प-दे- गूज़ (1748-1793) इत्यस्याः जीवन-चरित्रम्।

ओलम्प-दे-गूज़-वर्या क्रान्तिकालीनस्य फ्रांसस्य राजनैतिक-रूपेण सक्रिय-महिलासु महत्त्वपूर्णतमा आसीत्। सा संविधानस्य पुरुषस्य जन-अधिकार-घोषणापत्रस्य च विरोधम् अकरोत् यतो हि मानवमात्रस्य यः मौलिकः अधिकारः अस्ति तस्मात् अधिकारात् ताः महिलाः वञ्चिताः आसन्। अतः सा गूज़वर्या 1791तमे वर्षे "महिला" एवं नागराधिकार-घोषणापत्रं सञ्जीकृतवती तत् घोषणापत्रं महाराज्ञ्यः राष्ट्रिय-परिषदः च सदस्यानां कृते प्रेषितम् अपि च तस्य माध्यमेन इयम् अभ्यर्थना कृता यत् एतस्मिन् क्रियान्वयनं स्यात्। यानि महिला-केन्द्राणि जैकोबिन-सर्वकारेण बलात् पिहितानि आसन् तदभिलक्ष्य 1793तमवर्षे ओलम्प-दे-गूज़ेन आलोचनं कृतम्। गूज़म् अभिलक्ष्य नैशनल-कन्वेंशन-द्वारा देशद्रोहस्य अभियोगः चालितः। तदनन्तरं शीघ्रम् एव सा मृत्युदण्डेन दण्डिता

स्रोतः छ इति

ओलम्प-दे –गूज़-वर्यायाः घोषणापत्रे उल्लिखिताः केचन मौलिकाः अधिकाराः

1. महिला जन्मना स्वतन्त्रा अस्ति अपि च अधिकार-दृष्ट्या पुरुषसमा अस्ति।
2. सर्वेषां राजनैतिक-सङ्घटनानां लक्ष्यं पुरुषाणां महिलानां च नैसर्गिक-अधिकाराणां संरक्षणम् अस्ति। एते अधिकाराः सन्ति – स्वतन्त्रता, सम्पत्तिः, सुरक्षा, महत्त्वपूर्णतमः च शोषण-प्रतिरोधस्य अधिकारः इति।
3. समग्र-संप्रभुतायाः स्रोतः राष्ट्रे निहितः अस्ति तत् स्रोतः पुरुषाणां महिलानां च सङ्घम् अतिरिच्य किमपि नास्ति।
4. अधिनियमः सामान्येच्छायाः अभिव्यक्तिः भवेत्। देशस्य सर्वासां महिलानां पुरुषाणां च व्यक्तिगतरूपेण अथवा स्वप्रतिनिधीनां माध्यमेन विधिनिर्माणे हस्ताक्षेपः स्यात्। सर्वेभ्यः समाना व्यवस्था स्यात्। देशस्य सर्वाः महिलाः पुरुषाः च स्वयोग्यतायाः प्रतिभायाः च बलेन समानरूपेण अपि च केनचित् अपि भेदभावेन विना प्रत्येकंविधस्य सम्मानस्य सार्वजनिकपदस्य च अधिकारिण्यः सन्ति।
5. कापि महिला अपवाद-स्वरूपा नास्ति। सा विधिसम्मत-प्रक्रियया अपराधिनी इति घोषयितुं शक्यते, अपि च महिलायाः निग्रहणं कारागारं प्रति प्रेषणम् अपि तस्याः भवितुं शक्नोति। पुरुषाणाम् इव महिलाः अपि कठोर-अधिनियमस्य पालनं कुर्युः।

क्रियाविधिः

ओलम्प-दे-गूज़-वर्यया सज्जीकृतस्य घोषणापत्रस्य (स्रोतः छ इत्यस्य) तथा च "पुरुषः एवं जन-अधिकार-घोषणापत्रम्" (स्रोतः ग इति) इत्यनयोः द्वयोर्मध्ये परस्परं तुलनां कुर्वन्तु।

चित्रम् – 13 - सुपिष्टकादिकस्य आपणे महिलाः पङ्क्तिबद्धाः सन्ति।

क्रियाविधिः

कल्पनां कुर्वन्तु यत् भवती त्रयोदश-चित्रे चित्रिता महिला अस्ति अपि च शोमेत-वर्यस्य (स्रोतः ज इति) तर्काणां प्रत्युत्तरं यच्छन्तु।

स्रोतः ज इति

1793तमे वर्षे जैकोबिनः राजनीतिज्ञः शोमेत-वर्यः एतान् तथ्यान् आधारीकृत्य महिलाकेन्द्राणां पिधानस्य निर्णयम् उचितम् इति स्पष्टीकृतवान्।

" किं गृह्यकार्यं पुरुषेभ्यः अर्पितम् अस्ति ?

किं प्रकृत्या शिशूनां स्तन्य-पानाय अस्मभ्यं स्तनौ प्रदत्तौ ?

नैव।

प्रकृत्या पुरुषः उक्तः –

पुरुषः भव। मृगया, कृषिः, राजनैतिक-कर्त्तव्यम्, इदं तव साम्राज्यम् अस्ति।

प्रकृत्या महिला उक्ता –

स्त्री भव ..... गृह्यकार्यम्, मातृत्वस्य सुखदं दायित्वम् इति

एतानि एव तव कार्याणि सन्ति।

याः महिलाः पुरुषान् इव भवितुम् इच्छन्ति ताः निर्लज्जाः सन्ति। किं दायित्वानाम् उचित-आवण्टनं न अभवत् ?

।। इति चतुर्थः पाठः ।।

5 दास-प्रथायाः उन्मूलनम्

फ्रांसीये उपनिवेशे दास-प्रथायाः उन्मूलनं जैकोबिन-शासनस्य क्रान्तिकारिषु सामाजिकेषु परिवर्तनेषु अन्यतमम् आसीत् । कैरिबियायी उपनिवेशः - मार्टिनिकः, गाडेलोपः सैन-डोमिंगों च इति तम्बाकू-नील-शर्करा-कॉफी-प्रभृतीनां वस्तूनां महत्त्वपूर्णाः आपूर्तिकर्तारः आसन् । यूरोपीयाः अपरिचितं दूरदेशं गत्वा तत्र च कार्यं कर्तुम् अनिच्छवः आसन् परिणामतः तत्रत्येषु उद्यानेषु श्रमस्य न्यूनता जाता । एषा न्यूनता यूरोपस्य अफ्रीकायाः अमेरिकायाः च मध्ये यत् त्रिकोणीयं दास-वाणिज्यं जातं तेन अपकृता । दास-वाणिज्यं सप्तदशशताब्दे आरब्धम् । फ्रांसीयाः वणिजः बोर्दे नान्ते इति द्वाभ्यां पोतस्थानकाभ्याम् अफ्रिकातटं प्रति जलपोतान् नयन्ति स्म, तत्र ते स्थानीय-प्रमुखेभ्यः दासान् क्रीणन्ति स्म । दासाः बन्दिनः कृत्वा अटलांटिक-महासागरस्य पारे कैरिबियायि-देशान् यावत् मासत्रयस्य सामुद्रीय-यात्रायै पोतेषु बलात् उपावेश्यन्ते स्म । तत्र ते दासाः उद्यानस्वामिभ्यः विक्रीयते स्म । दासश्रमस्य बलेन यूरोपीयविपणिषु या शर्करायाः नीलस्य कॉफी इत्यस्याः च अभ्यर्थना आसीत् तां पूरयितुं वणिजः समर्थाः जाताः । बोर्दे-नान्ते-सदृशानि च पोतस्थानकानि वर्धितस्य फलितस्य पुष्पितस्य च दासवाणिज्यस्य कारणात् एव समृद्धनगराणि जातानि ।

अष्टादश-शताब्दे फ्रांसे दास-प्रथायाः अधिका निन्दा न जाता । राष्ट्रिय-परिषदि (नैशनल असेंबली) दीर्घकालिका चर्चा जाता यत् जनस्य मौलिकाः अधिकाराः औपनिवेशिक-प्रजा-सहितायै समस्त-फ्रांसीय-प्रजायै प्रदातव्याः अथवा न प्रदातव्याः । परन्तु दास-व्यापारे आश्रितानां वणिजां विरोधभयात् राष्ट्रिय-परिषदि कश्चित् अपि अधिनियमः न पारितः । परन्तु अन्ततः 1794तमे वर्षे कन्वेंशन इत्यनेन फ्रांसीयेषु उपनिवेशेषु सर्वेषां दासानां मुक्तेः विधेयकः पारितः । परन्तु एषः अधिनियमः अल्पावधिपर्यन्तम् एव कार्यम् अकरोत् । दशवर्षेभ्यः परं नेपोलियन-वर्येण पुनः दास-प्रथा आरब्धा । उद्यानस्वामिनः स्व-आर्थिकानि हितानि साधयितुम् अफ्रीकीय-नीग्रो-जनान् दासान् कर्तुं स्वतन्त्रतां प्राप्तवन्तः । फ्रांसीयेभ्यः उपनिवेशेभ्यः अन्तिमरूपेण दासप्रथायाः उन्मूलनं 1848तमे वर्षे कृतम् ।

चित्रम् – 14 – दास-मुक्तिः ,
1794 तमवर्षस्य एतस्मिन् चित्रे दासमुक्तेः विवरणम् अस्ति । शीर्षे त्रिवर्णीयस्य बैनर इत्यस्य उद्घोषः अस्ति – " मनुष्यस्य अधिकाराः" । अधस्तनः अभिलेखः विवृणोति – " दासानां (परतन्त्राणां) मुक्तिः"। काचित् फ्रांसीया महिला अफ्रीकीयेभ्यः दासेभ्यः अमेरिकीय-इण्डियन-दासेभ्यः च यूरोपीय-वस्त्राणि दत्त्वा तान् सभ्यान् कर्तुं चेष्टते ।

नूतनाः शब्दाः

नीग्रो इति – अफ्रीकायां सहारा-रेगिस्तानस्य(मरुस्थलस्य) दक्षिण-भागस्य वास्तव्याः स्थानीयाः जनाः । अयम् अपमानजनकः शब्दः अस्ति, यस्य अधुना प्रायः प्रयोगः न क्रियते ।

।। इति पञ्चमः पाठः ।।

6 क्रान्तिः दैनन्दिनं जीवनं च

किं राजनीतिः जनानां वेशं परिधानीयं वा, तेषां वार्तालाप-शैलीम् अथवा तैः पठ्यमानानि पुस्तकानि परिवर्तितुं शक्नोति ? 1789 तमवर्षात् अन्तरतमेषु वर्षेषु फ्रांसस्य पुरुषाणां महिलानां बालानां च जीवनेषु एवंविधानि परिवर्तनानि आगतानि । क्रांतिकारि-सर्वकारैः अधिनियमं निर्माय स्वतन्त्रतायाः समानतायाः च आदर्शाः जीवने क्रियात्मक-रूपेण भवेयुः इति एतदर्थं प्रयासः कृतः ।

बास्तीलस्य विध्वंसात् परं 1789 तम-वर्षस्य ग्रीष्मकाले यः सर्वातिशायी अधिनियमः अस्तित्वं प्रति आगतः सः आसीत् – (सेंसर-शिप) नियन्त्रक-समितेः समाप्तिः इति । प्राचीनस्य लोकतन्त्रस्य अन्तर्गतं समग्र-लिखित-सामग्रीं सांस्कृतिक-गतिविधीः, पुस्तकानि नाटकानि वार्तापत्राणि नाटकानि च नृपस्य नियन्त्रक-अधिकारिणां पार्श्वे प्रेष्यन्ते स्म यदा ते नियन्त्रक-अधिकारिणः तानि नाटकादीनि प्रकाशन-योग्यानि सन्ति इति तानि प्रति आश्वस्ताः भवन्ति स्म ततः परम् एव प्रकाशनस्य मञ्चनस्य च अनुमतिं प्रयच्छन्ति स्म । परन्तु अधुना अधिकाराणां घोषणापत्रेण भाषणस्य अभिव्यक्तेः च स्वतन्त्रता इति नैसर्गिक-अधिकारः अस्ति इति घोषितः । परिणामतः फ्रांसस्य नगरेषु वार्तापत्राणां प्रचारकपत्राणां पुस्तकानाम् अपि च चित्राणां जलौघवत् प्रकाशनं जातं तस्मात् च तानि प्रकाशितानि चित्राणि सा प्रकाशित-सामग्री च तीव्रतया प्रतिग्रामं गता । प्रकाशितेषु चित्रेषु फ्रांसे जायमानानां घटनानां परिवर्तनानां च विवरणं ताः घटनाः च अभिलक्ष्य जनाः टिप्पणीं कुर्वन्ति । (प्रेस) प्रकाशनस्य स्वतन्त्रतायाः अभिप्रायः अयम् आसीत् यत् काम् अपि घटनाम् अभिलक्ष्य पारस्परिकाः विरोधि-विचाराः अपि अभिव्यञ्जयितुं शक्यन्ते स्म इति । (प्रिंट) मुद्रण-माध्यमस्य उपयोगं कृत्वा एकः पक्षः अपरं पक्षं स्वाभिप्रायं बोधयितुम् आत्मवत् च अपरस्य पक्षस्य अपि धारणा स्यात् इति एतदर्थं प्रयत्नं कृतवान् । नाटकं सङ्गीतकार्यक्रमम् उत्सवं जनसभां च प्रति असङ्ख्याः जनाः गन्तुम् आरब्धवन्तः । स्वतन्त्रतायाः न्यायस्य च विषये राजनीतिज्ञानां दार्शनिकानां च पाण्डित्यपूर्णान् लेखान् अवगन्तुं तैः सह सम्बद्धान् भवितुम् अयम् एव लोकप्रियः उपायः आसीत् यतो हि पुस्तकानां पठनं तु केवलं केषाञ्चित् शिक्षितानां कृते एव सम्भवम् आसीत् ।

क्रियाकलापः

एतस्य चित्रस्य वर्णनं स्वशब्दैः कुर्वन्तु । चित्रकारेण लोभस्य समानतायाः न्यायस्य राज्यद्वारा (चर्च) ख्रिस्तालयस्य सम्पत्तेः अधिग्रहणादि-विचाराणां संप्रेषणाय केषां प्रतीकानां साहाय्यं स्वीकृतम् ?

चित्रम् – 15 – देशभक्तः, व्यायाम-प्रभावि-यन्त्रम्, यस्य प्रयोगः स्थूलतायाः न्यूनीकरणाय कर्तुं शक्यते स्म ।

चित्रम् – 16 - मरामहोदयः जनतां सम्बोधयन् वर्तते । लुई-लियोपोल्ड-बा-इलीवर्येण रचितं चित्रम् ।
एतस्य अध्यायस्य माध्यमेन मरा-महोदयस्य विषये किं स्मरन्ति ? तं परितः विद्यमानस्य दृश्यस्य वर्णनं कुर्वन्तु तथा च तस्य लोकप्रियतायाः विषये बोधयन्तु । कस्मिंश्चित् सैलान इत्यस्मिन् आगन्तुकानां विभिन्नवर्गीयजनानाम् एतस्य चित्रस्य विषये का प्रतिक्रिया जाता स्यात् ?

सारांशः

1804 तमे वर्षे नेपोलियन-बोनापार्ट-वर्यः आत्मानं फ्रांसस्य सम्राट्-त्वेन अघोषयत् । सः प्रतिवेशि-यूरोपीयदेशानां विजय-यात्राम् आरब्धवान् । पुरातन-राजवंशान् अपकृत्य सः नूतन-साम्राज्यानि स्थापितवान् अपि च साम्राज्यानां सञ्चालनस्य दायित्वं स्वकुलीयानां जनानां पार्श्वे अददात् । नेपोलियन-वर्यः आत्मानं यूरोपस्य आधुनिकीकरणस्य अग्रदूतः इति मन्यते स्म । तेन निज-सम्पत्तेः सुरक्षायै अधिनियमाः रचिताः अपि च दशमलव-पद्धत्या परिमाणस्य काचित् समाना प्रणाली प्रचालिता । आरम्भे अनेके जनाः नेपोलियन-वर्यः मुक्तिदाता अस्ति इति मन्यन्ते स्म अपि च सः अस्मान् स्वतन्त्रतां दापयिष्यति इति जनाः आशावन्तः आसन् । परन्तु किञ्चित् कालानन्तरम् एव नेपोलियन-वर्यस्य सेनाः आक्रमणकारिण्यः सन्ति इति जनाः वक्तुम् आरब्धवन्तः । अन्ततः 1815 तमे वर्षे नेपोलियन-वर्यस्य पराजयः जातः । यूरोपस्य अन्येषु भागेषु मुक्तेः आधुनिक-अधिनियमानां च प्रसारकाणां तस्य क्रान्तिकारिणाम् उपायानां प्रभावः तस्य मृत्योः बहुकालानन्तरं सर्वेषां पुरतः समागतः ।

चित्रं 17 नेपोलियनः आल्प्सनदीं पारं कुर्वन्नस्ति । डेविडद्वारा रचितं चित्रम् ।

स्वतन्त्रतायाः जनवादि-अधिकाराणां च विचाराः फ्रांसीय-क्रान्तेः महत्त्वपूर्णतमाः न्यास-रूपाः आसन् । एवंविधाः विचाराः एकोनविंशति-शताब्दे फ्रांसतः निर्गम्य अवशिष्ट-यूरोपे प्रसृताः । अपि च एतेषां विचाराणां कारणतः तत्र (सामन्ती व्यवस्था) क्षेत्र-स्वामित्व-व्यवस्थायाः नाशः अभवत् । औपनिवेशिक-समाजाः संप्रभु-राष्ट्र-राज्यस्य स्थापनायाः स्वीयेषु आन्दोलनेषु दासतातः मुक्तेः विचाराय नूतन-परिभाषां दत्तवन्तः । टीपू-सुल्तानः राजा राममोहन-रायः च क्रान्तिकारि-फ्रांसे प्रादुर्भूत-विचारेभ्यः प्रेरणा-गृहीतृषु द्वौ उदाहरण-भूतौ आस्ताम् ।

द्वितीया- मञ्जूषा

राजा राममोहन-रायः तस्मिन् काले यूरोपे प्रसृतेभ्यः नूतन-विचारेभ्यः प्रभावितेषु एकः आसीत् । फ्रांसीय-क्रान्त्याः अनन्तरं जुलाई-क्रान्त्या च तस्य कल्पनायै नूतनं बलं प्रदत्तम् ।
"फ्रांसे 1830 तमे वर्षे जात-क्रान्तेः विषये अवगमनात् परं सः कस्मिंश्चित् अन्यस्मिन् वस्तुनः विषये चर्चाम् एव न करोति स्म । यद्यपि कस्याश्चित् दुर्घटनायाः कारणेन सः तेषु दिनेषु पङ्गवायते स्म परन्तु इङ्गलैण्ड-गमन-काले केपटाउन-मध्ये सः दुराग्रही जातः यत् तस्मै क्रान्ति-कारिणः त्रिवर्णीयाः युद्धपोताः दर्शयेरन्" । सुशोभन-सर्वकारः, नोट्स-आन-द-बङ्गाल-रेनेसाम्, 1946 तमवर्षम् ।

क्रियाकलापः

1. अस्मिन् अध्याये भवन्तः क्रान्तिकारि-जनानां विषये पठितवन्तः, तेषु कस्मिंश्चित् एकस्मिन् विषये अन्याः सूचनाः एकत्र कुर्वन्तु । तस्य जनस्य सङ्क्षिप्त-जीवन-चरित्रं लिखन्तु ।
2. फ्रान्सीय-क्रान्ति-काले एतादृशानां वार्तापत्राणां प्रादुर्भावः जातः येषु प्रत्येकं दिनस्य प्रतिसप्ताहं च घटनानां विवरणं प्रदीयते स्म । कस्याश्चित् एकस्याः घटनायाः विषये सूचनाः चित्राणि च एकत्रीकुर्वन्तु तथा च वार्त्तापत्राय एकं लेखं लिखन्तु । यदि भवन्तः इच्छन्ति तर्हि मिराब्यो-वर्येण ओलम्प-दे-गूञ्ज-वर्येण अथवा रोबेस्प्येर-वर्येण सह काल्पनिकं साक्षात्कारम् अपि कर्तुं शक्नुवन्ति । समूहद्वयं समूहत्रयं वा कुर्वन्तु । प्रत्येकं समूहः फ्रांसीय-क्रान्तेः विषये काञ्चित् भित्ति-पत्रिकां निर्माय श्यामपट्टे दोलयति ।

क्रियाकलापः

प्रश्नाः

1. फ्रांस-देशे क्रान्तेः प्रारम्भः कासु परिस्थितिषु अभवत् ?
2. फ्रांसीय-समाजस्य के समुदायाः क्रान्त्या लाभान्विताः जाताः ? के समुदायाः सत्तां परित्यक्तुं बाध्याः जाताः ? क्रान्तेः परिणामैः समाजस्य के समुदायाः नैराश्यं प्राप्तवन्तः स्युः ?
3. एकोनविंशति-शताब्दस्य विंशति-शताब्दस्य च फ्रांसीया क्रान्तिः विश्वस्य कृते किं न्यास-रूपं समर्पितवती ?
4. तेषां जनवादि-अधिकाराणां सूचीं कुर्वन्तु ये अधिकाराः अद्य अस्माभिः प्राप्ताः सन्ति अपि च येषां उत्पत्तिः फ्रांसीय-क्रान्तेः अस्ति ।
5. किं भवन्तः अनेन तर्केण एकमताः सन्ति यत् सार्वभौमिकानाम् अधिकाराणां सन्देशे नाना अन्तर्विरोधाः आसन् ?
6. नेपोलियन-वर्यस्य उदयः कथम् अवगन्तुं शक्यते ?

॥ इति षष्ठः पाठः ॥

यूरोपे समाजवादः रूसीया क्रान्तिः च

1 सामाजिक-परिवर्तनस्य युगम्

गताध्याये भवन्तः फ्रांसीय-क्रान्तेः परं यूरोपे प्रसरतां स्वतन्त्रतायाः समानतायाः च शक्तिसम्पन्नानां विचाराणां विषये पठितवन्तः । फ्रांसीय-क्रान्तिः सामाजिक-संरचनायाः क्षेत्रे आमूलं परिवर्तनस्य सम्भावनानां सूत्रपातम् अकरोत् । यथा भवन्तः पठितवन्तः , अष्टादश-शताब्दात् प्राक् फ्रांसीयः समाजः सामान्य-रूपेण एस्टेट्स इत्यस्मिन् श्रेणिषु च विभक्तः आसीत् । समाजस्य आर्थिक-सत्तायां सामाजिक-सत्तायां च कुलीनवर्गस्य ख्रिस्तालयस्य च नियन्त्रणम् आसीत् । परन्तु क्रान्तेः परम् एतस्याः संरचनायाः परिवर्तनं शक्यते इति दृश्यमानम् आसीत् । यूरोपेन एशियया च सह विश्वस्य अनेकेषु भागेषु वैयक्तिक-अधिकाराणां स्वरूपे सामाजिक-सत्तायां च कस्य नियन्त्रणं स्यात् – इति अस्मिन् विषये चर्चा प्रारब्धा । भारते अपि राजा राममोहनरायः डेरोजियो-वर्यः च फ्रांसीय-क्रान्तेः महत्त्वस्य उल्लेखं कृतवन्तौ । अपि च अन्ये अपि अनेके जनाः क्रान्तेः परं यूरोपस्य स्थितीनां विषये जायमान-चर्चायां सहभागिनः जाताः । परावर्तिकाले अपि उपनिवेशेषु जात-घटनाभिः अपि एतादृशेभ्यः विचारेभ्यः नूतन-रूपं प्रदातुं साहाय्यं कृतम् ।

परन्तु यूरोपे अपि सर्वे जनाः आमूलं समाजपरिवर्तनस्य पक्षे न आसन् । एतादृशं प्रश्नम् अभिलक्ष्य सर्वेषां जनानां पृथक् पृथक् मतम् आसीत् । अधिकांशतः जनाः परिवर्तनाय सज्जाः आसन् परन्तु ते इच्छन्ति स्म यत् एतत् परिवर्तनं शनैः शनैः स्यात् इति । एकः वर्गः मन्यते स्म यत् समाजस्य आमूलं पुनःसङ्घटनम् आवश्यकम् अस्ति । केचन (Conservatives) रुढिवादिनः आसन् अपि च केचन उदारवादिनः (Liberals) अथवा आमूलं परिवर्तनवादिनः (Radical,रैडिकल) आसन्, एतादृशाः जनाः समाधानानां पक्षे आसन् । तात्कालिक-सन्दर्भे एतेषां शब्दानां कः अभिप्रायः आसीत् ? राजनीतेः आसु धारासु का पृथक्ता आसीत् अपि च कानि कानि तथ्यानि समानानि आसन् ? अत्र अस्माभिः अवधातव्यं यत् एतेषां शब्दानाम् अर्थः प्रत्येकस्मिन् काले परिवेशे च समानः एव न भवति ।

अस्मिन् अध्याये वयम् एकोनविंश-शताब्दस्य कासाञ्चित् राजनैतिक-परम्पराणाम् अध्ययनं करिष्यामः अपि च द्रक्ष्यामः यत् ताभिः परिवर्तनस्य सन्दर्भे कीदृशः प्रभावः निपातितः । तदनन्तरं वयम् एतादृशीं घटनाम् अभिलक्ष्य स्वीयं ध्यानं केन्द्रितं करिष्यामः यस्यां परिवर्तनवादिनः समाजस्य पुनःसङ्घटनस्य कञ्चित् गम्भीरं प्रयासं कृतवन्तः । रूसे जात-क्रान्तेः फलस्वरूपं समाजवादः विंशति-तम-शताब्दस्य स्वरूपस्य कृतनिश्चयानाम् अतीव-महत्त्वपूर्णानां सुदृढ-विचाराणां च शृङ्खलायाः भागः सञ्जातः ।

1.1 उदारवारवादिनः परिवर्तनवादिनः (रैडिकल) रुढिवादिनः च

समाज-परिवर्तनस्य समर्थकेषु कश्चित् समूहः उदारवादिनाम् आसीत् । उदारवादिनः एतादृशं राष्ट्रम् इच्छन्ति स्म यत्र सर्वे धर्माः समान-रूपेण सम्माननं पदं च प्राप्नुयुः । प्रायः

भवतां संज्ञाने स्यात् यत् तस्मिन् काले यूरोपीय-देशेषु प्रायः कस्मैचित् धर्माय अधिकं महत्त्वं दीयते स्म । (ब्रिटेन-सर्वकारः चर्च ऑफ इङ्ग्लैण्ड इत्यस्य समर्थनं करोति स्म,आस्ट्रिया स्पेनः च कैथोलिक-ख्रिस्तालयस्य समर्थकौ आस्ताम्)। उदारवादिनः समूहाः वंशाधारित-शासकानाम् अनियन्त्रित-सत्तायाः चापि विरोधिनः आसन् । ते सर्वकारस्य समक्षे जनमात्रस्य अधिकाराणां संरक्षणस्य पक्षधराः आसन्। तेषां कथनम् आसीत् यत् सर्वकारस्य पार्श्वे कस्यचित् अधिकाराणां हननस्य परिहरणस्य च अधिकारः न भवेत् । अयं समूहः प्रतिनिधित्वे आधारितस्य कस्यचित् एतादृशस्य निर्वाचित-सर्वकारस्य पक्षे आसीत् यः शासकानाम् अधिकारिणां च प्रभावात् मुक्तः भवेत्, अपि च सुप्रशिक्षितया न्यायपालिकया स्थापितानाम् अधिनियमानाम् अनुसारं शासकीय-कार्यस्य सञ्चालनं कुर्यात् । परन्तु अयं समूहः "लोकतान्त्रिकः" (Democrat) न आसीत् । एते जनाः 'सार्वभौम-वयस्क-मताधिकारः भवेत्' इत्यस्मिन् पक्षे अर्थात् 'सर्वे नागराः मतदानं कर्तुम् अधिकृताः भवेयुः' इत्यस्मिन् पक्षे न आसन्। तेषां मान्यता आसीत् यत् मतदानस्य अधिकारः केवलं सम्पन्न-जनानाम् एव भवेत्।

एतद्विपरीतं परिवर्तनवादिनः एतादृशस्य सर्वकारस्य पक्षे आसन् यः सर्वकारः देशस्य अधिकया जनसङ्ख्यया समर्थितः स्यात्। एतेषु बहवः जनाः "महिला-**मताधिकार-आन्दोलनस्य**" अपि समर्थकाः आसन् । उदारवादिनां विपरीतम् एते जनाः भूस्वामिभिः सम्पन्नैः उद्योगपतिभिः च प्राप्ताः ये के अपि विशेषाधिकाराः आसन् तेषां विरोधिनः आसन्। ते निज-सम्पत्तीनां विरोधिनः न आसन् परन्तु केवलं केषाञ्चित् जनानां पार्श्वे एव सम्पत्तेः केन्द्रं स्यात् इति एवंविधस्य संकेन्द्रणस्य ते विरोधम् अवश्यमेव कुर्वन्ति स्म ।

रूढिवादिवर्गः परिवर्तनवादिनाम् उदारवादिनां च इति द्वयोः एव वर्गयोः विरुद्धः आसीत् । परन्तु फ्रांसीय-क्रान्तेः परं तु रुढिवादिनः अपि परिवर्तनस्य आवश्यकतां स्वीकर्तुम् आरब्धवन्तः । पुरातनकाले अर्थात् अष्टादश-शताब्दे रूढिवादिनः सामान्यतया परिवर्तनसम्बद्धानां विचाराणां विरोधं कुर्वन्ति स्म । परन्तु ते अपि एकोनविंशति-शताब्दं यावत् अनुभूतवन्तः यत् किञ्चित् परिवर्तनम् आवश्यकम् अस्ति इति । परन्तु ते इच्छन्ति स्म यत् अतीतस्य सम्माननं भवेत् इति अर्थात् अतीतस्य सर्वथा अवहेलनं न स्यात् अपि च परिवर्तनस्य प्रक्रिया किञ्चित् मन्दा भवेत्।

फ्रांसीय-क्रान्ते परम् उत्पन्नायाः राजनैतिक-अस्थिरतायाः काले सामाजिक-परिवर्तने केन्द्रितानाम् एतेषां विविध-विचाराणां मध्ये पर्याप्तानि परिवर्तनानि जातानि । एकोनविंशतिशताब्दे क्रान्तेः राष्ट्रिय-कायान्तरणस्य विभिन्नप्रयासैः एतासां सर्वासां राजनैतिक-धाराणां सीमाः सम्भावनाः च स्पष्टीकृताः ।

1.2 औद्योगिक-समाजः सामाजिक-परिवर्तनं च

एतानि राजनैतिकानि आकर्षणानि कस्यचित् नूतनयुगस्य द्योतकानि आसन् । अयं कालः गहन-सामाजिकानाम् आर्थिकानां च परिवर्तनानाम् आसीत्। अयं तादृशः कालः आसीत् यदा नूतननगराणि अस्तित्वम् आयान्ति स्म , नूतनानि नूतनानि औद्योगिक-क्षेत्राणि विकसन्ति स्म। रेल-संस्थायाः पर्याप्तविस्तारः जातः आसीत् अपि च औद्योगिक-क्रान्तिः सम्पन्ना आसीत्।

औद्योगिकीकरणेन महिलाः पुरुषाः बालाः इत्यादयः सर्वे अपि शिल्पशालासु नियोजिताः । कार्यहोराः अर्थात् पर्यायः दीर्घकालीनः भवति स्म पारिश्रमिकः च अत्यल्पः आसीत्। अवृत्तिः इति सामान्या समस्या आसीत्। औद्योगिक-वस्तूनाम् अभियाञ्चायां न्यूनत्वे

नूतनाः शब्दाः

मताधिकार-आन्दोलनम्- मतदान-अधिकारं प्राप्तुं सञ्चालितम् आन्दोलनम्।

चित्रम् – 1 – एकोनविंश-शताब्दस्य मध्ये लन्दनस्य निर्धनानाम् दशा तात्कालीनस्य जनस्य दृष्ट्या,
स्रोतः – हेनरी-मेह्यूः इति , लन्दन-लेबर-ऐण्ड-लन्दन-पुअर, इति, 1861तमवर्षम् ।

जाते तु आजीविकारहितानां जनानां सङ्ख्या वर्धते स्म । नगराणि त्वरया वसन्ति प्रसरन्ति च स्म अतः आवासस्य स्वच्छतायाः च कार्यम् अपि प्रायः कठिनं भवति स्म । प्रायः सर्वाः शिल्पशालाः वैयक्तिक-स्वामित्वस्य अधीनाः आसन् । अनेकेषां परिवर्तनवादिनाम् उदारवादिनां च पार्श्वे अपि पर्याप्त-सम्पत्तिः आसीत् अपि च तेषाम् अधीनत्वे अनेके जनाः सेवां कुर्वन्ति स्म ।

ते जनाः वाणिज्यस्य औद्योगिक-व्यवसायानां च माध्यमेन सम्पत्तेः अर्जनं कृतवन्तः आसन् । अतः ते इच्छन्ति स्म यत् यदि एवंविधाः प्रयासाः आधिक्येन वर्धेरन् इति, अपि च ते अनुभवन्ति स्म यत् यदि श्रमिकाः स्वस्थाः भवेयुः नागराः च सुपठिताः स्युः तर्हि अनया व्यवस्थया पर्याप्तः लाभः स्वीकर्तुं शक्यते । एतद्विधाः जनाः जन्मनः प्राप्यमाणानां विशेष-अधिकाराणां विरोधिनः आसन् । वैयक्तिके प्रयासे श्रमे उद्यमशीलतायां च तेषाम् अतीव विश्वासः आसीत् । तेषां मान्यता आसीत् यत् यदि प्रत्येकं जनाय वैयक्तिक-स्वतन्त्रता प्रदीयेत, निर्धनाः वृत्तिम् आजीविकां च प्राप्नुयुः, अपि च यदि येषां पार्श्वे धनादिकम् अस्ति तेभ्यः निर्बाधतया कार्यं कर्तुम् अवसरः भवेत् तर्हि समाजः प्रोन्नतिं कर्तुं शक्नोति । एतस्मात् कारणात् एव एकोनविंशति-शताब्दस्य आरम्भिकेषु दशकेषु समाज-परिवर्तनस्य इच्छवः बहवः कार्यकर्तारः अर्थात् सेवारताः स्त्रियः पुरुषाः च उदारवादिनः परिवर्तनवादिनः च समूहान् परितः एकत्र अभवन् ।

यूरोपे 1815तमे वर्षे यादृशाः सर्वकाराः जाताः, तेभ्यः मुक्तये केचन राष्ट्रवादिनः उदारवादिनः परिवर्तनवादिनः च आन्दोलनकारिणः क्रान्तेः पक्षे आसन् । फ्रांसे इटल्यां जर्मन्यां रूसे च एतादृशाः जनाः क्रान्तिकारिणः जाताः । ते च नृपान् राजसिंहासनात् च्युतान् कर्तुं प्रयत्नवन्तः । राष्ट्रवादिनः कार्यकर्तारः क्रान्तेः माध्यमेन एतादृशानां राष्ट्राणां स्थापनां कर्तुम् इच्छन्ति स्म, येषु सर्वे नागराः समानरूपेण अधिकारान् प्राप्नुयुः । 1815तमवर्षात् परम् इटलीदेशस्य राष्ट्रवादी गिसेप्पे-मेजिनि-वर्यः इदम् एव लक्ष्यं प्राप्तुं स्वीयैः समर्थकैः सह मिलित्वा नृपं विरुध्य षडयन्त्रम् अरचयत् । भारतस्य, सम्पूर्ण-संसारस्य च राष्ट्रवादिनः तस्य रचनाः पठन्ति स्म ।

1.3 यूरोपे समाजवादस्य आगमनम्

समाजस्य पुनःसङ्घटनस्य सम्भवतः सर्वाधिक-दूरगामि-दृष्टेः प्रदायिका विचारधारा समाजवादः इति एव आसीत् । एकोनविंशति-शताब्दस्य मध्यकालं यावत् यूरोपस्य समाजवादस्य सुपरिचितः विचारः आसीत् । यूरोपः आत्मानं प्रति बहूनां जनानां ध्यानाकर्षणं करोति स्म ।

समाजवादिनः निज-सम्पत्तेः विरोधिनः आसन् । अर्थात् ते सम्पत्तौ निज-स्वामित्वं भवेत् इति विषयं समीचीनं न मन्यन्ते स्म । तेषां कथनम् आसीत् यत् सम्पत्तेः निज-स्वामित्वस्य व्यवस्था एव सर्वासां समस्यानां मूला अस्ति । ते इत्थं किमर्थं मन्यते स्मः ? तेषां तर्कः आसीत् यत् बहूनां जनानां पार्श्वे सम्पत्तिः तु अस्ति यया अन्ये जनाः वृत्तिम् अपि प्राप्नुवन्ति परन्तु समस्या इयम् अस्ति यत् सम्पन्न-जनस्य केवलं स्वीये लाभे एव दृष्टिः भवति, तादृशः जनः अन्येषां विपन्नानां विषये न चिन्तयति ते विपन्नाः जनाः एव तस्य सम्पन्नस्य जनस्य सम्पत्तेः उत्पादकतां वर्धयन्ति । अतः यदि सम्पत्तौ कस्यचित् एकस्य जनस्य अधिकारः न भूत्वा सम्पूर्णस्य समाजस्य अधिकारः भवेत् तर्हि सामूहिक-सामाजिक-हितानां विषये आधिक्येन अवधानं कर्तुं शक्यते । समाजवादिनः एवंविधं परिवर्तनम् इच्छन्ति स्म, एतदर्थं तैः व्यापक-परिमाणेन अभियानम् अपि चालितम् ।

कश्चित् समाजः सम्पत्तिं विना कथं विकासं कर्तुं शक्नोति ? समाजवादि-समाजस्य कः आधारः भविष्यति ?

समाजवादिनां मनःसु भविष्यतः काचित् सर्वथा भिन्ना दृष्टिः आसीत् । केचन समाजवादिनः सामूहिक-उद्यमः (को-आपरेटिव) भवेत् इत्यस्मिन् विचारे रुचिमन्तः आसन् । इङ्ग्लैण्डस्य प्रख्यातः उद्योगपतिः राबर्ट-ओवेनः (1771-1858) इण्डियाना (अमेरिका) इत्यस्मिन् स्थाने नूतन-समन्वयः (New Harmony) इति नाम्ना नूतन-विधस्य समुदाय-सङ्घटनस्य प्रयासं कृतवान् । केचन समाजवादिनः मन्यन्ते स्म यत् केवलं वैयक्तिक-प्रयासेन बहुव्यापकानि सामूहिक-क्षेत्राणि न निर्मातुं शक्यन्ते । ते समाजवादिनः इच्छन्ति स्म यत् सर्वकारः स्वीय-पक्षतः सामूहिक-कृषेः वर्धापनं कुर्यात् इति । उदाहरणार्थम् – फ्रांसे लुई-ब्लाङ्कः (1813-1882) इच्छति स्म यत् सर्वकारः पुञ्जीवादिनाम् उद्यमानां स्थाने सामूहिक-उद्यमानां वर्धापनं कुर्यात् । (को-आप-रेटिव) इति एवंविधानां जनानां समूहाः आसन् ये समूहाः सम्भूय वस्तूनि निर्मान्ति स्म । सामूहिक-श्रमेण यः लाभः अर्ज्यते स्म, सः प्रत्येकं सदस्यद्वारा कृतस्य कार्यस्य अनुगुणं परस्परं वण्ट्यते स्म ।

क्रियाकलापः

कुर्वन्तु यत् निजसम्पत्तेः अधिकारस्य समाप्तये तस्य स्थाने च सामूहिकस्वामित्वस्य व्यवस्था प्रवर्त्तिता स्यात् इति प्रश्ने भवतां क्षेत्रे काचित् गोष्ठी आयोजिता वर्तते । निम्नलिखितजनानां रूपेण तस्यां गोष्ठ्यां भवन्तः यत् भाषणं करिष्यन्ति तत् लिखन्तु -

- कश्चन कृषिजीविश्रमिकः
- कश्चन मध्यवर्ती भूस्वामी
- कश्चन गृहस्वामी

क्रियाकलापः

निज-सम्पत्ति-विषये पूञ्जीवादि-समाजवादि-विचारधारामध्ये अन्तर्द्वयं बोधयन्तु ।

कार्ल-मार्क्सः (1818-1882) तथा च फ्रेडरिक-एङ्गेल्सः (1820-1895) इति एताभ्याम् एतस्मिन् विषये नूतनाः तर्काः समुपस्थापिताः । मार्क्सस्य विचारः आसीत् यत् औद्योगिक-समाजः "पूञ्जीवादी" समाजः अस्ति इति । शिल्पशालासु नियोजित-पूञ्ज्यां पूञ्जीपतीनां स्वामित्वम् अस्ति, अपि च पूञ्जीपतयः श्रमिकाणां श्रमेण एव लाभान्विताः भवन्ति । मार्क्स-वर्यस्य अभिप्रायः आसीत् यत् यावत्पर्यन्तं निज-पूञ्जीपतयः एवंविधस्य लाभस्य सञ्चयं निरन्तरं करिष्यन्ति तावत्पर्यन्तं श्रमिकाणां स्थितेः परिवर्तनं न भवितुं शक्नोति । स्वस्थितेः परिवर्तनाय श्रमिकैः पूञ्जीवादस्य निजसम्पत्तौ आधारितायाः शासनस्य व्यवस्थायाः वा सर्वथा उत्पाटनं करणीयं भविष्यति । मार्क्समहोदयः विश्वसिति स्म यत् आत्मानं पूञ्जीवादि-शोषणात् मोचयितुं श्रमिकैः अत्यन्तं भिन्नप्रकारकस्य समाजस्य निर्माणं करणीयं भविष्यति यस्मिन् सम्पूर्ण-सम्पत्तौ सम्पूर्णसमाजस्य सामाजिकं नियन्त्रणं स्वामित्वं च स्यात् । सः मार्क्स-महोदयः एवंविधस्य समाजस्य नामकरणं साम्यवादि-समाजः (कम्युनिस्ट) इति रूपेण अकरोत् । मार्क्स-वर्यः विश्वसिति स्म यत् पूञ्जीपतिभिः सह जायमाने सङ्घर्षे अन्ततः विजयः श्रमिकाणाम् एव भविष्यति । तस्य मार्क्स-वर्यस्य दृष्ट्या साम्यवादि-समाजः एव भविष्यत्कालीनः समाजः भविष्यति ।

1.4 समाजवादाय समर्थनम्

1870 तमदशकस्य आगमनेन सह एव समाजवादि-विचाराः सम्पूर्णे यूरोपे प्रसृताः आसन् । समाजवादिभिः स्वप्रयासेषु समन्वयं स्थापयितुं द्वितीय-इण्टर-नैशनल इति नाम्ना कस्याश्चित् अन्ताराष्ट्रिय-संस्थायाः अपि स्थापना कृता ।

इङ्ग्लैण्डस्य जर्मन्याः च श्रमिकाः स्वीय-जीवन-शैल्यां कार्यस्थितिषु च परिष्कारं कर्तुं सङ्घटनानां निर्माणम् आरब्धवन्तः आसन् । आपत्काले स्वीय-सदस्यानां साहाय्यार्थम् एतादृशैः सङ्घटनैः कोषाः स्थापिताः तथा च कार्यहोराः न्यूनाः भवेयुः इति एतदर्थम् अपि च मतदान-अधिकाराय आन्दोलनस्य चर्चायाः च आरम्भः कृतः । जर्मन्यां (सोशल-डेमोक्रैटिक-पार्टी) सामाजिक-लोकतान्त्रिक-दलम्(एस.पी.डी) इत्यनेन सह एतेषां सङ्घटनानां घनिष्ठसम्बन्धाः आसन् , अपि च संसदीय-निर्वाचनेषु ते दलस्य साहाय्यम् अपि कुर्वन्ति स्म । 1905तमवर्षं यावत् ब्रिटेनस्य समाजवादिनः अपि च (ट्रेड-यूनियन) वाणिज्यिकसंस्थायाः आन्दोलनकारिणः श्रमिकदलम् (लेबर पार्टी) इति नाम्नः स्वीयम् एकं पृथक् दलं सङ्घटितवन्तः (निर्मितवन्तः) आसन् । फ्रांसे अपि सामाजिक-दलम् (सोशलिस्ट-पार्टी) इति नाम्नः एतादृशस्य एव एकस्य दलस्य सङ्घटनं जातम् । परन्तु 1914तमवर्षं यावत् यूरोपे समाजवादिनः कुत्रापि सर्वकारं निमार्तुं साफल्यं न प्राप्तवन्तः । संसदीय-राजनीतौ तेषां प्रतिनिधयः व्यापक-सङ्ख्यया निरन्तरं विजयन्ते स्म, ते अधिनियम-निर्माणे अपि महत्त्वपूर्णां भूमिकां निरूढवन्तः परन्तु सर्वत्र सर्वकाराणां रूढिवादिनाम् उदारवादिनां परिवर्तनवादिनां चैव प्रभावः यथावत् आसीत् ।

चित्रम् -2 – इदं पेरिस-कम्यून इत्यस्य 1871तमवर्षस्य चित्रम् अस्ति । एतस्मिन् चित्रे 1871तमवर्षस्य मार्च-मई-मासयोः मध्ये जातः जनविद्रोहः दर्शितः अस्ति । अयम् एतादृशः कालः आसीत् यदा श्रमिकान् सामान्य-जनान् व्यवसायिकान् राजनैतिक-कार्यकर्तॄन् च आधृत्य यः सर्वकारः सङ्घटितः आसीत् तेन सङ्घटितेन जन-सर्वकारेण पेरिसस्य नगर-परिषदः (कम्यून) अधिग्रहणं, कृतम् आसीत् । इयम् अव्यवस्था फ्रांसीय-सर्वकारस्य नीतीः प्रति वर्धमानस्य असन्तोषस्य कारणात् उत्पन्ना । यद्यपि अन्ततः पेरिस-परिषदः नाशः सर्वकारीय-सैन्य-समूहैः कृतः परन्तु आविश्वं समाजवादिनः समाजवादि-क्रान्तेः पूर्वपीठिकायाः रूपेण एतस्याः परिवर्तित-व्यवस्थायाः महान् उत्सवः आचरितः । पेरिस-परिषद् द्वाभ्यां विशेषकारणाभ्याम् अद्य अपि स्मर्यते । प्रथमः – श्रमिकाणां रक्त-ध्वजस्य उदयः एतस्याः एव घटनायाः अभवत् । (कम्युनार्डो) क्रान्तिकारिणः आत्मनः कृते अमुम् एव ध्वजं चितवन्तः आसन् । द्वितीयः - "मार्सेयेस" इत्यस्मै, यः एतस्याः घटनायाः परं पेरिस-परिषदः मुक्ति-सङ्घर्षस्य च प्रतीकभूतः जातः । उल्लेखनीयम् अस्ति यत् एतद् गीतं मूलतः 1792तमवर्षे युद्धगीतस्य रूपेण लिखितम् आसीत् । (सौजन्यम् – लन्दन-न्यूज, इति, 1871तमवर्षम्) ।



।। इति प्रथमः पाठः ।।

2 रूसीया क्रान्तिः

यूरोपस्य सर्वेषु पश्चवर्तिषु औद्योगिक-देशेषु अन्यतमः रूसः आसीत् तत्र इदं समीकरणं परिवर्तितम् । 1917 तमवर्षीयायाः अक्तूबर-क्रान्तेः माध्यमेन रूसस्य सत्तायाः समाजवादिभिः अधिग्रहणं कृतम् । फैब्रवरी-मासस्य 1917 तमवर्षे राजशासनस्य पतनम् अपि च अक्तूबर-मासीयाः घटनाः एव रूसीय-क्रान्तिः इति रूपेण उच्यन्ते । इत्थं किमर्थम् अभवत् ? क्रान्ति-काले रूसस्य सामाजिकी राजनैतिकी च अवस्था कीदृशी आसीत् ? एतेषां प्रश्नानाम् उत्तराणि अन्वेष्टुम्, आगच्छन्तु , क्रान्तेः पूर्ववर्ति-वर्षेषु जात-परिस्थितिषु दृष्टिपातं कुर्मः ।

चित्रम् – 3 – सेण्ट-पीटर्सबर्ग-स्थिते विंटर-पैलेस इत्यस्य व्हाइट-हाल इत्यस्मिन् जार- निकोलस-द्वितीयः,1990.

अर्नेस्ट-लिपगार्ट-द्वारा (1847-1932) चित्रितं चित्रम् ।

2.1 रूसीयं साम्राज्यम् , 1914

1914तमे वर्षे रूसस्य तस्य च सम्पूर्णे साम्राज्ये जार-निकोलस-द्वितीयस्य शासनम् आसीत् । मास्को इत्यस्य समीपस्थानि भूक्षेत्राणि अतिरिच्य वर्तमान-कालिकस्य फिनलैण्डस्य, लातवियायाः, लिथु-आनियायाः, एस्तोनियायाः, पोलैण्डस्य यूक्रेनस्य बेलारूसस्य च कानिचन क्षेत्राणि रूसीय-साम्राज्यस्य अङ्गभूतानि आसन् । रूसीयं साम्राज्यं प्रशान्त-महासागरं यावत् प्रसृतम् आसीत् । वर्तमानकालिकैः मध्य-एशियायि-राज्यैः सह जार्जिया, आर्मेनिया अजरबैजान इत्येते चापि एतस्य एव साम्राज्यस्य अन्तर्गताः आसन् । रूसे ग्रीक-आर्थोडाक्स-ख्रिस्तालयात् प्रादुर्भूता शाखा रूसी-आर्थोडाक्स-क्रिश्चियैनिटि इति आसीत्, क्रिश्चियैनिटी इत्यस्याः समर्थकाः

चित्रम् – 4 – 1914 तमवर्षीयः यूरोपः,
मानचित्रे रूसीय-साम्राज्यं प्रथमे विश्व-युद्धे च सम्मिलिताः यूरोपीय-देशाः दर्शिताः सन्ति ।

बहुमते आसन् । परन्तु एतस्य साम्राज्यस्य अन्तर्गताः कैथलिकाः,प्रोटेस्टेण्ट्, यवनाः बौद्धाः चापि सम्मिलिताः आसन् ।

2.2 अर्थव्यवस्था समाजः च

विंशति-तम-शताब्दस्य आरम्भे एव रूसस्य जनसङ्ख्यायाः कश्चित् महान् भागः कृषिकार्यं करोति स्म । रूसीय-साम्राज्यस्य प्रायः 85प्रतिशतं जनता आजीविकायै कृषिकार्ये एव आश्रिता आसीत् । यूरोपस्य कस्मिन् अपि देशे कृषि-आश्रितायाः जनतायाः प्रतिशतम् एतावत् एव आसीत् । उदाहरणार्थम् – फ्रांसे जर्मन्यां च कृषिकार्ये आश्रिता जनसङ्ख्या चत्वारिंशत्तः पञ्चाशत्तः च प्रतिशतात् अधिका न आसीत् । रूसीय-साम्राज्यस्य कृषकाः स्वीयाभिः आवश्यकताभिः सह विपण्याः कृते अपि उत्पादनं कुर्वन्ति स्म । रूस-देशः अन्नस्य कश्चित् महान् निर्यातकः आसीत् ।

चित्रम् – 5 – युद्धात् पूर्वं सेण्ट-पीटर्स-बर्गे अवृत्तिकाः कृषकाः ,
अनेके जनाः धर्मार्थ-भोजनालयेषु भोजनं कुर्वन्ति स्म तथा च जीर्णेषु शीर्णेषु च भवनेषु निवसन्ति स्म ।

शिल्पशालाः अत्यल्पाः आसन् । सेण्ट-पीटर्स-बर्गः मास्को च इति प्रमुखे औद्योगिक-क्षेत्रे आसन् । यद्यपि प्रायः उत्पादनं शिल्पकाराः एव कुर्वन्ति स्म । परन्तु शिल्पकाराणां कार्यशालाभिः सह महत्यः शिल्पशालाः अपि विद्यमानाः आसन् । अनेकाः शिल्पशालाः 1890तमे दशके तदा आरब्धाः आसन् यदा रूसस्य रेलतन्त्रं विस्तार्यते स्म । तस्मिन् काले एव रूसीयासु शिल्पशालासु विदेशिनिवेशः अपि तीव्रतया वर्धितः आसीत् । एतस्मात् कारणात् केषुचित् वर्षेषु एव रूसस्य प्रस्तराङ्गारस्य उत्पादने अपि द्विगुणितस्य स्टीलोत्पादने च अपि चतुर्गुणितं वर्धनम् अभवत् । 1990 तमवर्षं यावत् केषुचित् वर्षेषु शिल्पकाराणां शिल्पशाला-श्रमिकाणां च सङ्ख्या प्रायः परस्परं समाना जाता आसीत् ।

अधिकतराः शिल्पशालाः उद्योगपतीनां निज-सम्पत्ति-रूपेण आसन् । श्रमिकेभ्यः न्यूनतम-वेतनं भवेत् अपि च कार्य-पर्याय-होराः निश्चिताः भवेयुः – एतादृश्याः व्यवस्थायाः सुसञ्चालनाय सर्वकारीय-विभागीयाः जनाः महतीनां शिल्पशालानाम् निरन्तरं निरीक्षणं कुर्वन्ति स्म । परन्तु शिल्प-शालानां निरीक्षकाः अपि नियमानाम् उल्लङ्घनं नियन्त्रयितुं वारयितुं च विफलाः भवन्ति स्म । शिल्पकाराणां खण्डेषु कार्यशालासु च कार्य-पर्यायस्य होराः प्रायः पञ्चदश-होराः यावत् भवति स्म परञ्च शिल्पशालासु श्रमिकाः सामान्यतया दशभिः अथवा द्वादशभिः होराभिः पर्यायत्वेन कार्यं कुर्वन्ति स्म । श्रमिकाणां निवासाय अपि प्रकोष्ठ-प्रभृतिः निवासस्थानं यावत् विभिन्नाः व्यवस्थाः विद्यमानाः आसन् ।

चित्रम्–6– क्रान्तेः पूर्वं रूसे कस्मिंश्चित् डार्मिटरी इत्यस्मिन् निर्मिते बङ्कर इत्यस्मिन् शयानाः श्रमिकाः ,
ते पर्यात्वेन शेरते स्म अपि च सकुटुम्बं न वसितुं शक्नुवन्ति स्म ।

सामाजिकस्तरेण श्रमिकाः विभक्ताः आसन् । केचन श्रमिकाः स्वीयैः मूल-ग्रामैः सह अधुना अपि घनिष्ठ-रूपेण सम्बद्धाः आसन् । बहवः श्रमिकाः स्थायि-रूपेण नगरेषु एव उषितवन्तः । तादृशानां श्रमिकाणां योग्यतायाः दक्षतायाः च स्तरे अपि महद् अन्तरम् अस्ति । सेण्ट-पीटरबर्गस्य केनचित् श्रमिकेण उक्तम् आसीत् – धातु-कर्मिणः आत्मानं श्रमिकाणां स्वामिनः मन्यन्ते स्म । तेषां कार्ये अधिक-प्रशिक्षणस्य निपुणतायाः च आवश्यकता भवति स्म" । 1914तमे वर्षे शिल्पशाला-श्रमिकेषु महिलानां सङ्ख्या एकत्रिंशत् प्रतिशतम् आसीत् परन्तु पुरुष-श्रमिकाणाम् अपेक्षया ताभ्यः महिला-श्रमिकाभ्यः न्यूनं वेतनं दीयते स्म (पुरुषाणां वेतनस्य दृष्ट्या अर्थात् अपि तृतीयांशं यावत् न्यूनम्) । श्रमिकाणां मध्ये विद्यमानम् अन्तरं तेषां वेशे व्यवहारे च अपि स्पष्टतया दृश्यते स्म । यद्यपि कैश्चित् श्रमिकैः अनाजीविकायाः आर्थिक-सङ्कटकाले च पारस्परिक-साहाय्यार्थं सङ्घटनानि निर्मितानि आसन् परन्तु एतादृशानि सङ्घटनानि अल्पीयांसि आसन् ।

एतेषु विभेदेषु सत्सु अपि , यदा कश्चित् वृत्तितः निष्कास्यते स्म अथवा स्वामिनां पार्श्वे कश्चित् अपरस्य दूषणं करोति स्म तदा श्रमिकाः सङ्घीभूय कार्य-बहिष्कारं कुर्वन्ति स्म । 1896-1897 इति वर्षयोः मध्ये वस्त्रागारेषु तथा च 1902तमे वर्षे धातोः शिल्पशालासु एतादृशाः कार्यबहिष्काराः व्यापक-सङ्ख्यया आयोजिताः ।

ग्रामस्य अधिकतर-भूमौ कृषकाः कृषिकार्यं कुर्वन्ति स्म । परन्तु महतीषु सम्पत्तिषु भूस्वामिनां राजशासनस्य आर्थो-डाक्स-ख्रिस्तालयस्य च अधिग्रहणम् आसीत् । श्रमिकाः इव कृषकाः अपि विभक्ताः आसन् । कृषकाः अतीव धार्मिकाः आसन् । विरलान् अपवादान् त्यजामः चेत् ते कृषकाः भूस्वामिनां शासकानां च लेशम् अपि सम्माननं न कुर्वन्ति स्म । शासकाः भूस्वामिनः च यां सत्तां प्रतिष्ठां च प्राप्तवन्तः आसन् ते द्वे अपि लोकप्रियतायाः कारणात् न अपितु जार-महोदयं प्रति तेषां निष्ठानां सेवानां च कारणात् लब्धे आस्ताम् । अत्रत्या स्थितिः फ्रांस-समा न आसीत् । उदाहरणार्थम् - , फ्रांसीय-क्रान्ति-काले ब्रिटनी इत्यस्य कृषकाः न केवलं शासकानां सम्माननं कुर्वन्ति स्म अपितु ते शासकान् संरक्षयितुं युद्धानि अपि अकुर्वन् । एतद्विपरीतम्, रूसीयाः कृषकाः इच्छन्ति स्म यत् शासकेभ्यः भूमेः परिहरणं कृत्वा कृषकाणां मध्ये तस्याः वण्टनं भवेत् इति । बहुधा ते राजस्वम् अपि न अर्पयन्ति स्म । अनेकेषु स्थानेषु तु भूस्वामिनां हननम् अपि कृतम् आसीत् । 1902 तमे वर्षे रूसस्य दक्षिणभागे एतादृश्यः घटनाः व्यापक-परिमाणेन जाताः । 1905तमे वर्षे तु सम्पूर्णे रूसदेशे एव एतादृश्यः घटनाः घटितुम् आरब्धवत्यः ।

रूसीयाः कृषकाः यूरोपस्य अन्येषां कृषकाणाम् अपेक्षया केनचित् अन्येन कारणेन अपि भिन्नाः आसन् । अत्रत्याः कृषकाः यथाकालं समग्रां भूमिं कम्यून (मीराय) प्रशासनिकसमूहाय अर्पयन्ति स्म अपि च पुनः (कम्यून) प्रशासनिकसमूहः एव प्रत्येकं कुटुम्बस्य आवश्यकानुरूपं कृषकेभ्यः भूमेः आवण्टनं करोति स्म ।

2.3 रूसे समाजवादः

1914तमवर्षात् पूर्वं रूसे अपि राजनैतिक-दलानि असंवैधानिकानि आसन् । मार्क्स-वर्यस्य समाजवादिभिः समर्थकैः 1898तमे वर्षे रूसीय-सामाजिक-लोकतान्त्रिक-श्रमिक-दलम् (रशियन-सोशल-डेमोक्रैटिक-वर्कर्स-पार्टी) सङ्घटितम् । सर्वकारीयस्य आतङ्कस्य कारणात् अनेन दलेन असंवैधानिक-सङ्घटनस्य रूपेण कार्यं करणीयं भवति स्म । अनेन दलेन एकस्य वार्त्तापत्रस्य प्रकाशनम् अपि क्रियते स्म ,पत्रसूचना-माध्यमेन श्रमिकाः सुसङ्घटिताः क्रियन्ते स्म तथा च कार्य-बहिष्कारादि-कार्यक्रमाः अपि आयोज्यन्ते स्म ।

केचन रूसीयाः समाजवादिनः अनुभवन्ति स्म यत् रूसीयाः कृषकाः यथा काले काले भूमेः आवण्टनं कुर्वन्ति इति, तस्मात् ज्ञायते यत् तादृशाः जनाः स्वाभाविक-रूपेण समाजवादि-भाव-युक्ताः सन्ति । अनेन एव आधारेण तेषां मतम् आसीत् यत् रूसे श्रमिकाः नैव अपि तु कृषकाः एव क्रान्तेः मुख्य-शक्तित्वेन भविष्यन्ति इति । ते आन्दोलनस्य नेतृत्वं करिष्यन्ति अपि च अनेन रूसः अन्येषां देशानाम् अपेक्षया शीघ्रमेव समाजवादि-देशः भविष्यति । एकोनविंश-शताब्दस्य अन्तवर्तिकाले रूसस्य ग्रामीणेषु क्षेत्रेषु समाजवादिनः अतीव सक्रियाः आसन् । 1900 तमे वर्षे ते सामाजवादि-क्रान्तिकारि-दलस्य घटनम् अकुर्वन् । अनेन दलेन कृषकाणाम् अधिकारेभ्यः सङ्घर्षाः कृताः तथा च अभियाचितं यत् भूस्वामिभिः अधिग्रहीता भूमिः शीघ्रमेव कृषकेभ्यः प्रत्यर्पणीया इति ।

स्रोतः कः

तस्मिन् काले समाजवादिनः कार्यकर्तुः अलेक्जेण्डर-श्ल्याप्निकोवस्य वक्तव्यात् ज्ञायते यत् उपवेशनानि कथम् आयोज्यन्ते स्म -

"प्रत्येकं शिल्प-शालाम् आपणं च गत्वा प्रचारः क्रियते स्म । अध्ययन-सत्राणि अपि प्रचाल्यन्ते स्म - संबन्धित-प्रकरणानि अथवा अधिकृत-विषयान् वैधानिक-उपवेशनानि अपि आहूयन्ते स्म, परन्तु एतादृशः गतिविधिः श्रमिकवर्गस्य मुक्तये यः व्यापक-सङ्घर्षः चलति स्म तत्र एव एतादृशः कार्यक्रमः अपि निबद्ध्यते स्म । असंवैधानिक-उपवेशनानि ... कार्यकाले शीघ्रमेव आयोज्यन्ते स्म परन्तु मध्यांश-काले, सांयकाले, मुख्यद्वारात् बहिः,प्राङ्गणे, बहुतलीयभवनस्य सोपानेषु व्यवस्थितरूपेण उपवेशनानाम् आयोजनं क्रियते स्म । अतीव जागरूकाः श्रमिकाः द्वारस्य समीपे "प्लग" इत्यस्य कार्यं निर्वहन्ति स्म तथा च मुख्यद्वारे समग्र-सम्मर्दः एकत्र भवति स्म । यत्र सर्वेषां पुरतः कश्चित् एकः आन्दोलनकारी उत्तिष्ठति स्म । स्वामी दूरवाण्या आरक्षकान् एतस्मिन् विषये सूचयति स्म परन्तु यावत्-पर्यन्तम् आरक्षकाः आयान्ति स्म तावत्पर्यन्तं भाषणानि समाप्तिं यान्ति स्म, अपि च तत्र आवश्यक-निर्णयाः स्वीक्रियन्ते स्म -।"

अलेक्जेण्डर-श्ल्याप्निकोवः, आन-दि-ईव-आफ-1917, रेमिनिसेंसेज-फ्राम-द-रेवलूशनरी-अण्डर-ग्राउण्ड इति ।

कृषक-सम्बद्ध-प्रश्ने सामाजिक-लोकतान्त्रिक-वर्गः(social Democrats) समाजवादि-क्रान्तिकारिभ्यः एकमतः नासीत् । लेनिनस्य मतम् आसीत् यत् कृषकेषु ऐक्यं नास्ति, ते विभक्ताः सन्ति । केचन कृषकाः निर्धनाः आसन् अपि च केचन धनिकाः, केचन श्रमिकाः आसन् तथा च केचन पूञ्जिपतयः आसन् ये च सेवकैः कृषिकार्यं कारयन्ति स्म । अनेन पारस्परिक-वैषम्येन (विभेदः इति) एव ते सर्वे समाजवादिनः आन्दोलनस्य सहभागिनः न भवितुं शक्नुवन्ति स्म ।

साङ्घटनिक-रणनीतेः दृष्ट्या दले गहन-मतभेदाः आसन् । व्लादिमीर-लेनिनः चिन्तयति स्म यत् जार(राजशासिते) रूस-सदृशे दमनकारि-समाजे दलेन अत्यन्तं सुशासितेन भवितव्यम् अपि च निज-सदस्यानां सङ्ख्यया स्तरेण च तेषां नियन्त्रणं भवेत् । द्वितीयः वर्गः (मेन्शेविक इति) मन्यते स्म यत् दले सर्वेषां सदस्यता स्यात् ।

2.4 अव्यवस्थितः कालः - 1905 तमवर्षीया क्रान्तिः

रूसः **निरङ्कुश-शासकाधीनः** आसीत् । अन्येषां यूरोपीय-शासकानां विपरीतं विंशति-तम-शताब्दस्य आरम्भे अपि जार इति वंशक्रमागतराजा राष्ट्रिय-संसदः अधीनः नासीत् । उदारवादिभिः एतस्याः स्थितेः नाशाय व्यापक-परिमाणेन आन्दोलनं चालितम् । 1905तमवर्षीयायाः क्रान्तेः काले ते संविधानस्य रचनायै सामाजिक-लोकतान्त्रिकान् अपि च समाजवादि-क्रान्तिकारिणः सम्मेल्य कृषकाणां श्रमिकाणां च मध्ये व्यापक-कार्यं कृतवन्तः । रूसीय-साम्राज्यस्य अन्तर्गतं ते राष्ट्रवादिनाम् इस्लामस्य आधुनिकीकरणस्य समर्थकानां मुस्लिम-बहुल-क्षेत्राणाम् (**जदीदि** इति) (जनानाम्) च अपि समर्थनं प्राप्तवन्तः।

रूसीय-श्रमिकेभ्यः 1904 इति वर्षम् अतीव हानिप्रदम् आसीत् । आवश्यक-वस्तूनां मूल्यानि एतावत् तीव्रतया वर्धितानि यत् वास्तविक-वेतने (20)विंश-प्रतिशतं यावत् न्यूनता जाता । तस्मिन् एव काले श्रमिक-सङ्घटनानां सदस्यतायाम् अपि तीव्रतया वर्धनं जातम् । यदा 1904तमे वर्षे सङ्घटितायाः रूसीय-श्रमिक-सभायाः (असेंबली आफ रशियन वर्कर्स) चत्वारः सदस्याः प्युतिलोव-आयरन-वर्क्स इत्यस्मिन् कार्यं कुर्वन्ति स्म ते श्रमिकाः ततः निष्कासिताः,तदा श्रमिकैः आन्दोलनस्य घोषणा कृता । तदनन्तरं केषाञ्चित् दिनानाम् आभ्यन्तरे सेण्ट-पीटर्स-बर्ग इत्यस्य 110,000 इत्यस्मात् अधिकाः श्रमिकाः अवदन् यत् कार्यहोराः याः अष्टौ होराः आसन् तत्र विकलनं भवेत् अपि च वेतनस्य वर्धनं, कार्यस्थितीनां परिष्कारः स्यात् इति एतादृशीः याचनाः कुर्वन्तः कार्य-बहिष्कारं कृतवन्तः ।

तस्मिन् एव काले यदा ख्रिस्त-पुरोहितस्य गैपानस्य नेतृत्वे श्रमिकाणां किञ्चन दलं विण्टर-पैलेस (जार इत्यस्य प्रासादः) इत्यस्य पुरतः प्राप्तवत् तदा आरक्षकाः कोसैक्स इति एते च श्रमिकेषु आक्रमणम् अकुर्वन् । अस्मिन् आक्रमणे शताधिकाः श्रमिकाः मृत्युं प्राप्तवन्तः अपि च प्रायः त्रिशतं व्रणिताः । इतिहासे एषा घटना रक्त-रञ्जित-रविवासरः इति नाम्ना स्मर्यते । 1905तमवर्षीय-क्रान्तेः आरम्भः अनया एव घटनया अभवत् । समग्रे देशे कार्यबहिष्काराणाम् आरम्भः जातः । यदा जनाः स्वतन्त्रतायाः अभावस्य विरोधं कुर्वन्तः अपि च विद्यार्थिनः अपि स्व-कक्षाणां बहिष्कारम् आरब्धवन्तः तदा विश्वविद्यालयाः अपि पिहिताः । अधिवक्तारः चिकित्सकाः आभियान्त्रिकाः, अन्ये मध्यवर्गीयाः शिल्पकाराः संविधान-सभायाः निर्माणस्य अभियाचनां कुर्वन्तः यूनियन-आफ-यूनियन्स इत्यस्य स्थापनां कृतवन्तः ।

क्रियाविधिः

रूसे 1905तमे वर्षे क्रान्तिकारिणी अव्यवस्था किमर्थम् उत्पन्ना आसीत् ? क्रान्तिकारिणां काः अभियाञ्चाः आसन् ?

नूतन-शब्दाः

निरङ्कुश-राजशासनम् – राज्ञः अबाध-शासनम् ।

जदीदी इति – रूसीये साम्राज्ये सक्रियाः मुस्लिम-परिवर्तन-वादिनः ।

वास्तविकं वेतनम् अथवा यथार्थ-वेतनम् – इदं तथ्यं तस्य तथ्यस्य परिमापकम् इति अस्ति यत् कस्यचित् जनस्य वेतनेन वास्तविकतायां कियन्ति वस्तूनि क्रेतुं शक्यन्ते ।

1905तम-वर्षीयायाः क्रान्तेः काले, जार-वर्येण कस्याश्चित् निर्वाचित-परामर्शदातुः संसदः अथवा ड्यूमा इत्यस्य रचनायाः विषये अनुमतिः प्रदत्ता। क्रान्ति-काले कानिचन दिनानि यावत् शिल्पशालीय-श्रमिकाणाम् अनेके वणिक्-सङ्घाः (ट्रेड्-यूनियन) अनधिकृत-रूपेण कार्यं कर्तुम् आरभन्तः यतो हि ते असंवैधानिकाः इति घोषिताः, राजनैतिक-गतिविधिषु महान् प्रतिबन्धः स्थापितः। जार इत्यनेन प्रथमा (ड्यूमा) संसद् मात्रं पञ्चसप्तति-दिनाभ्यन्तरे तथा च पुर्निर्वाचितं द्वितीयं ड्यूमा इति मास-त्रयाभ्यन्तरे निरस्तीकृता। सः स्वसत्ताम् उत्तर-दायित्वं च अभिलक्ष्य कस्यचित् प्रकारस्य अपि अङ्कुशं न इच्छति स्म। सः मतदान-अधिनियमान् परिवर्त्य तृतीये ड्यूमा इत्यस्मिन् रूढिवादिनेतॄन् नियोजितवान्। उदारवादिनः क्रान्तिकारिणः च तेन बहिः स्थापिताः।

2.5 प्रथम-विश्वयुद्धं रूसीय-साम्राज्यं च

1914तमे वर्षे द्वयोः यूरोपीय-घटबन्धनयोः मध्ये युद्धं प्रवृत्तम्। एकस्मिन् दले जर्मनी-देशः तुर्की-देशः आस्ट्रियादेशः आसीत् तथा च अपरस्मिन् दले फ्रांसदेशः ब्रिटेन-देशः रूसदेशः (अनन्तर-काले, इटलि-देशः रूमानियादेशः च अपि अत्र सम्मिलितौ) च आसन्। एतेषां सर्वेषां देशानां पार्श्वे महान्ति वैश्विक-साम्राज्यानि आसन् अतः यूरोपेण सह एव इदं युद्धं यूरोपात् बहिः अपि प्रसृतम्। इदम् एव युद्धं प्रथमं युद्धम् इति उच्यते।

आरम्भे रूसीयाः जनाः एतस्य युद्धस्य पर्याप्तं समर्थनं कृतवन्तः। जनतया जार इत्यस्य समर्थनं कृतम्। परन्तु यथा यथा युद्धं चिरकालम् अगच्छत् तथा तथा जार-वर्येण ड्यूमा इत्यस्मिन् विद्यमानैः मुख्य-दलैः परामर्श-ग्रहणं त्यक्तम्। तं प्रति यत् जनसमर्थनम् आसीत् तदपि क्रमशः न्यूनम् अभवत्। जर्मनी-विरोधिनः भावाः अपि अनुदिनं प्रबलताम् अगच्छन्। जर्मनी-विरोधिनां भावानां कारणात् एव जनाः सेण्ट-पीटर्सबर्ग इति नाम परावर्त्य पेत्रोग्राद इति कृतवन्तः यतो हि सेण्ट-पीटर्स-बर्ग इति जर्मन-नाम आसीत्। जारीना (जार-वर्यस्य भार्या महाराज्ञी) अलेक्सांद्रा मूलतः जर्मनीतः आसीत्, अपरतः तस्य परामर्शदातारः नीचाः आसन् तस्मात् अपि परं तस्य जारस्य रासपुतीन-नामा कश्चित् संन्यासी आसीत् तेन च राजशासनम् इतोऽपि अलोकप्रियं कृतम्।

प्रथम-विश्वयुद्धस्य "पूर्वस्मिन् अयने" जायमान-युद्धं "पश्चिमे अयने" जायमानात् युद्धात् भिन्नम् आसीत्। पश्चिम-भागे नियुक्ताः सैनिकाः पूर्व-फ्रांसस्य सीमायां निर्मिताभिः परिखाभिः सह युद्ध्यन्ते स्म अपरञ्च पूर्वस्मिन् अयने शत्रुसेनां पराजयन्ती सेना प्रभूतम् अग्रे अर्वधत। एतस्मिन् अयने सेनायाः अनेके सैनिकाः मृत्युं प्राप्तवन्तः आसन्। सेनायाः पराजयेन रूसीय-सैनिकानां मनोबलं सर्वथा भञ्जितम्। 1914 तम-वर्षात् आरभ्य 1916 तमवर्षाभ्यन्तरे जर्मनी-देशे आस्ट्रियादेशे च रूसीया सेना महतीं पराजयम् असहत। 1917तम-वर्षं यावत् सप्तति-लक्षं जनाः मृतवन्तः। पराजयात् प्रति-गच्छन्त्यः सेनाः मार्गे विद्यमानानि सस्यानि भवनानि अपि नाशितवत्यः यतः शत्रुसेनाः तत्र न तिष्ठेयुः। सस्यानां भवनानां च विनाशात् रूसे त्रिंशत् लक्षाधिकाः जनाः शरणार्थिनः अभवन्। एताभिः परिस्थितिभिः सर्वकारः जारः च इति द्वौ अपि अलोकप्रियौ कृतौ। सैनिकाः अपि युद्धेन खिन्नाः जाताः। ते अपि योद्धुं न इच्छन्ति स्म।



चित्रम् –7- प्रथमस्य विश्वयुद्धस्य काले रूसि-सैनिकाः, राजसी रूसि-सेना "रूसी स्टीमरोलर" इति उच्यते स्म। इयं विश्वस्य गरीयसी सशस्त्र-सेना आसीत्। यदा अनया सेनया स्वनिष्ठा परिवर्त्य क्रान्तिकारिभ्यः समर्थनं दातुम् आरब्धं तस्मात् जारस्य सत्ता अपि समाप्तिं गता।

युद्धेन उद्योगाः अपि अतीव दुष्प्रभाविताः। पूर्वतः एव रूसदेशीयाः उद्योगाः अल्पीयांसः आसन्। अधुना तु अन्यैः आपूर्तिकर्तृभिः देशैः रूसे या आपूर्तिः क्रियते स्म सा अपि तैः निरुद्धा यतो हि बाल्टिक-समुद्रस्य येन मार्गेण वैदेशिकानि औद्योगिकानि वस्तूनि आयान्ति स्म तेषु अपि जर्मनीदेशेन अधिग्रहणं कृतम्। यूरोपस्य अन्येषां देशानाम् अपेक्षया रूसस्य औद्योगिकानि उपकरणानि अतीव तीव्रतया व्यर्थानि जायमानानि आसन्। 1916 तम-वर्षं यावत् रेल-मार्गाः त्रोटितुम् आरब्धाः। स्वस्थाः बलिनः च पुरुषाः युद्धे नियुक्ताः। सम्पूर्णे देशे श्रमिकाणाम् अभावः जायमानः आसीत्। आवश्यकवस्तु-निर्मात्र्यः कार्यशालाः अपि पिहितुम् आरब्धाः। अधिकतराणि अन्नानि सैनिकानाम् उदर-पूर्तये अयनेषु प्रेषितानि। नगरवासिनां जनानां कृते रोटिकानाम् (खाद्यस्य) गोधूम-चूर्णस्य च समस्या जाता। 1616 तमवर्षीये शैत्यकाले रोटिकानाम् आपणेषु प्रायः उपद्रवाः भवन्ति स्म।

॥ इति द्वितीयः पाठः ॥

क्रियाविधिः

(1916) षोडशोत्तर-नवदश-शत-तमे ख्रिस्टाब्दीयं दिनम् अस्ति। भवान् परम्परागतस्य(जार) नृपस्य सेनायां सेनाप्रमुखत्वेन नियुक्तः अस्ति। भवान् मास्को-सर्वकाराय काञ्चित् समाख्यां लिखति। स्व-समाख्यायाः माध्यमेन स्वीयं परामर्शं यच्छतु यत् स्थितेः परिष्काराय भवतां दृष्ट्या किं करणीयं स्यात्।

3 पेत्रोग्राद् इत्यस्मिन् फरवरी-मासीया क्रान्तिः

नूतनाः शब्दाः

(तालाबन्दी) सतालक-पिधानम् – शिल्प-शालायाः स्थायि-रूपेण पिधानाय स्वामिभिः मुख्य-द्वारस्य सतालक-पिधानम् ।

क्रियाविधिः

द्वितीयां मञ्जूषां पश्यतु अपि च वर्तमान-दिनदर्शिकायाः अनुसारम् अन्ताराष्ट्रिय-महिला-दिवसस्य तिथेः ज्ञानं करोतु ।

(1917) सप्तदशोत्तर-नवदश-शततमे ख्रिस्ताब्दे राजधान्याः पेत्रोग्रादस्य अतीव दुःस्थितिः आसीत् । इत्थम् अनुभूयते स्म यत् जनतायाः दृष्टौ याः विभिन्नताः विद्यमानाः आसन् ताः मनसि निधाय एव अस्य नगरस्य संरचना सुनिश्चिता स्यात् इति । श्रमिकाणां भाटक-प्रकोष्ठाः शिल्पशालाः च, नेवा इति नद्याः वामतः आसन् । नद्याः वामतः (फैशनेबल) नव्यानि क्षेत्राणि, (विंटर पैलेस) शरत्कालीनाः प्रासादाः अपि च सर्वकारीयानि भवनानि आसन् । यस्मिन् प्रासादे ड्यूमा इत्यस्य उपवेशनानि भवन्ति स्म तदपि तस्मिन् पक्षे आसीत् । फरवरी-मासे श्रमिकाणां क्षेत्रेषु खाद्यपदार्थानां महान् अभावः जातः । तस्मिन् वर्षे शैत्यम् अपि किञ्चित् अधिकम् आसीत् । भीषणतुषारः हिमपातः च अपि तत्र आसीत् । संसदीयाः प्रतिनिधयः इच्छन्ति स्म यत् निर्वाचित-सर्वकारः यथावत् भवेत् अतः परम्परा-गत-नृपेण ड्यूमा इत्येतं निरस्तीकर्तुं क्रियमाणानां प्रयासानां विरोधं कुर्वन्ति स्म ।

फरवरी-मासस्य द्वाविंशे दिनाङ्के वामतटे स्थितायाः कस्याश्चित् शिल्पशालायाः (**तालाबंदी**) **पिधानं** घोषितम् । अग्रिमे दिने एतस्याः शिल्पशालायाः (फैक्ट्री) श्रमिकाः अपि कार्य-बहिष्कारस्य घोषणां कृतवन्तः । अनेकासु शिल्पशालासु कार्य-बहिष्कार-आन्दोलनस्य नेतृत्वं महिलाः कुर्वन्ति स्म । परावर्तिकाले अयं दिवसः अन्ताराष्ट्रिय-महिला-दिवसः इति रूपेण ख्यातिं प्राप्तः । आन्दोलनकारिणी जनता उपनगरम् उल्लङ्घ्य राजधान्याः मध्ये नेव्स्की-प्रोस्पेक्ट इत्येतं यावत् प्राप्नोत् । तं कालं यावत् किञ्चन अपि राजनैतिक-दलम् आन्दोलनं सक्रिय-रूपेण सङ्घटितं सञ्चालितं न करोति स्म । यदा नव्यानि आवासीयानि क्षेत्राणि सर्वकारीयाणि भवनानि च श्रमिकैः परिवेष्टितानि तदा सर्वकारेण जनसञ्चार-रोधः स्थापितः । सायं यावत् प्रदर्शनकारिणः इतस्ततः अभवन् परन्तु चतुर्विंशे पञ्चविंशे च दिनाङ्के ते पुनः एकत्रीभवितुम् आरब्धवन्तः । सर्वकारेण तेषां निरीक्षणाय सादिसैनिकाः आरक्षकाः च नियुक्ताः ।

रविवासरे फरवरी-मासस्य पञ्चविंश-दिनाङ्के रविवासरे च सर्वकारेण ड्यूमा इति निरस्तीकृतम् । सर्वकारस्य एतं निर्णयं विरुध्य राजनीतिज्ञाः भाषणम् आरब्धवन्तः । षड्विंशे दिनाङ्के प्रदर्शनकारिणः व्यापक-सङ्ख्यया वामतटस्य क्षेत्रे एकत्र अभवन् । सप्तविंशे दिनाङ्के ते प्रमुख-आरक्षकालयेषु आक्रमणम् कृत्वा तान् नष्टवन्तः । रोटिकायाः, वेतनस्य च उत्तमव्यवस्थाया स्यात्, कार्यहोराणां च न्यूनता स्यात् इति एतादृशानां लोकतान्त्रिक-अधिकाराणां पक्षे उद्घोषान् कुर्वन्तः अङ्ख्य-जनाः राजमार्गेषु एकत्र अभवन् । सर्वकारेण एकदा पुनः स्थितेः नियन्त्रणाय सादिसैनिकाः नियुक्ताः । परन्तु सादिसैनिकैः उक्तं यत् ते प्रदर्शनकारिणः उद्दिश्य गुलिकाप्रहारं न करिष्यन्ति ।

चित्रम् – 8 – ड्यूमा इत्यस्मिन् पेत्रोग्राद्-सोवियतस्य उपवेशनम्, फरवरीमासः – 1917 इति ख्रिस्ताब्दः ।

क्रोधाविष्टैः सैनिकैः कस्मिंचित् (रेजीमेंट)सैन्यदलस्य (वैरक)सैन्यदलनिवासे स्वस्य एव एकस्मिन् अधिकारिणि गुलिकाप्रहारः कृतः । त्रिभिः अपरैः (रेजीमेंट) सैन्यदलैः अपि विद्रोहः कृतः अपि च कार्यबहिष्कार-कर्तृभिः श्रमिकैः सह मिलितवन्तः । तदानीन्तने सांयकाले सैनिकाः श्रमिकाः च कस्यचित् सोवियत् इत्यस्य अथवा परिषदः सङ्घटनाय तस्मिन् एव भवने एकत्र अभवन् यत्र अधुना यावत् ड्यूमा इत्यस्य उपवेशनं भवति स्म। इतः एव पेत्रोग्राद्-सोवियत इत्यस्य जन्म अभवत्।

अग्रिमे दिने कश्चित् प्रतिनिधिमण्डलः जार इत्यनेन सह मेलितुम् अगच्छत्। सैनिक-प्रमुखाः तं परामृष्टवन्तः यत् सः राजसिंहासनं परित्यजेत्। सः सैनिकप्रमुखाणां वचनम् अपालयत् अपि च मार्चमासस्य द्वितीये दिनाङ्के सः राजसिंहासनं त्यक्तवान्। सोवियतस्य ड्यूमा इत्यस्य च नेतारः देशं शासितुं कस्यचित् अन्तरिमसर्वकारस्य निर्माणं कृतवन्तः। तत्र इदं सुनिश्चितं यत् रूसस्य भविष्यतः विषये निर्णयस्य दायित्वं संविधान-सभायै दातव्यम्, अपि च तस्य निर्वाचनं सार्वभौमिकस्य वयस्क-मताधिकारस्य आधारेण भवेत् इति । फरवरीमासे (1917) सप्तदशोत्तरनवदशशततमे ख्रिस्ताब्दे राजशासनं राजसिंहासनात् अपसारयितुं या क्रान्तिः जाता तस्याः क्रान्तेः ध्वजः पेत्रोग्रादस्य जनतायाः अधीने आसीत्।

नूतनाः शब्दाः

सोवियतः – रूसस्य स्थानीयाः स्वयंशासिनः सङ्घटनानि।

(बाक्स) मञ्जूषा – 1

फरवरी-क्रान्तौ महिलाः

महिला-शिल्पकाराः प्रायः ... स्वपुरुष-सहकर्मिणः प्रेरयन्ति स्म ...। लारेञ्ज-टेलीफोन-फैक्ट्री) लारेञ्ज-दूरभाष-शिल्पशालायां मार्फा-वासीलेवा प्रायः एकाकिनी एव कञ्चित् सफलं कार्य-बहिष्कारम् आयोजितवती आसीत्। तदनन्तरं (मिलिंग-मशीन-आपरेटर) इत्यस्य कार्यकर्त्री मार्फा-वासीलेवा कार्यं निरुद्धवती अपि च त्वरया तया कार्यबहिष्कारस्य आह्वानं कृतम्। कार्ये संलग्नाः वर्तमानाः श्रमिकाः तस्याः समर्थनाय पूर्वतः एव सज्जाः आसन्। फोरमैन इति पदधारिणा एतस्मिन् विषये प्रबन्धकाः पूर्वमेव सूचिताः अपि च तस्याः कृते पावरोटी पर्युषितरोटिकाः प्रेषिताः। तया पर्युषितरोटिका तु स्वीकृता परन्तु कार्यं प्रति आगन्तुं निराकृतम्। यदा प्रशासकेन सा पृष्टा यत् सा कार्ये किमर्थं न आगन्तुम् इच्छति तदा सा प्रत्युत्तरितवती "यदा अन्याः सर्वाः बुभुक्षिताः भवेयुः तदा अहम् एकाकिनी कथं स्वीयम् उदरं पूरयितुं शक्नोमि " मार्फायाः समर्थने शिल्पशालायाः अपरस्मिन् विभागे कार्ये नियुक्ताः महिलाः अपि एकत्र अभवन् अपि च शनैः शनैः अन्याभिः सर्वाभिः महिलाभिः अपि कार्यस्य स्थगनं कृतम्। शीघ्रमेव पुरुषाः अपि कार्य-उपकरणानि (औजार) भूमौ निपातितवन्तः तथा च सम्पूर्णदलम् अथवा जनसमूहः राजमार्गं प्रति आगतवान्।

स्रोतः चाई-चैटर्जी, सेलिब्रेटिंग-विमेन इति (2002)।

3.1 फरवरीमासात् परम्

अन्तरिम-सर्वकारे सैन्याधिकारिणः, भूस्वामिनः उद्योगपतयः च प्रभावशालिनः आसन्। तेषु उदारवादिनः समाजवादिनः च शीघ्रातिशीघ्रं निर्वाचितसर्वकारस्य सङ्घटनम् इच्छन्ति स्म। जनसभायाः आयोजने सङ्घटनरचनायाः च उपरि यः प्रतिबन्धः आसीत् सः अपकृतः। यद्यपि निर्वाचनस्य प्रक्रिया सर्वत्र समाना न आसीत् परन्तु पेत्रोग्राद-सोवियतस्य इव सर्वत्र "सोवियत इति एतेषां " निर्माणम् अभवत्।

अप्रैल-मासे (1917) सप्तदशोत्तर-नवदश-शत-तमे ख्रिस्टाब्दे च बोल्शेविकों इत्यस्य निर्वासितः नेता व्लादिमीर-लेनिनः रूसं प्रत्यागतवान्। लेनिनस्य नेतृत्वे बोल्शेविकः (1914) चतुर्दशोत्तर-नवदश-शत-तमे ख्रिस्टाब्दात् एव युद्धस्य विरोधं करोति स्म। तस्य कथनम् आसीत् यत् अधुना सोवियत इत्येतैः सत्ता स्वाधीना कर्तव्या। लेनिनः अवदत् यत् युद्धस्य समाप्तिः भवेत् ,सर्वाः भूमिः कृषकेभ्यः दीयेत अपि च वित्तकोशानां राष्ट्रियकरणं भवेत्। इति

क्रियाविधिः

स्रोतः क इत्येतं (बाक्स) प्रथमां मञ्जूषां च एकदा पुनः पश्यतु।

- श्रमिकाणां मनादशायाम् आगतानि पञ्च परिवर्तनानि बोधयतु।
- आत्मानम् एतयोः द्वयोः परिस्थित्योः प्रत्यक्ष-दर्शिन्याः महिलायाः रूपेण पश्यतु तथा च लिखतु यत् पूर्वतन-स्थितेः अपेक्षया अपरस्यां स्थितौ किं परिवर्तनम् अभवत्।

एताः तिस्रः अभियाचनाः लेनिनस्य अप्रिल-थीसिस इति नाम्ना ज्ञायन्ते। सः एतदपि परामृष्टवान् यत् अधुना स्वीयानां रैडिकल इति उद्देश्यानां स्पष्टीकरणाय बोल्शेविक-दलस्य नाम कम्युनिस्ट-दलम् इति भवेत्। बोल्शेविक-दलस्य अधिकतराः जनाः अप्रैल-थीसिसस्य विषये श्रुत्वा अतीव आश्चर्यान्विताः जाताः। ते अनुभवन्ति स्म यत् अधुना समाजवादि-क्रान्तये समीचीनः कालः न आगतः। अतः अधुना किञ्चित् कालं यावत् अन्तरिम-सर्वकाराय एव समर्थनं भवेत्। परन्तु अग्रिमेषु केषुचित् मासेषु याः घटनाः जाताः ताभिः घटनाभिः स्थितिः परिवर्तिताः।

ग्रीष्मकाले श्रमिकान्दोलनम् इतोऽपि प्रसृतम्। औद्योगिक-क्षेत्रेषु शिल्पशालीयाः समूहाः निर्मिताः। एतेषां समूहानां माध्यमेन श्रमिकाः शिल्पशाला-सञ्चालनस्य शिल्पशाला-पतीनां शैलीविषये प्रश्नान् आपत्तिं च कर्तुम् आरब्धवन्तः। वाणिज्यिक-सङ्घटनानां सङ्ख्या अभिवर्धितुम् आरब्धा। सेनायां सैन्य-समीतिनां रचना आरब्धा। जूनमासे प्रायः पञ्चशतं सोवियत इत्येतैः अखिल-रूसीय-सोवियत-काङ्ग्रेस इत्यस्मिन् स्वप्रतिनिधयः प्रेषिताः। यथा यथा (अन्तरिम) मध्यवर्ति-सर्वकारस्य शक्तिः क्रमशः न्यूनतां गता अपि च बोल्शेविकों इत्यस्य प्रभावः वर्धितः, सर्वकारः जनेषु व्याप्तम् असन्तोषम् अभिभवितुं दृढप्रयासान् कर्तुम् आरब्धवान्। स्वयं ये श्रमिकाः शिल्पशालाः सञ्चालयितुं प्रयतन्ते स्म तान् अपि च श्रमिकनेतारः ये आसन् तान् निग्रहीतुं सर्वकारः आरब्धवान्। जुलाई-मासे 1917तमे ख्रिस्टाब्दे बोल्शेविक इत्येतैः आयोजितानां विशाल-प्रदर्शनानां महत् दमनं कृतम्। अनेके बोल्शेविक-नेतारः निलेतुं पलायितुं च बाध्याः जाताः।

ग्रामेषु कृषकाः तेषां च समाजवादिनः क्रान्तिकारिणः नेतारः भूमेः पुनर्वितरणाय प्रभावं जनयितुम् आरब्धवन्तः। एतन्निमित्तं भूमि-समीतयः निर्मिताः आसन्। सामाजिक-क्रान्तिकारिभ्यः प्रेरणां प्रोत्साहनं च स्वीकुर्वन्तः जूलाई-मासतः सितम्बरमासस्य मध्ये कृषकाः व्यापक-भूमेः अधिग्रहणं कृतवन्तः।

चित्रम् -9 – अप्रैल-मासे (1917) सप्तदशोत्तर-नवदश-शत-तमे ख्रिस्ताब्दे श्रमिकान् सम्बोधयतः लेनिनस्य काचित् बोल्शेविक-छविः,

चित्रम् – 10 – जुलाई-मासिके दिने,
जुलाई-मासस्य सप्तदश-दिनाङ्के (1917) सप्तदशोत्तर-नवदश-शत-तमे च ख्रिस्ताब्दे बोल्शेविक-समर्थकेषु प्रदर्शनकारिषु सेनाद्वारा गुलिका-प्रहारस्य दृश्यम्।

3.2, (1917) अक्टूबर्-मासीया च क्रान्तिः

यथा यथा (अन्तरिम) मध्यवर्ति-सर्वकारस्य बोल्शेविकों इत्यस्य च मध्ये (टकराव) विद्वेषः वर्धितः, लेनिनः मध्यवर्ति-सर्वकार-द्वारा राजशासनं बलात् आरोपयिष्यते इति विषये सः सशङ्कः दृश्यते स्म। सितम्बर-मासे सः सर्वकारं विरुध्य विद्रोहस्य विषये चर्चाम् आरब्धवान्। सेनायां शिल्पशालीयेषु सोवियत इत्येतेषु च विद्यमान-बोल्शेविक इत्येते एकत्र कृताः।

अक्टूबर-मासिके षोडश-दिनाङ्के (1917) सप्तदशोत्तर-नवदश-शत-तमे ख्रिस्ताब्दे च लेनिनः पेत्रोग्राद-सोवियत इत्येतम् अपि च बोल्शेविक-दलं सत्तायाः अधिग्रहणाय स्वपक्षे अनयत्। सत्तायाः उपरि अधिग्रहणाय लियान-ट्राट्स्की इत्यस्य नेतृत्वे सोवियत इत्यस्य पक्षतः कस्यचित् सैनिक-क्रान्तिकारिण्याः समितेः सङ्घटनं कृतम्। एतस्य तथ्यस्य रहस्योद्घाटनं न कृतं यत् योजना कस्मिन् दिने क्रियान्वयिता भविष्यति इति।

अक्टूबर्-मासस्य (24)चतुर्विंशति-दिनाङ्के विद्रोहस्य आरम्भः जातः। सङ्कटेन आशङ्कितः प्रधानमन्त्री केरेंस्की-महोदयः सैन्यदलानि एकत्रीकर्तुं नगरात् बहिर्भागम् अगच्छत्। प्रातःकाले एव सर्वकारीयाः शुभचिन्तकाः सैनिकाः द्वयोः बोल्शेविक-वार्त्तापत्र-कार्यालययोः (घेराव) उपरोधनम् कृतवन्तः। दूरभाषीयानां(टेलीग्राफ्)दूरच्छायाचित्रणस्य कार्यालयानां नियन्त्रणाय तथा च विण्टर-पैलेस इत्यस्य रक्षायै सर्वकार-समर्थकाः सैनिकाः तत्र प्रेषिताः। झटिति क्रान्तिकारि-समिति-द्वारा अपि स्वीयाः समर्थकाः आदिष्टाः यत् ते अपि सर्वकारीयाणां कार्यालयानाम् अधिग्रहणं कुर्युः अपि च मन्त्रिणां निग्रहणं कुर्युः इति। तस्मिन्नेव दिने आरोरा इति नामधेयेन युद्धपोतेन विण्टर-पैलेस इत्यस्मिन् परमाणु-अस्त्रैः आक्रमणम् आरब्धम्। अन्यैः युद्धपोतैः नेवा इत्याख्येन मार्गेण गत्वा विभिन्नाः सैन्यालयाः स्वाधीनाः कृताः। सायङ्कालं यावत् सम्पूर्णनगरं क्रान्तिकारिसमितेः अधीनम् आसीत् अपि च मन्त्रिणः आत्मसमर्पणं कृतवन्तः। पेत्रोग्रादे अखिल-रूसीय-सोवियत-क्राङ्ग्रेस इत्यस्य उपवेशनम् अभवत् यत्र बहुमतेन बोल्शेविकानां क्रियान्वयनस्य समर्थनं कृतम्। अन्येषु नगरेषु अपि विद्रोहाः प्रारब्धाः। उभयतः पर्याप्तः गुलिकाप्रहारः अभवत्, विशेषतया मास्को इत्यत्र, परन्तु दिसम्बरमासं यावत् मास्को-पेत्रोग्राद इति क्षेत्रे बोल्शेविकानां नियन्त्रणं स्थापितम् आसीत्।

चित्रम् -11 – पेत्रोग्राद इत्यस्मिन् (वामतः) लेनिनः तथा च दक्षिणतः ट्राट्स्की श्रमिकैः सह वर्तते।

॥इति तृतीयः पाठः॥

द्वितीया मञ्जूषा

रूसीय-क्रान्तेः दिनाङ्कः:
रूसे फरवरीमासस्य प्रथमं दिनाङ्कम् (1918) अष्टादशोत्तर-एकोनविंशति-शततमं च ख्रिस्ताब्दं यावत् जूलियन इति दिन-दर्शिकायाः अनुसरणं क्रियते स्म। ततः परं रूसीय-सर्वकारेण ग्रेगोरियन इति दिनदर्शिका अङ्गीकृता एतस्याः अधुना सर्वत्र प्रयोगः क्रियते। ग्रेगोरियन् इति दिनदर्शिका जूलियन इति दिनदर्शिकायाः अपेक्षया त्रयोदशदिनानि अग्रे चलति। अनेन अयम् अभिप्रायः अस्ति यत् अस्माकं दिनदर्शिकायाः अनुसारं फरवरी-क्रान्ति मार्चमासस्य द्वादश-दिनाङ्के अपि च अक्तूबर-क्रान्तिः नवम्बरमासस्य सप्तमे दिनाङ्के सम्पन्ना।

काञ्चन महत्त्व-पूर्णाः तिथयः
1850-1880
(पञ्चाशदधिक-अष्टादश-शत-तम-ख्रिस्टाब्दः)
(अशीत्यधिक-अष्टादश-शत-तम-ख्रिस्टाब्दः)
रूसे समाजवाद-विषये चर्चा
1898 (अष्ट-नवत्यधिक-अष्टादश-शत-तमः ख्रिस्टाब्दः)
(रशियन-सोशल-डैमोक्रेटिक-वर्कर्स-पार्टी)
रूसीय-सामाजिक-लोकतान्त्रिक-कार्यकर्तृ-दलस्य स्थापनम्।
1905(पञ्चाधिक-नवदश-शत-तमः ख्रिस्ताब्दः)
रक्त-रञ्जित-रविवासरः अपि च (1905) पञ्चाधिक-नवदश-शत-तम-ख्रिस्ताब्दीया क्रान्तिः।
(1917) सप्तदशोत्तर-एकोनविंशति-तमः ख्रिष्टाब्दः
मार्च-मासस्य द्वितीये दिनाङ्के – जार-द्वारा पदत्यागः।
अक्टूबर-मासस्य चतुर्विंशति-दिनाङ्के - पेत्रोग्रादे बोल्शेविकः विद्रोहः।
(1918) अष्टादशोत्तर-नवदश-शत-तम-ख्रिस्टाब्दः - (1920) विंशत्यधिक-नवदश-शत-तम-ख्रिस्टाब्दः
गृह-युद्धम्।
1919
कामिन्टर्न इत्यस्य सङ्घटनम्।
(1929) एकोनविंशत्यधिक-नवदश-शत-तमे ख्रिस्टाब्दे
सामूहिकीकरणस्य आरम्भः।

नूतन-शब्दः:
कामिन्टर्न – इति (कम्युनिस्ट-पार्टी) साम्यवादि-दलानाम् अन्ताराष्ट्रिय-संस्था। अयं शब्दः "कम्युनिस्ट-इण्टर-नैशनल"(Communist International) इत्यस्य संक्षिप्तरूपम् अस्ति।

4 अक्टूबर-मासात् परं किं परिवर्तितम् ?

बोल्शेविकाः जनाः निजसम्पत्तेः व्यवस्थायाः सर्वथा विरोधिनः आसन् । अधिकतराणां उद्योग-शालानां वित्तकोशानां च नवम्बर-मासे (1917) सप्तदशोत्तर-एकोन-विंशति-शत-तमे च ख्रिस्ताब्दे एव राष्ट्रियकरणं कृतम् आसीत् । तेषां स्वामित्वं प्रबन्धनं च सर्वकारस्य नियन्त्रणे (नियमने)जातम् आसीत् । भूमिः सामाजिक-सम्पत्तिः अस्ति इति घोषितम् । कृषकाः (सामन्त) भूस्वामिनां भूमीनाम् अधिग्रहणं कर्तुं मुक्ताः आसन् । नगरेषु बोल्शेविकाः गृहपतीनां कृते पर्याप्तभागं दत्त्वा तेषां दीर्घभवनानां लघु-विभागान् अकुर्वन् तेन गृह-रहितानाम् अपि च प्रयोजनवतां जनानां कृते अपि वासव्यवस्था भवेत् इति । अभिजात्य-वर्ग-द्वारा पुरातनपदानां यः प्रयोगः क्रियते स्म तत्रापि बोल्शेविकाः प्रतिबन्धं स्थापितवन्तः । परिवर्तनं स्पष्टरूपेण प्रत्यक्षतः सर्वेषां पुरतः आनेतुं सैनिकानां सर्वकारीय-अधिकारिणां च वेशान् चापि ते परिवर्तितवन्तः । एतदर्थं (1918) अष्टादशोत्तर-नवदश-शत-तमे ख्रिस्ताब्दे कस्याश्चित् परिधान-प्रतियोगितायाः आयोजनं कृतम् । तस्यां प्रतियोगितायां सोवियत-शिरस्त्राणस्य (बुदियोनोव्का) चयनं कृतम् ।

चित्रम् 12-सोवियत-शिरस्त्राण-धारी (बुदियोनोव्का) कश्चित् सैनिकः ।

बोल्शेविक-दलस्य नाम परिवर्त्य (रूसी कम्युनिस्ट पार्टि) रूसीय-साम्यवादि-दलम् (बोल्शेविक)इति कृतम् । नवम्बरमासे (1917) सप्तदशोत्तर-नवदश-शत-तमे ख्रिस्ताब्दे बोल्शेविकाः संविधानसभायै निर्वाचनं कारितवन्तः परन्तु एतेषु निर्वाचनेषु ते बहुमतं न प्राप्तवन्तः । जनवरीमासीये (1918) अष्टादशोत्तर-नवदश-शततमे ख्रिस्ताब्दे अन्येषां राजनैतिकदलानां मतैक्यं विना अपि बोल्शेविकाः ब्रेस्ट-लिटोव्स्क् इत्यस्मिन् जर्मनीदेशेन सह सन्धिं कृतवन्तः । आगामिषु वर्षेषु बोल्शेविक-दलम् अखिल-रूसीय-सोवियत-काङ्ग्रेस इत्यस्य कृते जायमानेषु निर्वाचनेषु एकमात्रं भाग-गृहीतृ-दलम् अवशिष्टम् । अखिल-रूसीय-सोवियत-काङ्ग्रेसाय अधुना देशस्य संसद्वत् शक्तिः अधिकारः वा दत्तः । रूसदेशः अधुना कश्चित् दलीयः व्यवस्थासम्पन्नः देशः जातः । (ट्रेन यूनियन) वाणिज्यिक-संस्थाः दलस्य नियन्त्रणं कुर्वन्ति स्म । गुप्तचराः आरक्षकाः (यः पूर्वं चेका अनन्तरकाले च ओजीपीयू एनकेवीडी इति नाम प्रदत्तम्) ये जनाः बोल्शेविकानाम् आलोचनां कुर्वन्ति स्म तान् दण्डयन्ति स्म । अनेके युवलेखकाः कलाकाराः अपि दलं प्रति आकृष्टाः जाताः । यतो हि ते सर्वे अपि समाजवादं परिवर्तनं च प्रति समर्पिताः आसन् । अक्टूबर-मासीयात् (1917) सप्तदशोत्तर-नवदश-शत-तम-ख्रिस्ताब्दात् परम् एतादृशाः कलाकाराः लेखकाः च कलायाः वास्तुशिल्पस्य च क्षेत्रे नूतनान् प्रयोगान् आरब्धवन्तः । परन्तु दलद्वारा बलात् आरोपितायाः सेंसरशिप इत्यस्याः कारणात् बहूनां जनानां दलात् मोहभङ्गः जायमानः आसीत् ।

चित्रम् -13 – मास्को इत्यस्मिन् मई-दिवसस्य प्रदर्शनम्,1918 ।

तृतीया मञ्जूषा

अक्टूबर-क्रान्तिः रूसीय-ग्रामीण-क्षेत्राणि च – द्वे दृष्टी

"अक्टूबर-मासीये पञ्चविंशति-दिनाङ्के पञ्चोत्तर-नवदश-शत-तमे च (1905) ख्रिस्ताब्दे जातायाः क्रान्तेः अव्यवस्थायाः वार्त्ता अग्रिमे एव दिने प्रतिग्रामं प्राप्नोत्। जनाः आनन्दिताः अभवन्। कृषकाणां दृष्ट्या तु क्रान्तेः अर्थः एतावत् एव आसीत् यत् निर्मूल्यं भूमेः प्राप्तिः युद्धस्य च समाप्तिः। यस्मिन् दिने वार्त्ता प्राप्ता तस्मिन् एव दिने भूस्वामिनः प्रासादं प्रविश्य सर्वं विद्यमानं लुण्ठितवन्तः, तस्य क्षेत्राणि अधिगृहितानि , अपि च तस्य उद्यानस्य सर्वान् वृक्षान् छित्त्वा सम्पूर्ण-काष्ठानि कृषकाणां मध्ये वण्टितानि। तस्य सर्वाणि भवनानि भञ्जितानि तस्य च भूमिः कृषकाणां मध्ये आवण्टिता, ते कृषकाः तु पूर्वतः एव कस्यचित् नूतन-सोवियतस्य अनुसारं जीवनं जीवितुं सन्नद्धाः आसन्।"

फेदोर-बेलोव, द-हिस्ट्री-आफ-ए-सोवियत-कलेक्टिव-फार्म।

कस्यचित् कृषक-कुटुम्बस्य सदस्येन स्वसम्बधिने पत्रं प्रेषितं तस्मिन् पत्रे तेन लिखितं यत् तस्य कुटुम्बस्य (जागीर) सम्पत्तेः किम् अभवत् इति। " सत्ता-परिवर्तनं" कष्टेन विना, मौनपूर्वकं शान्तिपूर्वकं च पूर्तिं गतम् ...। अत्र कोऽपि सन्देहः नास्ति यत् (चेयरमैन) अध्यक्षस्य व्यवहारः समीचीनः अस्ति, अपि च सः अतीव विनम्रभावेन वार्त्तालापं करोति इति। अस्माकं पार्श्वे द्वे गावौ द्वौ अश्वौ च अवशिष्टौ। सेवकाः पौनःपुन्येन तान् एतदेव कथयन्ति यत् अस्मदीय-चिन्तां न कुर्वन्तु। "तान् जीवयन्तु। तेषां सुरक्षायाः सम्पत्तेः च दायित्वम् अस्माकम् अस्ति। वयं तैः सह मानवीयं व्यवहारम् एव करिष्यामः ...।"

... "इयं जनश्रुतिः अस्ति यत् अनेकेषु ग्रामेषु जनाः समितीः निष्क्राम्य सम्पूर्ण-सम्पत्तिं पुनः मिखाइल-मिखाइलोविच् इत्यस्मै अर्पयितुम् इच्छन्ति। न ज्ञायते एतत् भविष्यति न वा,अथवा इदं अस्मभ्यं शोभनं भविष्यति अथवा नैव। परन्तु वयम् अनेन विषयेन सन्तुष्टाः स्मः यत् अस्मदीयेषु जनेषु चैतन्यम् अस्ति ...।"

सर्ज-श्मेमान, एकोज-आफ-ए-नेटिव-लैण्ड्। टू-सेंचुरीज-आफ-ए-रशियन-विलेज (1997)।

4.1 गृह-युद्धम्

यदा बोल्शेविक इत्येतैः भूमेः पुनर्वितरणस्य आदेशः दत्तः तदा रूसीयसेना खण्डयितुम् आरब्धवती। अधिकतराः सैनिकाः कृषकाः आसन्। ते भूमेः वितरणाय गृहं प्रतिगन्तुम् इच्छन्ति स्म। अतः ते सेनां परित्यज्य गन्तुम् आरब्धवन्तः। ये बोल्शेविकाः न आसन् ते, समाजवादिनः उदारवादिनः राजशासनस्य च समर्थकाः बोल्शेविक-विद्रोहस्य निन्दनं कृतवन्तः। तेषां नेतारः दक्षिणीय-रूसे एकत्र भूत्वा बोल्शेविकों (रेड्स) इत्यनेन योद्धुं सैन्यदलानि सङ्घटितानि कर्तुम् आरब्धवन्तः। (1918) अष्टादशोत्तर-एकोनविंश-तमे ख्रिस्ताब्दे तथा च (1919) एकोनविंशोत्तर-नवदश-शत-तमे ख्रिस्ताब्दे रूसीय-साम्राज्यस्य अधिकतरेषु भागेषु सामाजिक-क्रान्तिकारिणां (ग्रीन्स इति) अपि च जार-समर्थकानाम् (व्हाइट्स) एव नियन्त्रणम् आसीत्। ते फ्रांसीयानाम् अमेरिकीयाणां ब्रिटिशानां जापानदेशीयानां च सैन्यदलानाम् अपि समर्थनं प्राप्नुवन्ति स्म। एताः सर्वाः शक्तयः रूसे समाजवादस्य विकासं न द्रष्टुम् इच्छन्ति स्म। एतेषां सैन्यदलानां बोल्शेविकानां मध्ये चलितस्य गृह-युद्धस्य काले लुण्ठनं दुर्भिक्षं च एतादृशाः समस्याः व्यापक-परिमाणेन व्यापृताः।

"व्हाइट्स" इत्यस्मिन् ये निज-सम्पत्तेः पक्षधराः आसन् ते भूमेः अधिगृहीतॄणां कृषकाणां विरोधे कठोरतया व्यवहृतवन्तः। तेषाम् एतादृशेन व्यवहारेण बोल्शेविकेभ्यः

क्रियाविधिः

ग्रामीणेषु क्षेत्रेषु जात-क्रान्तेः विषये दृष्टि-द्वयं परिशीलयतु। कल्पयतु यत् भवान् एतासां घटनानां साक्षिणः सन्ति। निम्नलिखितस्य अनुसारम् एतासां घटनानां विवरणं लिखन्तु–

- एस्टेट्-स्वामी
- लघु-कृषकः
- पत्रकारः

क्रियाविधिः

ख इत्येतत् स्रोतः पश्यतु, ज्ञापयतु च यत् रूसीय-क्रान्तेः विषये मध्य-एशियायाः जनानां प्रतिक्रिया एतावत् पृथक् किमर्थम् आसीत्?

भिन्नान् प्रति जनसमर्थनं तीव्रतया न्यूनीभवन् आसीत्। जनवरीमासीयं विंशत्यधिक-नवदश-शत-तम-ख्रिस्ताब्दं (1920) यावत् भूतपूर्वस्य रूसीय-साम्राज्यस्य अधिकतरेषु भागेषु बोल्शेविकानां नियन्त्रणं जातम् आसीत्। ते रूसीय-राष्ट्रवादि-भिन्नानां मुस्लिम-जदीदीनां च साहाय्येन एतत् साफल्यं प्राप्तवन्तः आसन्। यत्र रूसीयाः उपनिवेशवादिनः एव बोल्शेविक-विचारधारायाः अनुयायिनः जाताः। तत्र एतादृशं साहाय्यं निष्फलम् आसीत्। मध्यवर्तिनि एशिया इत्यस्मिन् स्थिते खीवा इति स्थाने बोल्शेविकाः उपनिवेशकाः समाजवादस्य रक्षां वयं करिष्यामः इति व्याजेन स्थानीय-राष्ट्रवादिनां व्यापक-परिमाणेन हननम् अकुर्वन्। एतस्यां स्थितौ अनेके जनाः एतत् न अवगच्छन्ति स्म यत् बोल्शेविक-सर्वकारः किम् इच्छति स्म।

आंशिकरूपेण एतस्याः समस्यायाः निराकरणाय अधिकतराः रूसीय-भिन्नाः राष्ट्रिय-मान्यताः सोवियत-सङ्घे (यू-एस-एस-आर) – दिसम्बर-मासीये द्वाविंशत्यधिक-नवदश-शत-तमे (1922) ख्रिस्ताब्दे रूसीये साम्राज्ये बोल्शेविकैः स्थापितस्य राज्यस्य अन्तर्गतं राजनैतिकी **स्वायत्तता** प्रदत्ता। परन्तु, बोल्शेविकाः स्थानीय-सर्वकारेषु अनेकाः अलोकप्रियाः दृढनीतयः – यथा - , **यायावर-वादस्य** रोधाय दृढ-प्रयासाः – आरोपिताः आसन्, अतः विभिन्न-राष्ट्रियाणां विश्वास-जयस्य प्रयासाः आंशिकरूपेण सफलाः जाताः।

4.2 समाजवादिनः समाजस्य निर्माणम्

गृह-युद्ध-काले बोल्शेविकाः शिल्पशालानां वित्तकोशानां च राष्ट्रियकरणं यथावत् सञ्चालितवन्तः। ते कृषकेभ्यः भूमेः कर्षणस्य अवकाशं दत्तवन्तः यस्य समाजीकरणं जातम् आसीत्। अधिगृहीत-क्षेत्राणां प्रयोगः बोल्शेविकाः इदं दर्शयितुं कुर्वन्ति स्म यत् सामूहिकता का भवति ?

शासनाय केन्द्रीकृतस्य नियोजनस्य व्यवस्था स्थापिता। अधिकारिणः परिगणयन्ति स्म यत् कथम् अर्थव्यवस्था कार्यं कर्तुं शक्नोति ? एतस्य आधारेण ते वर्षाणां कृते लक्ष्यस्य निर्धारणं कुर्वन्ति स्म। एतस्य आधारेण एव ते पञ्चवर्षीय-योजनानां निर्माणम् आरब्धवन्तः। प्रथमयोः द्वयोः योजनयोः काले (1927-1932) तथा च (1933-1938) इति वर्षावधौ औद्योगिकविकासं वर्धयितुं सर्वकारेण सर्वाणि मूल्यानि स्थिरीकृतानि। केन्द्रीकृतेन नियोजनेन आर्थिकविकासः अतीव गतिशीलः जातः। औद्योगिकम् उत्पादनं वर्धितुम् आरब्धम् (1929तः1933) इति वर्षयोः आभ्यन्तरे तैलस्य कृष्णाङ्गारकस्य स्टील इत्यस्य च उत्पादने शत-प्रतिशतं वर्धनम् अभवत्। नूतनानि नूतनानि औद्योगिक-नगराणि अस्तित्वम् आगतानि।

परन्तु तीव्र-निर्माण-कार्याणां प्रभाव-वशात् **कार्यस्थितयः** विकृतिं गन्तुम् आरब्धवत्यः। मैग्नीटोगोस्क-नगरे कस्यचित् स्टीलसंयन्त्रस्य निर्माणकार्यं वर्षत्रयाभ्यन्तरे पूर्णतां गतम्। तस्मिन् काले श्रमिकाः अतीव कठिनं जीवनं यापयितुं बाध्याः जाताः। परिणामतः प्रथमे एव वर्षे 550वारं कार्यस्थगनम् अभवत्। आवासीय-भाटक-प्रकोष्ठेषु शैत्यकाले पुरीषोत्सर्गाय 40डिग्री इत्यतः न्यूने तापमाने जनाः चतुर्थतलात् अवतीर्य पारं राजमार्गस्य धावित्वा गच्छन्ति स्म।

काचित् विस्तारिता शिक्षाव्यवस्था विकासं नीता अपि च शिल्पशालीय-शिल्पकाराणां कृषकाणां च विश्वविद्यालये प्रवेशाय विशिष्टाः प्रबन्धाः कल्पिताः।

तृतीया मञ्जूषा

अक्टूबर-क्रान्तेः कालिकः मध्य-एशिया – द्विविधा दृष्टिः

एम.एन.रायः भारतीयः क्रान्तिकारी (मैक्सिकन कम्युनिस्ट पार्टी)मैक्सिकन-साम्यवादि-दलस्य च संस्थापकः भारते चीने यूरोपे च कामिन्टर्न इत्यस्य च कश्चित् प्रमुखः नेता आसीत्। 1920 तमदशके यदा रूसे गृहयुद्धं प्रवर्तते स्म तदा सः मध्य-एशियायाम् आसीत्। सः अलिखत् –

प्रमुखः कश्चित् सज्जनः वृद्धः आसीत्। तस्य सहायकः कश्चित् युवकः आसीत् यः रूसीयया भाषया भाषते स्म। सः क्रान्तेः विषये जानाति स्म, सः जानाति स्म यत् जारः राजसिंहासनात् अपकृतः अस्ति अपि च ते सैन्यप्रमुखाः अपि ततः निष्कासिताः ये किर्गिजानां भूमेः अधिग्रहणं कृतवन्तः आसन्, अनया दृष्ट्या क्रान्तेः अभिप्रायः आसीत् यत् अधुना एकदा पुनः किर्गिज्-जनाः स्वमातृभूमेः स्वामिनः जाताः आसन्। जन्मनः बोल्शेविक-सम्बद्धेन युवकेन उच्चैः घोषः कृतः इङ्कलाब जिन्दाबाद इति। सम्पूर्णः कुटुम्बः तेन सह उद्घोषं कर्तुम् आरब्धवान्।

एम.एन.रायः, मेमायर्सः (1964)।

किर्गीज-जनाः प्रथमक्रान्तिकाले अर्थात् फरवरी-क्रान्तेः अवसरे आनन्दिताः सञ्जाताः द्वितीयक्रान्ति-विषयकीं वार्त्तां श्रुत्वा तु ते अतीव आश्चर्यान्विताः भीताः च जाताः। प्रथमया क्रान्त्या ते जार-वर्यस्य दमनकारि-शासनात् मुक्ताः अभवन्। तथा च तेन ते आशान्विताः जाताः आसन् यत् ते स्वायत्तां प्राप्स्यन्ति। द्वितीया क्रान्तिः (अक्टूबर-मासस्य क्रान्तिः) हिंसां लुण्ठनं अत्यधिक-करग्रहणं स्वैच्छिकराजशासनं च विरुध्य आसीत्। आदौ आनुवांशिकस्य शासकस्य (जार) लघुसमूहेन किर्गिज-जनानां दमनं कृतम् आसीत्। अधुना ते एव जनाः तां व्यवस्थां सञ्चालयन्ति वर्धयन्ति च --।

कश्चित् कज़ाकः नेता (1919), अलेक्जेण्डर-बेनिगसनः अपि च चान्ताल-केलकेजे,ले मावमेन्त्स-नेशनाशेज ले मुसुलमान्स दे

रूसीयः, (1960) इत्यस्मिन् उल्लिखितम्।

नूतन-शब्दाः

स्वायत्तता – स्वीयं शासनं सञ्चालयितुम् अधिकारः

(घुमन्तु) यायावराः – एतादृशाः जनाः ये एकस्मिन् स्थाने न स्थायिरूपेण तिष्ठन्ति परन्तु आजीविकायाः अन्वेषणाय एकस्मात् स्थानात् अपरं स्थानं प्रति निरन्तरं गच्छन्ति।

कार्यस्थितयः – कार्यस्य अवस्थाः।

चित्रम् -14 – शिल्पशालाः समाजस्य प्रतीकरूपाः मन्यन्ते स्म,
चित्रे लिखितम् अस्ति – धूम-नलिकाभ्यः निर्गच्छन् धूमः एव सोवियतरूसस्य प्राणकल्पः अस्ति।

चित्रम् – 15 – त्रिंशत्तमे दशके सोवियत-रूसस्य कस्मिंश्चित् विद्यालये पठन्तः बालाः। बालाः सोवियत-अर्थव्यवस्थायाः अध्ययनं कुर्वन्ति।

चित्रम् – 16 – प्रथम-पञ्चवर्षीय-योजनायाः काले मैग्नीटागोर्स्कीयः कश्चित् बालः,
अयं बालः सोवियत-रूसाय कार्यं करोति।



चित्रम् – 17 – त्रिंशत्तमे दशके कस्याश्चित् शिल्पशालायाः भोजनकक्षः।

चतुर्थी मञ्जूषा

यूक्रेनस्य कस्मिंश्चित् ग्रामे समाजवादीयं कृषिकार्यम् द्वे (अधिगृहीत-क्षेत्रयोः) क्षेत्रे आधृत्य कश्चित् कम्यून इति कल्पितः। कम्यूने आहत्य त्रयोदश-कुटुम्बाः अपि च सप्ततिः जनाः आसन्। --- क्षेत्रात् प्राप्तानि कृषि-उपकरणानि – कम्यून इत्यस्मै दत्तानि। -- सर्वे सदस्याः सामूहिके भोजनालये भोजनं कुर्वन्ति स्म। सहकारि-साम्यवाद इत्यस्य सिद्धान्तस्य आधारेण प्राप्तः आयः अथवा लाभः सर्वेषु वण्ट्यते स्म। सदस्यश्रमेण जायमानः लाभः अपि च कम्यूनस्य पार्श्वे विद्यमानानां सर्वेषाम् आवासीय-भवनानां सौविध्यानां च अधिनियमस्य सदस्याः मिलित्वा प्रयोगं कुर्वन्ति स्म।

फेदोर-बेलोव,हिस्ट्री-आफ-ए-सोवियत-कलेक्टिव-फार्म इति (1955)

महिला-श्रमिकाणां बालेभ्यः शिल्पशालासु बालवाटिकाः उद्घाटिताः । अनर्घ-स्वास्थ्य-सेवाः प्रकल्पिताः । श्रमिकेभ्यः आदर्श-आवसीय-भवनानि निर्मापितानि । परन्तु एतादृशानि सौविध्यसाधनानि सर्वत्र न आसन् यतो हि सर्वकारीय-संसाधनानि सीमितानि आसन् ।

4.3 स्तालिनवादः सामूहिकीकरणं च

नियोजितायाः अर्थव्यवस्थायाः आरम्भिककालः कृषिकार्यस्य सामूहिकी-करणात् जातेन नाशेन सम्बद्धः अस्ति । 1927-1928 इति वर्षयोः नातिदूरे रूसस्य नगरेषु अन्नस्य व्यापक-सङ्कटः उत्पन्नः । सर्वकारेण अन्नस्य मूल्यं निश्चितम् । ततोऽधिकेन मूल्येन कोऽपि अन्नं न विक्रेतुं शक्नोति स्म । परन्तु कृषकाः निश्चितमूल्येन अन्नं विक्रेतुं सज्जाः न आसन् ।

लेनिनात् परं दलनेतृत्वस्य दायित्वं स्तालिनः निर्वहति स्म स्तालिनः समस्यायाः समाधानाय समीचीन-प्रयासान् कृतवान् । सः अनुभवति स्म यत् धनाढ्याः कृषकाः वणिजः च अन्नस्य मूल्यवृद्धिः सम्भाविता अस्ति इति एतस्मात् कारणात् ते अन्नं न विक्रीणन्ते । सुशासनाय द्यूतस्य प्रतिबन्धनं, वणिग्भिः सङ्गृहीतस्य अन्नस्य अधिग्रहणं च आवश्यकम् आसीत् । 1928तमे वर्षे दलस्य सदस्याः अन्नोत्पादकानां क्षेत्राणां परिभ्रमणम् अकुर्वन् । ते बलात् कृषकेभ्यः अन्नं क्रीतवन्तः अपि च कुलक इत्येतेषाम् आवासानां निरीक्षणं कृतवन्तः । रूस-देशे सम्पन्नाः कृषकाः कुलक इति पदेन ख्याप्यन्ते स्म । ततः परम् अपि अन्नस्य न्यूनता एव आसीत् तदा क्षेत्राणां सामूहिकीकरणस्य निर्णयः स्वीकृतः । एतादृशस्य निर्णयस्य पक्षे अयं तर्कः दत्तः यत् अन्नस्य अभावः एतस्मात् कारणात् अस्ति, यतो हि कृषिक्षेत्राणि लघूनि सन्ति । 1917तमवर्षात् परं भूमिः कृषकेभ्यः अर्पिता आसीत् । फलतः अधिकतराणां कृषकाणां पार्श्वे लघूनि क्षेत्राणि आसन् येषाम् आधुनिकीकरणं न कर्तुं शक्यते स्म । आधुनिक-क्षेत्राणि विकसयितुम् अपि च यन्त्रसाहाय्येन औद्योगिक-कृषि-करणाय कुलकानां(सम्पन्नकृषकाणां) नाशनम्, अपि च कृषकेभ्यः भूमेः अपहरणम्,राज्यनियन्त्रणम्, अर्थात् सर्वकारीय-नियन्त्रण-युक्तानां दीर्घाणां क्षेत्राणां निर्माणम् आवश्यकम् अस्ति इति निर्णीतम् ।

एतस्मात् परम् एव स्तालिनस्य सामूहिकीकरण-कार्यक्रमः आरब्धः । 1929 तमवर्षात् दलेन सर्वे कृषकाः आदिष्टाः यत् ते सामूहिक-क्षेत्रेषु कार्यं कुर्युः । अधिकतरा भूमिः अपि च उपकरणानि सामूहिकक्षेत्राणां स्वामित्वे एव अर्पितानि आसन् । सर्वे कृषकाः सामूहिकक्षेत्रेषु कार्यं कुर्वन्ति स्म अपि च कोलखोज इत्यनेन प्राप्तलाभः सर्वेषां कृषकाणां मध्ये विभज्यते स्म । अनेन निर्णयेन कृषकाः सन्तुष्टाः न आसन् अतः ते सर्वकारस्य विरोधम् अकुर्वन् । अपि च ते स्वीयान् पशून् नाशयितुम् आरब्धवन्तः । 1929 इतिवर्षतः 1931 तमवर्षाभ्यन्तरे पशूनां सङ्ख्यायां तृतीयांशात्मिकी न्यूनता जाता । ये सामूहिकीकरणस्य विरोधं कुर्वन्ति स्म ते कठोर-दण्डेन दण्ड्यन्ते स्म । अनेके जनाः देशनिर्वासन-दण्डेन दण्डिताः । सामूहिकीकरणस्य विरोधिनां कृषकाणां कथनम् आसीत् यत् वयं न तु धनाढ्याः स्म न च समाजवादस्य विरोधिनः स्म । ते तु केवलं विभिन्नैः कारणैः सामूहिक-

स्रोतः ग

1933तमे वर्षे सोवियत-बाल्यस्य स्वप्नः यथार्थः च

प्रियः पितामहः कालीनिनः ---

मम कुटुम्बः दीर्घः अस्ति, चत्वारः बालाः सन्ति । अस्माकं पिता अधुना नास्ति सः श्रमिकान् न्यायं दापयन् मृत्युं प्राप्तवान् --- अपि च मम अम्बा रुग्णा अस्ति । अहं सुपठितुम् इच्छामि स्म परन्तु विद्यालयं न गन्तुं शक्नोमि । मम पुरातनौ उपानहौ आस्ताम् । परन्तु अधुना तौ इयन्तौ जीर्णौ जातौ यत् तयोः पुनरुद्धारम् अपि न भवितुं शक्नोति । मम माता रुग्णा अस्ति अस्माकं पार्श्वे तस्याः उपचाराय न तु धनम अस्ति न तु भोजनमेव, परन्तु अहं समीचीनतया पठितुम् इच्छामि । अस्माकं पुरतः केवलं पठनस्य एव दायित्वम् अस्ति । व्लादिमीर-इलीच-लेनिनः इत्थम् एव अवदत् । परन्तु निर्धनावशात् अहं विद्यालयगमनं त्यक्ष्यामि । अस्माकं कोऽपि सम्बन्धी नास्ति कश्चिदपि अस्मत्साहाय्यं न कर्तुं शक्नोति, अतः मया शिल्पशालायां कार्यं करणीयं भविष्यति यतः मम कटुम्बस्य अहं भरणं कर्तुं शक्ष्यामि । प्रियपितामह ! अहं त्रयोदशवर्षदेशीयः अस्मि, विद्यालयीये अध्ययने प्रथमं स्थानं दधामि अपि च मम कापि समाख्या असमीचीना नास्ति । अहं पञ्चम-कक्षायां पठामि ...।

सोवियतस्य राष्ट्रपतये कालिनिन-वर्याय त्रयोदशवर्षीयेण केनचित् श्रमिकबालकेन 1933तमे वर्षे लिखितं पत्रम् ।

वी. सोकोलोव(सं.)आब्शचेस्त्वो 1 व्लास्त,वी 1930-ये-गोदी(मास्को,1977) ।

चत्रिम् – 18 - सामूहकीकरण-कालस्य कञ्चित् चत्रिम् , एतस्मिन् लिखितम् अस्ति – वयं कृषौ यः न्यूनतां लाति कुलक इति तस्मिन् प्रहारं करिष्यामः ।

क्षेत्रेषु कार्यं कर्तुं न इच्छन्ति स्म । सामूहिक-क्षेत्रेषु कार्यं न कर्तुम् इच्छन्ति स्म । स्तालिन-सर्वकारेण सीमितस्तरे स्वतन्त्र-कृषकीय-व्यवस्था अपि यथावत् प्रचालिता परन्तु एतादृशेभ्यः कृषकेभ्यः कञ्चित् विशिष्टं साहाय्यं न दीयते स्म ।

सामूहिकीकरणस्य अनन्तरम् अपि उत्पादने अधिक-वृद्धिः न अभवत् । परन्तु 1930-1933 इति काले सस्यानि समीचीनतया न जातानि तस्मात् सोवियत-इतिहासस्य तत् महत्तमं दुर्भिक्षम् आसीत् येन (40) चत्वारिंशत् लक्षाधिकाः जनाः मृत्युं प्राप्नवन्तः ।

दले अपि अनेके जनाः नियोजितायाः अर्थव्यवस्थायाः अन्तर्गतम् औद्योगिक-उत्पादने जायमानानां भ्रान्तीनां सामूहिकीकरणस्य च परिणामानाम् आलोचनम् आरब्धवन्तः । स्तालिनः तस्य च सहयोगिनः एतादृशानाम् आलोचकानां समाजवादस्य विरोधेषड्यन्त्ररचनस्य आरोपणम् आरोपितम् । सम्पूर्णे देशे अनेकेषु जनेषु एतादृशानि अनेकानि आरोपणानि आरोपितानि । अपि च 1939 तमवर्षं यावत् विंशतिलक्षाधिकाः जनाः कारासु अपि च श्रमशिबिरेषु प्रेषिताः । अधिकतराः जनाः एतादृशम् कमपि अपराधं न कृतवन्तः आसन् परन्तु तेषाम् अभ्यर्थनां कोऽपि न शृणोति स्म । बहून् जनान् भयाक्रान्तान् कृत्वा प्रपीड्य च एतादृशस्य आशयस्य कथनानि लिखितरूपेण समाख्याः सज्जीकृताः यत् ते समाजवादस्य विरोधिनः सन्ति अपि च एतादृशे षड्यन्त्रे ते भागं गृहीतवन्तः अपि च एतस्य आधारेण ते हताः । एतेषु अनेके प्रतिभावन्तः व्यवसायिनः च जनाः आसन् ।

स्रोतः च

इदं पत्रं तेन कृषकेण लिखितम् अस्ति यः सामूहिकक्षेत्रे कार्यं कर्तुं न इच्छति ।

सः क्रस्तियान्स्काया गजेटा (कृषक-वार्त्तापत्रम्) इत्यस्मै लिखितम् आसीत् ।

अहं स्वाभाविकरूपेण कृषिं कुर्वाणः कृषकः अस्मि । मम जन्म 1859तमे वर्षे अभवत् — मम परिवारे षट् सदस्याः सन्ति । मम भार्यायाः जन्म 1871 तमे अभवत्, मम पुत्रः षोड्शवर्षदेशीयः अस्ति मम द्वे पुत्र्यौ स्तः ते नवदशवर्षीये स्तः । सन्तति-त्रयम् अपि विद्यालयं गच्छति । मम भगिनी एकसप्ततिवर्षीया अस्ति । 1932 तमवर्षात् एव महान् करः मयि सुनिश्चितः तस्य प्रत्यर्पणं न शक्यते । 1935 तमे वर्षे स्थानीयाधिकारिणः करवर्धनम् अकुर्वन् । अहं वर्धितम् अत्यधिकं करं न प्रत्यर्पयितुम् शक्तवान् तस्मात् मम सम्पूर्णा सम्पत्तिः लीलामयक्रयेण सर्वकारेण विक्रीता । मम अश्वः गौः गोवत्सः अविः मेषशिशुः सर्वाणि उपकरणानि काष्ठमयानि(सदनपूरकाः) वस्तूनि गृहस्य जीर्णोद्धाराय स्थापितानि वस्तूनि इति उपर्युक्तं सर्वमपि ते अधिकारिणः लीलामयेन क्रयेण विक्रीतवन्तः । 1936तमे वर्षे तैः मम भवनद्वयं विक्रीतम् । कोलखोज इति एव तान् क्रीतवान् । 1937 तमे वर्षे मम द्वयोः पर्णकुटीरयोः एकः विक्रीणीतः अपि च एकः अधिगृहीतः... ।

वी.सोकोलोव(सं.) आब्शचेस्त्वो 1ब्लास्त, वी 1930-ये गोदी इति ।

स्रोतः घ इति

सामूहिकीकरणस्य विरोधः अपि च सर्वकारीयप्रतिक्रियायाः सर्वकारीयं विवरणम् -

अस्मिन् वर्षे फरवरीमासस्य द्वितीयस्मात् पक्षात् यूक्रेनस्य विभिन्नेषु क्षेत्रेषु कृषकाः व्यापकरूपेण विद्रोहम् अकुर्वन् । इयं स्थितिः सामूहिकीकरणस्य क्रियान्वयनस्य काले दलस्य कनिष्ठैः कार्यकर्तृभिः दलस्य चिन्तनं निर्देशः वा समीचीनरूपेण न क्रियान्वयितः यतो हि ग्रीष्मकाले यत् सस्यकर्तनं भवति तस्मात् एतत् जातम् अस्ति । अल्पैः दिनैः यथाकालम् उपर्युक्तक्षेत्रेषु जायमान-गतिविधयः पार्श्वस्थेषु क्षेत्रेषु अपि प्रसृताः । सर्वाधिक-आक्रामक-विद्रोहः सीमावर्तिषु क्षेत्रेषु अभवत् । विद्रोहिकृषकैः अस्मिन् विषये बलाघातः कृतः यत् सामूहिकी-करणस्य कारणात् तेभ्यः परिहृतम् अन्नं पशवः उपकरणानि च इति तेभ्यः प्रत्यर्पयेयुः इति ।

फरवरीमासस्य प्रथमदिनाङ्कतः मार्चमासस्य पञ्चदशदिनाङ्कं यावत् (25,000) पञ्चविंशतिसहस्रं जनानां निग्रहणम् कृतम् ,तेषु 656 जनाः मृत्युदण्डेन दण्डिताः । 3673 जनाः श्रमशिबिरेषु स्थापिताः अपि च 5580 जनाः देशात् निर्वासिताः ।

यूक्रेनराज्यम् आरक्षि-प्रशासनस्य प्रमुखस्य के.एम.कार्लसन-द्वारा कम्युनिस्ट-दलस्य केन्द्रिय-समितये एषा समाख्या प्रेषिता, मार्चमासस्य नवदशदिनाङ्के 1930तमे ख्रिस्ताब्दे इति ।

वी.सोकोलोव(सं.), आब्शचेस्त्वो 1व्लास्त,वी 1930-ये गोदी इति ।

चित्रम् – 19 – विशाल-सामूहिक-क्षेत्रेषु कार्ये सलग्नाः महिलाः ।

।।इति चतुर्थः पाठः ।।

5 रूसीय-क्रान्तेः सोवियत-सङ्घस्य च वैश्विक-प्रभावः

(बोल्शेविका) साम्यवादि-क्रान्तिकारिणः येन प्रकारेण सत्तायाः अधिग्रहणम् अकुर्वन् अपि च येन प्रकारेण ते शासितवन्तः तस्मिन् विषये यूरोपस्य समाजवादि-दलानां सर्वथा ऐक्यं नासीत् परन्तु परिश्रमशीलानां राज्यस्य स्थापनं भविष्यति इति संभावनेन आविश्वं जनेषु काचित् नूतना आशा जागरिता । अनेकेष देशेषु साम्यवादिदलस्य सङ्घटनं कृतम् – यथा- इङ्ग्लैण्ड्-देशे कम्युनिस्ट-पार्टी-आफ-ग्रेट-ब्रिटेन इत्यस्य स्थापनं जातम् । साम्यवादि-क्रान्तिकारिणः उपनिवेशीयजनताम् अपि स्वीयस्य अनुकरणस्य कृते प्रेरितवन्तः तेषां प्रोत्साहनं च कृतवन्तः । सोवियतसङ्घम् अतिरिच्य अपि अनेकेषां देशानां प्रतिनिधयः क्रान्फ्रेंस-आफ-द-पीपुल-आफ-दि-ईस्ट इति संस्थया (1920), अपि च बोल्शेविकैः निर्मितस्य कामिन्टर्न् (बोल्शेविक-समर्थक-समाजवादि-दलानाम् अन्ताराष्ट्रिय-महासङ्घः) इत्यस्मिन् भागः गृहीतः आसीत् । केचन वैदेशिकाः सोवियत-सङ्घस्य कम्युनिस्ट-यूनिवर्सिटी-आफ-द-वर्कर्स-आफ-दि-ईस्ट इत्यस्मिन् दीक्षिताः । यदा द्वितीयविश्वयुद्धस्य आरम्भः जातः तदा सोवियत-सङ्घस्य कारणात् समाजवादस्य ख्यातिः जाता परिचिताश्च समाजवादेन सर्वे जाताः । परन्तु पञ्चाशत्-तमे दशके देशस्य आभ्यन्तरे जनाः एतत् अपि अवगन्तुम् आरब्धवन्तः यत् सोवियत-सङ्घस्य शासनशैली रूसीयायाः क्रान्तेः अनुरूपं नास्ति । वैश्विक-समाजवादिनि आन्दोलने अपि एतत् तथ्यम् अङ्गीकृतं यत् सोवियत-सङ्घे सर्वं समीचीनं न चलति । कश्चित् पश्चवर्तिदेशः महाशक्तिसम्पन्नः जातः आसीत् । तस्य उद्योगाः कृषिकार्यं च विकसितम्, अपि च निर्धनाः अपि भोजनं प्राप्नुवन्ति स्म । परन्तु तत्रत्यानां जनानां कृते अनेकविधाः आवश्यक-स्वतन्त्रताः न दीयन्ते स्म अपि च विकास-परियोजनाः दमन-कारिणीनां नीतीनां बलेन क्रियान्वयन्ते स्म । विंशतितम-शताब्दस्य अन्तकालं यावत् कस्यचित् समाजवादि-देशस्य रूपेण अन्ताराष्ट्रियस्तरे सोवियत-सङ्घस्य प्रतिष्ठाः न्यूना जाता आसीत् यद्यपि तत्रत्याः जनाः अधुना अपि समाजवादस्य आदर्शानां सम्मानं कुर्वन्ति स्म । परन्तु सर्वेषु देशेषु समाजवादस्य विषये विविधप्रकारेण व्यापकत्वेन च पुनर्विचारः कृतः ।



चित्रम् – 20 – इण्डो-सोवियत-जर्नलस्य लेनिन-विशेषाङ्कः,
द्वितीयस्य विश्वयुद्धस्य काले भारतीय-साम्यवादिनः सोवियत-सङ्घाय जनमतस्य निर्माणम् अकुर्वन् ।

पञ्चमी मञ्जूषा

रूसीयक्रान्त्या प्रेरितेषु अनेके भारतीयाः आसन् । तेषु अनेकैः साम्यवादि-विश्वविद्यालयेषु शिक्षा प्राप्ता । 1920तमे दशके भारते साम्यवादि-दलस्य रचनम् अभवत् । एतस्य दलस्य सदस्याः सोवियत-साम्यवादि-दलस्य सम्पर्के भवन्ति स्म । अनेके महत्त्वपूर्णाः राजनैतिकाः सांस्कृतिकाः जनाः च सोवियतप्रयोगं रुच्या स्वीकृतवन्तः अपि च ते रूसस्य यात्राम् अपि कृतवन्तः । रूसगन्तृषु भारतीयेषु जवाहरलालनेहरूः रविन्द्रनाथटैगोरः च अपि सम्मिलितौ आस्ताम्, तौ सोवियत-सर्वकारस्य विषये अपि अलिखताम्। भारतीयलेखने सोवियतरूसस्य पृथक् पृथक् छवयः परिलक्ष्यन्ते स्म । हिन्द्या आर.एस.अवस्थी-महोदयः 1920-21 इति वर्षयोः रशियन-रेवल्यूशन,लेनिन, हिज-लाइफ-ऐन्ड-हिज-थाट्स इति अपि च द रेड-रेवल्यूशन इति नामधेये पुस्तके अलिखत् । तदतिरिच्य एस.डी.विद्यालङ्कारः द-रीबर्थ-आफ-रशिया इति अपि च द-सोवियत-स्टेट-आफ-रशिया इति नामके पुस्तके अलिखत् । एतादृशान् विषयान् आधारीकृत्य बाङ्ग्ला-मराठी-मलयालम-तमिल-तेलगु इत्यादिभिः भाषाभिः अपि बहुकिमपि लिखितम् ।

स्रोतः छ इति

सोवियत-रूसे कश्चित् भारतीयः, 1920तमख्रिस्ताब्दः ।

वयं यूरोपीय-निवासिभिः एशिया-निवासिभिः च सह मुक्तभावेन मिलन्तः वार्तालापं च कुर्वन्तः आत्मानं स्वीये जीवनकाले प्रथमवारं दृष्टवन्तः । यदा वयं दृष्टवन्तः यत् रूसियाः जनाः देशस्य अन्यैः जनैः सह परस्परं सहजभावेन व्यवहरन्तः सन्ति तदा अस्मासु विश्वासः उदितः यत् वयम् अधुना वास्तविक-समानतायाः जगत् प्राप्तवन्तः ।

इयम् एव स्वतन्त्रता अस्ति इति वयं वास्तविकतायां प्रत्यक्षतः पश्यन्तः आस्म । प्रतिक्रान्तिकारिणां साम्राज्यवादिनां च क्रियाभिः जात-निर्धनतायाः अनन्तरम् अपि जनाः पूर्वापेक्षया अधिकाः सन्तुष्टाः प्रसन्नाः च दृश्यन्ते स्म । क्रान्त्या ते आत्मविश्वासं निर्भयतां च प्राप्तवन्तः । पञ्चाशत् पृथक् पृथक् राष्ट्रियता-युक्तेषु जनेषु मानवतारूपं भ्रातृत्वम् अत्र एव साकारीभविष्यति इति संभावितम् अस्ति । जातेः अथवा धर्मस्य कापि सीमा तान् पारस्परिकभावात् सामञ्जस्यात् च न वारयति स्म । प्रत्येकं जीवः केनचित् कुशल-वक्तृ-रूपेण कल्पितः अस्ति । भवन्तः तत्र श्रमिकान् कृषकान् सैनिकान् अन्यान् च सर्वान् व्यवसायि-वक्तृ-रूपेण परिचर्चां कुर्वतः द्रष्टुं शक्नुवन्ति ।

शौकत-उस्मानी,हिस्टारिक-ट्रिप्स-आफ-ए-रेवल्यूशनरी इति ।

स्रोतः ज इति

रूसदेशात् रबीन्द्रनाथटैगोरः, (1930) त्रिंशदधिकनवदशशततमख्रिष्टाब्दः ।

मास्को इति नगरम् अन्यासां राजधानीनाम् अपेक्षया न्यूनस्वच्छा वर्तते इति दृश्यते । राजमार्गेषु यः जनः व्यस्तः दृश्यते सः सुन्दरः कुशलः वा न प्रतिभाति । सम्पूर्णस्थानं श्रमिकाणाम् अस्ति । अत्र सामान्य-जनता धनाढ्यानां सान्निध्ये अभिभूतः अस्ति इति न दृश्यते । ये जनाः शताधिकेभ्यः वर्षेभ्यः नेपथ्ये निलीना इव दृश्यन्ते स्म अद्य सर्वेषां पुरतः आगत्य ते स्थिताः सन्ति । अहं स्वदेशस्य कृषकाणां श्रमिकाणां च विषये चिन्तयितुम् आरब्धवान् । मम पुरतः यत्किञ्चित् आसीत् तद् दृष्ट्वा अनुभूयते स्म यत् इदम् अरेबियन-नाइट्स इत्यस्य कस्यचित् प्रेतस्य चमत्कारः अस्ति इति । अत्रत्याः एते जनाः अपि दशकात् प्राक् अस्माकं जनानाम् इव निरक्षराः दीनाः वराकाः बुभुक्षिताः च आसन् । इदं दृष्ट्वा मादृशात् भारतीयात् अधिकः आश्चर्यान्वितः कः स्यात् यत् एतैः जनैः अल्पीयसा एव कालेन पर्वतस्य इव अज्ञानतायाः अनाश्रयस्य च महान् भारः स्वस्मात् दूरे क्षिप्तः स्यात् इति ।

नूतनः शब्दः –

प्रतिक्रान्तिकारी = क्रान्तिविरोधी ।

क्रियाकलापः

शौकत-उस्मानि-द्वारा अपि च रबीन्द्रनाथ-टैगोरेण लिखितानाम् उद्धरणानां परस्परं तुलनां कुर्वन्तु । तानि उद्धरणानि ग घ च इति स्रोतोभिः मेलयित्वा पठन्तु अपि च बोधयन्तु यत्-

- भारतीयाः सोवियत-सङ्घे सर्वाधिकां प्रभाविणीं वार्त्तां कां दृष्टवन्तः ?
- एते लेखकाः किं तथ्यं न द्रष्टुं शक्तवन्तः ?

क्रियाविधिः

1. कल्पयन्तु यत् कस्यचित् श्रमिकस्य रूपेण भवन्तः 1905तमवर्षीयस्य कार्य-प्रति-बन्ध-दिवसे भागं गृहीतवन्तः एतस्मात् कारणात् भवन्तः न्यायालयेन अभियुक्ताः इति घोषिताः अपि च भवत्सु अभियोगः चलति। अभियोगकाले स्वपक्षे भवन्तः कं तर्कम् उपस्थापयिष्यन्ति ? स्वीयं वक्तव्यं सज्जीकुर्वन्तु अपि च कक्षायां तदेव लिखितभाषणम् उपस्थापयन्तु।
2. निम्नलिखित-वार्त्तापत्राणां कृते अक्टूबर्-मासस्य चतुर्विंशतिदिनाङ्कस्य 1917तमवर्षीयस्य विद्रोहस्य च विषये शीर्षकसहितां काञ्चित् लघुवार्त्तां सज्जीकुर्वन्तु –
   - फ्रांसस्य कस्मैचित् परम्परावादिने वार्त्तापत्राय
   - ब्रिटेनस्य कस्मैचित् रैडिकल-वार्त्तापत्राय
   - रूसस्य कस्मैचित् वार्त्तापत्राय
3. कल्पयन्तु यत् सामूहिकीकरणं जातमस्ति तथा च भवन्तः रूसस्य केचन मध्यमवर्गीयाः गोधूम-उत्पादकाः कृषकाः सन्ति। भवन्तः सामूहिकीकरणस्य विषये स्वीयाः आपत्तीः अभिव्यञ्जयन्तः स्तालिनाय एकं पत्रं लेखितुम् इच्छन्ति। स्वजीवनपरिस्थितीनां विषये भवन्तः किं लेखिष्यन्ति ? भवतां दृष्टौ एतादृशस्य कृषकस्य पत्रं प्राप्य स्तालिनस्य का प्रतिक्रिया भविष्यति ?

प्रश्नाः

1. रूसीयस्य सामाजिकी राजनैतिकी आर्थिकी च परिस्थितिः 1905तमवर्षात् पूर्वं कीदृशी आसीत् ?
2. 1917तमवर्षात् पूर्वं रूसस्य व्यवसायिनां जनसङ्ख्या यूरोपीयानाम् अन्येषां देशानाम् तुलनया कैः कैः स्तरैः भिन्ना आसीत् ?
3. 1917तमे वर्षे जारस्य (आनुवांशिक-नृपस्य) शासनं किमर्थं समाप्तं जातम् ?
4. सूचीद्वयं कुर्वन्तु – एकस्यां सूच्यां फरवरीक्रान्तेः मुख्य-घटनाः प्रभावान् च लिखन्तु तथा च अपरस्यां सूच्यां अक्टूबर-क्रान्तेः प्रमुख-घटनाः प्रभावान् च उल्लिखन्तु।
5. साम्यवादि-क्रान्तिकारिणः अक्टूबर-क्रान्तेः परं शीघ्रम् एव कानि कानि प्रमुखपरिवर्तनानि अकुर्वन् ?
6. निम्नलिखितस्य विषये सङ्क्षेपेण लिखन्तु –
   - कुलक इति
   - ड्यूमा इति
   - इति 1900 वर्षतः आरभ्य 1930 तमवर्षाभ्यन्तरे महिला-श्रमिकाणां विषये।
   - उदारवादी
   - स्तालिनस्य सामूहिकीकरण-कार्यक्रमः।

पञ्चमः पाठः समाप्तः

नात्सीवादस्य हिटलरस्य च प्रादुर्भावः

1945तमे ख्रिस्ताब्दे हेलमुटनामकः कश्चित् एकदशवर्षीयः बालकः पर्यङ्के शयानः किमपि चिन्तयति स्म । शयानः सः तस्मिन् काले स्वीययोः मातापित्रोः अव्यक्तध्वनिं श्रुतवान् । हेलमुटः सावधानं तयोः वार्त्तालापं श्रोतुं प्रयत्तवान् । तौ गभीरस्वरेण कस्मिंश्चित् विषये परस्परं चर्चयन्तौ आस्ताम् । हेलमुटस्य पिता कश्चित् प्रसिद्धः चिकित्सकः आसीत् । तस्मिन् काले सः स्वभार्यया वदति स्म यत् सः एकाकी एव आत्महननं कुर्यात् अथवा सपरिवारम् इति सः हेलमुटस्य पिता स्वभविष्यत्-कालं सुरक्षितं न पश्यति स्म । तौ सभीतौ कथयन्तौ आस्ताम् , यत् अधुना मित्रराष्ट्रानि अपि अस्माभिः सह तादृशमेव व्यवहारं करिष्यन्ति यथा अस्माभिः दिव्याङ्ग-जनैः यहूदिजनैः च सह कृतः आसीत् । अग्रिमे दिने तौ दम्पत्ती हेलमुटम् आदाय उद्यानं प्रति भ्रमितुं गतवन्तौ । अयम् अन्तिमः अवसरः आसीत् यदा हेलमुटः स्वपितृभ्यां सह उद्यानं भ्रमितुम् आगतवान् । तस्य पितृभ्यां बालसम्बद्धानि पुरातनानि गीतानि गीतानि अपि च चिरकालं यावत् तौ क्रीडन्तौ कालं स्वपुत्रेण सर नीतवन्तौ । केभ्यश्चित् दिनेभ्यः परं हेलमुटस्य पिता स्वकार्यालये गुलिकाप्रहारेण आत्महननम् अकरोत् । हेलमुटस्य स्मृतौ ते क्षणाः अधुना अपि वर्तन्ते यदा तस्य पितुः रक्तरञ्जितः वेशः गृहस्य अग्नौ एव ज्वालितः आसीत् । हेलमुटः यत्किञ्चित् दृष्टवान् श्रुतवान् च अपि च तस्य समक्षे यत्किञ्चित् जातम् आसीत् तस्य दृश्यस्य प्रभावः आघातः च तस्य मस्तिष्के तावान् आसीत् यत् अग्रिम-नव-वर्ष-पर्यन्तं सः गृहे भोजनस्य एकमपि ग्रासं मुखाभ्यन्तरे न नेतुं शक्तवान् । सः भीत्या आक्रान्तः आसीत् यत् कदाचित् तस्य अम्बा तस्य भोजने विषं न स्थापयेत् ।

हेटमुटः प्रायः न तस्मिन् काले अवगतः स्यात् यत् वास्तविकता का अस्ति परन्तु तस्य पिता नात्सी इति आसीत् । सः एडाल्फ-हिटलरस्य धर्मान्धसमर्थकः आसीत् । भवत्सु केचन बालकाः नात्सिजनानां तेषां च नेतुः हिटलरस्य विषये अपि प्रायः जानीयुः यत् हिटलरः जर्मनिदेशं विश्वे शक्तिशालितम-देशं कर्तुं कटिबद्धः आसीत् । सः सम्पूर्णं यूरोपीयदेशान् जेतुम् इच्छति स्म । भवद्भिः एतदपि श्रुतं स्यात् यत् तेन यहूदीयाः जनाः अपि मारिताः आसन् । परन्तु नात्सिवादः केवलम् एकस्य घटनाद्वयस्य च पर्यायत्वेन नास्ति । नात्सिवादस्तु विश्वस्य राजनीतेः च विषये काचित् सम्पूर्णव्यवस्था विचाराणां च काचित् सम्पूर्णा संरचना अपि आसीत् । आयान्तु एतस्मिन् सन्दर्भे अवगन्तुं प्रयत्नं कुर्मः यत् नात्सिवादेन कः अभिप्रायः आसीत् । एतस्मिन् विषये सर्वप्राथम्येन वयं द्रक्ष्यामः यत् हेलमुटस्य च पिता आत्महननं किमर्थम् अकरोत्, सः कस्मात् भीतः आसीत् ।

मे-मासीये 1945तमे ख्रिस्ताब्दे जर्मनिदेशेन मित्रराष्ट्राणां पुरतः आत्मसमर्पणं कृतम् । हिटलरः आश्वस्तः आसीत् यत् युद्धस्य परिणामः किं भविष्यति ? अतः हिटलरः तस्य प्रचारमन्त्री ग्योबल्सः बर्लिनस्य कस्मिंश्चित् बङ्कर इत्यस्मिन् सम्पूर्णपरिवारेण सह अप्रिल्-मासे एव आत्महत्याम् अकरोत् । युद्धस्य समाप्तेः परं न्यूरेम्बर्ग इत्यस्मिन् कश्चित् अन्ताराष्ट्रिय-सैनिक-न्यायालयः स्थापितः । एतस्य न्यालयस्य स्थापनं शान्तिं विरुध्य क्रीयमाणानाम् अपराधान् विरुध्य, मानवतां विरुध्य कृतापराधानां युद्धापराधानां च कृते नात्सी इत्यस्य

चित्रम् – 1 – मध्ये हिटलरः, वामतः ग्योबल्सः, च सर्वकारीयस्य उपवेशनात् परं बहिर्भागं च प्रति आगच्छन्तः सन्ति, 1932.तमवर्षम् ।

नूतन-शब्दाः -

मित्रराष्ट्रम् – मित्रराष्ट्राणां नेतृत्वम् आरम्भे ब्रिटेनस्य फ्रांसस्य च अधीने आसीत् । 1941 तमे ख्रिस्ताब्दे सोवियत-सङ्घः अमेरिकादेशः अपि अस्मिन् समूहे सम्मिल्लितः आसीत् । ते धुरी इति शक्तीनाम् अर्थात् जर्मनिदेशस्य इटलिदेशस्य जापानस्य च मिलित्वा प्रतिकारं कृतवन्तः ।

युद्धबद्धान् अभिलक्ष्य अभियोगं चालयितुं कृतम् आसीत्। युद्धस्य काले जर्मनिदेशस्य व्यवहारः विशेषतया मानवतां विरुध्य कृतानाम् अपराधानां कारणात् अनेके गभीराः नैतिकाः प्रश्नाः उदिताः अथ च तेषां कृत्यानाम् आविश्वं निन्दनम् अपि जातम्। एतानि कृत्यानि कानि आसन्?

विश्वस्मिन् विश्वयुद्धस्य छायायां जर्मनिदेशः जनसंहारम् आरब्धवान् तदन्तर्गतं यूरोपीयवास्त्व्यानां विशिष्टप्रजात्याः जनाः सामूहिकरूपेण मारयितुम् आरब्धाः। एतस्मिन् युद्धे मारितेषु जनेषु 60लक्षाः यहूदिजनाः लक्षद्वयं जिप्सिजनाः 10लक्षं पोलैण्डजनाः नागराः आसन्। सहैव मानसिकस्य शारीरिकस्य च रूपेण विकलाङ्गाः घोषिताः 70,000 जर्मननागराः अपि मारिताः। एतदतिरिच्य न ज्ञायते यत् कियन्तः एव राजनैतिकविरोधिनः अपि मारिताः। एतावत्यां व्यापकसङ्ख्यायां जनान् हन्तुम् औषवित्ससदृशाः हननशिल्पशालाः निर्मिताः यत्र विषयुक्तवायुना सहस्राधिकाः जनाः सहैव मारिताः आसन्। न्यूरेम्बर्ग इति न्यायालयेन केवलं एकादश मुख्याः नात्सिजनाः मृत्युदण्डेन दण्डिताः। अन्येषु अपराधिषु अपि अनेके आजीवनं कारावासीयेन दण्डेन दण्डिताः। दण्डस्तु अनेकैः प्राप्तः परन्तु नात्सिजनाः यं दण्डं प्राप्तवन्तः सः न्यूनः आसीत् तेषां च अपराधः नृशंसता च अधिकाः आसन्। वास्तविकतायां मित्रराष्ट्राणि पराजितजर्मनिदेशस्य उपरि तादृशस्य कठोरदण्डस्य आरोपणं न इच्छन्ति स्म यादृशस्य दण्डस्य स्थापनं तस्योपरि विश्वयुद्धकाले कृतम् आसीत्।

अनेकेषां जनानां मतम् आसीत् यत् प्रथमविश्वयुद्धस्य अन्तकाले जर्मनिदेशीयाः जनाः यादृशम् अनुभवं प्राप्तवन्तः आसन् तस्मात् अपि नात्सिवादस्य जर्मनिदेशस्य च प्रादुर्भावस्य मार्गः सरलीकृतः॥

अयम् अनुभवः किदृशः आसीत्?

नात्सी इति अयं शब्दः जर्मनभाषायाः नात्सियोणाल इत्यस्य शब्दस्य प्रारम्भिकाक्षराणि आधृत्य रचितः अस्ति। नात्सियोणाल इति शब्दः हिटलर-दलस्य नाम्नः प्रथमशब्दः आसीत् अतः तद्दलीयाः जनाः नात्सी इति पदेन ख्यायन्ते स्म।



1 वाइमर इत्यस्य गणराज्यस्य जन्म

विंशतिशताब्दस्य आरम्भिकेषु वर्षेषु जर्मनिदेशः कश्चित् शक्तिसम्पन्नं साम्राज्यम् आसीत्। तेन आस्ट्रियायि-साम्राज्येन सह मिलित्वा मित्रराष्ट्राणि (इङ्ग्लैण्ड-फ्रांस-रूसदेशाः इति)विरुध्य प्रथमविश्वयुद्धे (1914-1918)भागः गृहीतः आसीत् । विश्वस्य सर्वाः शक्तयः इदं विचिन्त्य अस्मिन् युद्धे भागं नीतवत्यः यत् शीघ्रमेव जयस्य प्राप्तिः भविष्यतीति । सर्वे अपि देशाः स्वीयं कञ्चित् विशिष्टं प्रयोजनं साधयितुम् अस्मिन् युद्धे भागं गृहीतवन्तः । ते देशाः अनुभवन्ति स्म यत् युद्धं तावन्तं दीर्घकालं यावत् प्रवर्तिष्यते अपि च सम्पूर्णयूरोपस्य अर्थव्यवस्थायाः सर्वदा नाशं करिष्यति इति । फ्रांसं बेल्जियमं च अधिगृह्य जर्मनिदेशः आरम्भे साफल्यम् अवाप्नोत् परन्तु 1917तमे ख्रिस्ताब्दे यदा अमेरिकादेशः अपि मित्रराष्ट्रेषु सम्मिलितः जातः तदा एतस्य समूहस्य बलं पर्याप्तं वर्धितम् तस्मात् अन्ततः नवम्बरमासीये 1918तमे ख्रिस्ताब्दे ते देशाः केन्द्रियशक्तीनां पराभवं कृत्वा ततः परं जर्मनिदेशम् अपि पराजयं स्वीकर्तुं बाध्यम् अकुर्वन्।

साम्राज्यवादिजर्मनिदेशस्य पराजयस्य सम्राजः च पदत्यागात् तत्रत्यसंसदीयदलानि जर्मनिदेशस्य राजनैतिक-व्यवस्थां पुनः व्यवस्थापयितुं समीचीनम् अवसरम् उपस्थापितवन्ति । एतस्मिन् एव सन्दर्भे वाइमर इत्यस्मिन् काचित् राष्ट्रिया गोष्ठी आयोजिता अपि च सङ्घीयाधारेण किञ्चित् लोकतान्त्रिक-संविधानं पारितम्। नूतनव्यवस्थायां जर्मनसंसदे अर्थात् राइखस्टाग इत्यस्मै जनप्रतिनिधीनां निर्वाचनस्य आरम्भः जातः । प्रतिनिधीनां निर्वाचनाय महिलासहितेभ्यः सर्वेभ्यः वयस्कनागरेभ्यः सम्मानः सार्वभौमिकमताधिकारः प्रदत्तः।

परन्तु इदं नूतनं गणराज्यं स्वयं जर्मनिदेशस्य अनेकेभ्यः जनेभ्यः न रोचते स्म। एतस्य एकं कारणं तु इदम् आसीत् यत् प्रथमे विश्वयुद्धे जर्मनिदेशस्य पराजयात्

चित्रम् 2 – वर्साय इत्यस्य सन्धेः परं जर्मनिदेशस्य चित्रम् ,
एतस्मिन् चित्रे भवन्तः तानि क्षेत्राणि द्रष्टुं शक्नुवन्ति यानि सन्धेः परं जर्मनिदेशस्य आधिन्यात् गतानि।

परं विजयिनः देशाः अतीव दृढसमयाः आरोपिताः आसन्। मित्रराष्ट्रैः सह वर्साय (versailles) इत्यस्मिन् जातः शान्ति-सन्धिः जर्मनिदेशीयायाः जनतायै अतीव कठोराः अपमानजनिका च आसीत्। एतस्य सन्धेः कारणात् जर्मनिदेशः स्वीयान् सर्वान् उपनिवेशान्, प्रायः दशप्रतिशतं जनसङ्ख्यां, त्रयोदश प्रतिशतं भूभागं पञ्चसप्ततिः लौह-भण्डागारं षडविंशतिप्रतिशतं कृष्णाङ्गारभाण्डागारं च फ्रांसाय पोलैण्डाय डेनमार्काय लिथुआनियादेशाय च अर्पयितुं बाध्यः जातः। जर्मनिदेशस्य अवशिष्टशक्तिं नाशयितुं मित्रराष्ट्रैः तस्य सैन्यदलानि अपि निरस्तीकृतानि। युद्ध-अपराध-बोध-अनुच्छेदस्य (war Guilt Clause) अन्तर्गतं युद्धस्य कारणात् जातस्य नाशस्य कारणभूतः जर्मनिदेशः एव अस्ति इति घोषितः। तदर्थं जर्मनिदेशस्य उपरि षड-अर्बुद-पौण्डपरिमित-मुद्रा दण्डशुल्कत्वेन स्थापिताः। खनिज-संसाधन-सम्पन्नस्य राईनलैण्डस्य उपरि अपि विंशतितमे दशके अधिकांशतया मित्रराष्ट्रैः एव अधिग्रहणं कृतम्। अनेकाः जर्मनिदेशीयाः जनाः अवदन् यत् जर्मनिदेशस्य पराजयाय वर्साये च जातापमानाय वाइमर-गणराज्यम् एव कारणभूतम् अस्ति इति।

1.1 युद्धस्य प्रभावः

अनेन युद्धेन सम्पूर्णं महाद्वीपं मनोवैज्ञानिकरूपेण आर्थिकरूपेण च द्वयोः स्तरयोः दृष्ट्या सर्वथा नाशितम्। यूरोपः कदाचित् उतमर्णं महाद्वीपम् इति रूपेण ख्यातिं प्राप्तवान् आसीत् परन्तु समाप्यमानं युद्धं यावत् अधमर्णानां महाद्वीपं जातम्। विडम्बनं तु इदमस्ति यत् पुरातनसाम्राज्येन ये अपराधाः कृताः आसन् तेषां दण्डं नवजातं वाइमर-गणराज्यं सहते स्म। एतत् गणराज्यं युद्धे पराजयरूपस्य अपराधबोधस्य राष्ट्रियापमान-रूप-भारस्य च वहनाय बाध्यं जातम्। शुल्कप्रत्यर्पणस्य च कारणात् आर्थिकस्तरेण अपि विकलाङ्गः इति जातं तद्राज्यम् इति। वाइमर-गणराज्यस्य हितैषिषु मुख्यरूपेण समाजवादिनः कैथलिक-जनाः लोकतान्त्रिकदलीयाः च जनाः आसन्। रूढिवादिनां पुरातनपंथी इत्येतेषां राष्ट्रवादिनां च मिथ्यापवादानां आश्रयेण तान् अभिलक्ष्य अनेकविधानि आक्रमणानि शरसन्धानि च जातानि। एतादृश्याः मनोदशायाः कारणात् त्रिंशततमस्य दशकस्य आरम्भिके राजनैतिक-घटनाक्रमे गहनः प्रभावः जातः।

प्रथमेन महायुद्धेन यूरोपीयसमाजस्य राजनैतिक-व्यवस्थायाः च उपरि स्वीयः कश्चन गभीरप्रभावः स्थापितः आसीत्। पूर्वापेक्षया सैनिकानां सम्माननं सामान्यनागराणाम् अपेक्षया अधिकं जायमानम् आसीत्। राजनेतारः प्रचारकाः च एतस्मिन् विषये बलाघातम् अकुर्वन् यत् पुरुषैः आक्रामकैः शक्तिशालिभिः पौरुषगुणैः च सम्पन्नैः भाव्यमिति। सामाजिक-सञ्चारतन्त्रैः (सैन्ययुद्धस्थानानि) खन्दक इत्येतस्य जीवनस्य महिमामण्डनं क्रियते स्म। परन्तु सत्यम् इदम् आसीत् यत् सैनिकाः एतेषु खन्दक इत्येतेषु दयनीयं जीवनं जीवन्ति स्म। ते तादृशैः मूषकैः आवृत्ताः तत्र आसन् ये शवान् खादन्ति स्म। ते विषाक्तवायुं शत्रुविस्फोटकानि च सहन्तः प्रतिकुर्वन्तः च अनुक्षणं स्वमित्राणि म्रियतः पश्यन्ति स्म। सार्वजनीने जीवने आक्रामक-सैनिक-प्रचारस्य राष्ट्रियसम्माननस्य प्रतिष्ठायाः च इच्छायाः पुरतः अन्यानि वस्तूनि गौणरूपाणि जातानि इति यद्यपि सद्य एव सत्तां ये रूढिवादिनः शासकाः प्रविष्टाः आसन् ते व्यापकं जनसमर्थनं प्राप्तुम् आरब्धवन्तः। तस्मिन् काले लोकतन्त्रम् इति कश्चित् दुर्बलः विचारः आसीत् यः द्वयोः महायुद्धयोः आभ्यन्तरे सम्पूर्णे यूरोपे प्रसृतायाः अस्थिरतायाः प्रतिकारं न कर्तुं शक्नोति स्म।

नूतनाः शब्दाः

दण्डशुल्कम्(हर्जाना) – कस्यचित् अपराधस्य दण्डस्वरूपं क्षतिपूर्तये दीयमानं शुल्कम् इति।

सैनिकयुद्धावासस्थलम्(खन्दक) - युद्धस्य अयनेषु सैनिकानां निलयनाय खनितगर्ताः।

1.2 राजनैतिक-रैडिकलवादः (आमूलं परिवर्तनवादः) अपि च आर्थिकसङ्कटम् –

यस्मिन् काले वाइमर इति गणराज्यस्य स्थापनं जातं तस्मिन् काले रूसे जातायाः बोल्शेविक-क्रान्तेः अनुरूपं जर्मनिदेशे अपि स्पार्टकिस्ट-लीग इति स्वक्रान्तिकारि –विद्रोहस्य

चित्रम् -3 – स्पार्टकिस्ट-लीग-नामकेन आमूलं परिवर्तनकारिणा (रैडिकल)सङ्घटनेन आयोजितायाः जनसभायाः दृश्यम्,
प्रशियन-चेम्बर-आफ—डेप्यूटीज, इति बर्लिनस्य पुरतः आयोजिता जनसभा। 1918-1919 इतिवर्षयोः शैल्यकाले बर्लिनस्य राजमार्गेषु सामान्यजनानाम् एव अधिकारः आसीत्। दैनिकानि राजनैतिक-प्रदर्शनानि प्रतिदिनं तत्र भवन्ति स्म।

योजनाः क्रियान्वयितुम् आरब्धाः। बहूषु नगरेषु श्रमिकान् नाविकान् च संयोज्य सोवियत इत्येतेषां निर्माणं जातम्। बर्लिनस्य राजनैतिके वातावरणे सावियतप्रकारकस्य शासनस्य व्यवस्थायाः समर्थने उद्घोषाः भवन्ति स्म। अतः समाजवादिनः लोकतान्त्रिकाः कैथलिक इत्येते समूहाः च वाइमर इत्यस्मिन् एकत्र भूत्वा एवंविधायाः शासनव्यवस्थायाः च विरोधे कस्यचित् लोकतान्त्रिकस्य गणतन्त्रस्थापनस्य निर्णयं कृतवन्तः। अथ च अन्ततो गत्वा वाइमर-गणराज्येन पुरातन-सैनिकानां फ्री-कोर इति नामकस्य सङ्घटनस्य साहाय्येन एतस्य विद्रोहस्य अभिभवः कृतः। एतस्य सम्पूर्णस्य घटनाक्रमात् परं स्पार्टकिस्ट इत्येतैः जर्मन्यां कम्युनिस्ट-दलस्य आधारशिला स्थापिता। ततः परं समाजवादिनः साम्यवादिनः च परस्परं शत्रवः जाताः अपि च हिटलरं विरुध्य कश्चित् अपि सामूहिकयुद्धं न आरब्धुं शक्तवान्। क्रान्तिकारिणः राष्ट्रवादिनः च द्वे अपि दले रैडिकल इति समाधानानां कृते ध्वनिं मुखरं कर्तुम् आरब्धवन्तः।

राजनैतिक-आमूलं परिवर्तनवादिनः विचाराः 1923तमस्य आर्थिकसङ्कटेन इतोऽपि बलं प्राप्तवन्तः। जर्मनिदेशेन प्रथमविश्वयुद्धं सामान्यरूपेण ऋणं स्वीकृत्य युद्धम् आसीत्। अपि च युद्धात् परं तु तेन स्वर्णमुद्रापरिमाणेन दण्डशुल्कम् अपि दातव्यम् आसीत्। एतस्य द्विगुणितस्य भारेण जर्मनिदेशस्य स्वर्णभाण्डागाराणि प्रायः समाप्तेः अवस्थायां प्राप्तानि आसन्। अन्ततो गत्वा 1923तमे वर्षे जर्मनिदेशेन ऋणस्य प्रत्यर्पणात् दण्डशुल्कदानात् च निराकृतम्। एतस्य प्रत्युत्तरे फ्रांसीयाः जनाः जर्मन्याः मुख्येषु औद्योगिक-क्षेत्रेषु रूर इत्यस्मिन् अधिग्रहणं कृतम्। इदं जर्मनिदेशस्य विशाल-प्रस्तराङ्गार-भाण्डागार-सम्पन्नं क्षेत्रम् आसीत्। जर्मनिदेशः फ्रांसदेशं विरुध्य निष्क्रिय-प्रतिरोधस्य रूपेण व्यापक-परिमाणेन अभिलेख-मुद्रा-मुद्रणम् आरब्धवान्। जर्मन-सर्वकारः एतावता व्यापकपरिमाणेन मुद्रायाः

चित्रम् – 4 – वेतन-देयाय बर्लिने कण्डोलेषु भारवाहकानियन्त्रेषु कर्गदस्य पणकानि आरोहयन्ते, 1923तमे वर्षे जर्मनमार्क इत्यस्य मूल्यम् एतावत् न्यूनतम् आसीत् यत् न्यूनतमस्य प्रत्यर्पणाय अपि अनेकेषां पणकानाम् आवश्यकता भवति स्म।

मुद्रणम् आरब्धं यत् तेन तस्य मुद्रायाः मार्क इत्यस्याः अवमूल्यं तीव्रतया भवितुम् आरब्धम् । अप्रिल्-मासे एकस्य अमेरिकीयस्य डालर इत्यस्य मूल्यं 24,000मार्कवत् आसीत् यच्च जूलै-मासे 3,53,000मार्क इति, अगस्ट्-मासे च 46,21,000मार्क इति अपि च दिसम्बरमासे 9,88,60,000मार्क इति अभवत् । अनेन प्रकारेण एकस्मिन् डालर इत्यस्मिन् खर्ब-मार्क इति प्राप्यमाणम् आसीत् । यथा यथा मार्कस्य अवमूल्यम् अभवत्, आवश्यकवस्तूनाम् अतीव मूल्यवृद्धिः अभवत् । रेखाचित्रेषु जर्मन-नागराः पर्युषित-रोटिकाः क्रीतुं शकटे पणकानि वहन्तः सन्ति इति दर्शयितुम् आरब्धाः । जर्मनसमाजः आविश्वं दयापात्रम् अस्ति इति जातः । इयम् आपद् अति-मुद्रास्फीतिः अस्ति इति परवर्तिकाले कथितम् । यदा अतिमूल्य-वृद्धिर्भवति तदा सा स्थितिः एव अतिमुद्रास्फीतिः इति नाम्ना कथ्यते ।

चित्रम् – 5 – रात्रौ शयनाय पङ्क्ति-बद्धाः सन्ति, (1923) ।

जर्मनिदेशः अस्मात् सङ्कटात् बहिर्भागं प्रति आगच्छेत् तदर्थम् अमेरिकीयसर्वकारेण हस्तक्षेपः कृतः । तदर्थम् अमेरिकादेशेन डाव्स इति योजना प्रकल्पिता । अनया योजनया जर्मनिदेशस्य आर्थिकसङ्कटः अपगच्छेत् इति तन्निमित्तं दण्डशुल्कस्य समयाः पुनः निश्चिताः ।

1.3 आर्थिक-न्यूनतायाः वर्षाणि

1924तमख्रिष्टाब्दात् आरभ्य 1928तमख्रिष्टाब्दं यावत् जर्मनिदेशे अल्पपरिमाणेन स्थैर्यम् आसीत् । परन्तु इदं स्थैर्यं परम-चञ्चलम् आसीत् । जर्मननिवेशे औद्योगिक-गतिविधिषु च परिष्कारः मुख्यतः अमेरिकातः स्वकृतानाम् अल्पकालिकानाम् ऋणानाम् उपरि आश्रितः आसीत् । यदा 1929तमे ख्रिस्ताब्दे वाल-स्ट्रीट-एक्सचेञ्ज (शेयर-विपणिः) नष्टा तदा जर्मनिदेशः यत् साहाय्यं प्राप्नोति स्म तत् शीघ्रमेव पिहितम् । अवमूल्यनस्य आंशकया जनाः झटिति स्वीयानि शेयर इत्येतानि विक्रेतुम् आरब्धवन्तः । अक्टूबर्-मासीये चतुर्विंशतिदिनाङ्के केवलम् एकस्मिन् दिने एव 1.3कोटि-परिमित-शेयर इत्येतानि विक्रीतानि । अयम् आर्थिक-न्यूनतायाः आरम्भः आसीत् । 1929तमख्रिष्टाब्दात् आरभ्य 1932तमख्रिष्टाब्दं यावत् यानि वर्षाणि आसन् तेभ्यः अग्रिमेषु त्रिषु वर्षेषु अमेरिकादेशस्य राष्ट्रियः आयः केवलम् अर्धम् अजायत् । शिल्पशालाः पिहिताः, निर्यातस्य अपि पतति स्म, कृषकाणां स्थितिः दयनीया आसीत् ,अपि च (सट्टेबाज) सन्दिग्ध-व्यवहार-निपुणाः जनाः विपणितः धनार्जनं कुर्वन्ति स्म । अमेरिकीयार्थव्यवस्थायां जातार्थिकन्यूनतायाः दुष्प्रभावः आविश्वम् अनुभूतः ।

एतस्याः न्यूनतायाः सर्वाधिकः दुष्प्रभावः जर्मनार्थव्यवस्थायाः उपरि जातः । 1932तमे ख्रिस्ताब्दे जर्मनिदेशस्य औद्योगिकोत्पादनं 1929तमख्रिष्टाब्दस्य अपेक्षया केवलं चत्वारिंशत् प्रतिशतम् अवशिष्टम् आसीत् । श्रमिकाः निरुद्योगिनः भवन्ति स्म अथवा तेषां वेतनम् अतीव-न्यूनं जातम् आसीत् । निरुद्योगिनां सङ्ख्या षष्ठिलक्षं यावत् प्राप्ता आसीत् । जर्मनिदेशस्य राजमार्गेषु एतादृशानां जनानां व्यापकसङ्ख्या दृश्यते स्म - अहं किमपि कार्यं कर्तुं सज्जः अस्मि - इति एतादृशं फलकं कण्ठे निधाय अवलम्बय वा स्थिताः भवन्ति स्म । वृत्तिरहिताः युवकाः द्युतक्रीडारताः दृश्यन्ते स्म अथवा वीथिषु समूहं कृत्वा तिष्ठन्ति स्म अथवा पुनः कार्यालयानां बहिर्भागे पङ्किबद्धाः स्थिताः भवन्ति स्म । यथा यथा उद्योगाः समाप्ताः भवन्ति स्म तथा तथा युववर्गः आपराधिकेषु गतिविधिषु संलिप्ताः भवन्ति स्म । सर्वत्र गहननैराश्यस्य भावः वातावरणं च आसीत् ।

चित्रम् – 6 – (लाइन) पदातिमार्गे अथवा पङ्किबद्धाः भूत्वा शयानाः जनाः । महति आर्थिक-सङ्कटकाले निरुद्योगिनः जनाः न तु वेतनं प्रति आशान्विताः भवन्ति स्म न च वासः कुत्र स्यात् इत्यस्मिन् विषये एव आशावन्तः भवन्ति स्म । शैत्यकाले यदा ते कुत्रचित् वसितुम् इच्छन्ति स्म तर्हि तदर्थम् अपि तैः धनं प्रत्यर्पणीयं भवति स्म ।

नूतन-शब्दः

(वाल-स्ट्रीट-एक्सचेञ्ज) – इति अमेरिकायां स्थिता विश्वस्य विशालतमा शेयरविरणिः ।

आर्थिक-सङ्कटेन जनेषु गहनावसादः भयं च उत्पादितम् आसीत् । यथा यथा मुद्रायाः अवमूल्यं भवति स्म तथा तथा च मध्यवर्गः विशेषतया वेतनभोगिनः कर्मचारिणः सेवा-निवृत्ति-वेतन-भोगिनः च अपि धनसंरक्षणं न कर्तुं पारयन्ति स्म । व्यवसायस्य नाशवशात् लघु-उद्योगिनां निजाजीविकारतानां च जनानाम् अपि च खुदरा-वणिजां च स्थितिः अपि निरन्तरं शोचनीया भवति स्म । समाजस्य एते वर्गाः सर्वहाराकरणम् इत्यस्मात् भयाक्रान्ताः आसन् । ते एतस्मात् भीताः आसन् यत् यदि एतादृशी एव स्थितिः निरन्तरं भविष्यति तर्हि ते एव कदाचित् श्रमिकवत् एव जीवितुं बाध्याः भविष्यन्ति अथवा एतदपि भवितुं शक्नोति यत् तेषां समीपे आजीविकायाः किमपि साधनम् एव न भवेत् । अधुना केवलं सङ्घटिताः श्रमिकाः एव आसन् ये अधुना अपि धैर्यवन्तः उत्साहिनः च आसन् । परन्तु निरुद्योगिनां वर्धमानसमूहेन तेषां वैशिष्ट्यस्य मूल्यस्य च हानिः क्रियते स्म । महान्तः उद्योगाः सङ्कटग्रस्ताः आसन् । कृषकाणां कश्चन महान् समूहः कृष्युत्पादनां न्यूनमूल्यात् चिन्ताग्रस्तः आसीत् । युवान् स्वभविष्यत्कालम् अन्धकारमयं पश्यन्ति स्म । स्वीयशिशूनाम् उदरपूर्तिं कर्तुम् अक्षमाः मातरः महिलाः च अपि अवसादग्रस्ताः आसन् ।

राजनैतिकस्तरेण वाइमर-गणराज्यस्य कश्चित् विपरीतकालः अर्थात अनुकूलसमयः न आसीत् । वाइमर-संविधाने काश्चन एतादृश्यः न्यूनताः आसन् यत् तासां कारणात् तद् गणराज्यं कदाचित् अस्थिरतया राजशासनेन च ग्रस्तः न अभवत् । तेषु एका न्यूनता आनुपातिक-प्रातिनिधित्व-सम्बद्धा आसीत् । एतादृश्याः व्यवस्थायाः कारणात् कस्मैचित् एकस्मै दलाय बहुमतस्य प्राप्तिः प्रायः असम्भाविता एव आसीत् । प्रत्येकस्मिन् प्रक्रमे घटबन्धनात्मिक-सर्वकारः एव सत्तासीनः भवति स्म । अपरा समस्या अष्टचत्वारिंशत्तमस्य अनुच्छेदस्य कारणात् आसीत् यत्र राष्ट्रपतिने आपातकाल-स्थापनस्य नागराधिकारस्य भङ्गस्य अध्यादेशानां च माध्यमेन शासयितुम् अधिकारः प्रदत्तः आसीत् । स्वीये अल्पे एव जीवनकाले वाइमरगणराज्यस्य शासनं विंशति-मन्त्रिमण्डलानाम् अधीने आसीत् अपि च सामान्यप्रमाणानुरूप-अवधिः 239दिनेभ्यः अधिककालं यावत् न अतिष्ठत् । एतस्मिन् अवधौ 48तमस्य अनुच्छेदस्य अपि प्राचुर्येण प्रयोगः कृतः । परन्तु एतेषां सर्वेषां योगानाम् अथवा युक्तीनाम् अनन्तरमपि सङ्कटः न अपगन्तुं शक्तवान् । लोकतान्त्रिक-संसदीय-व्यवस्थायां जनानां विश्वासः समाप्यमानः आसीत् यतो हि सा व्यवस्था अपि तेषां कृते किमपि समाधानं न अन्वेष्यति स्म ।

नूतनः शब्दः
सर्वाहाराकरणम् – निर्धनं भूत्वा श्रमिकवर्गस्य इव आर्थिकस्थितौ प्राप्तिः ।

॥इति प्रथमः पाठः ॥

2 हिटलरस्य उदयः

अर्थव्यवस्थायां राजनीतौ समाजे च यः गभीरसङ्कटः निरन्तरं जायते स्म तेन हिटलरस्य सत्ताप्राप्तेः मार्गः सरलीकृतः । 1889तमे ख्रिस्ताब्दे आस्ट्रियायां जातस्य हिटलरस्य यौवनम् अतीव निर्धनतया व्यतीतः आसीत् । तस्य भोजनस्य अपि कापि व्यवस्था न आसीत् अतः सः प्रथमविश्वयुद्धस्य आरम्भे सेनां प्रवेष्टुम् आवेदनम् अकरोत् । प्रवेशात् परं सः अग्रिमे अयने संदेशवाहकस्य कार्यम् अकरोत्, कार्पोरल इति पदे सः तत्र नियुक्तः अपि च साहसिककार्याय तस्मै विशिष्ट-पद-चिह्नानि अपि दत्तानि । जर्मनसेनायाः पराजयात् सः अवसादग्रस्तः आसीत् पुनः वर्सायस्य सन्धिकारणात् तु सः अतीव क्रोधाविष्टः जातः । 1919तमे ख्रिस्ताब्दे तेन हिटलरेण जर्मन-वर्कर्स्-दलम् इति नामधेयस्य कस्यचित् लघुसमूहस्य सदस्यता स्वीकृता । शनैः शनैः सः एतस्य सङ्घटनस्य उपरि स्वीयं नियन्त्रणं स्थापितवान् अपि च पूर्वतनस्य सङ्घटनस्य नाम परिवर्त्य सः (नैशनल-सोशलिस्ट-पार्टी) राष्ट्रिय-सामाजिक-दलम् इति नूतनं नामकरणम् अकरोत् । एतस्य एव दलस्य नाम एव परवर्तिकाले नात्सी इति जातम् ।

1923तमे ख्रिस्ताब्दे हिटलरः बवेरिया इत्यस्य उपरि अधिग्रहणस्य बर्लिनस्य च उपरि आक्रमणस्य सत्तायाः च उपरि अधिग्रहणस्य योजनाम् अकल्पयत् । एतासु दुःसाहसिक-योजनासु सः असफलः जातः । हिटलरः निगठितः , तं विरुध्य देशद्रोहस्य अभियोगः अपि चालितः परन्तु किंचित् कालानन्तरं सः मोचितः । नात्सी इति राजनैतिक-वर्गः 1930तम-दशकस्य आरम्भिकवर्षाणि यावत् जनतां व्यापकपरिमाणेन आत्मानं प्रति न आकृष्टुं शक्तवान् । परन्तु महति आर्थिकसङ्कटकाले नात्सीवादेन कस्यचित् जनान्दोलनस्य रूपं गृहीतम् । यथा अस्माभिः पूर्वमपि दृष्टम् अस्ति, यत् 1929 तमवर्षात् परं वित्तकोशाः (दिवालिया) क्षीणसर्वस्वाः जाताः आसन् । उद्योगाः पिधानं प्रति गच्छन्ति स्म , श्रमिकाः निरुद्योगिनः जायन्ते स्म अपि च मध्यवर्गीयाः निर्धनतायाः दुर्भिक्षस्य च भयात् भयाक्रान्ताः आसन् । नात्सी इति प्रचारकार्येण जनाः सुभविष्यत्कालं प्रति आशासते स्म । 1929तमे ख्रिस्ताब्दे नात्सि-दलं जर्मनसंसदः राइखस्टाग – इत्यस्य

चित्रम् – 7 – न्यूरेम्बर्ग-दलं काङ्ग्रेस इत्यस्मिन् हिटलरस्य स्वागतम्,(1938) ।

नूतन-शब्दः

(प्रोपेगैंडा) प्रचारकार्यम् – जनमतं प्रभावयितुं क्रियमाणं विशिष्टं प्रचारकार्यम्, यत् चित्राणां चलच्चित्राणां भाषणादीनां च माध्यमेन क्रियते इति ।

चित्रम् – 8 – न्यूरेम्बर्ग-जनसभा,(1936)।
एतादृशीनां सभानां प्रत्येकस्मिन् वर्षे आयोजनं भवति स्म। नात्सिसत्तायाः प्रदर्शनम् एतासां जनसभानां कश्चित् महत्त्वपूर्णः आयामः पक्षः भवति स्म। विभिन्न-सङ्घटनानि हिटलरस्य पुरतः पदसञ्चलनं कुर्वन्तः निर्गच्छन्ति स्म, तं प्रति निष्ठायाः शपथं गृह्णन्ति स्म अपि च तस्य भाषणानि शृण्वन्ति स्म।

कृते निर्वाचनेषु मात्रं 2.6प्रतिशतं मतानि प्राप्तानि। 1932तमख्रिष्टाब्दं यावत् इदं दलं देशस्य विशालतमं दलं जातम्, अपि च अनेन दलेन 37प्रतिशतं मतानि प्राप्तानि।

हिटलरः महान् वक्ता आसीत्। तस्य उत्साहं दृष्ट्वा प्रखरशब्दान् च श्रुत्वा जनाः प्रभाविताः भवन्ति स्म। स्वभाषणैः सः जनान् आश्वासयति स्म यत् सः शक्तिसम्पन्नराष्ट्रस्य स्थापनं करिष्यति, अपि च वर्सायसन्धौ जातस्य अन्यायस्य प्रतिशोधं नेष्यति, जर्मनसमाजस्य नष्टप्रतिष्ठां च पुनः प्रतिष्ठापयिष्यति इति। तेन सङ्कल्पितम् यत् सः निरुद्योगिनां युवकानां कृते उद्योगस्य व्यवस्थां करिष्यति, तेभ्यः च सः सुरक्षितं भविष्यं दास्यति इति। सः जनान् आश्वासितवान् यत् सः स्वीयं देशं वैदेशिक-प्रभावात् मोचयिष्यति तथा च समग्राणां वैदेशिक-षडयन्त्राणां कटिभञ्जनप्रत्युत्तरं दास्यति इति।



चित्रम् – 9 – हिटलर-द्वारा एस-ए इति अपि च एस-एस-इति पङ्क्तीबद्धानां जनानां पुरतः भाषणम्,
अत्र लम्बतराः ऋजु-पङ्क्तीः च पश्यन्तु। एतादृशानां चित्राणां माध्यमेन नात्सिसत्तायाः भव्यतायाः शक्तेः च दर्शनस्य प्रयासः क्रियते स्म।

हिटलरेण राजनीतेः काञ्चित् नूतनशैलीं रचितवान्। सः जनान् अनुकूलयितुम् आडम्बरस्य प्रदर्शनस्य च महत्त्वम् अवगच्छति स्म। हिटलरं प्रति जनानाम् पर्याप्तं समर्थनम् अस्ति इत्यर्थम् अपि च जनेषु परस्परम् ऐक्यम् उत्पादयितुं नात्सिजनाः महतीः जनसभाः आयोजितवन्तः। स्वस्तिक-चिह्नयुक्तानां

रक्तवर्णीयानां ध्वजानाम् अपि च नात्सि-प्रणामविशिष्टस्य भाषणानां च अनन्तरं विशिष्टशैल्यां करतालस्य गडगडाहट इति अव्यक्त-शब्दः – उपर्युक्तम् एतत् सर्वमपि प्रदर्शनस्य भागभूतम् आसीत्।

नात्सिजनाः स्वीयस्य घोरप्रचारस्य माध्यमेन हिटलरः कश्चित् विश्वत्राता रक्षकः च अस्ति इति एतादृशस्य जनस्य रूपेण प्रस्तुतवन्तः, यः केवलं जनतां नाशात् रक्षयितुम् एव अवतीर्णवान् इति। केनचित् समाजेन इयं छविः अतीव आकर्षकत्वेन दृश्यते स्म यस्य प्रतिष्ठायाः गर्वस्य च अनुभूतिः सर्वथा नष्टा जाता आसीत्, अपि च यः समाजः केनचित् भीषणेन आर्थिकेन राजनैतिकेन च सङ्कटेन ग्रस्तः आसीत्।

2.1 लोकतन्त्रस्य विध्वंसः

जनवरीमासस्य त्रिंशत्तमे दिनाङ्के 1933तमे च ख्रिस्ताब्दे राष्ट्रपतिः हिण्डनबर्गः हिटलरं कुलपति-पदम् अलङ्कर्तुं निमन्त्रितवान्। इदं पदं समग्रे अपि मन्त्रिमण्डले सर्वाधिकं शक्तिशालि आसीत्। तावत्पर्यन्तं नात्सि-दलं रूढिवादी अपि स्वोद्देशेन सह योजितवत्। सत्तायाः प्राप्तेः परं हिटलरः लोकतान्त्रिक-शासनस्य संरचनां संस्थानानि च निरस्तीकर्तुम् आरब्धवान्। फरवरीमासे जर्मन-संसद-भवने जातात् रहस्यमयात् अग्निकाण्डात् तस्य मार्गः इतोऽपि सरलः अभवत्। फरवरीमासस्य 28दिनाङ्के 1933तमे च ख्रिस्ताब्दे प्रस्तुतस्य अग्निकाण्डाध्यादेशस्य (फायर-डिक्री) च माध्यमेन अभिव्यक्तेः प्रेस इत्यस्य सभायोजनस्य च स्वतन्त्रतासदृशाः अधिकाराः अनिश्चितकालाय निलम्बिताः। वाइमर-संविधाने एतैः अधिकारैः अतीव महत्त्वपूर्णं स्थानं प्राप्तम् आसीत्। ततः परं हिटलरः स्वीयान् घोरशत्रून् अभिलक्ष्य शरसन्धानम् अकरोत्। अधिकतराः साम्यवादिनः निशीथे एव कन्सन्ट्रेशन-कैम्प(शिबिरेषु) बद्धाः। साम्यवादिनां हिंसात्सकदमनं कृतम्। प्रायः पञ्चलक्षं जनसङ्ख्यायुक्ते ड्युस्सलडार्फ् इति नगरे ते निगृहीतानां जनानाम् अवशिष्टासु 6,808 इति सञ्चिकासु केवलं 1,440 इति साम्यवादिनाम् आसीत्। नात्सिजनाः न केवलं साम्यवादिनाम् एव नाशनं न अकुर्वन् अपितु नात्सिशासनेन आहत्य 52प्रकारकाणां जनानां दमनं कृतम् आसीत्।

1933 तमवर्षस्य मार्चमासस्य 03 दिनाङ्के प्रसिद्धः विशेषाधिकार-अधिनियमः निर्मितः। अनेन जर्मन्यां विशेषतया अधिनायकत्वं स्थापितम्। अनेन नियमेन हिटलराय संसदः सर्वोच्चस्थाने धक्कनस्य अपि च अध्यादेशानां द्वारा शासनचालनस्य अधिकारः प्रदत्तः। नात्सीदलं तेन सम्बद्धसङ्घटनान् अतिरिच्य सर्वाणि राजनैतिकदलानि ट्रेडयूनियनादिषु प्रतिबन्धः नियोजितः। अर्थव्यवस्था, प्रचारमाध्यमः, सेना, न्यायपालिका च इत्यादिषु अपि राज्यस्य सम्पूर्णतया नियन्त्रणं जातम्।

सम्पूर्णः समाजः नात्सिजनानां दृष्ट्या नियन्त्रितः व्यवस्थितः च भवेत् इति एतदर्थं विशेषनिरीक्षणाय सुरक्षायै च दलानि समूहाः च केचन नियुक्ताः। पूर्वतः एव हरितवेशधारिणाम् आरक्षकाणाम् अपि च स्टार्म-टूपर्स इत्येतम् अतिरिच्य गेस्तापो (गुप्तचर-राज्य-आरक्षकाणाम्), एस-एस इत्यस्य (अपराधनियन्त्रकारक्षकाणां) अपि च सुरक्षासेवकानां(एस-डी) इत्यस्य अपि नियोजनं कृतम्। एतेभ्यः नवसङ्घितसमूहेभ्यः अनन्ताः असंवैधानिकाः अधिकाराः प्रदत्ताः एतस्मात् एव नात्सिराज्यं कस्यचित् हिंसकस्य आपराधिकस्य च राज्यस्य छविं प्राप्तवान्। गेस्तापो इत्यस्य यन्त्रणा-गृहेषु कस्यापि निगठनं कर्तुं शक्यते स्म। एतादृशानि नूतनानि दलानि किमपि यातनागृहं प्रति

नूतनः शब्दः

(कन्सन्ट्रेशन-कैंप) - एतादृशानि स्थानानि यत्र कस्यापि वैधानिक-प्रक्रियायाः जनाः कारागारे स्थाप्यन्ते स्म। एतानि कन्सन्ट्रेशन् इति शिबिराणि विद्युतः धारायुक्तैः कण्टकिलतन्त्रीभिः च आवृत्तानि भवन्ति स्म।

प्रेषयितुं शक्नुवन्ति स्म, कस्यापि वैधानिकप्रकारेण देशनिर्वासनं भवितुं शक्नोति स्म, अथवा निग्रहणं तस्य कर्तुं शक्यते स्म। दण्डस्य आशङ्कया मुक्तानि आरक्षकदलानि निरङ्कुशस्य निरपेक्षस्य च शासनस्य अधिकारं प्राप्नवन्ति आसन्।

2.2 पुनर्निमाणम्

हिटलरः अर्थव्यवस्थां सुदृढां कर्तुं यम् अर्थशास्त्रिणं नियोजितवान् तस्य नाम ह्यालमारशाख्तः इति आसीत्। शाख्तः सर्वादौ सर्वकारीयेण धनेन प्रचाल्यमानानाम् आजीवका-संवर्धन-कार्यक्रमस्य माध्यमेन शतं प्रतिशतं च उत्पादनस्य शतं प्रतिशतं च आजीविकादानस्य च लक्ष्यं सुनिश्चितम्। प्रसिद्ध-जर्मन-अतिविशिष्ट-राजमार्ग इति परियोजना अपि च जनतायाः कार-फाक्स्-वैगन इति परियोजना च तस्य अर्थशास्त्रिणः कारणात् एव आसीत्।

विदेशनीतेः विषये अपि हिटलरः शीघ्रं साफल्यम् अवाप्तवान्। 1933तमे ख्रिस्ताब्दे सः लीग-आफ-नेशंस् इति एतं परित्यक्तवान्। 1936तमे ख्रिस्ताब्दे राईनलैण्ड इत्यस्य पुनः अधिग्रहणम् अकरोत् अपि च एकः जनः, एकं साम्राज्यं, एकः नेता इति एतादृशानाम् उद्घोषाणाम् आश्रयेण 1938तमे ख्रिस्ताब्दे आस्ट्रियादेशः जर्मनिदेशे विलीनीकृतः अथवा सम्मेलितः। ततः परं सः तेन चेकोस्लोविवाकिया इत्यनेन अधिगृहीतस्य जर्मनभाषिणः सुडेण्टनलैण्ड् इति प्रान्तस्य अधिग्रहणम् अकरोत्, अपि च पुनः सम्पूर्णं चेकोस्लोवाकिया इति देशम् अधिगृहीतवान्। तस्मिन् काले सः इङ्ग्लैण्डस्य अपि गुप्तसमर्थनं प्राप्नोति स्म यतो हि इङ्ग्लैण्डस्य दृष्टौ वर्सायस्य सन्धिनाम्नि जर्मनिदेशेन सह अन्यायः जातः। गृह्य-विदेशि-विषयोः शीघ्रमेव प्राप्तसाफल्यानां कारणात् इत्थम् अनुभूतं यत् देशस्य नियतिः अधुना परिवर्तयिष्यति इति सम्भाव्यते स्म।

चित्रम् – 10 – (पोस्टर) चित्रमाध्यमेन धोषणम् -, भवतां फाक्स-वागान इति ,
एतेषां चित्राणां माध्यमेन एतस्याः अनुभूतेः प्रयासः क्रियते स्म यत् अधुना सामान्यश्रमिकः अपि कारयानं क्रेतुं शक्नोति।



चित्रम् – 11 – नात्सि-सत्तायाः विस्तारः – यूरोपः , 1942,

परन्तु हिटलरः अत्रैव न स्थितवान् । शाख्तः हिटलरं परामृष्टवान् यत् सेनाम् अस्त्राणि शस्त्राणि च अभिलक्ष्य अधिकस्य धनस्य व्ययः न भवेत् यतो हि अधुना अपि सर्वकारीय-व्ययविवरण-पत्रानुसारं सर्वकारः हानौ आसीत् । परन्तु नात्सि-समर्थित-जर्मनिदेशे सुरक्षाप्रियजनानां कृते किमपि स्थानं नासीत् । शाख्तः तस्य पदात् सः अपकृतः । हिटलरः आर्थिकसङ्कटात् बहिर्भागम् आगन्तुं युद्धं विकल्परूपेण अचिनोत् । सः राष्ट्रिय-सीमाः विस्तारयन् पर्याप्तसंसाधनानि एकत्र कर्तुम् इच्छति स्म । एतत् एव लक्ष्यं मनसि निधाय सः सितम्बरमासे 1939तमे ख्रिस्ताब्दे पोलैण्डदेशस्य उपरि आक्रमणम् अकरोत् । एतस्मात् कारणात् फ्रांस-इङ्ग्लैण्ड-देशाभ्यां सह अपि तेन युद्धम् आरब्धम् । सितम्बरमासे 1940तमे च ख्रिस्ताब्दे जर्मनिदेशेन इटलीजापानदेशाभ्यां च सह कस्मिंचित त्रिपक्षीये सन्धौ हस्ताक्षरम् अकरोत् । एतस्य सन्धेः कारणात् अन्ताराष्ट्रियसमुदाये हिटलरस्य प्रभावः इतोऽपि प्रगाढः जातः । यूरोपस्य अधिकतरेषु देशेषु नात्सि इत्यस्य जर्मनिदेशस्य समर्थने ये सर्वकाराः आसन् ते काष्ठपुत्तिलिकारूपाः सर्वकाराः हिटलरेण निम्नीकृताः । 1940तम-ख्रिष्टाब्दस्य अन्तिमे काले हिटलरस्य शक्तेः चरमोत्कर्षः आसीत् ।

अधुना हिटलरः निजसम्पूर्णावधानं पूर्वियूरोपं जेतुं केन्द्रीकृतवान् यतो हि तस्य एषः दीर्घकालिकः स्वप्नः आसीत् । सः जर्मनदेशीयायै जनतायै संसाधनानां वासस्थानस्य (Living Space) च प्रबन्धनं कर्तुम् इच्छति स्म । जूनमासे 1941तमे च ख्रिस्ताब्दे सः सोवियत-सङ्घस्य उपरि आक्रमणम् अकरोत् । इयमेव हिटलरस्य काचित् ऐतिहासिकी मूर्खता आसीत् । अनेन आक्रमणेन जर्मनिदेशः पश्चिमायनानां ब्रिटिश-वायु-सैनिकानां परमाण्वस्त्रैः आक्रान्तः जातः यद्यपि पूर्विषु अयनेषु सोवियत-सेनाः जर्मनिसेनायाः प्रचण्डपराभवं कुर्वन्ति स्म । सोवियत-लाल-सेना स्तालिन-ग्राद इत्यस्मिन् जर्मनिसेनां पराभवितुम् बाध्याम् अकरोत् । सोवियत-लाल-सैनिकाः जर्मनिदेशस्य ये सैनिकाः युद्धात् पलायन्ते स्म तान् सैनिकान् अन्तपर्यन्तम् अनुधावनम् अकुर्वन् अपि च ते धावन्तः अन्ते बर्लिनस्य मध्यभागपर्यन्तम् आगतवन्तः । अनेन घटनाक्रमेण अग्रिमस्य अर्धशताब्दस्य कृते समग्रस्य पूर्वियूरोपस्य उपरि सोवियतस्य वर्चस्वं स्थापितम् ।

अमेरिका-देशः निरन्तरं प्रयत्तवान् यत् सः अस्मिन् युद्धे भागं न ग्रहीष्यति। प्रथमविश्वयुद्धकारणात् याः आर्थिकसमस्याः जाताः आसन् ताः अमेरिकादेशः अनुभूतवान् अतः पुनः ताः समस्याः सः न सोढुम् इच्छति स्म । परन्तु चिरकालं यावत् सः युद्धे भागम् अगृहीत्वा न स्थातुं शक्नोति स्म । पूर्वस्यां दिशि जापानस्य शक्तेः विस्तारः भवति स्म । तेन फ्रेंच-इण्डो-चाइना इत्यस्य अधिग्रहणं कृतम्, अपि च स प्रशांत-महासागरे अमेरिकादेशस्य नौसैनिक-स्थलानाम् आक्रमणस्य सम्पूर्णां योजनाम् अकरोत् । यदा जापानदेशेन हिटलरस्य समर्थनं कृतम् अपि च पर्ल-हार्बर इत्यस्मिन् अमेरिकीयस्थलानि लक्ष्यीकृत्य तस्योपरि परमाण्वस्त्रैः आक्रमणं कृतम् तदा अमेरिकादेशः अपि द्वितीयस्मिन् विश्वयुद्धे भागम् अवहत् । इदं युद्धं मे-मासे 1945तमे च ख्रिस्ताब्दे हिटलरस्य पराजयेन जापानस्य च हिरोशिमानगरे अमेरिकीय-परमाणुविस्फोटकस्य निपातनेन च सह समाप्तः जातः ।

द्वितीय-विश्व-युद्धस्य अनेन संक्षिप्तविवरणात् परम् वयम् अधुना एकदा पुनः हेलमुटस्य तस्य च पितृकथां प्रति गच्छामः । इयं युद्धकालिका नात्सि इत्येतेषाम् अपराधसम्बद्धा कथा अस्ति ।

चित्रम् – 12 – भारतीय-वार्त्तापत्रेषु जर्मनिदेशस्य स्थितिविषये वृत्तान्तः ।

॥ इति तृतीयोऽध्यायः ॥

3 नात्सि-विचारकाणां विश्वं प्रति दृष्टिः

नात्सिजनैः ये अपराधाः कृताः ते विशिष्टप्रकारकैः मूल्यैः मान्यताभिः व्यवहारेण च सम्बद्धाः आसन्।

नात्सि-विचार-धारा हिटलरस्य विश्वं प्रति (दृष्टिकोण) अवलोकनस्य पर्यायरूपा आसीत् । एतस्मिन् विश्व-अवलोकनस्य अनुसारं सर्वेभ्यः समाजेभ्यः समानतायाः अधिकारः न आसीत्, ते (नस्ल) जातेः आधारेण श्रेष्ठाः आसन् अथवा तु न्यूनतमाः आसन्। एतस्यां दृष्टौ ब्लान्ड इति,(नीली आंखों वाले) नीलाक्षाः, नार्डिक-जर्मन-आर्याः च प्रथमे स्थाने आसन्, यहूदिजनाः च निम्नतमे स्थाने आसन्। यहूदिजनाः जातेः विरोधिनः अर्थात् आर्याणां (कट्टर)मतान्धाः शत्रवः मन्यन्ते स्म । अवशिष्टाः समग्रसमाजाः तेषां बाह्यवर्णस्य रूपस्य च आधारेण जर्मनिदेशस्य आर्याणां यहूदिजनानां च मध्ये स्थापिताः आसन्। हिटलरस्य जातिवादि चिन्तनं चार्ल्स-डार्विन-हर्बर्ट-स्पेंसर-सदृशानां विचारकाणां सिद्धान्तेषु आधारितम् आसीत् । डार्विनः प्रकृति-विज्ञानी आसीत् येन विकासस्य प्राकृतिक-चयनस्य च अवधारणायाः माध्यमेन पादपानां पशूनां च उत्पत्तेः व्याख्यानस्य प्रयासः कृतः। परवर्तिकाले हर्बर्ट-स्पेंसरः अति-जीवितायाः सिद्धान्तं (सरवाइकल आफ द फिटेस्ट) दत्तवान्, यः योग्यतमः अस्ति, सः एव सजीवम् अवशिष्यते – इति एतादृशं विचारं सः प्रस्तुतवान्। एतादृशस्य विचारस्य अयम् अभिप्रायः आसीत् यत् याः प्रजातयः परिवर्तमानानां वातावरणीय-परिस्थितीनाम् अनुसारम् आत्मानम् अनुकुलयितुं शक्नुवन्ति, ताः एव पृथिव्यां जीवन्ति। अत्र अस्माभिः अयम् अंशः अवधातव्यः यत् डार्विनः उक्तवान् आसीत् यत् चयनस्य सिद्धान्तः इति काचित् विशुद्धा प्राकृतिक-प्रक्रिया अस्ति अपि च तत्र सः मानवीय-हस्तक्षेपस्य समर्थनं कदापि न अकरोत्। परन्तु जातिवादिनः विचारकाः राजनेतारः च पराजितेषु समाजेषु निजसाम्राज्यवादिनं शासनं समर्थयितुं डार्विनस्य विचाराणाम् आश्रयं कृतवन्तः। नात्सि-जनानां तर्कः अतीव सरलः आसीत्, ते वदन्ति स्म यत् या जातिः सर्वशक्तिमती अस्ति सा एव जीविष्यति इति, निर्बल-जातयः नष्टाः भविष्यन्ति। आर्यजातिः श्रेष्ठा अस्ति। तया सदैव निजशुद्धता संरक्षणीया, शक्तिः अर्जनीया आविश्वं च वर्चस्वं स्थापनीयम् अस्ति।

हिटलरस्य विचारधारायाः अपरः पक्षः लेबेन्स्राउम इत्यनेन अथवा जीवन-परिधिना भूराजनैतिक-अवधारणया च सम्बद्धः आसीत्। हिटलरस्य मतम् आसीत् यत् आत्मीयानां जनानां वासार्थम् अधिकाधिक-क्षेत्राणाम् अधिग्रहणम् आवश्यकम् अस्ति इति। अनेन मातृदेशस्य क्षेत्रफलम् (परिमाणम्) अपि वर्धिष्यते अपि च नूतनानि क्षेत्राणि गत्वा ये जनाः वासं करिष्यन्ति एतादृशाः च जनाः यदि स्वीयेन जन्मस्थानेन सह घनिष्ठ-सम्बन्धं स्थापयितुम् इच्छन्ति तर्हि ते तं स्थापयितुं काठिन्यं न अनुभविष्यन्ति। हिटलरस्य दृष्ट्या अनेन प्रकारेण जर्मनराष्ट्राय संसाधनस्य अनन्तशक्तेः च एकत्रीकरणं कर्तुं शक्यते स्म।

पूर्वस्मिन् भागे हिटलरः जर्मनसीमाः इतोऽपि विस्तारयितुम् इच्छति स्म, यतः सर्वे जर्मनजनाः भौगोलिक-दृष्ट्या एकस्मिन् एव स्थाने एकत्रीकर्तुं शक्येरन्। पोलैण्डदेशः एतादृश्याः अवधारणायाः प्रथमप्रयोगशालारूपः जातः।

3.1 जातिवादि-राज्यस्य स्थापनम्

नात्सिजनानां कश्चित् स्वप्नः आसीत् यत् ते (सत्ता) अधिकारप्राप्तेः समन्तरमेव शुद्धानां जर्मनजनानां विशिष्ट-जातीयसमुदायस्य स्थापनं करिष्यन्ति इति अतः एतस्य कार्यस्य ते

स्रोतः कः इति

"इयं पृथिवी न तु केनचित् दायाद-भाग-रूपेण प्राप्ता अस्ति न च उपहाररूपेण एव प्राप्ता अस्ति। नियत्या तादृशेभ्यः जनेभ्यः इयम् अर्पिता अस्ति येषां हृदये एतां जेतुं संरक्षितुं च धैर्यं साहसः च अस्ति अपि च येषां पार्श्वे एतां भूमिं क्रष्टुम् उद्यमः अस्ति .... । एतस्मिन् जगति आधारभूततमः अधिकारः अस्ति जीवनस्य अधिकारः, कामं कस्यचित् समीपे तादृशं जीवनाधारं प्राप्तुं शक्तिः स्यात् उत् न स्यात्। एतस्य अधिकारस्य आधारेण किञ्चित् उर्जस्वलं वर्चस्वलं च राष्ट्रं स्वीयं भूभागम् आत्मीय-जनानां जनसङ्ख्यायाः आधारेण प्रसारणस्य मार्गाः आविष्कृताः।"

हिटलरः,सीक्रेट-बुक,सं., टेलफोर्ड-टेलर इति।

क्रियाविधिः

क इति स्रोतसं ख इति स्रोतसं च पठन्तु

- एतस्मात् हिटलरस्य साम्राज्यवादिनां लक्ष्याणां विषये भवन्तः किम् अवगच्छन्ति ?
- भवतां मतानुसारं एतेषां विषयाणां सन्दर्भे महात्मा गान्धी हिटलरं किम् अकथिष्यत् ?

नूतनः शब्दः –

नार्डिक-जर्मन-आर्यः (इति) – आर्याणां काचित् शाखा । एते जनाः उत्तरीय-यूरोपीय-देशेषु निवसन्ति स्म अपि च ते जर्मनसम्बद्धाः अथवा तादृशाः आसन्।

आरम्भं कृतवन्तः। सर्वप्रथमं ते विस्तारिते जर्मन-साम्राज्ये विद्यमानान् तान् समाजान् अथवा जातीः समापयितुम् आरब्धवन्तः याः जातीः अवाञ्छिताः सन्ति इति ते मन्यन्ते स्म। नात्सिजनाः शुद्धानां स्वस्थ-नार्डिक-आर्याणां च समाजं रचयितुम् इच्छन्ति स्म। तेषां दृष्टौ केवलम् एतादृशाः जनाः एव वाञ्छिताः आसन्। केवलम् एते एव ते जनाः आसन् ये उन्नतये वंशविस्ताराय च योग्याः सन्ति इति मन्यन्ते स्म। अन्ये सर्वे जनाः अवाञ्छिताः आसन्। एतस्याः व्यवस्थायाः अभिप्रायः अयम् आसीत् यत् एतादृशानाम् अपि जर्मनजनानाम् अपि जीवितुम् कश्चिदपि अधिकारः नास्ति यान् नात्सिजनाः अशुद्धान् असामान्यान् च मन्यन्ते स्म। यूथनेजिया (दयामृत्युः) इति कार्यक्रमस्य अन्तर्गतम् अन्यैः नात्सि-अधिकारिभिः सह हेलपुटस्य पिता अपि असङ्ख्यकान् जर्मनजनान् हतवान् यान् ते नात्सिजनाः मानसिकरूपेण शारीरिकरूपेण च अयोग्यान् मन्यन्ते स्म।

केवलं यहूदिजनाः एव न आसन् ये अवाञ्छित-श्रेण्यां स्थापिताः आसन्। एतान् यहूदिजनान् अतिरिच्य अपि अनेकाः जातयः आसन् याः अपि अस्याम् अवाञ्छित-श्रेण्याम् आसन्। जर्मन-वास्त्व्यानाम् जिप्सिजनानाम् अश्वेतानां तु आदौ जर्मननागरिकता परिहृताः परवर्तिनि च काले ते हताः। रूसीयाः पोलिश-मूलीया जनाः अपि हीनपुरुषाः सन्ति इति मताः। यदा जर्मनिदेशेन पोलैण्डस्य रूसस्य च केचन भागाः अधिगृहीताः तदा स्थानीयाः जनाः भयानक-परिस्थितिषु क्रीतदासाः इव कार्ये नियोजिताः। तादृशैः जनैः सह मानवीयव्यहारः नोचितः इति मन्यते स्म। तेषु जनेषु नैके जनाः तु अपरिगणितकार्यभारवशात् अपि च बुभुक्षया मृतवन्तः।

नात्सिशासिते जर्मनिदेशे अतीव दयनीयदशा तु यहूदिजनानाम् आसीत्। यहूदिजनान् प्रति नात्सिजनानां शत्रुतायाः आधारः यहूदिजनान् प्रति ख्रिष्टीये धर्मे विद्यमानः परम्परागतस्य घृणायाः भावः अपि आसीत्। ख्रिस्तानुयायिनाम् आरोपः आसीत् यत् ईसामसीहः यहूदिजनैः एव मारितः। ख्रिस्तानुयायिनां दृष्टौ यहूदिजनाः प्रकृत्या एव हन्तारः **(सूदखोर) कुशीदकाः** च इति आसन्। मध्यकालं यावत् यहूदिजनाः भूस्वामिनः न भवितुं शक्नुवन्ति स्म यतः तेषां तत्र अधिकारः न आसीत्। एतादृशाः जनाः मुख्यरूपेण वाणिज्यं कुर्वन्ति स्म अपि च कुसीदस्य आधारेण धनम् ऋणरूपेण दत्त्वा स्वीयं जीवननिर्वहणं कुर्वन्ति स्म। ते समाजात् पृथक् आवासीयस्थानेषु निवसन्ति स्म तानि ते **घेटो (Ghettoes)** इति अर्थात् दडबा इति उच्यन्ते स्म। जातेः संहारस्य माध्यमेन ख्रिस्तानुयायिनः पौनःपुण्येन तेषां संहारं कुर्वन्ति स्म। यदा कदा तान् विरुध्य सङ्घीया हिंसा अपि च तान् तेषाम् आवासान् प्रति ते बलात् प्रेष्यन्ते स्म। परन्तु ख्रिस्तानुयायिभिः तेभ्यः आत्मानं रक्षितुं कश्चन मार्गः पुनरपि दत्तः आसीत्। इदं धर्मपरिवर्तनस्य मार्गः आसीत्। आधुनिके काले बहूभिः यहूदिजनैः ख्रिस्तीयः धर्मः अङ्गीकृतः अपि च ते अवजानन्तः जर्मनसंस्कृतौ विलीनाः जाताः। परन्तु यहूदिजनान् प्रति हिटलरस्य घृणा तु जातेः छद्म-वैज्ञानिक-सिद्धान्तेषु आधारिता आसीत्। एतस्मिन् घृणाभावे यहूदिसमस्यायाः समाधानं धर्मान्तरेण न भवितुं शक्नोति स्म। हिटलरस्य दृष्टौ एतस्याः समस्यायाः केवलम् एकमेव समाधानम् आसीत् - यहूदि-जनानां सम्पूर्णतया समापनं स्यात्।

1933तमख्रिष्टात् आरभ्य 1938तमख्रिष्टाब्दं यावत् नात्सिजनाः यहूदिजनान् विविधप्रकारेण आतङ्कितान् अकुर्वन् तैः ते तान् दरिद्रान् कृत्वा आजीविकाविहीनान् च कृतवन्तः अपि च ते शिष्टात् समाजात् बहिष्कृताः। यहूदिजनाः देशं परित्यज्य गन्तुम् आरब्धवन्तः। 1939-45 इति काले काचित् रणनीतिः कल्पिता सा एवम् आसीत् यत् यहूदिजनाः आदौ केषुचित् विशिष्टक्षेत्रेषु एकत्र करणीया अपि च अन्ततः ते पोलैण्डे निर्मितानि यानि गैसयन्त्राणि सन्ति तानि प्रति नीत्वा ते तत्र हन्तव्याः इति।

चित्रम् – 13 – आरक्षकाणां निरीक्षणे औषवित्सं प्रेष्यमाणाः जिप्सिजनाः, (1943-1944,)

स्रोतःख इति

(पृथिवी) भूमिः निरन्तरं राज्याणाम् मध्ये विभागशः वण्ट्यते , तत्र केचन महाद्वीपवत् महान्तः भागाः सन्ति । एतादृशे युगे वयं कस्याश्चित् विश्वशक्तेः विषये न चिन्तयितुं शक्नुमः यस्याः राजनैतिकः मातृदेशः केवलं पञ्च-शत-वर्ग-किलीमीटर-परिमित-सदृशात् वाहियात इत्यस्मात् क्षेत्रफले सङ्कुचितः स्यात् ।

हिटलरः,मेन-काम्फ इति, पृष्ठम्,644 इति।

नूतनाः शब्दाः

(जिप्सी इति) जिप्सिजनाः - जिप्सी इति नाम्नः श्रेण्यां बद्धानां समूहानां स्वीयः कश्चन सामुदायिकः परिचयः आसीत्। सिन्ती रोमा च इति द्वौ एव एतादृशौ समूहौ आस्ताम्।

(सूदखोरः) कुशीदकाः – एतादृशाः महाजनाः ये आधिक्येन कुसीदं गृह्णन्ति स्म। एतस्य (कुशीदक इति) शब्दस्य प्रायः अपशब्दरूपेण प्रयोगः क्रियते स्म।

(घेटो इति) - कस्यचित् समुदाय-विशेषस्य – पृथक् कृत्वा स्थापनं घेटो इति उच्यते स्म।

3.2 जाति-कल्पना-लोकः (यूटोपिया)

युद्धस्य छायायां नात्सिजनाः घातक-प्रवत्तेः जातावादिनः कल्पनालोकस्य च अथवा आदर्शविश्वस्य निर्माणे संलग्नाः जाताः । जनसंहारः युद्धं च कस्याश्चित् एकस्याः मुद्रायाः पक्षद्वयम् इव जातम् । पराजितः पोलैण्डदेशः सम्पूर्णतया नाशितः । उत्तर-पश्चिमस्थस्य पोलैण्डदेशस्य अधिकतरः भागः जर्मन्यां विलीनीकृतः । पोलैण्डवासिनः जनाः निजगृहाणि सम्पत्तीः च परित्यज्य पलायितुं बाध्याः कृताः यतः जर्मनिदेशेन अधिगृहीते यूरोपे ये जर्मनजनाः सन्ति तान् जनान् तत्र आनीय तेषां वासव्यस्था तत्र भवितुं शक्नुयात् इति । ततः परं पोलैण्डवासिनः पशवः इव ततः बलात् निष्कास्य जनरल-गवर्नमेंट इति नामके अपरस्मिन् भागे प्रापिताः । जर्मनसाम्राज्ये विद्यमानाः सर्वे अवाञ्छित-जनाः जनरल-गवर्नमेंट-नामकम् एतत् क्षेत्रम् आनीय एव स्थाप्यन्ते स्म । पोलैण्डस्य बुद्धिजीविनः व्यापकप्रमाणेन हताः । पोलैण्डस्य समाजः बौद्धिकरूपेण आध्यात्मिकरूपेण च क्रीतदासः भवेत् इति तदर्थम् एव इयं काचित् युक्तिः आसीत् । ये पोलैण्डदेशीयाः बालाः आर्यवत् दृश्यन्ते स्म ते बालाः तेषां पितृभ्यः बलात् परिहृत्य निरीक्षणाय जातिविशेषज्ञाणां समीपे प्रापिताः यस्मात् प्रमाणितं स्यात् यत् एते वास्तविकरूपेण आर्याः सन्ति अथवा न सन्ति इति । ये तत्र निरीक्षणे साफल्यम् अवाप्नुवन्ति स्म ते जर्मनपरिवारेषु पाल्यन्ते स्म अपि च ये ते तत्र आर्याः न भवन्ति स्म ते अनाथालयाः प्रवेश्यन्ते स्म तत्र तेषु नैके तु मृत्युं प्राप्नुवन्ति स्म । जनरल-गवर्नमेंट इत्यस्मिन् केचन विशालतमाः घेटो इति अपि च (गैस-चैम्बर)वाष्प-कक्षाः अपि आसन् अतः अत्र यहूदिजनाः व्यापकपरिमाणेन हन्यन्ते स्म ।

क्रियाविधिः

अग्रिमे द्वे पृष्ठे पश्यन्तु अपि च एतयोः विषये सङ्क्षेपेण लिखन्तु

- भवतां दृष्टौ नागरिकतायाः कः अभिप्रायः अस्ति ? प्रथमं तृतीयं च अध्यायं पश्यन्तु अपि च द्विशतैः शब्दैः बोधयन्तु यत् फ्रांसीयक्रान्तिकारिभिः नात्सिवादिनः च नागरिकतां कथं परिभाषितवन्तः ?
- नात्सियुक्त-जर्मनिदेशे अवाञ्छितेभ्यः न्यूरम्बर्ग-अधिनियमानां कः अभिप्रायः आसीत् ? ते एतत् तथ्यम् अवगच्छेयुः यत् ते अवाञ्छिताः सन्ति इत्यर्थं के के अधिनियमीय-प्रयासाः कृताः ?

चित्रम् – 14 – यहूदिजनान् वाष्पकक्षान् यावत् नेतुं कञ्चित् सामग्रीवाहक-यानम्

मृत्योः क्रमः

प्रथमं चरणम् – बहिष्कारः (1933 -39)

अस्माकं मध्ये नागराः इव वसितुं भवतां कोऽपि अधिकारः नास्ति।



न्यूरेम्बर्ग-नागरिकता अधिकारः,सितम्बरमासः,1935तमख्रिष्टाब्दम् –

1.जर्मनदेशीयाः अथवा तत्सम्बद्ध-रक्त-युक्ताः जनाः एव जर्मननागराः भविष्यन्ति जर्मनसाम्राज्यस्य संरक्षणं ते एव प्राप्स्यन्ति।

2.यहूदिजनानां जर्मनजनानां च पारस्परिके विवाहे प्रतिबन्धः।

3.यहूदिजनानां जर्मनजनानां च मध्ये विवाहेतरसम्बन्धः अपराधः अस्ति इति घोषितम्।

4.यहूदिजनैः राष्ट्रियध्वजस्य उत्तोलने प्रतिबन्धः स्थापितः।

अन्ये अधिनियमीयाः उपायाः –

- यहूदीय-उद्योगानां बहिष्कारः।
- सर्वकारीयाभ्यः सेवाभ्यः निष्कासनम्।
- यहूदिजनानां सम्पत्तेः राजसात्करणं विक्रयणं च।

एतदतिरिच्य एतस्य नवम्बरमासीयस्य 19तमवर्षीयस्य कस्मिंश्चिति नरसंहारे यहूदिजनानां सम्पत्तिः नाशिता, लुण्ठिता तेषां गृहाणां च उपरि आक्रमणानि जातानि, यहूदि-प्रार्थनालयाः (Synagogues) प्रज्वालिताः अपि च यहूदिजनाः निगृहीता। इयं घटना "नाइट-आफ-ब्रोकन-ग्लास "इति नाम्ना स्मर्यते।

चित्रम् – 17 – मम पार्श्वे विक्रयणाय केवलम् इदम् एव अस्ति
घेटो इत्यस्य जनानां पार्श्वे जीवितुं कोऽपि अन्यमार्गः अवशिष्टः न आसीत्।

द्वितीयं चरणम् दडबाबन्दी(Gattoisaion) यहूदि-ग्रामटिका (1940-44)

अस्मासु वासस्य भवतां कोऽपि अधिकारः नास्ति।

सितम्बरमासे 1941तमे ख्रिस्ताब्दे सर्वे यहूदिजनाः आदिष्टाः यत् ते डेविडस्य पीतवर्णीयं तारक-चिह्नं स्वीये वक्षस्थले नियोज्य तिष्ठन्ति। तेषां पारपत्रस्य सर्वेषाम् अधिनियमीयाभिलेखानां गृहाणां च बहिर्भागे अपि इदं परिचयपत्रचिह्नं स्थापितम्। जर्मनिदेशे ते यहूदिगृहेषु अपि च पूर्वि-क्षेत्रस्य लोट्स-वारसा-सदृशाषु घेटो इति ग्रामटीकासु कष्टपूर्णायाः द्ररिद्रतायाः च स्थितौ स्थाप्यन्ते स्म। यत्र यहूदिजनाः निवसन्ति स्म तानि क्षेत्राणि अविकसितानि असम्पन्नानि च आसन्। घेटो इत्यस्मिन् प्रवेशात् पूर्वं यहूदिजनाः तेषां स्वीयां सम्पूर्णां सम्पत्तिं त्यक्तुं बाध्याः कृताः। कैश्चित् दिनैः एव तत्र वञ्चनस्य दुर्भिक्षम् अस्वच्छतायाः रोगाणां च साम्राज्यं व्याप्तम्।

तृतीयं चरणम् – सर्वनाशः – 1941तमख्रिस्ताब्दात् परम्

भवन्तः जीवितुं न अधिकृताः ।

चित्रम् – 18 – पलायनस्य प्रयासेन मृत्युः । यातनागृहं परितः विद्यमानासु तन्त्रिषु विद्युतधारा निरन्तरं प्रवहति स्म ।

चित्रम् – 19 – गैस वाष्प-कक्षात् बहिर्भागे वस्त्राणां चयः ।

चित्रम् – 20 – किञ्चित् यातना-गृहम् ।

चित्रम् 21 - किञ्चित् यातना-गृहम् । छायाचित्रयन्त्रेण मृत्युक्षेत्राणि अपि रमणीयानि कर्तुं शक्यन्ते ।

चित्रम् 22 – अन्तिमसमाधानात् पूर्वं बन्दिभ्यः परिहृतानि पादत्राणानि ।

इति तृतीयः पाठः

4 नात्सिवादिनि जर्मनिदेशे यूनां स्थितिः

युवकेषु हिटलरं प्रति रुचेः चरमोत्कर्षः आसीत् । युवकानां मतम् आसीत् यत् शक्तिशालिनः नात्सिसमाजस्य स्थापनायै बालानां नात्सिविचारधारायां दीक्षा आवश्यकी अस्ति इति । एदर्थं विद्यालयस्य आभ्यन्तरे बहिर्भागे च उभयत्र सम्पूर्णं नियन्त्रणम् आवश्यकम् आसीत् ।

नात्सिवादकाले विद्यालयेषु किं भवति स्म ? सर्वेषु विद्यालयेषु नाशस्य शुद्धिकरणस्य च अभियानं चालितम् । यहूदिजनाः अथवा राजनैतिकरूपेण अविश्वसनीयाः ये मन्यन्ते स्म तादृशाः शिक्षकाः आदौ सेवातः निष्कासिताः अपि च परावर्तिकाले ते मृत्युमुखं निपातिताः । जर्मनिदेशीयाः यहूदिबालाः च न तु सहैव उपवेष्टुं शक्नुवन्ति स्म न च क्रीडितुम् एव शक्नुवन्ति स्म । परवर्तिकाले अवाञ्छिताः बालाः अर्थात् यहूदिजनानां जिप्सिजनानां दिव्याङ्ग-बालाः च विद्यालयात् निष्कासिताः । चत्वारिंशततमे दशके तु ते अपि वाष्पकक्षीयाग्नौ क्षिप्ताः ।

शोभनैः जर्मनबालैः अनिवार्यरूपेण नात्सिशिक्षा प्राप्तव्या भवति स्म । इयं विचारधारात्मक-प्रशिक्षणस्य काचित् दीर्घतरा प्रक्रिया आसीत् । विद्यालयीयानि पाठ्यपुस्तकानि नूतनरूपेण प्रारम्भतः लिखितानि । जातेः विषये प्रचारिताः नात्सिविचाराः समीचीनाः सन्ति इति प्रमाणीकर्तुं जातिविज्ञानस्य नाम्नः कश्चित् नूतनविषयः पाठ्यक्रमे सम्मिलितः । अन्यत् तु किं वदामः गणितसम्बद्धकक्ष्यासु अपि यहूदिजनानां काचित् विशिष्टा छविः स्यात् इति एतदर्थं प्रयासः क्रियते स्म । बालाः शिक्षिताः यत् ते कर्तव्यपालकाः आज्ञाकारिणः च भवेयुः, यहूदिजनान् प्रति जुगुप्सेरन् अपि च हिटलरम् अर्चयेयुः । क्रीडादिमाध्यमेन अपि बालेषु हिंसायाः आक्रामकतायाः च भावाः उत्पाद्यन्ते स्म । हिटलरस्य मतम् आसीत् यत् मुष्टिक्रीडया बालाः शक्तिमन्तः पौरूषयुक्ताः उत्साहिनः च कर्तुं शक्यन्ते ।

जर्मनबालाः अपि च युवकाः च राष्ट्रीयसमाजवादस्य भावनया अन्विताः भवेयुः इति तद्दायित्वं युवसङ्घटनेभ्यः अर्तितम् । दशवर्षीयाः बालाः एव **युङ्गफोक** इत्येतं प्रवेश्यन्ते स्म । चतुर्दशवर्षीयैः बालकैः नात्सिनां युवसङ्घटनस्य हिटलरयूथ इत्यस्य सदस्यता स्वीकर्तव्या भवति स्म । तस्मिन् सङ्घटने ते युद्धस्य उपासनम् आक्रमकतां हिंसां लोकतन्त्रस्य निन्दनं यहूदिजनेभ्यः साम्यावादिभ्यः जिप्सिजनेभ्यः अवाञ्छितेभ्यः च घृणायाः शिक्षां प्राप्नुवन्ति स्म । अष्टादशवर्षीयाः यदा ते भवन्ति स्म तदा ते (लेबर-सर्विस) श्रमसेवायां सम्मिलिताः भवन्ति स्म । तदनन्तरं तैः सेनायां कार्यं करणीयं भवति स्म अपि च कस्यचित् नात्सिसङ्घटनस्य सदस्यता ग्रहीतव्या भवति स्म ।

चित्रम् – 23 - एतस्मिन् चित्रे यहूदि-विरोधि-विषयाणाम् अध्ययन-कक्षा दर्शिता अस्ति ।
अनर्स्ट-हीमरेण (न्यूरेम्बर्ग – डेअर-श्टुर्मर,1938) रचितम् एतत् चित्रं डेयर-गिफ्टपिल्ज इयस्मात् सप्तमपृष्ठात् उद्धृतम् अस्ति , चित्रस्य शीर्शकम् इत्थम् अस्ति – यहूदिनासिका उर्ध्वभागेन वक्रा अस्ति । इयम् आङ्ग्लभाषायाः षड् इति अङ्कसदृशा अस्ति ।

चित्रम् 24 – सर्वेषां बालानां हसनाभ्यन्तरे यहूदिविद्यार्थिनः शिक्षकाः च विद्यालयात् निष्कास्यन्ते ।
एल्वीरा-बाऊअरद्वारा रचितं (न्यूरेम्बर्ग- डेयर-शटुर्मर,1936) चित्रम्, ट्राऊ-कीनेम-जुड-आऊफ-ग्रुनर-हीद – ईन-बिल्दर-बुश-फ्रुर-ग्रास-उन्द-कियोम(ग्रीन-हीथ इत्यस्मिन् कस्मिन्नपि यहूदिजने न विश्वसितु – लघूनां ज्येष्ठानां च कृते किञ्चित् चित्रम्) इत्यस्मात् सङ्गृहीतम् अस्ति ।

नूतनः शब्दः

युङ्गफोकः – ये बालकाः चतुर्दशवर्षीयाः न सन्ति तादृशानां बालकानां कृते नात्सियुवसङ्घटनम् ।

क्रियाविधिः

यदि भवन्तां कस्याञ्चित् एतादृश्यां कक्षायाम् अभविष्यन्त तर्हि यहूदिजनान् प्रति भवतां दृष्टिः कीदृशी अभविष्यत् ?
किं भवद्भिः चिन्तितम् अस्ति यत् भवतां परिचिताः अन्येषां समुदायानां विषये किं चिन्तयन्ति ? तेषाम् एवम्विधा दृष्टिः कथं विकसिता ?

स्रोतः ग इति

षड्वर्षीयेभ्यः दशवर्षीयान् युवकान् यावत् सर्वभ्यः बालेभ्यः नात्सिविचारधारायाः आरम्भिकप्रशिक्षणं दीयते स्म। प्रशिक्षणस्य समाप्तौ तैः हिटलरं प्रति निष्ठायाः कश्चित् अयं शपथः ग्रहीतव्यः भवति स्म।

अस्माकं प्यूह्-रर इत्यस्य प्रतिनिधित्वकारिणः रक्तध्वजस्य उपस्थितौ अहं शपथं स्वीकरोमि यत् मम सम्पूर्णा शक्तिः ऊर्जा च अस्माकं देशस्य रक्षकाय एडाल्फहिटलराय समर्पिता अस्ति । अहं तस्य कृते स्वीयं जीवनं जीवनस्य इच्छुकः अस्मि एतदर्थं च अहं सज्जः अस्मि । ईश्वरः मम साहाय्यं कुर्यात्।

स्रोतः घ इति

जर्मन-लेबर-फ्रण्ट इत्यस्य प्रमुखः राबर्ट-ले अवदत् –

वयं तदारभ्य एव कार्यस्य आरम्भं कुर्मः यदा बालकः त्रवर्षीयः भवति। यथैव सः स्वल्पं चिन्तयितुम् आरभते तदैव कश्चित् लुघुध्वजः प्रसारणाय तस्य हस्तयोः स्थाप्यते। ततः परं विद्यालयस्य हिटलरयुवसङ्घटनस्य सैनिकसेवायाः च तस्य क्रमः भवति। परन्तु एतस्य सर्वविधस्य प्रशिक्षणस्य अनन्तरम् अपि न वयं तं बालकं त्यजामः । श्रमिकसेवादलं तान् बालकान् स्वाधीनान् करोति। कामं ते एतत्सर्वं मनसा स्वीकुर्युः अथवा न स्वीकुर्युः परन्तु मृत्युपर्यन्तं तैः एतत् सर्वं करणीयं भवति।

चित्रम् – 25 – वाञ्छिताः बालाः येषां सङ्ख्यां हिटलरः वर्धितुम् इच्छति स्म।

चित्रम् 26 - अधिकृतात् यूरोपात् अधिकृतपौलैण्डे निवासयितुं कश्चित् शिशुः स्वमात्रा सह प्रेष्यते।

नात्सि-युव-लीगस्य सङ्घटनं 1922तमे वर्षे अभवत्। चतुर्णां वर्षाणाम् अनन्तरं तस्य हिटलरयुथ इति नामकरणम् अभवत्। 1933तमख्रिस्ताब्दं यावत् अस्मिन् सङ्घटने 12.5लक्षाधिकाः बालाः सम्मिलिताः आसन्। युवान्दोलनं नात्सिवादस्य सान्निध्ये एकत्रीकर्तुम् अन्यानि सर्वाणि युवसङ्घटनानि पूर्वतः एव निरस्तीकृतानि आसन् अपि च परवर्तिकाले ते प्रतिबन्धिताः।

4.1 मातृत्व-सम्बद्धं नात्सिचिन्तनम्

नात्सिशासिते जर्मनिदेशे प्रत्येकं बालः पुनः पुनः बोध्यते स्म यत् महिलाः आधारभूतरूपेण पुरुषेभ्यः भिन्नाः सन्ति। ते बोध्यन्ते स्म यत् महिलाभ्यः पुरुषेभ्यः च

चित्रम् 27 - मृत्युशिल्पशालां प्रति आगच्छन्तः यहूदिबालकाः तत्र ये विषाक्त-वाष्पेण हनिष्यन्ते।

क्रियाविधिः

त्रयोविंशं चतुर्विंशं सप्तविंशं चित्रं च पश्यन्तु। कल्पयन्तु यत् भवन्तः नात्सियुक्तस्य जर्मनदेशस्य वास्तव्याः यहूदिजनाः अथवा पोलिशमूलकाः जनाः सन्ति। भवन्तः सितम्बरमासे 1941तमे ख्रिस्ताब्दे च जीवन्ति अपि च अधुना एव अधिनियमः रचितः अस्ति यत् यहूदिजनैः डेविड इत्यस्य पदकं धृत्वा स्थातव्यं भविष्यति। एतादृश्यां परिस्थितौ स्वीयस्य एकस्य दिनस्य विवरणं लिखन्तु।

समानाः अधिकाराः भवेयुः इति एतदर्थं सङ्घर्षः असमीचीनः अस्ति । अनेन समाजः नष्टः भविष्यति । अनेन आधारेण बालकाः आक्रामकाः पौरुषान्विताः अमृदुहृदयाः च भवेयुः इति ते शिक्ष्यन्ते स्म । अपरं च बालिकाः निर्दिष्यन्ते स्म यत् तासां दायित्वम् अस्ति यत् ताः सुप्रकारेण स्वीयं मातृधर्मं पालयेयुः अपि च शुद्धार्यरक्तान्वितेभ्यः बालेभ्यः जन्म दद्युः तथा च तेषां पालनं पोषणं च कुर्युः इति । जातेः शुद्धता निरन्तरं तिष्ठेत्, यहूदिबालेभ्यः आर्यबालाः दूरे तिष्ठेयुः, गृहकार्यस्य बालेभ्यः च नात्सिशिक्षणस्य मान्यतायाः च शिक्षायाः दायित्वं महिलाभ्यः एव समर्पितम् आसीत् । आर्यसंस्कृतेः जातेः च ध्वजवाहिकाः ताः महिलाः एव आसन् ।

1933तमे ख्रिस्ताब्दे हिटलरः अवदत् आसीत् – यत् मम राज्यस्य महत्त्वपूर्णनागरिकः इति माता एव अस्ति । परन्तु नात्सिसञ्चालिते जर्मनिदेशे सर्वाभिः मातृभिः च सह अपि समानव्यवहारः न भवति स्म । याः महिलाः जातीयरूपेण ये शिशवः अवाञ्छिताः इति दृश्यन्ते स्म इति तादृशान् शिशून् प्रसवन्ति स्म तादृशाः महिलाः दण्ड्यन्ते स्म अपरञ्च याः महिलाः जातेः रूपेण वाञ्छितशिशून् प्रसवन्ति स्म ताभ्यः पुरस्काराः दीयन्ते स्म । एतादृशाभ्यः च महिलाभ्यः चिकित्सालयेषु च विशिष्टसौविध्यानि दीयन्ते स्म, आपणेषु अपि च ताः विशिष्टमुक्त-तां प्राप्नुवन्ति स्म अपि च चलच्चित्रस्य रेलयानस्य च चिटिकाः अपि ताः अन्येषाम् अपेक्षया अल्पधनेन प्राप्नुवन्ति स्म । याः महिलाः अनेकान् शिशून् प्रसवन्ति स्म तासां कृते हिटलरेण पदकदानस्य तादृशी एव व्यवस्था कल्पिता आसीत् या व्यवस्था पदक-दानाय सैनिकभ्यः कृता आसीत् । याः महिलाः चतुरः शिशून् प्रसवन्ति स्म ताभ्यः कांस्यपदकं याः महिलाः षड् शिशून् प्रसवन्ति स्म ताभ्यः रजतपदकं याश्च महिलाः अष्टौ शिशून् अथवा ततोऽपि अधिकान् शिशून् प्रसवन्ति स्म ताभ्यः सुवर्णपदकं दीयते स्म ।

याः आर्य-महिलाः निश्चिताचारसंहितायाः उल्लङ्घनं कुर्वन्ति स्म तासां निन्दा क्रियते स्म अपि च ताः कठोरदण्डेन दण्ड्यन्ते स्म । अनेकासां महिलानां मुण्डनं कृत्वा, मुखे कालिमां संलेप्य कण्ठे च तासां फलकं संस्थाप्य ताः आ नगरं परिभ्राम्यन्ते स्म । तासां महिलानां कण्ठे यत् फलकं लम्बितं भवति स्म तत्र लिख्यते स्म यत् मया – राष्ट्रसम्मानः मलिनीकृतः इति । एतादृशस्य आपराधिकस्य कृत्यस्य कृते अनेकाः महिलाः न केवलं कारां प्रति एव प्रेषिताः अपितु ताभ्यः तासां नागरसम्मानः तासां पतिदेवाः परिवाराः च अपि परिहृताः ।

स्रोतः च

न्यूरेम्बर्ग-दल-जनसभायां महिलाः सम्बोधयन् सितम्बरमासे अष्टौ दिनाङ्के 1934तमे च ख्रिस्ताब्दे हिटलरः अवदत् –
मह्यम् एतत् न रोचते यत् महिलाः परुषजगत् प्रविश्य तत्र पुरुषस्थानं प्राप्य पुरुषकार्येषु हस्तक्षेपं कुर्युः इति। मम दृष्टौ महिलापरुषरूपेण या दृष्टिः अस्ति एते द्वे अपि सृष्टी परस्परं भिन्ने स्तः --- । यथा पुरुषाः स्वसाहसरूपेण युद्धस्य अयनेषु स्वीयं सर्वस्वम् अर्पयन्ति, तथैव महिलाः अनन्तात्मबलिदानस्य अनन्तपीडायाः च रूपेण स्वीयं योगदानं यच्छन्ति । प्रत्येकम् अपि बालकं यं महिला संसारं प्रति आनयति तत् आनयनं तस्यै युद्धवत् एव भवति, स्वसमाजं जीवनाय महिला युद्धवत् एव कार्यं करोति।

स्रोतः छ इति

न्यूरेम्बर्ग-दलीय-जनसभायां सितम्बर-मासस्य अष्टौ दिनाङ्के 1934तमे च ख्रिस्ताब्दे एव हिटलरः इदम् अपि अवदत् आसीत् -----
महिलाः कम् अपि समुदायं संरक्षयितुं सर्वाधिकं स्थिरतत्त्वम् अस्ति --- । सा महिला एतं विषयं समीचीनतया जानाति यत् स्वजातेः जीवनाय कानि कानि वस्तूनि आवश्यकानि भवन्ति यतो हि तस्याः एव बालाः सन्ति ये अनया समग्रपीडया सर्वादौ प्रभाविताः भविष्यन्ति --- । अतः अस्माभिः जातीय-समुदायस्य सङ्घर्षे महिलाभ्यः एव तदेव स्थानं प्रदत्तम् अस्ति यत् प्रकृतेः नियतेः च अनुसारम् अस्ति ।

4.2 प्रचारस्य कला

नात्सिशासनेन भाषायाः सामाजिकसञ्चारतन्त्रस्य च चातुर्येण प्रयोगः कृतः अपि च महान् लाभः ताभ्यां प्राप्तः । नात्सिशासनेन स्वव्यस्थाः प्रचारयितुं ये शब्दाः आविष्कृताः ते न केवलं भ्रामकाः एव आसन् अपितु हृदयविदारकाः अपि आसन् । नात्सिजनैः स्वीयेषु अधिकृताभिलेखेषु हत्या अथवा मृत्युः इति एतादृशानां शब्दानां प्रयोगः न कृतः । सामूहिकहत्येभ्यः विशेषव्यवहारः, अन्तिमसमाधानम् (यहूदिनां सन्दर्भे इति), यूथनेजिया इत्यस्य प्रयोगः विकलाङ्गेभ्यः, चयन-सङ्क्रमण-मुक्त्यादीनां च शब्दानां प्रयोगः क्रियते स्म । (इवैक्युएशन) रिक्तकरणस्य आशयः आसीत् यत् जनाः वाष्पकक्षान् प्रति नेतव्याः इति । किं भवन्तः जानन्ति वा यत् वाष्पकक्षाः कैः शब्दैः अभिधीयन्ते स्म ? ते वाष्पकक्षाः सङ्क्रमण-मुक्ति-क्षेत्रम् इति अनेन शब्देन कथ्यन्ते स्म । (गैस-चेम्बर) वाष्प-कक्षाः स्नानालयवत् दृश्यन्ते स्म अपि च तस्मिन् कृत्रिमाः उत्साः एव संलग्नाः भवन्ति स्म ।

शासनाय समर्थनस्य प्राप्तिः भवेत् इत्यर्थम् अपि च नात्सिजनानां विश्वं प्रति या दृष्टिः अस्ति तस्याः विस्ताराय प्रचाराय च सामाजिक-सञ्चार-तन्त्रस्य प्रयोगः विवेकपूर्वकं कृतः । नात्सिविचाराणां प्रसाराय चित्राणां चलच्चित्राणाम् आकाशवाण्याः भित्तिपत्रकाणाम् आकर्षकोद्घोषाणां प्रचारकपत्राणां च आश्रयणं कृतम् । भित्तिपत्रेषु जर्मनदेशस्य शत्रूणां रटित-छव्यः दृश्यन्ते स्म । तेषाम् उपहासः क्रियते स्म, तेषाम् अपमानः क्रियते स्म, ते (शैतान्) निशाचररूपेण प्रस्तूयन्ते स्म । समाजवादिनः उदारवादिनः च दुर्बलाः पथभ्रष्टाः च सन्ति इति रूपेण ते प्रस्तूयन्ते स्म । ते वैदेशिकाः गुप्तचराः अथवा सचिवाः सन्ति इति उक्त्वा तेषाम् अपमानः क्रियते स्म । प्रचारक-चलच्चित्रेषु यहूदिजनान् प्रति घृणाभावस्य प्रसाराय बलाघातः क्रियते स्म । "द-एटर्नल-ज्यू" (अक्षय-यहूदी) इति अस्याः सूच्याः कुख्याततमं चलच्चित्रम् आसीत् । परम्पराप्रियाः यहूदिजनाः विशिष्ट-छविभिः प्रस्तूयन्ते स्म । ते वर्धितशमश्रवः काफ्तान (चोगा) इति घृतेः प्रदर्श्यन्ते स्म, अपरञ्च वास्तविकतायां जर्मन-यहूदिजनानाम् अन्येषां च जर्मनजनानां च मध्ये असादृश्यं न शक्यते स्म यतो हि द्वौ अपि समुदायौ परस्परं घनिष्ठसम्बन्धेन सम्बद्धाः आसन् । ते मुद्-कृमि इति मूषकः कीट इति एतैः शब्दैः चे सम्बोध्यन्ते स्म । तेषां गतेः गमनस्य व्यवहारस्य च तुलना कुर्तन-शीलैः गन्धमुख्यादिभिः जीवैः सह क्रियते स्म । नात्सिवादेन जनानां मनःसु हृदयेषु च कश्चन गभीरप्रभावः निपातितः तत्र तेषां जनानां ये भावाः क्रोधादिकस्य विद्वेषस्य च आसन् ते तत्र अवाञ्छितेषु केन्द्रीकृताः । अनेन एव अभियानेन नात्सिवादस्य कश्चन सामाजिकः आधारः उत्पन्नः ।

नात्सिजनाः जनसङ्ख्यायाः सर्वान् भागान् आक्रष्टुं प्रयासं कृतवन्तः । सम्पूर्णसमाजः तान् नात्सिजनान् प्रति आकृष्टः भवेत् इति एतदर्थं तैः जनाः एतत् तथ्यं प्रति आश्वस्ताः विश्वस्ताः च यत् तैः नात्सिभिः एव तेषां जनानां सर्वासां समस्यानां समाधानं कर्तुं शक्यते ।

क्रियाविधिः

यदि भवत्यः

- यहूदिमहिलाः अथवा
- अयहूदि-जर्मन-महिलाः अभविष्यन् तर्हि भवत्यः हिटलरस्य विचारान् अभिलक्ष्य कीदृशीं प्रतिक्रियाम् अदास्यत् ?

„Der Gott des Juden ist das Geld. Und um Geld zu verdienen, begeht er die größten Verbrechen. Er ruht nicht eher, bis er auf einem großen Geldsack sitzen kann, bis er zum König des Geldes geworden ist."

चित्रम् - 28 – यहूदिनाम् उपरि आक्रमणं कुर्वत् किञ्चित् भित्तिचित्रम्,
चित्रस्य अधः प्रदत्ताः पङ्क्तयः – धनमेव यहूदिजनस्य ईश्वरः अस्ति । धनाय सः घोरम् अपराधं करोति । सः तावत्पर्यन्तं शान्त्या न उपविशति यावत्पर्यन्तं सः पणकगोण्याः उपरि न उपविशेत्, अपि च सः धनपतिः न भवेत् ।

क्रियाविधिः

भवतां विचारस्य अनुसारम् एतस्य भित्ति चित्रस्य माध्यमेन किं दर्शनस्य प्रयासः क्रियते ?

जर्मन-कृषकाः
यूयं केवलं हिटलरस्य स्थ !
किमर्थम् ?
अद्य
जर्मन-कृषकः द्वयोः भयानक-पट्टयोः मध्ये पिनष्टि ---
प्रथमा भीत्तिः अमेरिकीयार्थव्यवस्थायाः अर्थात् महत्तः पूञ्जीवादात् अस्ति।
अपरा भीत्तिः बोलशेविज्मस्य मार्क्सवादिन्याः अर्थव्यवस्थायाः अस्ति
महान् पूञ्जीवादः बोलशेविज्म च इति द्वौ अपि परस्परं साहाय्येन कार्यं कुरुतः।
एतौ द्वौ एव यहूदिविचारेभ्यः प्रादुर्भूतौ
अपि च विश्वे यहूदिवादस्य महायोजनायाः आरम्भं कुरुतः।
कृषकं एताभ्यः भीत्तिभ्यः कः रक्षयितुं शक्नोति ?

केवलं
राष्ट्रियः समाजवादः
1932तमे ख्रिस्ताब्दे प्रकाशितात् कस्माच्चित् नात्सि-स्फोरकपत्रात् इदम्
उपर्युक्तम् उद्धृतम् अस्ति।

चित्रम् – 29 – इदं चित्रं दर्शयति यत् कृषकान् नात्सिजनाः कथम् आकर्षयन्ति स्म।

चित्रम् – 30 – विंशतितम-दशकस्य एकं नात्सिदलीयं भित्तिपत्रम्,
अनेन चित्रेण दर्शितम् अस्ति यत् हिटलरः अग्रिमेषु अयनेषु युद्धरतः सैनिकः अस्ति तस्मै मतदानं कुर्वन्तु इति आह्वाहनम् अनेन क्रियते।

क्रियाविधिः

एकोनविंशतितमं त्रिंशततमं चित्रं च पश्यतु अपि च निम्नलिखितस्य उत्तरं प्रयच्छतु –
अनेन नात्सिप्रचारस्य विषये वयं किम् अवगच्छामः ? जनसङ्ख्यायाः विभिन्नभागान् गोलबन्ध इति कर्तुं नात्सिजनाः कीदृशं प्रयासं कुर्वन्ति स्म ?

काश्चन महत्त्वपूर्णतिथयः
अगस्तमासस्य प्रथमदिनाङ्के 1914तमख्रिस्ताब्दे च
प्रथमविश्वयुद्धस्य आरम्भः –
नवम्बरमासस्य नवदिनाङ्के 1918तमख्रिस्ताब्दे च
जर्मनिदेशस्य पराजयः जातः,युद्धं समाप्तम्।
नवम्बरमासस्य नवदिनाङ्के 1918तमख्रिस्ताब्दे च
वाइमर-गणराज्यस्य स्थापनायाः घोषणा
जूनमासस्य 28दिनाङ्के 1919तमे ख्रिस्ताब्दे च
वर्सायस्य सन्धिः अभवत्।
जनवरीमासस्य त्रिंशे दिनाङ्के 1933तमे ख्रिस्ताब्दे च
हिटलरः जर्मनिदेशस्य कुलपतिपदम् अलङ्करोति।
सितम्बरमासस्य प्रथमे दिनाङ्के 1939तमे ख्रिस्ताब्दे च
जर्मनिदेशस्य पोलैण्डदेशं प्रवेशनम्। द्वितीयस्य विश्वयुद्धस्य च आरम्भः।
जूनमासस्य द्वाविंशतिदिनाङ्के 1941तमे च ख्रिस्ताब्दे
जर्मनसेनाः सोवियतं प्रति प्रविशन्ति।
जूनमास्य त्रयोविंशतिदिनाङ्के 1941तमे ख्रिस्ताब्दे
यहूदिजनानां हननस्य आरम्भः
दिसम्बरमासस्य अष्टौ दिनाङ्के 1941तमे च ख्रिस्ताब्दे
अमेरिकादेशः अपि द्वितीयस्मिन् विश्वयुद्धे भागं गृहीतवान्।
जनवरीमासस्य सप्तविंशतिदिनाङ्के 1945तमे च ख्रिस्ताब्दे
सावियतसैन्यदलानि औषवित्सं मोचयन्ति।
मे-मासस्य अष्टौ दिनाङ्के 1945तमे च ख्रिस्ताब्दे यूरोपे
मित्रराष्ट्राणां विजयः।

इति पञ्चमाध्यायः

5 सामान्यजनतां मानवतां च विरुध्य अपराधाः

नात्सिवादम् अभिलक्ष्य सामान्यजनानां का प्रतिक्रिया स्यात् ?
अनेके जनाः नात्सि-शब्दाडम्बरेण घोरप्रचारेण च ग्रस्ताः जाताः । ते विश्वस्य दर्शनम् अपि नात्सि-दृष्ट्या द्रष्टुम् आरब्धवन्तः अपि च स्वभावाभिव्यक्तिं नात्सिशब्दावल्यामेव कर्तुम् आरब्धवन्तः । केनचित् यहूदिजनेन सह यदा तेषां सामुख्यं भवति स्म तदा ते गभीरस्य क्रोधभावस्य घृणायाः च अनुभवं कुर्वन्ति स्म । ते न केवलं यहूदिजनगृहाणां बहिर्भागे एव विशिष्टचिह्नं न स्थापितवन्तः अपितु येषु प्रतिवेशिषु सन्देहः आसीत् तेषां विषये आरक्षकान् अपि सूचितवन्तः । ते विश्वसन्ति स्म यत् नात्सिवादः एव देशं विकासमार्गं प्रति नेतुं शक्नोति, इयम् एव व्यवस्था सर्वेषां कृते कल्याणदायिनी भविष्यति ।

परन्तु जर्मनिदेशस्य प्रत्येकं जनः नात्सी न आसीत् । अनेके जनाः आरक्षकदमनस्य मृत्युशङ्कायाः अनन्तरम् अपि नात्सिवादस्य घोरं विरोधं कृतवन्तः । परन्तु जर्मनजनसङ्ख्यायाः कश्चन महत्तमः भागः एतं घटनाक्रमं मूकदर्शकरूपेण उदासीनभावेन च पश्यति स्म । जनाः विभ्यति स्म तस्मात् नात्सिवादस्य विरोधं स्वीयं मतभेदस्य च प्राकट्यं न कुर्वन्ति स्म । ते एतस्मिन् विषये स्वीयमनाभावान् अनुक्त्वा एव तस्मात् स्थानात् अन्यत्र पश्यन्तः गच्छन्ति स्म इति एतादृशं व्यवहारम् एव ते एतस्मिन् सन्दर्भे उचितं मन्यते स्म । पादरि-नीम्योलरः नात्सिजनानां निरन्तरं विरोधम् अकरोत् । सः दृष्टवान् यत् नात्सिसाम्राज्ये जनेषु यादृशाः निर्ममाः सङ्घटिताः च अपराधाः क्रियन्ते तेषां जर्मनिदेशस्य सामान्यजनता विरोधं न कर्तुं पारयति स्म । जनता विचित्ररूपेण मौनावस्थायां च आसीत् । गेस्तापो इत्यस्य भयानक-कार्यशैलीं कुकृत्यानि च अभिलक्ष्य तत्र तेषाम् उपरि शरसन्धानं कुर्वन् एतस्य मौनस्य विषये सः अतीव मर्मस्पर्शि-प्रकारेण अलिखत् -

"आदौ ते साम्यवादिजनान् अन्वेष्टवन्तः,

अहं साम्यवादी न आसम्

अतः अहं किमपि न उक्तवान् ।

पुनः ते सामाजिक-लोकतान्त्रिकजनम् अन्वेष्टवन्तः

परन्तु अहं सामाजिकलोकतान्त्रिकः अपि न आसम्

अतः मौनभावेन आसम्

ततः परं ते वाणिज्यकसमूहम् अन्विष्टवन्तः,

परन्तु अहं वाणिज्यिकसमूहे अपि न आसम्

पुनः ते यहूदिजनान् अन्वेष्टुम् आगतवन्तः

परन्तु अहं यहूदी अपि नासम् – अतः अहं किमपि न कृतवान् ।

पुनः च ते अन्ते यदा ते मदर्थम् आगतवन्तः

तदा तत्र कोऽपि अवशिष्टः न आसीत् यः मया सह तत्र स्थातुं शक्नुयात् । "

प्रथमा मञ्जूषा

किं नात्सिजनैः ये जनाः प्रताडिताः आसन् तान् जनान् प्रति सौहार्दस्य सहानुभूतेः च अभावः केवलं भीतेः कारणात् आसीत् ? लारेंसरीसस्य कथनम् आसीत् यत् इदं मतम् असमीचीनं स्यात् । लारेंस-रीसः सद्य अव स्ववृत्तचित्राय " द नात्सीज – एवार्निंग फ्राम हिस्ट्री "विभिन्नजनैः सह वार्त्तालापं कृतवान् आसीत् । एतस्मिन् सन्दर्भे एव सः एर्ना-क्रात्स इत्यनेन सह अपि वार्त्तालापम् अकरोत् या 1930 तमे ख्रिस्ताब्दे किशोरी आसीत् अपि च अधुना पितामही सञ्जाता अस्ति । एर्ना रीसं प्रति अवदत् –
त्रिंशत्तमे दशके काचित् आशा दृश्यते स्म । अयं निरुद्योगिनां कृते एव न अपितु प्रत्येकं जनाय आशाकालः आसीत् यतो हि वयं सर्वे अभिभूताः इव आत्मानम् अनुभवामः स्म । स्वीयानुभवस्य आधारेण अहं वक्तुं शक्नोमि यत् तेषु दिनेषु वेतववृद्धिः जाता आसीत् अपि च जर्मनिदेशः एवं प्रतीयते स्म यत् तेन पुनः स्वीयः उद्देशः प्राप्तः स्यात् । न्यूनातिन्यूनम् अहं तु एतदेव अनुभवामि यत् सः शोभनः कालः आसीत् । अहं तदा समीचीनम् अनुभवामि स्म ।

क्रियाकलापः

एर्ना-क्रात्सः इदं किमर्थम् अवदम् – न्यूनातिन्यूनम् अहं तु एतत् एव अनुभवामि स्म ? भवन्तः तस्य परामर्शं कथं पश्यन्ति ?

नात्सिजर्मनिदेशे यहूदिजनाः किम् अनुभवन्ति स्म । शार्लट-बेरोटः स्वीयदैनन्दिन्यां जनानां स्वप्नान् सः गुप्तरूपेण अप्रकटरूपेण च लिखितवान् आसीत् । परवर्तिकाले सः तां दैनन्दिनीं पुस्तकरूपेण प्रकाशितवान् । एतत् पुस्तकं पाठकान् आन्दोलयति एतस्य पुस्तकस्य नाम अस्ति - थर्ड-राइख-आफ-ड्रीम्स इति । शार्लटे अस्मिन् पुस्तके अवदत् – यत् कालानन्तरं यहूदिजनाः अपि तेषां विषये नात्सिजनैः याः रूढयः अवधारणाः च प्रसार्यन्ते स्म तासु अवधारणासु ते यहूदिजनाः विश्वसितुम् आरब्धवन्तः आसन् । स्वीयेषु स्वप्नेषु ते अपि स्वीयां नासिकाम् अग्रभागात् वक्रां केशान् नेत्रे च अपि कृष्णवर्णीये अपि च यहूदिजनैः सदृशम् रूपम् आकारं गमनं च द्रष्टुम् आरब्धवन्तः आसन् । नात्सिजनानां मुद्रणालये यहूदिजनानां याः छवयः चित्राणि च मुद्रियन्ते स्म तानि चित्राणि अहोरात्रं यहूदिनाम् अनुधावन्ति स्म । एतादृशछवयः स्वप्नेषु अपि तेषाम् अनुगमनं कुर्वन्ति स्म तथा च न तत्रापि त्यजन्ति स्म । अनेके यहूदिजनाः वाष्पकक्षान् प्रति प्राप्तेः पूर्वम् एव मरणं प्राप्नुवन्तः ।

5.1 महाध्वंसस्य (होलोकास्ट इति) विषये सूचनाः (अभिज्ञताः) अथवा महाध्वंसविषयकः परिचयः

नात्सिशैल्याः परिचयः नात्सिशासनस्य अन्तिमवर्षेषु जलस्य परिस्रवणम् इव शनैः शनैः जर्मनिदेशतः बहिर्भागं प्रति गन्तुम् आरब्धः । परन्तु तत्र कियान् भीषणरक्तपातः अपि च नृशंसदमनम् अभवत्, एतस्य वास्तविकाकलनं तु विश्वेन तदा कृतं यदा युद्धं समाप्तम् अपि च जर्मनिदेशः पराजयं प्राप्तवान् । जर्मनसमाजः तु शकलराशौ निमग्नस्य कस्यचित् पराजितस्य राष्ट्रस्य रूपेण आत्मदुर्दशाकारणात् दुखी आसीत् एव, परन्तु यहूदिजनाः अपि इच्छन्ति स्म यत् संसारः तान् भीषणात्याचारान् पीडाः च स्मरेत् याः पीडाः जर्मनयहूदिजनैः नात्सिभिः कृतहिंसया सोढाः आसन् । सा एव हिंसा अथवा तदेव हननं महाध्वंस (होलोकास्ट) इति नाम्ना अपि अभिधीयते । यदा दमनचक्रं शिखरे आसीत् तदा एव यहूदिकुटुम्बिना केनचित जनेन स्वमित्रं कथितम् आसीत् यत् सः युद्धात् परं केवलम् अर्धहोरामात्रं कालं यावत् जीवितुम् इच्छति । प्रायः सः कदाचित् एतत् संसारम् एतत् बोधयित्वा मर्तुम् इच्छेत् यत् नात्सिशासिते जर्मनदेशे किं किं भवति स्म इति । किं किं जातं तस्य साक्ष्यं दातुम् अपि च ये अभिलेखाः हस्तागताः आसन् तान् संरक्षयितुम् एतादृशी अदम्या इच्छा घेटो इत्येतेषाम् अपि च शिबिरेषु ये नारकीयजीवनं जीवन्ति स्म तादृशेषु अनेकेषु जनेषु अतीव गहनरूपेण द्रष्टुं शक्यते स्म । तेषु अनेके जनाः दैनन्दिनी अलिखन्, टिप्पणीः कृताः, अभिलेखाः च अपि सङ्गृहीताः । परन्तु एतस्य सर्वस्य विपरीतं यदा ते नात्सिअधिकारिणः दृष्टवन्तः यत् युद्धे नात्सिजनानां पराजयः सुनिश्चितः अस्ति तदा ते स्वाधिकारीः पेट्रोल(शिलातैलं) वण्टयितुम् आरब्धन्तः यतो हि तेन ते कार्यालयेषु विद्यमानानि सर्वाणि साक्ष्याणि नष्टीकर्तुं समर्थाः भवेयुः ।

संसारस्य अनेकेषु भागेषु स्मृतिलेखेषु साहित्ये वृत्तचित्रेषु कवितासु स्मारकेषु सङ्ग्रहालयेषु च एतस्य महाविध्वंसस्य इतिहासः स्मृति चापि अद्य सुरक्षिता अस्ति । एतानि सर्वाणि वस्तूनि तेषां जनानां कृते श्रद्धाञ्जलिरूपेण अस्ति ये जनाः विपरीतकाले अथवा प्रतिकुलावस्थायाम् अपि प्रतिरोधरूपसाहसम् अकुर्वन् । तादृशानां जनानां कृते एताः सर्वाणि तथ्यानि लज्जास्पदस्मृतीनां रूपेण सन्ति यैः जनैः अत्याचाराः हिंसा च कृता तादृशानां जनानां कृते पूर्वसूचनारूपेण ध्वनयः सन्ति ये जनाः मौनेन उदासीनतया च एतत् सर्वं दृष्टवन्तः ।

चित्रम् 31 – वारसा-घेटो इत्यस्य निवासिनः अभिलेखान् एकत्रीकृतवन्तः अपि च त तान् ते दुग्धस्य तिसृषु कूपीषु स्थापितवन्तः । यदा एतत् निश्चितं यत् अधुना सर्वमपि नष्टं भविष्यति तदा ते 1943तमे ख्रिस्ताब्दे तिस्रः अपि कूपीः अन्तःकोष्ठानां भूमिगृहेषु निगूढवन्तः अथवा आत्मसात्कृतवन्तः । एताः कूपीः 1950तमे वर्षे जनाः प्राप्तवन्तः ।

चित्रम् 32 – डेनमार्क-देशाधिकारिभिः निजयहूदिजनाः गुप्तरूपेण जर्मनिदेशतः निष्कासिताः । एतस्मै कार्याय नौकानां प्रयोगः कृतः आसीत् तासु नौकासु काचित् नौका चित्रे दृश्यते ।

गान्धी हिटलरवर्यं पत्रं लिखितवान्

हिटलराय गान्धिनः पत्रम्

वर्धा, मध्यप्रान्तः, भारतम्
जुलै-मासः, 1939तमवर्षम्

प्रियमित्रम् –
मित्राणाम् अयम् आग्रहः अस्ति यत् मानवतायाः कृते अहं भवते किमपि लिखेयम्। परन्तु अहं तेषाम् अनुरोधम् अस्वीकरोमि यतो हि अहम् अनुभवामि यत् मम एषा धृष्टता अस्ति यत् अहं भवते पत्रं लिखामि। परन्तु अहम् अनुभवामि यत् एतस्मिन् विषये मया एतत् सर्वं न चिन्तनीयं यत् कः किं विचारयिष्यति इति मया भवते निवेदनीयम् एव कामं भवतः दृष्ट्या तद् उचितं स्यात् अथवा नोचितम् इति।
इदं तथ्यं सर्वदा स्पष्टम् अस्ति यत् अधुना संसारे भवान् एव एतादृशः जनः अस्ति यः युद्धं रोद्धुं शक्नोति येन युद्धं मानवजातिः नृशंसावस्थां प्रति प्रापयितुं शक्नोति। किं भवता कस्यश्चित् उद्देश्याय एतावत् अधिकं मूल्यम् अर्पणीयम् आसीत् कामं तत् उद्देश्यं भवतः दृष्टौ कियत् एव महत् किं न स्यात् ? किं भवान् कस्यचित् एतादृशस्य जनस्य निवेदने अथवा प्रार्थनापत्रे अवधानं करिष्यति येनविचिन्त्य विचार्य च युद्धस्य शैली परिवर्तिता स्यात् अपि च तया सः प्रभूतं साफल्यम् अपि प्राप्तवान् स्यात् ? यत्किमपि स्यात् अहम् एतत् अङ्गीकरोमि यत् यदि भवते पत्रं विलिख्य मया कोऽपि दोषः आचरितः तर्हि तदर्थम् अहं भवता क्षन्तव्यः ?
अहम् अस्मि,

भवतां यथार्थमित्रम्
मो.क.गान्धी

सम्पूर्ण-गान्धि-वाङ्मयखण्डम्,70,प्रकाशनविभागः,सूचना एवं प्रसारण-मन्त्रालयः, भारतसर्वकारः।

हिटलराय गान्धिवर्यस्य पत्रम्,

वर्धा
24,दिसम्बरमासः,1940तमः
ख्रिस्ताब्दः

अस्माभिः अहिंसायाः रूपेण काचित् एतादृशी शक्तिः प्राप्ता अस्ति यदि तां सङ्घटितां कुर्याम तर्हि सा आ संसारं सर्वासां प्रबलतम-हिंसात्मक-शक्तीनां सामूहिकरूपस्य प्रतीकारं सामुख्यं वा कर्तुं शक्नोति। यथा मयोक्तम् अहिंसात्मकोपाये पराजयनाम्नी काचित् वस्तुविशेषा एव न अस्ति।अयम् उपायस्तु ताडनेन विना हननेन विना च करणस्य मरणस्य च उपायः अस्ति। एतं प्रयोक्तुं धनस्य कापि आवश्यकता एव नास्ति अपि च तस्य विनाशशास्त्रस्य तु नास्ति एव यत् भवता चरमविन्दौ प्रापितम् अस्ति। एतत् दृष्ट्वा अहम् आश्चर्यान्वितो भवामि यत् भवान् एतत् द्रष्टुम् अपि न पारयति यत् विनाशकारियन्त्राणाम् उपरि कस्यापि एकाधिकारः नास्ति। यदि ब्रिटिशजनाः न तर्हि कोऽपि अन्यदेशः निश्चयेन भवताम् उपायेभ्यः अपि समीचीनतरोपायान् आविष्करिष्यति अपि च भवतः एव उपायैः भवन्तम् अपमानयिष्यति अथवा भवतन्तम् अवाङ्मुखं करिष्यति।भवान् स्वीयदेशवासिकभ्यः किमपि एतादृशं पितृधनम् अथवा न्यासरूपसम्पदां न त्यजति यां दृष्ट्वा ते सगर्वं भविष्यन्ति। ते कस्यचित् क्रूरकर्मणः चर्चाकाले गर्वं न अनुभविष्यन्ति कामं तत्कृत्यं कियत् एव निपुणतापूर्वकं नियोजितरूपेण च कृतं स्यात्। अतः अहं मानवतादृशा भवन्तं निवेदयामि यत् भवान् युद्धं रोधयेत् इति।
सहृदयम्, भवतां मित्रम् ,
मो.क.गान्धी

सम्पूर्ण-गान्धि-वाङ्मयखण्डम्,70,प्रकाशनविभागः,सूचना एवं प्रसारण-मन्त्रालयः, भारतसर्वकारः।

क्रियाकलापः

1. एकेन पृष्ठेन जर्मनिदेशस्य इतिहासं लिखन्तु -
   - नात्सिशासितस्य जर्मनिदेशस्य कस्चित् बालस्य दृष्ट्या।
   - कश्चित् यहूदिजनः यातनागृहं गत्वा अपि जीवितः बहिर्भागम् आगतवान् तस्य दृष्ट्या इतिहासं लिखन्तु।
   - नात्सिशासनस्य राजनैतिकविरोधिनः दृष्ट्या।
2. कल्पयन्तु यत् भवान् हेलमुटः अस्ति। विद्यालये भवतः अनेकानि मित्राणि सन्ति। भवतः मतम् अस्ति यत् यहूदिजनाः दुष्टाः न भवन्ति। एतस्याम् अवस्थायां भवान् स्वपितरा सह किं कथयिष्यति, एतस्मिन् विषये एकम् अनुच्छेदं लिखतु।

प्रश्नाः

1. वाइमर-गणराज्यस्य समक्षे काः समस्याः आसन् ?
2. एतस्मिन् विषये चर्चयन्तु यत् 1930 तमख्रिस्ताब्दं यावत् जर्मनिदेशे नात्सिवादः किमर्थं लोकप्रियः जातः ?
3. नात्सिचिन्तनस्य विशिष्टाः पक्षाः के आसन् ?
4. नात्सिजनानां भ्रामकप्रचारः यहूदिजनान् विरुध्य विद्वेषम् उत्पादयितुम् एतावत् प्रभावशाली कस्मात् कारणात् आसीत् ?
5. नात्सिसमाजे महिलानां का भूमिका आसीत् ? फ्रांसीयक्रान्तेः विषये अवगमनाय प्रथमम् अध्यायं परिशीलयन्तु फ्रांसीयक्रान्तौ नात्सिशासने च महिलानां भूमिकायाः योगदानस्य च मध्ये का भिन्नता आसीत् ? एकेन अनुच्छेदेन ज्ञापयन्तु।
6. नात्सिजनाः जनतायाः सम्पूर्णनियन्त्रणाय कान् कान् उपायान् अकुर्वन् ?

खण्डः II

जीविका, अर्थव्यवस्था समाजः च

द्वितीये खण्डे वयं जीविकायाः अर्थव्यवस्थायाः च विषये अध्ययनं करिष्यामः। अत्र वयम् एतस्मिन् विषये अपि विचारयिष्यामः यत् आधुनिके संसारे वनवासिनां पशुचारक-समुदायानां कृषकाणां च जीवने कीदृशानि परिवर्तनानि आगतानि अपि च एतानि परिवर्तनानि निश्चेतुं ते किम्विधं योगदानं कृतवन्तः इति।

आधुनिकसंसारस्य उदयः कथम् अभवत् एतस्मिन् विषये विचारयन्तः वयं प्रायः शिल्पशालानां विपण्याः आपूर्तिकर्तृणाम् औद्योगिकक्षेत्राणां कृषिक्षेत्राणां च विषये एव अवधानं कुर्मः। वयम् इदं विस्मरामः यत् एतेषां क्षेत्राणां बहिर्भागे पृथक् अर्थव्यवस्थाः अपि सन्ति अपरे जनाः अपि सन्ति ये राष्ट्राय महत्त्वं दधति। आधुनिकदृष्ट्या यदा पश्यामः तदा एवम् अनुभूयते यत् पशुचारकाः वनवासिनः यायावर-कृषकाः च शिलोञ्छन-वृत्या जीवन-निर्वहणं कुर्वन्ति स्म इति एतादृशानां जनानां जीवनम् अतीते काले एव स्थितम्। समकालीन-विश्वस्य प्रादुर्भावस्य अध्ययनं कुर्वताम् अस्माकं दृष्टिः तान् प्रति एतादृशी भवति यत् तेषां जीवनस्य किमपि महत्त्वम् एव न स्यात्। द्वितीयखण्डस्य अध्यायेषु एतत् तथ्यं रेखाङ्कितम् अस्ति यद् अस्माभिः तेषां जीवनविषये अवगन्तव्यम् इति, अस्माभिः दृष्टव्यं यत् ते स्वीयं जीवनं कथं व्यवस्थितं कुर्वन्ति अपि च कथम् आजीविकां चालयन्ति। एते जनाः अपि सम्पूर्णतया तस्य एव संसारस्य भागभूताः सन्ति यस्मिन् संसारे वयम् अद्य जीवामः। ते अतीतकालस्य परिशिष्टाः जनाः न सन्ति।

चतुर्थे अध्याये भवन्तः वनानां भ्रमणं करिष्यन्ति। अत्र भवन्तः द्रक्ष्यन्ति यत् वनेषु ये विविध-समुदायिनः जनाः निवसन्ति ते वनानां केन केन प्रकारेण प्रयोगं कुर्वन्ति। अत्र भवन्तः अवगमिष्यन्ति यत् एकोनविंशतिशताब्दे उद्योगानां शिल्पशालानां जलपोतानां नगराणां रेलसंस्थायाः च प्रादुर्भावः विस्तारः च जायते स्म तस्मात् काष्ठस्य अन्येषां वन्य-उत्पादानां च कृते वनानि आधिक्येन प्रभावितानि इति। एतासाम् आवश्यकतानां कारणात् वनानां प्रयोगसम्बद्धाः नियमाः अपि परिवर्तिताः अपि च वनानां संरक्षणाय काचित् नूतना पद्धतिः अपि आविष्कृताः पुरतः च सा समायाता। अस्मिन् अध्याये अस्मिन् तथ्ये अपि प्रकाशः निपातितः यत् वनेषु औपनिवेशिक-नियन्त्रणं कथं स्थापितम्, कथं च वनक्षेत्राणि मापितानि, वृक्षाणां वर्गीकरणं कृतम् अपि च उद्यानानि विकासितानि। एतादृशैः सर्वैः परिवर्तनैः वनसंसाधनानां ये स्थानीयसमुदायाः प्रयोगं कुर्वन्ति स्म तेषां जीवनम् अस्मात् कथं प्रभावितम्। स्थानीयाः समुदायिनः जनाः बाध्याः कृताः यत् ते नूतनव्यवथायाः अनुसारं कार्यं कुर्युः अपि च स्वीयं जीवनं नूतनतया सङ्घटितं कुर्युः। परन्तु बहुधा ते एतान् नूतनान् नियमान् विरुध्य विद्रोहम् अपि अकुर्वन् अपि च सर्वकारान् स्वनीतीः परिवर्तितुं बाध्यम् अकुर्वन्। अस्मिन् अध्याये भवन्तः एतस्मिन् विषये अपि ऊहां कर्तुं शक्ष्यन्ति यत् भारत-इण्डोनेशिया-देशयोः एतेषां परिवर्तनानाम् इतिहासः कीदृशः आसीत्।

पञ्चमे अध्याये भारत-अफ्रीका-देशयोः पर्वतेषु मरुस्थलेषु समतलक्षेत्रेषु अधित्यकासु च पशुचारकाणां पदचिह्नानि सन्ति न वा इति अन्वेषणस्य प्रयासः कृतः अस्ति। एतयोः द्वयोः क्षेत्रयोः पशुचारकसमुदायः जनसङ्ख्यायाः कश्चित् महत्त्वपूर्णः भागः अस्ति। पुनरपि वयं विरलतया एव तेषां

जीवनविषयकम् अध्ययनं कुर्मः । तेषाम् इतिहासः पाठ्यपुस्तकानां पृष्ठेषु सम्मिलितः भवितुं न शक्नुयात् । पञ्चमेन अध्यायेन भवन्तः अवगमिष्यन्ति यत् वनेषु यत् नियन्त्रणं स्थापितं भवति स्म तस्मात् कृषिविस्तारस्य पशुचारण-क्षेत्राणां च सङ्कोचनेन तेषां जीवनं कथं प्रभावितम् । एतस्मिन् भागे प्रदत्तविषयेन भवन्तः तेषाम् गमनागमनस्य स्वीय-समुदायजनैः सह तेषां सम्बन्धानां परिवर्तमानपरिवेशस्य च अनुरूपं ते आत्मानं कथं तदनुकूलं कुर्वन्ति इति एतादृशानां तथ्यानां विषये भवन्तः अवगन्तुम् अवसरं प्राप्स्यन्ति इति ।
षष्ठे अध्याये वयं कृषकाणां कृषिजीविनां च जीवने आगत-परिवर्तनानां विषये पठिष्यामः । अस्मिन् अध्याये वयं भारतस्य इङ्ग्लैण्डस्य अमेरिकायाः च परिस्थितीनाम् अध्ययनं करिष्यामः । गतयोः द्वयोः शताब्दयोः कृषिकार्यं सङ्घटितरूपेण स्यात् एतदर्थम् कृतोपायेषु गभीराणि परिवर्तनानि आगतानि सन्ति । नूतन-आभियान्त्रिक्या नूतन-अभ्यर्थनाभिः नूतननियमैः विधिभिः सम्पत्तेः नूतनावधारणाभिः च ग्रामीण-संसारस्य स्वरूपं सर्वथा परिवर्तितम् अस्ति । पूञ्जिवादेन उपनिवेशवादेन च ग्रामीणानां जीवनं नूतनप्रकारेण परिवर्तितम् अस्ति । षष्ठाध्यायः भवतां परिचयम् एतैः परिवर्तनैः सह कारयिष्यति अपि च अनेन अध्ययनेन भवन्तः अनुभविष्यन्ति यत् समाजस्य विभिन्नवर्गेषु निर्धनेषु धनिकेषु महिलासु पुरुषेषु शिशुषु बालेषु वयस्केषु च कीदृशाः पृथक् पृथक् प्रभावाः जाताः ।

यावत्पर्यन्तं वयं विभिन्नसमुदायानां समाजानां च जीवनेषु आगतानां परिवर्तनानां दर्शनं न आरभामहे तावत्पर्यन्तम् एतत् तथ्यं समीचीनतया न अवगन्तुं शक्ष्यामः यत् अद्यतनं विश्वं यत् दृश्यते तद् कथम् आस्तित्वं प्रति आगतम् अस्ति इति । तेन सहैव वयम् आधुनिकीकरणस्य समस्याः अपि तावत्पर्यन्तं न अवगन्तुं शक्ष्यामः यावत्पर्यन्तं वयं तासां पर्यावरणीय-प्रभावाणां विषये न विचारयिष्यामः ।

वन्यसमाजः उपनिवेशवादः च

स्वीयं विद्यालयं गृहं च परितः दृष्टिपातं कृत्वा तानि वस्तूनि परिचिन्वन्तु यानि वन्यानि सन्ति उदाहरणेन पश्यामः, यथा – एतस्य पुस्तकस्य कर्गदम्, उत्पीठिकाः आसन्दिकाः द्वाराणि वातायनानि, विचित्रवर्णीयानि वस्त्राणि अथवा ते वर्णाः यैः भवतां वस्त्राणि रञ्ज्यन्ते, उपस्कराः, भवतां मधुगुलिकायाः आवरणं, वीटिकाः तेन्दूपत्राणि,निर्यासः,मधु,कफघ्नी, चायचूर्णं, घृषिका, इति । एतैः वस्तुभिः सहैव चाकलेहे प्रयुज्यमानं चर्मशोधकं (टैटिन इति) अथवा औषधरूपेण प्रयुज्यमानाः ओषधयः इति उपर्युक्तम् एतत्सर्वम् अस्माभिः न विस्मर्तव्यम् इति, । अपि च, वंशः, इन्धनकाष्ठं, तृणानि, अशोधितं कृष्णाङ्गारकम्, पुटके उपयुज्यमानानि वस्तूनि, फलानि पुष्पाणि च, पशवः पक्षिणः च अपि च असङ्ख्यवस्तूनि अपि वयं वनेभ्यः एव प्राप्नुमः । ऐमेजान इत्यस्य अथवा पश्चिम-तटस्य वनानां कस्मिंश्चित् एकस्मिन् भागे पादपानां पञ्चशतं पृथक् पृथक् प्रजातयः लभ्यन्ते ।

इयं विविधता त्वरया लुप्यमानाः सन्ति । औद्योगिकीकरणस्य काले 1700 तमख्रिस्ताब्दात् आरभ्य 1995 तमख्रिस्ताब्दाभ्यन्तरे 139लक्षं वर्गकिलोमीटरपरिमितं वनम् अर्थात् विश्वस्य सम्पूर्णक्षेत्रफलस्य 9.3प्रतिशतं भागः औद्योगिकप्रयोगाय, कृषिकार्याय पशुचारणाय इन्धनकाष्ठाय च स्वच्छीकृतः ।

चित्रम् – 1 – इदं छत्तीसगढराज्यस्य किञ्चित् वनम् अस्ति ।
सघनत्वात् वनभूमेः तलं यावत् सूर्यस्य प्रकाशः न्यूनः एव प्राप्नोति । एतस्मिन् चित्रे भवन्तः वृक्षाणां पादपानां च विभिन्नाः आकृतीः प्रजातीः च द्रष्टुं शक्नुवन्ति ।

1 वनानां विनाशः किमर्थम् ?

वनानां लोपः एव वनविनाशः इति कथ्यते । वनविनाशः इति काऽपि नूतना समस्या नास्ति । वस्तुतः इयं प्रक्रिया अनेकेभ्यः शताब्देभ्यः प्रवर्तते स्म परन्तु औपनिवेशिक-शासनकाले अनेन विनाशेन अधिकं व्यवस्थितं व्यापकं च रूपं गृहीतम् । आयान्तु, भारते वनविनाशस्य केषाञ्चित् कारणानां विषये अवधानं कुर्मः ।

1.1 भूमेः उत्तमता

1600 तमे ख्रिस्ताब्दे भारतस्य सम्पूर्णस्य भू-भागस्य प्रायः षष्ठे भागे एव कृषिकार्यं भवति स्म । अद्य इदं कृषिकार्यं वर्धित्वा अर्धं यावत् प्राप्नोत् । एतेषां शताब्दानाम् अवधौ यथा यथा जनसङ्ख्यायाः वर्धनम् अपि च खाद्यपदार्थानाम् याचनायाः अपि वर्धनं जातं तथा तथा कृषकाः अपि वनानि अपसार्य तत्रत्यभूमिं वनरहितां च कृत्वा तां च स्वच्छीकृत्य कृषिकार्यस्य सीमानां विस्तारं कृतवन्तः । औपनिवेशिककाले कृषेः वेगेन विस्तारः जातः ।

चित्रम् – 2 – ह्वेन द वैलीज् वर फुल इति (यदा उपत्यकाः रिक्ताः आसन्) । जान-डासनस्य चित्रकला,
लाकोता-सदृशाः देशज-अमेरिकीय-आदिवासि-समूहाः, इति एतादृशाः समूहाः एतेषु विशालोत्तर-अमेरिकीय-क्षेत्रेषु निवसन्ति स्म, इत्येतेषाम् अर्थतन्त्रम् अत्यन्तं वैविध्यपूर्णम् आसीत् । ते मकायस्य उत्पादनं कुर्वन्ति स्म, वन्यमहिषाणाम् आखेटं कुर्वन्ति स्म, वन्यपादपानां च अन्वेषणे संलग्नाः भवन्ति स्म । आङ्ग्ल-आबादकार इत्येते वन्यमहिषाणां कृते विशालभूभागस्य रिक्तीकरणं न समीचीनम् इति अनुभूतवन्तः । (1860) षष्ट्यधिकाष्टादशशततमख्रिस्ताब्दात् परं (वीनस्) वन्यमहिषाणां व्यापकपरिमाणेन हननं कृतम् ।

एतस्य विस्तारस्य अनेकानि कारणानि आसन् । तत्र प्रथमं कारणम् इदम् आसीत् यत् आङ्ग्लीयैः व्यवसायिक-सस्यानां यथा – (पटसन) शणस्य इक्षोः गोधूमस्य कार्पासस्य च उत्पादनस्य प्रभूतं समर्थनं प्रोत्साहनं च कृतम् । एकोनविंशशताब्दीये यूरोपे वर्धमानायाः नागरजनसङ्ख्यायाः उदरपूर्तये खाद्यान्नस्य औद्योगिक-उत्पादनस्य च कृते अशोधितसामग्र्याः आवश्यकता आसीत् । परिणामतः एतेषां सस्यानाम् आवश्कतायाः विस्तारः जातः ।

प्रथमा मञ्जूषा – 1

कस्मिंश्चित् स्थाने यदि कृषिकार्यं न भवति तर्हि तस्य स्थानस्य अयम् अभिप्रायः नास्ति यत् तत् स्थानम् अविकसितम् अस्ति । यदा (श्वेत आबादकार) आङ्ग्लीय-विकास-कर्तारः आस्ट्रेलियादेशं प्राप्तवन्तः तदा ते अघोषयन् यत् एतत् महाद्वीपं रिक्तम् आसीत् । वास्तविकतायां ते आदिवासिनः पथप्रदर्शकानां नेतृत्वे पुरातन-मार्गैः एतं भूभागं प्रविष्टवन्तः आसन् । आस्ट्रेलियायाः विभिन्नानाम् आदिवासि-समुदायानां स्वीयानि स्पष्ट-विभाजितानि क्षेत्राणि आसन् । आस्ट्रेलियायाः नगार्रिन्द-जेरिय(NgarrindJeri) इत्येतेषां स्वीयभूमेः आकृतिः इति एतेषां पूर्वजस्य, नगुरूनदेरी (ngurunderi) इत्यस्य प्रतीकात्मकशरीरस्य सदृशा एव आसीत् । अनया भूम्या पञ्च पृथक् पृथक् प्राकृतिक-प्रदेशानां लावणिकजलस्य तडागानां कण्टकगुल्मानां मरुस्थलीय-क्षेत्राणां नदीतटीय-क्षेत्राणां च स्व-आभ्यन्तरे समाहरणं कृतम् आसीत्, एतानि उपर्युक्त-संसाधनानि पृथक् पृथक् सामाजिकीनाम् आर्थिक-आवश्यकतानां च पूर्तिं कुर्वन्ति स्म ।

अपरं कारणम् एतत् आसीत् यत् एकोनविंशतिशताब्दस्य आरम्भे औपनिवेशिकसर्वकारः अचिन्तयत् यत् वनानि अनुत्पादकानि सन्ति इति । तेषां दृष्ट्या एतस्यां व्यर्थभूमौ कृषिकार्यं कृत्वा तेन राजस्वस्य वर्धनम् अपि च कृष्युत्पादानाम् अपि वर्धनं कर्तुं शक्यते स्म अपि च एतस्मात् कारणात् राज्यस्य आयस्य अपि वर्धनं कर्तुं शक्यते स्म इति । एतत् एव कारणम् आसीत् यत् अशीत्यधिकाष्टादशशततमख्रिस्ताब्दतः (1880 - 1920) विंशत्यधिकनवदशशततम-वर्षाभ्यन्तरे कृषियोग्यभूमेः क्षेत्रफलस्य (67) सप्तषष्टि-लक्षं हेक्टेयरपरिमित-भूमेः वर्धनम् अभवत् ।

कृषेः विस्तारं वयं विकासस्य सूचकत्वेन मन्यामहे । परन्तु अस्माभिः एतत् न विस्मर्तव्यं यत् भूमेः कर्षणात् प्राक् वनानां कर्तनं करणीयं भवति ।

स्रोतः क इति

अकृष्टभूमेः अधिग्रहणं कृत्वा कृषियोग्या सा कर्तव्या इति एतादृशः विचारः आ संसारम् उपनिवेशकेषु आरम्भतः एव लोकप्रियः आसीत् । अयम् एव सः विचारः आसीत् यतः विजयः न्यायोचितः इति वक्तुं शक्येत ।

अमेरिकीयलेखकः रिचर्ड्-हार्डिंगः (1896) षण्णवत्यधिकाष्टादशशततमे ख्रिस्ताब्दे मध्य-अमेरिकायाः हान्डूरासस्य विषये लिखति ---

अद्य एतस्मात् अधिकः रोचकः प्रश्नः अन्यः न कोऽपि भवितुं शक्नोति यत् संसारस्य अविकसितभूमेः किं स्यात्, किम् एषा भूमिः तस्य शक्तिसम्पन्नस्य हस्ते गच्छेत् यः हस्तः एतस्य परिवर्तनस्य इच्छां दधाति । अथवा अस्याः भूमेः यः वास्तविकः स्वामी अस्ति तस्य अधीने एव एषा स्यात्, यः तस्याः मूल्यं न अवगन्तुं शक्नोति । एते मध्य-अमेरिकीये कस्मिंश्चित् सुसज्जितगृहे अर्ध-क्रूराणां दलवत् सन्ति एतादृशानि दलानि न तु अस्य गृहस्य उपयोगम् एव कर्तुं शक्नुवन्ति न च तेषु गृहेषु विश्रान्तिम् एव कर्तुं शक्नुवन्ति ।

वर्षत्रयानन्तरम् अमेरिकीय-आधिपत्ये यूनाइटेड-फ्रूट-समवायस्य सङ्घटनम् अभवत् येन व्यापक-परिमाणेन मध्य-अमेरिकायां कदलीफलानाम् उत्पादनम् आरब्धम् । अनेन समवायेन एतेषां देशानां सर्वकारेषु अत्यन्तं वर्चस्वं स्थापितम् आसीत् यतः सः समवायः बनाना रिपब्लिक इति नाम्ना अभिज्ञातम् ।

डेविड-स्पर इति "द रेटरिक आफ- एम्पायर" इति (1993) इत्यस्मात् उद्धृतम् अस्ति ।

1.2 रेलपथाय स्लीपर(दीर्घकाष्ठम्)

नूतन-शब्दः

स्लीपर (रेलमार्गपट्टिकानां कृते विशिष्ट-स्थूणाकार-काष्ठम्) -- रेलमार्गस्य द्वयोः पक्षयोः यानि काष्ठानि उपयुज्यन्ते । तेन मार्गः न स्खलति अपि तु सङ्घटितः भवति ।

चित्रम् – 3 - सिंहभूमस्य वनेषु सालस्य उपमूलभागैः स्लीपर अर्थात् रेलपथकाष्ठस्य निर्माणं, छोटानागपुरम्, मई-मासस्य (1897) सप्तनवत्यधिकाष्टादशशत-तमख्रिस्ताब्दः । रेलमार्गपट्टिकानाम् आधाराय विशेष-स्थूलाकार-काष्ठानां प्राप्तये यत् वृक्षाणां छेदनस्य कार्यं करणीयं भवति स्म तत्कार्याय वनविभागः आदिवासिनां नियुक्तिं तु करोति स्म परन्तु आदिवासिनः तेषां स्वीयगृहनिर्माणाय वृक्षाणां छेदनं न कर्तुं शक्नुवन्ति स्म यतो हि तत्र ते निषिद्धाः आसन् इति ।

एकोनविंश-शताब्दस्य आरम्भं यावत् इङ्ग्लैण्ड-देशे (बलूत) ओक इत्यस्य वनानि लुप्यन्ति स्म । एतस्मात् कारणात् राजकीय-सेनायै काष्ठस्य आपूर्तौ बाधा जाता । नियमितरूपेण दृढानां काष्ठानाम् आपूर्तिं विना आङ्ग्ल-जलपोतानां निर्माणं कथं भवितुं शक्नोति स्म ? जलपोतैः विना राजसत्तायाः संरक्षणं कथं भवितुं शक्नोति स्म ? (1820) विंशत्यधिकाष्टादशशत-तमीय- दशके अन्वेषकदलानि भारतस्य वन्यसम्पदाम् अन्वेष्टुं प्रेषितानि । एकस्य दशकस्य आभ्यन्तरे व्यापकपरिमाणेन वृक्षाणां कर्तनम् आरब्धम् अपि च व्यापकमात्रया काष्ठस्य भारतात् निर्यातः प्रारब्धः ।

(1850) पञ्चाशदधिकाष्टादशशततमे दशके रेलमार्गाणां प्रसारेण काष्ठानां काचित् नूतना आवश्यकता उत्पादिता । राजकीयसेनायाः गमनागमनाय औपनिवेशिक-वाणिज्याय च रेलमार्गाणां निर्माणम् आवश्यकम् आसीत् । ऊर्जकानां सञ्चालनाय इन्धनरूपेण अपि च रेलमार्गाणां परस्परं बन्धनाय योजनाय च रेलमार्ग-पट्टिका-काष्ठानां रूपेण काष्ठानां महती आवश्यकता आसीत् । मीलपरिमितस्य लम्बतरस्य रेलमार्गस्य कृते (1760-2000) षष्ट्यधिकसप्तदशशतात् द्विसहस्रपरिमित-सङ्ख्यकानां रेलमार्ग-काष्ठानाम् आवश्यकता भवति स्म ।

भारते रेलमार्गाणां जालम् अथवा सघनता तु (1860) षष्ट्यधिकाष्टादशशततम-ख्रिस्ताब्दात् तीव्रतया प्रसृता । (1890) नवत्यधिकाष्टादशशत-तमं ख्रिस्ताब्दं यावत् प्रायः (25,500) पञ्चशताधिकपञ्चविंशतिसहस्रं किलोमीटरपरिमित-लम्बतराः रेलमार्गाः निर्मिताः आसन् । (1946) षट्चत्वारिंशदधिकनवदशशत-तमे वर्षे एतेषां रेलमार्गाणां दैर्घ्यं (7,65,000) पञ्चषष्टिसहस्राधिकं सप्तलक्षं किलोमीटरपरिमितं यावत् प्रसृतम् आसीत् । रेलमार्गाणां विस्तारेण सह व्यापकसङ्ख्यायां वृक्षाः अपि कर्तिताः । केवले मद्रास-प्रेसीडेन्सी इत्यस्मिन् (1850) पञ्चाशदधिकाष्टादशशततमे दशके प्रतिवर्षं (35,000) पञ्चत्रिंशत्-सहस्रं वृक्षाः रेलमार्गकाष्ठानां कृते कर्तिताः । सर्वकारेण आवश्यकमात्रायाः आपूर्तये निजानुबन्धाः प्रदत्ताः । एतैः अनुबन्धधारकैः विचारं विना एव वृक्षाणां कर्तनम् आरब्धम् । रेलमार्गान् परितः यानि वनानि आसन् तानि त्वरया लोपपथं गन्तुम् आरब्धानि ।

चित्रम् – 4 – वंशस्य महान्तः जलपोताः कासालाङ्ग-नद्यां प्रवहन्तः गच्छन्ति ।
चिट्टगाङ्ग-पर्वतीय-पट्टिका,



चित्रम् – 5 – रंगूनस्य कस्मिंश्चित् काष्ठभाण्डागारे स्थूलाकारकाष्ठानि व्यवस्थीकुर्वन् कश्चित् गजः,
औपनिवेशिक-काले प्रायः गजानां प्रयोगः वनेषु काष्ठागारेषु च विशालकाष्ठम् उत्थापयितुं क्रियते स्म ।

स्रोतः ख इति

मुल्तान-सुक्कूरयोः मध्ये इंडस-वैली-रेलवे इति नाम्ना प्रायः 300 मीलपरिमितः लम्बतरः रेलमार्गः निर्मितः आसीत् । 2000 स्थूलाकार-काष्ठानि प्रतिमीलं परिमित्या एतदर्थं 10 फुट × 10 इञ्च × 5 इञ्च (अथवा 3.5 घन-फुट-प्रति-एकक) इत्यस्य (600,000) षट्लक्षं स्थूलाकार-काष्ठानाम् आवश्यकता भविष्यति अथवा 2,00,000 क्यूबिक-फीटपरिमितात् अधिककाष्ठस्य इति । एतेषाम् ऊर्जकानाम् इन्धनाय काष्ठम् आवश्यकम् । उभयत्र प्रतिदिनम् एकस्य ट्रेन इत्यस्य अपि च एकमनप्रतिट्रेन-मील-परिमितेन वार्षिकं (2,19,000) नवदशसहस्राधिकं द्विलक्षं मनपरिमितस्य आवश्यकता भविष्यति । एतदतिरिच्य इष्टकानां कृते व्यापकमात्रायाम् इन्धनस्य आवश्यकता भविष्यति । स्लीपर-काष्ठानि मुख्यरूपेण सिन्धस्य वनेभ्यः आनेष्यन्ते । इदम् इन्धनं सिन्धस्य पञ्चनदस्य च झाऊ (Tarmarisk) झाण्ड(Jand) च इत्येतेभ्यः वनेभ्यः आनेतव्यम् आसीत् । अपरा नूतना रेलमार्गः नार्दन-स्टेट-रेलवे इति लाहौरतः मुल्तानं यावत् आसीत् । सङ्ख्याचिह्नानां दृष्ट्या एतस्य रेलमार्गस्य निर्माणाय (22,00,000) द्वाविंशतिलक्षम् इति सङ्ख्याकानां स्थूलाकार-काष्ठानाम् आवश्यकता भविष्यति ।

ई.पी.स्टेबिंग इति, द फारेस्ट्स-आफ-इण्डिया इति, भागः – 2 (1923) त्रयोविंशत्यधिकनवदशशततमः ख्रिस्ताब्दः ।

क्रियाविधिः

एकमील-परिमित-लम्बतरस्य रेलमार्गस्य कृते (1,760) षष्ट्यधिकसप्तदशशततमख्रिस् ताब्दात् (2,000) द्विसहस्रं ख्रिस्ताब्दं यावत् स्थूणाकार- काष्ठस्य आवश्यकता आसीत् । यदि त्रिमीटरपरिमित-लम्बतरस्य रेलमार्गस्य निर्माणाय एकस्मात् सामान्य-परिमाणीय-वृक्षात् स्थूणाकारकाष्ठत्रयं पञ्च वा इति निर्मातुं शक्यन्ते तर्हि एतस्याम् अवस्थायां समग्रं परिगणय्य पश्यन्तु यत् एक-मील-परिमित-लम्बतरस्य मार्गनिर्माणस्य कृते कतीनां वृक्षाणां कर्तनं करणीयं भविष्यति ?

चित्रम् – 6 – इन्धनकाष्ठानि एकत्र कृत्वा गृहं प्रति गच्छन्त्यः महिलाः ।

चित्रम् – 7 – दीर्घ-काष्ठानि नयत् किञ्चित् ट्रकयानम् । दीर्घकाष्ठानि कर्तितुं कस्यचित् क्षेत्रस्य चयनात् परं वनविभागः सर्वप्रथमं दीर्घराजमार्गाणां निर्माणं करोति यतः ट्रकयानानां प्रवेशः सरलतया भवितुं शक्नुयात् । वन्यैः तैः मार्गैः सह एतेषां राजमार्गाणां तुलनां कुर्वन्तु यैः मार्गैः जनाः इन्धनकाष्ठानि अथवा अन्यान् वन्योत्पादान् एकत्र कर्तुं गच्छन्ति स्म। एतादृशानि अनेकानि ट्रकयानानि काष्ठपूरितानि वनेभ्यः महानगराणि प्रति गच्छन्ति स्म ।

1.3 उद्यानानि

यूरोपे चायस्य कफघ्न्याः घृषेः च आवश्यकतायाः विस्तारः जातः अतः तस्याः पूर्तये उद्यानानि विकासितानि, एतानि खाद्यवस्तूनि उत्पादयितुं च प्राकृतिकवनानां कश्चित् महान् भागः वनरहितः कृतः अर्थात् तत्स्थाने स्थिताः वृक्षाः कर्तिताः । औपनिवेशिक-सर्वकारेण वनानाम् अधिग्रहणं कृत्वा तेषां विशालभागाः न्यूनमूल्येन यूरोपीयेभ्यः उद्यानस्वामिभ्यः प्रदत्ताः । एतेषां भागानां क्षेत्रबन्धं कृत्वा वनानि वृक्षरहितानि कृतानि तत्र च चायस्य कफघ्न्याः च कृषिकार्यम् आरब्धम् ।

चित्रम् – 8 – प्लेजर्-ब्राण्ड्-चायम् इति ।

।।इति प्रथमः पाठः ।।

2 व्यावसायिक-वानिक्याः आरम्भः

गत-खण्डे अस्माभिः पठितं यत् जलपोतानां रेलमार्ग-पट्टिकानां च निर्माणाय विस्ताराय च आङ्ग्लीयाः वनानाम् आवश्यकताम् अनुभूतवन्तः। आङ्ग्लीयाः एतस्मिन् विषये चिन्तिताः आसन् यत् स्थानीयाः जनाः वणिग्-वर्गः च वृक्षाणाम् उपयोगं करिष्यन्ति तदर्थं ते वृक्षाणाम् कर्तनम् अपि आधिक्येन करिष्यन्ति तस्मात् वनानि नष्टानि भविष्यन्ति इति। अतः ते डायट्रिच-ब्रैण्डिस-नामकं जर्मन-विशेषज्ञम् एतस्मिन् विषये चर्चार्थम् आहूतवन्तः तम् आङ्ग्लीयाः देशस्य प्रथम-वन-महानिदेशकस्य रूपेण च नियुक्तवन्तः।

ब्रैण्डिसः अनुभूतवान् यत् जनानां संरक्षणविज्ञानस्य प्रशिक्षणं करणीयम्। वनानां च प्रबन्धनाय कस्यचित् व्यवस्थित-तन्त्रस्य विकासः करणीयः भविष्यति। एतदर्थम् वैधानिक-स्वीकृतेः आवश्यकता अस्ति। वनसम्पदायाः उपयोग-सम्बद्धाः अधिनियमाः सुनिश्चिताः करणीयाः भविष्यन्ति। वृक्षाणां कर्तनकार्ये पशुचारणे च प्रतिबन्धं कृत्वा एव वनानि काष्ठानाम् उत्पादनाय आरक्षितानि कर्तुं शक्ष्यन्ते। एतस्य तन्त्रस्य अवमाननां कृत्वा वृक्षस्य कर्तकाः

क्रियाविधिः

यदि 1862 तमे वर्षे भारतसर्वकारस्य शासकीय-व्यवस्था भवताम् अधीना अभविष्यत् अपि च भवतां दायित्वम् अभविष्यत् यत् व्यापकपरिमाणेन रेलमार्गाणां कृते स्लीपर इत्यस्मै काष्ठानाम् इन्धनस्य आपूर्तेः च दायित्वम् अभविष्यत् तर्हि भवन्तः एतादृशाय कार्याय कान् कान् उपायान् अकरिष्यन् ?

चित्रम् – 9 – इटलीस्थिते टस्कनी इत्यस्मिन् पोपलर् इत्यस्य वृक्षस्य वनानां व्यवस्थित-वीथिका ,
पोपलर् इत्यस्य वनानि मुख्यतः काष्ठानां कृते उपयुज्यन्ते तदेव तेषां महात्म्यं विशेषतया वर्तते। पत्राणां फलानाम् अन्येषां च उत्पादानां कृते एते पोपलर-वृक्षाः उपयोगिनः न भवन्ति। समानाकारान् समलम्बतरान् समानपङ्क्तौ च स्थितान् एतान् वृक्षान् पश्यन्तु। एतत् एव आदर्शरूपम् अस्ति यस्य प्रोत्साहनं विकासः च वैज्ञानिक-वानिक्या कृतम् अस्ति।

चित्रम् – 10 – काङ्गडा इत्यस्य किञ्चित् देवदारुवृक्षाणाम् उद्यानम् , 1933,
इण्डियन-फारेस्ट-रिकार्डस्, पञ्चदश-भागतः ।

यदि कश्चित् जनः विधानस्य उल्लङ्घनं करिष्यति तर्हि सः दण्डभाग् भविष्यति । अनेन प्रकारेण ब्रैडिस-वर्यः (1864) चतुःषष्ट्यधिकाष्टादशशत-तमे ख्रिस्ताब्दे भारतीय-वन-सेवायाः स्थापनाम् अकरोत्, (1865) पञ्चषष्ट्यधिकाष्टादशशत-तमे ख्रिस्ताब्दे च भारतीय-वन-अधिनियमं सूत्रबद्धं कर्तुं सहयोगम् अकरोत् । इम्पीरियल-फारेस्ट-रिसर्च-इंस्टीट्यूट् इत्यस्य स्थापना (1906) षडधिकनवदशशत-तमे वर्षे देहरादूने अभवत् । अत्र यस्याः पद्धत्याः प्रशिक्षणं दीयते स्म सा **वैज्ञानिक-वानिकी** (साइण्टिफिक फारेस्ट्री) इति कथिता । परन्तु वर्तमाने काले पारिस्थितिक-विशेषज्ञाः अन्ये च अधिकतराः जनाः मन्यन्ते यत् इयं पद्धतिः कुतश्चित् कथञ्चित् चापि वैज्ञानिकी नास्ति ।

वैज्ञानिक-वानिक्याः नाम्ना विविधप्रजातीनां प्राकृतिकवनानि कर्तितानि । तेषां कर्तितवृक्षाणां स्थाने सरलपङ्क्तौ समान-प्रकारकाः एव वृक्षाः आरोपिताः । एतत् उद्यानम् इति उच्यते स्म । वनविभागीयाः अधिकारिणः वनानां सर्वेक्षणम् अकुर्वन्, विभिन्नप्रजातीनां वृक्षयुक्तक्षेत्राणां परिमापणं कृतम्, वनप्रबन्धनस्य च योजनाः कृताः, ते अधिकारिणः इदम् अपि सुनिश्चितवन्तः यत् उद्यानस्य कियत् क्षेत्रं प्रतिवर्षं कर्तयिष्यते । छेदनात् परं रिक्तभूमौ पुनः वृक्षाः रोपणीयाः आसन् यतः केषुचित् एव वर्षेषु तत् क्षेत्रं पुनः छेदनाय सिद्धं भवेत् ।

(1865) पञ्चषष्ट्यधिकाष्टादशशत-तमे ख्रिस्ताब्दे वनाधिनियमस्य प्रवर्तनात् परं तस्मिन् अधिनियमस्य वारद्वयं संशोधनं कृतम् – प्रथमं (1878) अष्टसप्तत्यधिकाष्टादशशततमे ख्रिस्ताब्दे पुनः च द्वितीयं (1927) सप्तविंशत्यधिकनवदशशत-तमे ख्रिस्ताब्दे । (1878) अष्टसप्तत्यधिकाष्टादशशततमे वर्षे यः अधिनियमः कल्पितः आसीत् तदनुसारं वनानि श्रेणित्रये विभक्तानि - आरक्षितः सुरक्षितः ग्रामीणः च इति । समीचीनतमानि वनानि आरक्षितवनानि इति पदेन कथितानि । ग्रामीणाः जनाः एतेभ्यः वनेभ्यः निजोपयोगाय किमपि न स्वीकर्तुं शक्नुवन्ति स्म । ते जनाः गृहनिर्माणाय इन्धनाय च केवलं सुरक्षितेभ्यः ग्रामीणवनेभ्यः च एव काष्ठानि स्वीकर्तुं शक्नुवन्ति स्म ।

चित्रम् 11–दि-इम्पीरियल-फारेस्ट-स्कूल-देहरादूनम्, भारतम्। ब्रिटिश-साम्राज्ये स्थापितः प्रथमः वन्य-विद्यालयः ।
स्रोतः इण्डियन-फारेस्टर्, खण्डः – 31 इति,

2.1 जनानां जीवनं कथं प्रभावितम् ?

कञ्चित् उत्तमं वनं कीदृशं स्यात् एतस्मिन् विषये वनपालकानां ग्रामीणानां च विचाराः पृथक् पृथक् आसन् । एकतः ग्रामीणाः स्वीयाः पृथक् पृथक् आवश्यकताः यथा

नूतनः शब्दः

वैज्ञानिक-वानिकी – वनविभागद्वारा वृक्षाणां कर्तनं यत्र पुरातनानां कर्तितवृक्षाणां स्थाने नूतनवृक्षाः रोप्यन्ते ।

चित्रम् – 12 – वनात् मधुपुष्पाणां सङ्ग्रहणम् अथवा उञ्छनम् ।

ग्रामीणाः सूर्योदयात् प्रागेव उत्थाय भूमौ पतितानि मधुपुष्पाणि चेतुं वनं गच्छन्ति । मधुद्रुमाः बहुमूल्याः सन्ति । मधुपुष्पाणि खादितुम् अपि शक्यन्ते तेषां च प्रयोगः मद्यनिर्माणाय अपि कर्तुं शक्यते । एतेषां बीजेभ्यः तैलम् अपि निष्कासयितुं शक्यते ।

इन्धनस्य पशुखाद्यस्य पत्राणां च आपूर्तये वने विभिन्न-प्रजातीनां सम्मिश्रणम् इच्छन्ति स्म, तत्रैव वनविभागाय एतादृशानां वृक्षाणाम् आवश्यकता आसीत् ये जलपोतानां रेलमार्गाणां च कृते गृह्यकाष्ठानि प्राप्तुं शक्येरन् । एतादृशानि काष्ठानि दृढानि लम्बतराणि सरलानि च भवेयुः । अतः सागौन-शाल-प्रभृति-प्रजातीनां वृक्षाः विकसिताः आरोपिताः अन्यप्रजातीनां च वृक्षाः कर्तिताः ।

वन्यक्षेत्रेषु जनाः कन्दानां मूलानां फलानां पत्राणां वन्योत्पादानां च उपयोगं विभिन्नानाम् आवश्यकतानां पूर्तये कुर्वन्ति । फलानि कन्दानि मूलानि च अतीव पोषकखाद्यानि सन्ति, विशेषतया प्रावृषि यदा सस्यानि गृहं प्रति न आगतानि भवन्ति इति । औषधानां कृते मूलौषधीनां प्रयोगः भवति, काष्ठस्य प्रयोगः हलसदृशानां कृषि-उपकरणानां निर्माणाय क्रियते, वंशवृक्षैः समीचीनाः क्षेत्रबन्धाः निर्मातुं शक्यन्ते अपि च तेषां वंशवृक्षाणाम् उपयोगः छत्रस्य कण्डोलस्य च निर्माणाय अपि कर्तुं शक्यते । शुष्कस्य कूष्माण्डस्य बाह्यभागस्य प्रयोगः जलकूप्याः रूपेण कर्तुं शक्यते । वनेषु प्रायः सर्वमेव उपलब्धम् अस्ति - पत्राणां संयोजनं कृत्वा पर्ण-स्थालिकाः पत्रपुटकानि च निर्मातुं शक्यन्ते, (सेमूर) कौशेयस्य कण्टकिल- वल्कलस्य उपरि शाकानां त्वग्-निस्सारणं कर्तनं च कर्तुं शक्यते, मधुद्रुमात् यत् तैलं निष्कास्यते तस्य प्रयोगः पाकार्थं प्रकाशाय च अपि कर्तुं शक्यते ।

चित्रम् – 13 – शुष्यन्ति तिन्दुलपत्राणि ।

वनवासिनाम् अनेकेषां जनानां कृते तिन्दुलपत्राणां विक्रयणम् आयस्य किञ्चित् प्रमुखं साधनम् अस्ति । प्रत्येकस्मिन् गुच्छे प्रायः पञ्चाशत् पत्राणि भवन्ति । एकः जनः अतिकठिनं पुरुषार्थं विधाय एकेन दिनेन केवलं अधिकाधिकं शतं गुच्छान् एकत्र कर्तुं शक्नोति । बालाः महिलाः वृद्धाः च एव मुख्यतः पत्राणि एकत्र कुर्वन्ति ।

चित्रम् – 14 – क्षेत्रेभ्यः अन्नम् आनयन्तः जनाः ।
क्षेत्रेभ्यः पुरुषाः कण्डोलैः अन्नम् आनयन्ति । पुरुषाः स्वस्कन्धयोः द्वयोः प्रान्तभागयोः एकेन दण्डेन बद्धान् कण्डोलान् आनयन्ति अपरञ्च महिलाः कण्डोलान् स्वशिरसि निधाय आनयन्ति ।

वनाधिनियमानाम् अन्तर्गताः ये अधिनियमाः कल्पिताः तैः आदेशैः ग्रामीणानां समस्याः वर्धापिताः । एतस्मात् अधिनियमात् परं गृहार्थं काष्ठकर्तनं, पशुचारणं, कन्दानां मूलानां फलानां च आहरणम् एकत्रीकरणं च इत्यादीनि दैनिकानि कार्याणि अवैधानिकानि सन्ति इति जातम् । अधुना तेषां पार्श्वे काष्ठचौर्यरूपः एकः एव विकल्पः आसीत्, कदाचित् वनरक्षकैः निगृह्यमाणे सति मोचनाय ते रक्षकाः तेभ्यः उत्कोचं गृह्णन्ति स्म । इन्धनकाष्ठानाम् एकत्रीकरणं याः महिलाः कुर्वन्ति स्म विशेषतया ताः अतीव दुःखिताः अभवन् । आरक्षकाः वनरक्षकाः च निर्मूल्यं खाद्यवस्तूनि जनान् याचन्ते स्म इति एतादृशः व्यवहारः तेषां सामान्यरूपेण प्रायः दृश्यते स्म इति ।

क्रियाविधिः

वन-वासिनः बालकाः पादपानां वृक्षाणां च शताधिक-प्रजातीनां नामानि वक्तुं शक्नुवन्ति । भवन्तः पादपानां वृक्षाणां च कतीनां प्रजातीनां नामानि जानन्ति ?

2.2 वनानां नियमनेन कृषिकार्यं कथं प्रभावितम् ?

यूरोपीय-उपनिवेशवादस्य अतीव सघनप्रभावः झूम इत्यस्य कृषिकार्ये यायावरीय-कृषि-प्रथायाः जातः इति दृश्यते । एशिया-अफ्रीका-दक्षिण-अमेरिका-देशानाम् अनेकेषु भागेषु कृषेः कश्चित् परम्परागत-उपायः अस्ति । एतस्याः कृषेः स्थानीयनामानि सन्ति यथा - दक्षिण-पूर्व-एशियायां लादिंग् इति , मध्य-अमेरिकायां मिलपा इति, अफ्रीकायां चितमेन इति अथवा तावी इति श्रीलङ्कायां च चेना इति । भारते यायावर-कृषेः धया, पेन्दा,बेवर,नेवड,झूम,पोडू,खन्दाद, कुमरी च इति एतादृशानि कानिचन नामानि सन्ति ।

यावावरीय-कृष्यर्थं वनस्य केचन भागाः क्रमशः कर्त्यन्ते प्रज्वाल्यन्ते च । प्रावृषः प्रथमवृष्टेः परं तस्मिन् वृक्षभस्मनि बीजानि उप्यन्ते अपि च अक्टूबर्-मासे नवम्बरमासे च सस्यस्य कर्तनं क्रियते । एतेषु क्षेत्रेषु वर्षद्वयपर्यन्तं कृषिः क्रियते ततः परं तानि क्षेत्राणि द्वादशवर्षेभ्यः अष्टादश-वर्षपर्यन्तम् अकृष्टरूपेण स्थाप्यन्ते यतः पुनः तत्र वनस्य विकासः भवेत् । एतादृशेषु भूखण्डेषु मिश्रितसस्यानि उत्पाद्यन्ते यथा मध्यभारते अफ्रीकायां च यावनालः वज्रकः च, ब्राजीले कसावा, लैटिन-अमेरिकायाः अन्यभागेषु कणिशं फलिनः च इति ।

यूरोपीय-वन-रक्षकाणां दृष्टौ अयम् उपायः वनेभ्यः हानिप्रदः आसीत् । ते अनुभूतवन्तः यत् केषाञ्चित् वर्षाणाम् अन्तरालेन कृषिकार्यं यत्र भवति तादृश्यां भूमौ रेलमार्गाणां कृते उपयुज्यमानकाष्ठ्यानां

चित्रम् 15 – टौङ्ग्या इति कृषिः काचित् एतादृशी व्यवस्था आसीत् यत्र कृषकाः किञ्चित् कालं यावत् उद्यानेषु एव कृषिं कर्तुं स्वतन्त्रताः आसन् । 1921 तमे ख्रिस्ताब्दे बर्मायाः थर्मावाडी-डिवीजन इत्यस्मै चित्रिते चित्रे कृषकाः धान्यस्य रोपणं कुर्वन्ति । लौह-प्रान्तभागयुक्तानां दीर्घवंशानां साहाय्येन पुरुषाः भूमौ गर्तानि कुर्वन्ति स्म । महिलाः प्रत्येकं गर्ते धान्यं रोपयन्ति स्म ।

चित्रम् – 16 – वनस्य पेन्दा अथवा पोदु इति भागानां प्रज्वालनम् ।
यायावरीय-कृषि-व्यवस्थायां वनानि स्वच्छीक्रियन्ते । शिलानां प्रवणभागानां वृक्षाणां कर्तनात् परं भस्मने तत्र स्थिताः वृक्षाः ज्वाल्यन्ते । ततः परम् एतस्मिन् क्षेत्रे पुनः बीजानि विकीर्यन्ते वर्षाभिः च सेचनाय एतानि एवमेव त्यज्यन्ते ।

वृक्षाणाम् उत्पादनं न कर्तुं शक्यते इति । सहैव, वनानां प्रज्वालनकाले अन्येषां बहुमूल्यवृक्षाणाम् अपि अग्निज्वालाभिः ज्वलनस्य भीतिः सदैव तिष्ठति। यायावरीय-कृषेः कारणात् सर्वकाराय राजस्वस्य विवरणस्थापनम् अपि अतीव कठिनम् आसीत्, अतः सर्वकारः यायावरीय-कृषिकार्यस्य प्रतिबन्धस्य निर्णयम् अकरोत् । परिणामतः अनेके समुदायाः ये वनेषु निवसन्ति स्म तेषां गृहेभ्यः ते बलात् विस्थापिताः । केचन कृषकाः तु स्वकार्यस्य परिवर्तनं कर्तुं बाध्याः जाताः केचन च तत्र लघुविद्रोहाणां माध्यमेन प्रतिरोधं, नीतेः विरोधं च अपि कृतवन्तः ।

2.3 मृगयायाः स्वतन्त्रता केभ्यः आसीत् ?

वन्य-सम्बद्धैः नूतनाधिनियमैः वनवासिनां जीवनं केनचित् भिन्नप्रकारेण प्रभावितम् । वन्याधिनियमानां क्रियान्वयनात् पूर्वं वनेषु अथवा वनपार्श्वस्थेषु क्षेत्रेषु ये जनाः निवसन्ति स्म ते जनाः हिरणस्य तित्तिरस्य अन्येषां जन्तूनां च मृगयाद्वारा जीवनयापनं कुर्वन्ति स्म । अधुना एतत् पारम्परिक-प्रचलनम् अवैधानिकं जातम् । ये जनाः आखेटं कुर्वाणः वन्य-अधिकारिभिः परिलक्ष्यन्ते स्म तान् अधिकारिणः दण्डयन्ति स्म ।

यत्र एकतः वन्य-अधिनियमेन जनाः मृगयायाः यः तेषां पारम्परिकः अधिकारः आसीत् तेन अधिकारेण ते वञ्चिताः अपरतः अधिकारिणः विशालपशूनाम् मृगयां क्रीडार्थं कुर्वन्ति स्म । भारतवर्षे सिंहानाम् अपरेषां च जीवानाम् आखेटं शताब्देभ्यः राज-संस्कृतेः भागः आसीत् । अनेकासु मुगल-कलाकृतिषु युवराजाः राजकुमाराः सम्राजः च आखेटं कुर्वाणाः सानन्दं सन्ति इति दर्शिताः । परन्तु औपनिवेशिक-शासनकाले आखेटस्य प्रचलनम् एतावन्तं व्यापकपरिमाणं यावत् वर्धितं यत् अनेकाः वन्यजीव-प्रजातयः सर्वथा लुप्तप्रायाः जाताः ।

चित्रम् – 17 – मत्स्यानां हन्ता कश्चित् बालकः ।
बालकाः स्वीय-पितृभ्यां सह वनं गच्छन्ति अपि च शीघ्रम् एव तादृशाः बालकाः मत्स्यग्रहणं, वन्य-उत्पादानाम् एकत्रीकरणं, कृषिकार्यं, च शिक्षन्ते । अयं बालकः वंशस्य पिञ्जरं स्वीये वामहस्ते गृहाणः वर्तते, जलप्रवाहदिशि पिञ्जर-यन्त्रे स्थापिते सति मत्स्यस्य प्रवेशः अत्र भवति ।



चित्रम् – 18 – नेपाले मृगयायाः परं लार्ड-रीडिंग।
चित्रे मृतव्याघ्राणां गणनां कुर्वन्तु। ब्रिटिश-औपनिवेशिकाः अधिकारिणः राजानः च यदा मृगयार्थं गच्छन्ति स्म तदा तैः सह सेवकानां सम्पूर्णदलं भवति स्म। ग्राम्याः कुशलाखेटकाः हांका इति अर्थात् हन्तव्यपशून् वधस्थानं प्रति आनयन्ति स्म विशिष्टाधिकारिणः तु केवलं गुलिकाप्रहारमात्रं कुर्वन्ति स्म।

आङ्ग्लीयानां दृष्टौ दीर्घवन्यपशवः, नृशंसाः,हिंसकाः आदिसमाजस्य च ते प्रतीक-चिह्नरूपेण आसन्। तेषां मतम् आसीत् यत् भयङ्कर-पशूनां वधं कृत्वा ते भारतवर्षं सभ्यं करिष्यन्ति। व्याघ्रस्य वृकस्य च इति अन्येषां च विशालपशूनां ये जनाः आखेटं कुर्वन्ति स्म तेभ्यः पुरस्काराः अपि दीयन्ते स्म। आङ्ग्लीयाः कथयन्ति स्म यत् एतेभ्यः उपर्युक्तेभ्यः हिंसकपशूभ्यः कृषकाः भीताः भवन्ति। (1875) पञ्चसप्तत्यधिकाष्टादशशत-तमख्रिस्ताब्दात् (1925)पञ्चविंशत्यधिकनवदशशत-तमस्य ख्रिस्ताब्दस्य आभ्यन्तरे पुरस्काराशेः लोभवशात् (80,000) अशीतिसहस्राधिकाः व्याघ्राः, (1,50,000) सार्धैकलक्षं चित्रकव्याघ्राः अपि च (2,00,000) द्विलक्षं वृकाः हताः। शनैः शनैः व्याघ्रस्य मृगया क्रीडारूपेण अङ्गीकृता। जार्ज-यूल-नामकेन आङ्ग्लीय-अधिकारिणा चतुःशतं व्याघ्राः हताः। आरम्भे केचन वन्यप्रदेशाः मृगयायै एव आरक्षिताः आसन्। चिरकालानन्तरं पर्यावरणविद्भिः संरक्षणवादिभिः च अयं विषयः उपस्थापितः यत् पशूनां सर्वासां प्रजातीनां संरक्षणं भवेत् एतेषां च हननं न भवेत् इति।

2.4 नूतनानि वाणिज्यानि, नूतनाः आजीविकाः, नूतनाः सेवाः च

वनेषु वनविभागस्य नियन्त्रणं स्थापितं तस्मात् अनेकेषां जनानाम् अनेकविधाः हानयः सञ्जाताः परन्तु केचन जनाः वाणिज्यस्य नूतनान् अवसरान् अपि प्राप्तवन्तः। अनेके समुदायाः स्व-परम्परागतं कार्यं परिज्यत्य वन्योत्पादानां वाणिज्यम् आरब्धवन्तः। केवलं भारतवर्षे एव न, अपितु समग्रे विश्वे अपि एतादृशं परिदृश्यं परिलक्ष्यते।

स्रोतः ग इति

बैगा इति मध्यभारतस्य कश्चित् समुदायः अस्ति। (1892) द्विनवत्यधिकाष्टादशशत-तमे ख्रिस्ताब्दे यदा तेषां यायावरीय-कृषिकार्यं प्रतिबन्धितं तदा बैगा-समुदायस्य जनाः सर्वकाराय इमां याचिकां दत्तवन्तः -
" प्रतिदिनं वयं निराहाराः एव भवामःयतोहि अस्माकं पार्श्वे भोक्तुम् अन्नं नास्ति। अस्माकं पार्श्वे केवला एका एव सम्पत्तिः अस्ति सा अस्ति अस्माकं कुठारः इति। अस्माकं पार्श्वे निजगात्राणि आवरितुं वस्त्राणि न सन्ति। अग्नितापेन वयं शरद्-रात्रीः यापयामः। अधुना वयं बुभुक्षया म्रियामहे। वयं कुत्रचिद् गन्तुम् अपि न शक्नुमः। अस्माभिः कः दोषः आचरितः यत् सर्वकारः सर्वथा अस्माकम् अवहेलनं करोति। काराबन्धिभ्यः कारासु पर्याप्तभोजनं दीयते। घासस्य उत्पादकाः अपि तेषां भूमेः न अपक्रियन्ते परन्तु वयं तु अत्र वंशानुक्रमपरम्परया निवसामः अस्मभ्यं सर्वकारः अस्माकम् अधिकारं किमर्थं न प्रयच्छति।"

वेरियर-एल्विनः (1939), माधव-गाडगिलः रामचन्द्रगुहा च 'दिस-फिशर्ड-लैण्ड्- एन-इकोलाजिकल-हिस्ट्री-आफ-इण्डिया' इत्यस्मात् उद्धृतः कश्चन अंशः।

उदाहरणार्थम् – एकोनविंशस्य शताब्दस्य मध्यकाले तुङ्गीय-उपत्याकासु ये जनाः वासं कृत्वा मैनियोक इत्यस्य उत्पादनं कुर्वन्ति स्म ते ब्राजीलीयस्य ऐमेजॉन इत्यस्य मुनुदुरुकु इति समुदायस्य जनाः व्यापारिभ्यः घृषेः आपूर्तये वन्यघृषेः वृक्षेभ्यः लेटेक्स इत्यस्य एकत्रकरणम् आरब्धवन्तः। कालान्तरे ते वाणिज्यिक-चतुष्पीठानि प्रति अधः अवतीर्णवन्तः अपि च सर्वथा वणिजाम् आश्रयम् कृतवन्तः।

भारतवर्षे वन्योत्पादानां वाणिज्यं कञ्चित् विचित्रः नूतनः च विषयः न आसीत्। मध्यकालात् एव आदिवासि-समुदायद्वारा बंजारा इति यायावर-समुदायानां माध्यमेन हस्तिनाम् अन्यस्य चर्मादिकस्य वस्तूनां , शृङ्गस्य घासस्य निर्यासस्य राल इत्यस्य च वाणिज्यस्य उदाहरणानि लभ्यन्ते।

परन्तु आङ्ग्लीयानाम् आगमनात् परं वाणिज्यं सर्वथा सर्वकारीये नियन्त्रणे गतम् । ब्रिटिशसर्वकारेण अनेकेभ्यः महद्भ्यः यूरोपीय-वाणिज्यिक-समवायेभ्यः विशिष्टक्षेत्रेषु वन्योत्पादानां वाणिज्याय (इजारेदारी) अनुबन्धः समर्पितः। स्थानीयाः जनाः अधुना प्रतिबन्धिताः यत् ते मृगयां पशुचारणं च न करिष्यन्ति इति। अनया प्रक्रियया मद्रास-प्रेसीडेन्सी इत्यस्य कोरावा, कराचा येरुकुला च इति प्रभृतयः अनेके पशुचारकाः यायावरीयाः समुदायाः स्वीयाम् आजीविकां त्यक्तुं बाध्याः जाताः। एतेषु समुदायेषु केचन "अपराधिकुटुम्ब इति" रूपेण अपि कथिता अपि च एतादृशानां समुदायानां जनाः सर्वकारस्य निरीक्षणे शिल्पशालासु आकरेषु उद्यानेषु च कार्यं कर्तुं बाध्याः जाताः।

कार्यस्य नूतनावसराणां प्राप्तेः अयम् अभिप्रायः न आसीत् यत् तेषां जीवनस्थितौ सदैव परिष्कारः एव जातः स्यात् इति। असम-राज्यस्य चाय-उद्यानेषु कार्यार्थं झारखण्डस्य संथाल-समुदायस्य पुरुष-महिलाः उरांवस्य छत्तीसगढस्य च गोंड-सदृशाः आदिवासिनः पुरुषाः महिलाः च नियुक्ताः। तेषां पुरुष-महिलानां पारिश्रमिकम् अतीव न्यूनम् आसीत् अपि च कार्यस्थितयः तावत्य एव दुस्स्थाः आसन्। तेषां ग्रामेभ्यः ते आनाय्य अत्र अस्मिन् कर्मणि तु नियुक्ताः परन्तु तेषां ग्रामं पुनः प्रतिगमनम् अधुना सरलं नासीत्।

नूतनः शब्दः

एकाधिकारः (इजारेदारी)।

स्रोतः घ इति

पुतुमायो इत्यस्मिन् घृषेः निष्कासनम् --
आविश्वम् उद्यानेषु कार्यस्य स्थितयः भयावहाः आसन्। ऐमेज़ॉन इत्यस्य पुटुमायो इति क्षेत्रे पेरूवियन-रबड-कम्पनी इति (ब्रिटिश एवं पेरूवियन, इति अनयोः सहयोगे) घृषेः निष्कासनं हुईतोतोस इति उच्यमानस्य स्थानीयानाम् भारतीयानां श्रमाधारितम् आसीत्। (1900-1912) नवदशशतात् ख्रिस्ताब्दात् आरभ्य द्वादशाधिकनवदशशततम-वर्षाणाम् आभ्यन्तरे पुटुमायो इत्यस्मिन् (4,000) चतुःसहस्र-टनपरिमितस्य रबड इत्यस्य उत्पादनम् अभवत् तथा च तस्मिन् एव काले भारतीय-जनसङ्ख्यायां यन्त्राणां प्रयोगकारणात्, रोगाणां पलायनस्य च कारणात् (30,000) त्रिंशत्सहस्रम् इति सङ्ख्यायाः पतनम् अभवत्। रबड-समवायस्य कश्चित् वेतनभोगी वर्णनम् अकरोत् यत् रबड इत्यस्य सङ्ग्रहः कथं क्रियते स्म। प्रबन्धकेन शताधिकाः भारतीयाः स्थानके उपस्थिताः भवेयुः इति निर्देशः दत्तः -
तेन स्वीया कार्बाइन इति अपि च छुरिका ग्रहीता तथा च सः विवशानां भारतीयानां हननम् आरब्धवान्। अल्पे एव काले तत्र शिशूनां महिलानां पुरुषाणां च सार्धैकशतं शवैः भूमिः आच्छादिता। अवशिष्टाः जीविताः रक्तरञ्जिताः दीनाः तेन शवानां चयेन सहैव प्रज्वालिताः। पुनः तत्र प्रबन्धकः आक्रुष्टवान् अहं तान् सर्वान् भारतीयान्जिघांसामि ये घृषेः आनयनस्य मम आदेशस्य पालनं न कुर्वन्ति।

निकोलस-डर्क्स (सं.) कालोनियलिज्म-ऐण्ड-कल्चर् (1992) द्विनवत्यधिकनवदशशततमे ख्रिस्ताब्दे माइकेल-ताउसिग, इति कल्चर-आफ-टेरर्-स्पेस-आफ-डैथ इति।

॥इति द्वितीयः पाठः॥

3 वनविद्रोहः

भारतसहिते समग्रे संसारे वन्यसमुदायम् आधृत्य बलात् यानि परिवर्तनानि आरोपितानि तानि विरुध्य वन्यसमुदायिनः विद्रोहम् अकुर्वन्। संथालपरगना इति स्थाने सीधू कानू च इति एतौ, छोटानागपुरे च बिरसामुण्डा, आन्ध्रप्रदेशे च अल्लूरी-सीताराम-राजू इति एतादृशानां जनानां नामानि लोकगीतेषु कथासु च श्रूयन्ते एते जनाः आङ्ग्लीयान् विरुध्य यानि आन्दोलनानि जातानि तेषाम् आन्दोलनानां नायकानां रूपेण अद्य एव स्मर्यन्ते। अधुना वयं बस्तर-राज्ये (1910) दशाधिकनवदशशत-तमे ख्रिस्ताब्दे जातस्य एतादृशस्य एव विद्रोहस्य विस्तरेण अध्ययनं करिष्यामः।

3.1 बस्तरस्य जनाः

बस्तर-छत्तीसगढस्य सर्वतः दक्षिणे भागे आन्ध्रप्रदेशस्य उडीसायाः महाराष्ट्रस्य च सीमाभिः संलग्नं किञ्चित् क्षेत्रम् अस्ति। बस्तरस्य केन्द्रियभागः प्रवणीयः अस्ति। एतस्य प्रवणस्य उत्तरभागे छत्तीसगढस्य दक्षिणभागे च गोदावर्याः क्षेत्रम् अस्ति। इन्द्रावतीनदी पारं बस्तरस्य तत्रापि पूर्वस्मात् पश्चिमभागं प्रति प्रवहति। बस्तरे मरिया, मुरिया गोण्ड, धरवा, भतरा, हलबा इति आदयः अनेके आदिवासि-समुदायिनः निवसन्ति। यद्यपि एते पृथक् पृथक् भाषाभाषिणः सन्ति तथापि एतेषां रीतयः परम्पराः मान्यताश्च समानाः सन्ति। बस्तरस्य जनाः मन्यन्ते यत् प्रत्येकं ग्रामः भूमिं 'धरा-मातुः' प्राप्तवान् अस्ति, अतः एव प्रत्येकं कृषिजीवी प्रत्येकम् उत्सवेषु धरायै किमपि किमपि अर्पयति। भूमेः इव ते नद्याः वनस्य पर्वतानां च अपि उपासनां कुर्वन्ति। प्रत्येकं ग्रामस्य जनाः स्वकीयां सीमां जानान्ति अतः एते जनाः एतासां सीमानाम् आभ्यन्तरे एव समस्तानां प्राकृतिक-सम्पदां संरक्षणं कुर्वन्ति। यदि कस्यचित् एकस्य ग्रामस्य जनाः अपरस्य ग्रामस्य जनानां स्वल्पकाष्ठानि स्वीकर्तुम् इच्छन्ति स्म तदा प्रतिदाने ते लघुशुल्कम् अर्पयन्ति स्म तद् देवसारी दाण्ड अथवा मान इति पदेन कथ्यते स्म।

चित्रम् – 19 – बस्तरे सेनायाः शिबिरम्, (1910) दशाधिकनवदशशततमः ख्रिस्ताब्दः।
बस्तरे सेनायाः कस्यचित् शिबिरस्य इदं चित्रम् (1910) दशाधिकनवदशशत-तमे ख्रिस्ताब्दे चित्रितम् अस्ति। सेना पटगृहाणि नीत्वा, पाचकैः सैनिकैः च सह चलति स्म। अस्मिन् चित्रे कश्चित् सैनिकः विद्रोहिभ्यः सुरक्षायै शिबिरस्य संरक्षणं निरीक्षणं च करोति।



चित्रम् 20 – (2000) द्विसहस्रतमख्रिस्ताब्दे बस्तरः इति।
(1947) सप्तचत्वारिंशत्तमे वर्षे बस्तरराज्यं काङ्केर इति राज्ये सम्मेलितम्। इदं सम्पूर्णक्षेत्रं मध्यप्रदेशस्य बस्तरजनपदत्वेन जातम्। (1998) अष्टानवत्यधिकनवदशशत-तमे ख्रिस्ताब्दे पुनः एतत् जनपदं काङ्केर-बस्तर-दान्तेवाडा इत्येतेषु जनपदेषु विभक्तम्। (2000) द्विसहस्रतमे ख्रिस्ताब्दे एतानि जनपदानि छत्तीसगढस्य भागभूतानि जातानि। (1990) नवत्यधिकनवदशशत-तमवर्षीयः विद्रोहः काङ्केर इत्यतः वनक्षेत्रात् एव आरब्धः, अपि च शीघ्रमेव राज्यस्य अन्येषु क्षेत्रेषु अपि प्रसृतः।

केचन ग्रामीणाः स्व-वनानां संरक्षणाय निरीक्षकाणां नियुक्तिं कुर्वन्ति स्म तेषां वेतनाय प्रत्येकं गृहात् स्वल्पं स्वल्पम् अन्नं दीयते स्म । प्रत्येकं वर्षे कस्याश्चित् सभायाः आयोजनं भवति यत्र एकस्य ग्रामसमूहस्य ग्रामाणां प्रमुखाः भागं गृह्णन्ति स्म अपि च वनसहितेषु समस्तेषु मुख्यविषयेषु चर्चयन्ति ।

3.2 जनानां भीतिः

औपनिवेशिक-सर्वकारः (1905) पञ्चाधिकनवदशशत-तमे ख्रिस्ताब्दे यदा वनस्य 2/3 अंशः आरक्षितः, यायावरीयकृषिः प्रतिबन्धिता, आखेटस्य वन्योत्पादानां च सङ्ग्रहे अपि प्रतिबन्धः स्थापितः अपि च एतादृशाः प्रस्तावाः अपि उपस्थापिताः इति एतस्मात् कारणात् बस्तरस्य जनाः अतीव दुःखिताः जाताः ।

केषुचित् ग्रामेषु यानि आरक्षितानि वनानि आसन् तादृशानां वनानां प्रयोगः तत्रत्याः ग्रामीणाः कर्तुं शक्नुवन्ति स्म परन्तु तत्र काचित् प्रतिभूतिः अथवा अनुबन्धः वन्याधिकारिभिः कृतः आसीत् यत् तेषां ग्रामाणां ग्रामीणाः जनाः वनविभागाय वृक्षाणां कर्तनस्य कार्यम् अपि च वृक्षाणां वहनम् अपि पारिश्रमिकेण विना एव करिष्यन्ति तथा च तादृशाः जनाः अग्नेः अपि वनानां रक्षणं करिष्यन्ति इति । परवर्तिकाले एतादृशाः ग्रामाः एव वनग्रामाः इति रूपेण कथ्यन्ते स्म । अन्येषां ग्रामाणां जनाः सूचनां क्षतिपूर्तिराशिं विना च एव वनप्रदेशेभ्यः अपसारिताः । चिरकालात् ग्रामीणाः भूमेः अतिराजस्व-दानात् औपनिवेशिक-अधिकरिणाम् आदेशानुसारं निःशुल्क-परिश्रमात् अन्य-वस्तूनां च याचनात् त्रस्ताः आसन् । ततः परं भयानकं दुर्भिक्षं जातम्, प्रथमवारं (1899-1900) नवनवत्यधिकाष्टादशशततम-वर्षादारभ्य नवदशशततमवर्षं यावत् पुनश्च (1907-1908) सप्ताधिकनवदशशततम-वर्षात् अष्टाधिकनवदशशततमवर्षं यावत् आसीत् । अनेन वनारक्षणम् इत्यनेन अग्निस्फुल्लिङ्गस्य कार्यं कृतम् ।

जनाः विपणिषु उत्सवेषु अपि च यत्र कुत्रापि च अनेकेषां ग्रामाणां प्रमुखाः अर्चकाः च एकत्र भवन्ति स्म तत्र तत्र एव जनाः प्रमुखाः च एकत्र भूत्वा चर्चायाः आरम्भं कुर्वन्ति स्म । काङ्गेर इति वनानां धुरवा इति समुदायस्य जनाः एतस्मिन् अभियाने अग्रेसराः आसन् यतो हि आरक्षणं सर्वप्रथमम् अत्र एव क्रियान्वयितम् । यद्यपि कश्चित् एकः जनः एतस्य आन्दोलनस्य नेता न आसीत् परन्तु अनेके जनाः नेथानार इति ग्रामस्य गुण्डा-धूर इत्येतम् एतस्य आन्दोलनस्य प्रमुखं व्यक्तित्वरूपेण मन्यन्ते स्म । (1910) दशाधिक-नवदशशततमे ख्रिस्ताब्दे आम्रवृक्षस्य शाखाः, मृदायाः लोष्ठानि, मरिचिकाः, शराः च इत्येतानि वस्तूनि आदाय जनाः प्रतिग्रामं परिभ्रमितुम् आरब्धवन्तः । अयं ग्रामेषु आङ्ग्लीयान् विरुध्य विद्रोहस्य सन्देशः आसीत् । प्रत्येकं ग्रामस्य जनाः एतस्य विद्रोहस्य व्ययनिमित्तं किमपि साहाय्यम् अकुर्वन् । विपणयः लुण्ठिताः, अधिकारिणां वणिजां च गृहाणि लुण्ठितानि, विद्यालयाः आरक्षकालयाः च अपि लुण्ठिताः प्रज्वालिताः च । अन्नस्य पुनर्वितरणं कृतम् । यान् अभिलक्ष्य आक्रमणानि जातानि तेषु अधिकतराः जनाः औपनिवेशिक-राज्यस्य एतस्य च दमनकारिणाम् अधिनियमानां च कारणात् सम्बद्धाः आसन् । एतासां घटनानां प्रत्यक्षदर्शिना ख्रिस्तधर्मप्रचारकेण विलियम-वार्डेन लिखितम् - आरक्षकाणां वणिजां वनस्य मध्यस्थजनानां विद्यालयीयशिक्षकाणां प्रवासिनां च दलानि सर्वतः जगदलपुरं प्रति आयान्ति स्म ।

आङ्ग्लीयैः विद्रोहस्य नाशाय सैनिकाः प्रेषिताः । आदिवासि-नेतृभिः सह वार्तालापं कर्तुम् इष्टवन्तः परन्तु आङ्ग्ल-सैन्यदलेन तेषां शिबिरगृहाणि परितः आवृत्तानि अपि च तत्र गुलिका-प्रहारः अपि कृतः । तदनन्तरं विद्रोहे ये जनाः सम्मिलिताः आसन् ते दण्डिताः विद्रोहिजनाः च अपि दण्डिताः तेषां दण्डनाय च सैनिकाः प्रतिग्रामम् भ्रमितवन्तः । अधिकतराः ग्रामाः रिक्ताः जाताः यतो हि जनाः पलायनं कृत्वा वनानि प्रति गतवन्तः । आङ्ग्लीयाः पुनः मासत्रयेन

स्रोतः च इति

भोण्डिया-नामकेन जनेन चतुःशतं जनाः एकत्रीकृताः तान् आदाय अनेकेषाम् अजानां बलिदानं कृतं , तन्मध्ये प्रधान-अमात्यस्य बीजापुरतः आगमनस्य सम्भावना आसीत् , तस्य वारणाय भोण्डियाः अचलत् । जनसम्मर्दः फरवरीमासस्य दशदिनाङ्के आरक्षकचतुष्पीठं मारेगा-विद्यालयं च प्रज्वालितवान्, केसलुर इति स्थाने रेलमार्गाः पशु-अवरोधशाला प्रदग्धा, टोकापाल इत्यस्मिन् स्थाने विद्यालयः दग्धः । प्रधान-अमात्यं सुरक्षितम् आनेतुं प्रेषितः कश्चित् स्टेट-रिजर्व-पुलिस-बलस्य प्रमुख-सैनिकः तेन सह च चत्वारः अन्ये सैनिकाः अपि बन्धकाः कृताः । एकं दलं करञ्जी इति विद्यालयस्य दहनाय परित्यक्तः । भोण्डिया-माझी इत्यस्य मार्गदर्शने केनचित् दलेन कोयर इति नद्याः मार्गः अङ्गीकृतः यतो हि प्रधान-अमात्यः मुख्यं राजमार्गं परित्यज्य तेन मार्गेण आगन्तुं शक्नोति स्म । अन्ये जनाः बीजापुरात् यः मुख्य-राजमार्गः आयाति स्म तस्य पिधानाय दिलमिल्ली इति स्थानं प्रति अगच्छन् । बुद्धू-माझी हरचन्दनायिकः च मुख्यदलस्य नेतृत्वस्य दायित्वं स्वीकृतवन्तः ।

डेब्रेटः, पोलिटिकल-एजेन्ट, इति छत्तीसगढ-फ्यूडेटरी-स्टेट्स, इत्यस्य जूनमासस्य त्रयोविंशतिदिनाङ्के (1910) दशाधिकनवदशशततमे ख्रिस्ताब्दे च छत्तीसगढ-विभागस्य जनपद-आयुक्ताय लिखितपत्रम् ।

स्रोतः छ

बस्तरस्य निवासिनः वृद्धाः एतस्य युद्धस्य विषये स्वीयेभ्यः पितृभ्यः श्रुतवन्तः, ते प्रतिपादयन्ति –
कनकापालस्य पोदियामी-गङ्गां तस्य पिता पोदियामीतोकेली अबोधयत् यत् –
आङ्ग्लीयाः आगत्य भूमिं स्वीकर्तुम् आरब्धवन्तः । पार्श्वेषु क्षेत्रेषु किं भवति इति विषये नृपः निश्चिन्तः आसीत् , अतः भूमिं ते आङ्ग्लीयाः स्वीकुर्वन्ति स्म, इदं सर्वं दृष्ट्वा तस्य समर्थकाः जनान् एकत्र कृतवन्तः । युद्धस्य आरम्भः जातः । तस्य दृढाः समर्थकाः मारिताः अपि च कशाभिः ते ताडिताः । मम पिता पोदियामी तोकेली अपि कशाभिः ताडितः । परन्तु सः पलायने साफल्यम् अवाप्तवान् अपि च रक्षितः । इदम् आन्दोलनम् आङ्ग्लीयेभ्यः मुक्तये आसीत् । आङ्ग्लीयाः तान् अश्वैः सह बद्ध्वा तान् निपात्य च तान् बलात् आहरन्ति स्म । प्रत्येकं ग्रामात् द्वित्राः जनाः जगदलपुरं गतवन्तः - चिदपालस्य गार्गी देवा अपि च मिखोला, माकी-मिरास इत्यस्य दोलः अबराबुन्दी च, बालेरासस्य वादापान्दुः इति, पालेम इत्यस्य उङ्गा अपि च अपरे बहवः जनाः ।
अनेन एव प्रकारेण नन्दरासायाः कश्चित् वृद्धः चेन्द्रू अवदत् –
जनानां पक्षे पुरनिया इति जनाः आसन् – पालेमस्य मिल्ले मुदालः, नन्दरासायाः सोयेकाल-धुर्वा अपि च पण्डवा-माझी इति । प्रत्येकं ग्रामात् अलनार-तराई इति जनाः एकत्रिताः । क्षणाभ्यन्तरे एव दलेन सर्वे आवृत्ताः । गुण्डा-धूर इति उड्डयनं कर्तुं शक्नुवन्ति स्म अतः उड्डयनं कृतवन्तः । परन्तु धनुर्धारिणः अधुना किं कुर्युः ? रात्रौ युद्धस्य आरम्भः जातः । जनाः गुल्मेषु नीलीय उरगः इव पलायितवन्तः । सैन्यदलम् अपि पलायितम् । ये जनाः सुरक्षिताः ते कथञ्चित् निजग्रामं प्राप्तवन्तः ।

नियन्त्रणं प्राप्तुं शक्तवन्तः । पुनरपि ते गुण्डा-धूरं न कदापि गृहीतुं शक्तवन्तः । विद्रोहिणां प्रकृष्टतमः जयः अयम् आसीत् यत् आरक्षणकार्यं स्वल्पकालाय स्थगितम् अपि च आरक्षितक्षेत्रम् अपि (1910) दशाधिकनवदशशततम-ख्रिस्ताब्दात् पूर्वं या योजना आसीत् तस्याः अपि अर्धं कृतम् ।

बस्तरस्य वनानां जनानां च कथा अत्र एव समाप्ता न भवति । स्वतन्त्रतायाः अनन्तरम् अपि जनाः वनेभ्यः बाह्यभागे भवेयुः अपि च वनानि औद्योगिकोपयोगाय आरक्षितानि भवेयुः इति नीतिः पूर्ववत् एव स्थापिता । (1970) सप्तत्यधिकनवदशशत-तमे दशके विश्ववित्तकोशेन प्रस्तावः उपस्थापितः यत् कर्गदोद्योगाय सजल-पिष्ट-पदार्थस्य आवश्यकता अस्ति अतः तदर्थं (4600) षट्-चत्वारिंशत्-शतं हेक्टेयर-परिमितस्य प्राकृतिक-शालवनानां स्थाने देवदारुवृक्षाणां रोपणं भवेत् । परन्तु, स्थानीय-पर्यावरणविदां विरोधकारणात् परिणामतः एषा परियोजना रोधिता ।

आयान्तु, अधुना एशियायाः कञ्चित् भागम् इण्डोनेशियां प्रति गच्छामः । किञ्चित् पश्यामः –यत् वर्तमानकाले तत्र किं भवति स्म ।

इति तृतीयः पाठः ।।

4 जावा-वनेषु जातानि परिवर्तनानि

जावा इति अद्यत्वे इण्डोनेशियायाः तण्डुलस्य उत्पादक-द्वीप-रूपेण ख्यायते । परन्तु कदाचित् इदं क्षेत्रम् अधिकांशतः वनाच्छादितम् आसीत् । इण्डोनेशिया-देशः कस्यचित् डच् इत्यस्य उपनिवेशः आसीत् अपि च यथा वयं द्रक्ष्यामः, भारतस्य इण्डोनेशियादेशस्य च वनाधिनियमेषु अनेकाः समानताः आसन् । इण्डोनेशियादेशे जावाद्वीपम् एवतत् क्षेत्रम् आसीत् यत्र डचजनाः वन-प्रबन्धनस्य आरम्भं कृतवन्तः आसन् । आङ्ग्लीयानाम् इव ते अपि जलपोतानां निर्माणाय जावाद्वीपतः काष्ठानि प्राप्तुम् इच्छन्ति स्म । (1600) षट्शत-तमे ख्रिस्ताब्दे जावाद्वीपस्य अनुमानिता जनसङ्ख्या चतुस्त्रिंशत् लक्षम् आसीत् । यद्यपि उर्वराक्षेत्रेषु अनेके ग्रामाः आसन् परन्तु पर्वतीय-क्षेत्रेषु अपि यायावरीय-कृषकाणाम् अनेके समुदायाः निवसन्ति स्म ।

4.1 जावाद्वीपस्य वनच्छेत्तारः

जावाद्वीपे कलाङ्ग-समुदायस्य जनाः कुशलाः वनच्छेत्तारः यायावर-कृषकाः च आसन् । तेषां कीदृशं वैशिष्ट्यम् आसीत् इति अनुमानम् एतस्मात् कर्तुं शक्यते यत् (1755) पञ्चपञ्चाशत-तमे वर्षे यदा जावाद्वीपस्य माताराम इति राज्यं विभक्तं तदा अत्रत्याः (6,000) षट्-सहस्रं सङ्ख्याकाः कलाङ्गकटुम्बाः अपि द्वयोः राज्ययोः समानरूपेण विभक्ताः । तादृशानां जनानां कौशलेन विना सागौन इत्यस्य कर्तनं कृत्वा नृपाणां प्रसादनिर्माणम् अतीव कठिनम् आसीत् । यदा डचवासिनः अष्टादश-शताब्दे वनानां नियन्त्रणम् आरब्धवन्तः तदा ते अपि प्रयासं कृतवन्तः यत् कलाङ्गजनाः तेषां कृते कार्यं कुर्युः इति । (1770) सप्तत्यधिकसप्तदशशत-तमे ख्रिस्ताब्दे कलाङ्ग-जनाः एकस्मिन् दुर्गे आक्रमणं कृत्वा एतस्य प्रतिरोधं कृतवन्तः परन्तु एषः विद्रोहः सर्वथा अभिभूतः ।

4.2 डच-जनानां वैज्ञानिक-वानिकी

एकोनविंशे शताब्दे यदा जनैः सह क्षेत्राणां नियन्त्रणम् अपि आवश्यकम् इति अनुभूतं तदा डच-उपनिवेशकाः जावाद्वीपे वन-अधिनियमानां क्रियान्वयनं कृत्वा ग्रामीणाः वनानि प्रति न आगच्छेयुः एतदर्थं प्रतिबन्धः बलात् तेषु स्थापितः । तदनन्तरं नौकानां गृहनिर्माण-प्रभृतीनां विशिष्टानाम् उद्देश्यानां पूर्तये केवलं चितेभ्यः वनेभ्यः एव काष्ठानां कर्तनं कर्तुं शक्यते स्म । तथा च तदपि अतिगहने निरीक्षणे इति । अधुना ग्रामीणाः अनुमतिपत्रं विना पशुचारणं, काष्ठाहरणं वहनं वन्य-राजमार्गेण अश्वशकटेन पशून् आरुह्य च न गन्तुं शक्नुवन्ति स्म ,यदि कश्चित् एतादृशानां नियमानाम् अनुपालनं न करोति स्म तर्हि सः दण्ड्यते स्म ।

भारतस्य इव मलेशियादेशे अपि जलपोतानां रेलमार्गाणां च निर्माणस्य वन-प्रबन्धनस्य च वनसेवानां क्रियान्वयनम् आवश्यकम् इति तत्र अपि अनुभूतम् । (1882) द्व्यशीत्यधिकाष्टादशशत-तमे ख्रिस्ताब्दे केवलं जावाद्वीपाद् एव (2,80,000) अशीत्यसहस्राधिकद्विलक्षं सङ्ख्याकानां स्थूलाकार-काष्ठानां निर्यातः कृतः । स्पष्टम् अस्ति यत् वृक्षकर्तनाय

चित्रम् – 21 – वनात् सागौन इत्यस्य काष्ठानि नयत् किञ्चित् सामग्रीवाहनम्, औपनिवेशिक-शासनस्य अन्तिमकालः ।

स्थूलकाष्ठानां च वहनाय स्थूलाकार-काष्ठानां च सज्जीकरणाय श्रमस्य आवश्यकता आसीत् । डच-जनैः आदौ तु वनस्थ-भूमेः राजस्व-व्यवस्था स्थापिता तथा च परवर्तिकाले केचन ग्रामाः अस्याः प्रतिभूतेः आधारेण मुक्ताः यत् ते सामूहिकरूपेण वृक्षकर्तनाय काष्ठानां, वहनाय च महिषाणां व्यवस्थां निश्शुल्कं करिष्यन्ति इति । एषा व्यवस्था ब्लैन्डांगडिएन्स्टेन इति नाम्ना अवगता । परवर्तिकाले ग्रामवासिनः यं श्रमं कुर्वन्ति स्म तदर्थं तेभ्यः स्वल्पः पारिश्रमिकः दीयते स्म परन्तु राजस्वं तेषां क्षन्तव्यं न भवति स्म । परन्तु अधुना अपि वनभूमौ कृष्यर्थं तेषाम् अधिकाराः मर्यादिताः कृताः ।

4.3 सामिनस्य आह्वानम्

प्रायः (1890) नवत्यधिकाष्टादशशत-तमे ख्रिस्ताब्दे सागौनस्य वनेषु स्थिताः रान्दुब्लातुङ्ग-ग्रामस्य निवासिनः सुरोन्तिको-सामि इति जनाः वनेषु यत् राजकीयं स्वामित्वम् आसीत् तद्विरुध्य ते प्रश्नान् कृतवन्तः । तेषां तर्कः आसीत् यत् यद्यपि वायोः जलस्य भूमेः काष्ठस्य च निर्माणं राज्येन न कृतम् अस्ति अतः तेषाम् अधिकारः न तत्र भवितुं शक्नोति । शीघ्रमेव किञ्चित् व्यापकम् आन्दोलनं प्रादुर्भूतम् । एतम् आन्दोलनं सङ्घटयितुं सामिन इत्यस्य जामाता अपि सक्रियः आसीत् । (1907) सप्ताधिकनवदशशततम-ख्रिस्ताब्दं यावत् त्रिसहस्रं कुटुम्बाः तस्य विचाराणां समर्थनं कर्तुम् आरब्धवन्तः आसन् । डच-जनाः यदा भूमेः सर्वेक्षणं कर्तुम् आगतवन्तः तदा कैश्चित् सामिन-वादिभिः जनैः स्वभूमौ शयित्वा एतस्य विरोधः कृतः अपरञ्च अन्ये जनाः राजस्वस्य दण्डशुल्कस्य च अर्पणस्य निषेधं कृतवन्तः ।

स्रोतः ज इति

यूनाइटेड-ईस्ट-इण्डिया-समवायस्य डर्कवान-होजेनड्राप-नामकः कश्चित् अधिकारी उपनिवेश-कालिकस्य जावाद्वीपस्य विषये कथितवान्, – बटाविया-जनाः ! मम ज्ञापनं ससम्भ्रमं साश्चर्यं च शृण्वन्तु, । अस्माकं जलपोताः नष्टाः जाताः, अस्माकं वाणिज्यं म्लानम् अस्ति, अस्माकं नौकायनं नाशं प्रति गच्छति – उत्तरीयेभ्यः शक्तिसम्पन्नदेशेभ्यः वयम् अपरिगणितां सम्पत्तिं दत्त्वा जलपोतानां निर्माणाय काष्ठानि अन्यां सामग्रीं च क्रीणीमः अपि च जावाद्वीपे वयं सामरिकदृष्ट्या वाणिज्यिकदृष्ट्या च सङ्घटितदलानि येषाम् अस्तित्वं धूलिधूसरितं च अस्ति तादृशानि स्वीयानि दलानि वयं परित्यजामः । सत्यमस्ति यत् जावाद्वीपस्य वनेषु कस्याश्चित् सम्माननीयायाः नौसेनायाः निर्माणाय पर्याप्तकाष्ठानि सन्ति, तैः च अल्पे एव काले सेनायाः निर्माणं च शक्यते इति एतेन सहैव यावतां जलपोतानाम् आवश्यकता स्यात् तावताम् एव जलपोतानां निर्माणाय अपि पर्याप्तं संसाधनम् अस्ति । जावाद्वीपस्य वनानि अपि तावत्या तीव्रतया एव जायन्ते यावत्या तीव्रतया ते कर्त्यन्ते । उचितप्रबन्धनेन सुपालनेन पोषणेन निरीक्षणेन च एतादृशानि स्रोतांसि न कदापि समाप्तिं गमिष्यन्ति ।

डर्क-वान-होजेनडार्पः इति, पेलूसो, रिच-फारेस्ट्स, पुअर-पीपुल इति, 1992 तमे ख्रिस्ताब्दे प्रकाशितम् ।

चित्रम् - 22 – इण्डोनेशियायाः अधिकतराणि वनानि सुमात्रा कालिमांतान इत्यत्र पश्चिम इरियान इत्यत्र च स्थितानि सन्ति यत्र डच-जनाः स्वीयायाः वैज्ञानिकवानिक्याः आरम्भम् अकुर्वन् । इदं द्वीपं, यत् अधुना तण्डुल-उत्पादनाय प्रसिद्धम् अस्ति, कदाचित् एतत् द्वीपं वनैः आच्छादितम् आसीत् ।

4.4 युद्धं वनविनाशः च

प्रथमे द्वितीये च विश्वयुद्धे वनानि अतिप्रभावितानि । भारतवर्षे वनविभागेन समग्राः तात्कालिक्यः कार्यपरियोजनाः स्थगिताः अपि च आङ्ग्लीयानां युद्धविषयक-आवश्यकताः पूरयितुम् अगणितवृक्षाः छिन्नाः । जापान-जनाः यावत् जावाद्वीपस्य अधिग्रहणम् अकरिष्यन् तस्मात् पूर्वम् एव डचजनाः "भस्म कृत्वा पलायनं कुर्वन्तु" इति नीतिः अधिकृता अतः ते कर्तन-यन्त्राणि सागौनस्य च विशालानां स्थूलाकाराणां च काष्ठानां राशीन् प्रज्वालितवन्तः यतः तानि कर्तन-यन्त्राणि स्थूलकाष्ठानि च जापानीजनानाम् हस्तगतानि न भवेयुः इति । तदनन्तरं जापानीजनाः वनानां छेदनाय वनवासि-जनान् बाध्यान् कृत्वा स्वीयाय युद्ध-उद्योगाय निर्दयतया वनानि छिन्नवन्तः । अनेके ग्रामीणाः अवसरस्य अस्य लाभं स्वीकुर्मः इति धिया वन्यक्षेत्रेषु निज-कृषिकार्यस्य विस्तारं कृतवन्तः । युद्धात् परं इण्डोनेशियायाः वनसेवायै एतस्याः भूमेः पुनः कठिनम् आसीत् । भारतीयजनानाम् इव इण्डोनेशिया-जनानां कृषियोग्या-भूमेः आकाङ्क्षा आसीत् परन्तु वनविभागस्य भूमेः अधिग्रहणस्य नियन्त्रणस्य अपि च जनानां वन्यसम्पत्तौ कोपि अधिकारः न स्यात् इति इच्छा आसीत् अतः वनविभागस्य जनानां च मध्ये परस्परम् अनेकधा सङ्घर्षस्य स्थितिः उत्पन्नाः ।

चित्रम् – 23 – इण्डियन-म्यूनिशन्स-बोर्ड इति, सूले-पैगोडा इत्यस्मिन् एकत्रितानां जलपोतानाम् आरोहणाय स्थापनाय वा सिद्धानि वार-टिम्बर-स्थूलकाष्ठानि इति, 1917तमः ख्रिस्ताब्दः ।

प्रथमे द्वितीये च विश्वयुद्धे मित्रराष्ट्राणि प्रायः तावन्ति सफलानि न अभविष्यन् यदि तानि स्वीयानाम् उपनिवेशानां सम्पदां जनानां च एतादृशं दोहनं कर्तुं सक्षमाः न अभविष्यन्। द्वयोः एव विश्वयुद्धयोः प्रभावः भारतवर्षे इण्डोनेशियायाम् अन्यस्थानानां च वनेषु विनाशकारी आसीत् । कार्ययोजनानां स्थगनं कृतम् अपि च वनविभागेन युद्धस्य आवश्यकताः पूरयितुम् अत्यधिकाः वृक्षाः कर्तिताः ।

4.5 वानिकी-व्यवस्थायां नूतनानि परिवर्तनानि

अशीतितमे दशके एशियायाः अफ्रीकायाः च सर्वकारौ अनुभूतवन्तौ यत् यदा वैज्ञानिकवानिकीं वनसमुदायं च वनेभ्यः बहिर्भागं कर्तुं याः नीतयः सुनिश्चिताः सन्ति तासां कारणात् वनाश्रितस्य जनसमुदायस्य वनविभागस्य च मध्ये सङ्घर्षस्य स्थितिः पौनःपुन्येन जायते । परिणामतः वनेभ्यः भवनीयकाष्ठस्य ग्रहणम् अकृत्वा वनानां संरक्षणम् अतिमहत्त्वभूतं लक्ष्यं जातम् । सर्वकारेण इदम् अपि सुनिश्चितं यत् ये जनाः वनप्रदेशेषु निवसन्ति तादृशाः जनाः वनविभागीय-कार्येषु सहयोगं कुर्युः इति । मिजोरम-प्रान्ततः केरलप्रान्तं यावत् भारतवर्षे यानि सघन-वनानि अधुना दृश्यन्ते अथवा तानि यदि अवशिष्टानि सन्ति तर्हि तत्र कारणम् एतत् अस्ति यत् तत्रत्याः ग्रामीणाः सरना,देवराकुडु, कान, राई इत्यादिभिः पवित्रैः नामभिः वनं पवित्रोद्यानम् अस्ति इति अवगत्य तस्य रक्षणं कृतम् । नैकानि ग्रामवनानि वनरक्षकाणाम् आश्रितानि न आसन् अपितु तत्रत्याः वनप्रदेशीयाः जनाः वनानां संरक्षणं स्वयं कुर्वन्ति स्म -- अत्र प्रत्येकं कुटुम्बः पर्यायेण स्वीयं योगदानं करोति । स्थानीयः वनसमुदायः पर्यावरणविदः च अधुना वनप्रबन्धनस्य वैकल्पिकोपायानां विषये चिन्तयितुम् आरब्धवन्तः ।

चित्रम् 24 – डच-औपनिवेशिक-शासनस्य अधीने रेमबैंग इत्यस्मिन् स्थूलकाष्ठानां भाण्डागारम् ।

क्रियाविधिः

1.यत्र भवन्तः निवसन्ति तत्रत्येषु वन्यक्षेत्रेषु अनेकानि परिवर्तनानि जातानि सन्ति ? एतानि परिवर्तनानि कानि सन्ति अपि च किमर्थं जातानि सन्ति ?
2.कस्यचित् औपनिवेशिक-वनपालस्य आदिवासिनः च मध्ये वने आखेटस्य सन्दर्भे जायमानं संवादं लिखन्तु।

प्रश्नाः

1. औपनिवेशिक-कालस्य वनप्रबन्धने जातैः परिवर्तनैः एते समूहाः कथं प्रभाविताः –
   - झूम-कृषकाः
   - यायावराः पशुचारकसमुदायाः च
   - काष्ठानां वन्योत्पादानां च वाणिज्यकर्तारः समुदायाः
   - उद्यानस्वामिनः
   - आखेट-शीलाः राजानः आङ्ग्लाधिकारिणः च
2. बस्तरस्य जावाद्वीपस्य च औपनिवेशिकस्य वनप्रबन्धनस्य मध्ये काः समानताः सन्ति ?
3. 1880तमख्रिस्ताब्दात् 1920तमख्रिस्ताब्दं यावत् भारतीय-उपमहाद्वीपस्य वनाच्छादितक्षेत्रे सप्तनवत्याः हेक्टेयरपरिमितस्य पतनम् अभवत् । प्रथमस्य 10.86 कोटि-हेक्टेयरपरिमितात् विकलय्य इदं क्षेत्रं 9.89कोटिहेक्टेयरपरिमितं शिष्टम् आसीत्। एतस्य पतनस्य निम्नलिखितानां कारकाणां योगदानं किम् आसीत् इति तं ज्ञापयन्तु –
   - रेलपथविस्तारस्य
   - जलपोतनिर्माणास्य
   - कृषेः विस्तारस्य
   - व्यावसायिक-कृषेः
   - चायस्य कफघ्न्याः च उद्यानानाम्
   - आदिवासिनां कृषकाणां च
4. युद्धैः वनानि कथं प्रभावितानि भवन्ति ?

॥ इति चतुर्थः पाठः ॥

आधुनिके विश्वे पशुचारकाः

चित्रम् – 1 – पूर्व-गढवालस्य बुग्याले चरन्त्यः मेषाः ,
बुग्याल इति नामधेयानि पशुचारणक्षेत्राणि तुङ्गेषु पर्वतेषु (12,000) द्वादशसहस्रं फुटपरिमितात् अपि तुङ्गतरेषु क्षेत्रेषु स्थितानि भवन्ति । शैत्यकाले एतादृशानि स्थानानि हिमाच्छादितानि भवन्ति, अप्रैल्-मासात् परं च हरितानि जायन्ते । अस्मिन् काले उपत्यकानां तलस्पर्शिस्थानानि विविध-घासयुक्तानि मूलपूर्णानि औषधिभिः वनस्पतिभिः च पूर्णानि भवन्ति । प्रावृषं यावत् एतेषु पशुचारणेषु सघनहरितिमा आच्छादिता भवति,तथा च तानि पशुचारणानि परितः पुष्पाणि फलानि चापि दृग्गोचराणि भवितुम् आरभन्ते ।

अस्मिन् अध्याये भवन्तः यायावर-पशुचारकाणां विषये पठिष्यन्ति । यायावराः तादृशाः जनाः भवन्ति ये एकस्मिन् स्थाने न तिष्ठन्ति अपितु आजीविकायाः अन्वेषणाय इतस्ततः भ्रमन्ति । देशस्य अनेकेषु भागेषु वयं यायावर-पशुचारकान् तेषां पशुभिः सह इतस्ततः परिभ्रमतः द्रष्टुं शक्नुमः । पशुचारकाणां कस्यचित् कुटुम्बस्य पार्श्वे अवीनाम् अजानां मेषाणां च यूथाः भवन्ति अपि च कस्यचित् कुटुम्बस्य पार्श्वे उष्ट्राः अन्ये च पशवः भवन्ति । किम् एतादृशान् जनान् दृष्ट्वा कदाचित् भवन्तः विचारितवन्तः यत् ते जनाः कुतः आगतवन्तः अपि च कुत्र गच्छन्ति इति ? किं भवन्तः जानान्ति यत् ते कथं निवसन्ति ? तेषाम् आजीविकायाः साधनानि कानि सन्ति, तेषां च अतीतकालः कीदृशः आसीत् ?

पशुचारकाः इतिहासस्य पुस्तकेषु विरलतया एव स्थानं प्राप्नुवन्ति । यदापि भवन्तः अर्थव्यवस्थायाः विषये पठन्ति, कामं सा इतिहासस्य कक्षा स्यात् अथवा अर्थशास्त्रस्य कक्षा स्यात् तत्र केवलं कृषेः उद्योगानां शिल्पशालानां च विषये एव आधिक्येन पठन्ति । कदाचित् एतादृशेषु पुस्तकेषु शिल्पकाराणां विषये अपि पठितुं लभ्यते । परन्तु पशुचारकाणां विषये पठितुं लेखितुं च अधिकं न लभ्यते । एवं प्रतीयते यत् तेषां जीवनस्य किमपि महत्त्वम् एव न स्यात् इति । प्रायः एवं मन्यते यत् ते एतादृशाः जनाः सन्ति येषां कृते अद्य आधुनिकविश्वे किमपि स्थानम् एव नास्ति, एवम् अनुमीयते यत् ते अधुना अतीत-कालिकाः स्युः इति ।

अस्मिन् अध्याये भवन्तः द्रक्ष्यन्ति यत् भारते अफ्रीकासदृशे च समाजे पशुचारणस्य कियत् महत्त्वम् अस्ति । अत्र भवन्तः अवगमिष्यन्ति यत् उपनिवेश-वादेन तेषां जीवने कियान् गभीरः प्रभावः निपातितः अस्ति अपि च एतादृशैः समुदायैः आधुनिक-समाजस्य प्रभावानां सम्मुखीकरणं कथं कृतम् अस्ति ? । एतस्मिन् भागे वयम् आदौ भारतस्य तदनन्तरं च अफ्रीकायाः पशुचारकाणां जीवनस्य अध्ययनं करिष्यामः ।

1 यायावर-पशुचारकाः तेषाम् गमनागमनं च

1.1 पर्वतेषु

जम्मू-कश्मीर-प्रान्तयोः गुर्ज्जर-बकरवाल-समुदायस्य जनाः अजानाम् अवीनां च समूहान् पालयन्ति । एतस्य समुदायस्य अधिकतराः जनाः स्वपशूनां कृते पशुचारण-भूक्षेत्राणाम् अन्वेषणं कुर्वन्ति , अन्वेषणं कुर्वाणाः एव ते एकोनविंशतितमे ख्रिस्ताब्दे अत्र आगतवन्तः । यथा यथा कालः क्रमशः अतीतः ते अत्र एव स्थायिरूपेण स्थितवन्तः, उषितवन्तः च । तदनन्तरं ते ग्रीष्कालस्य शरत्कालस्य च अनुगुणं पृथक् पृथक् पशुचारणस्थलानि प्रति गन्तुम् आरब्धवन्तः । शैत्यकाले यदा तुङ्गाः पर्वतोपत्यकाः हिमाच्छादिताः भवन्ति स्म तदा तादृशाः यायावराः पशुचारकाः शिवालिकस्य अधस्तनाः उपत्यकाः आगत्य तत्र एव वसन्ति स्म । शैत्यकाले अधस्तनक्षेत्रेषु ये शुष्कगुल्माः भवन्ति स्म ते एव तेषां पशूनाम् आहार-रूपेण भवन्ति स्म । ते अप्रैल्-मासस्य उत्तरार्द्धं यावत् उत्तर-दिशां प्रति गन्तुम् आरभन्ते स्म अपि च ग्रीष्म-कालिकानि गोचारणानि प्रति गच्छन्ति स्म । एतस्मिन् जीवनक्रमे अनेके कुटुम्बाः समूहं निर्माय सहैव चलन्ति स्म । ते पीर-पञ्जालस्य सङ्कटान्वितैः मार्गैः काश्मीरस्य उपत्यकां प्राप्नुवन्ति स्म । यदा ग्रीष्मर्तोः आरम्भः भवति स्म तदा सघनीभूतस्य हिमस्य स्थूलपट्टिकाः द्रवीभावं प्रति गच्छति स्म अपि च सर्वत्र हरीतिमायाः प्रसारः भवति स्म । तेषु दिनेषु अत्र अनेक-प्रकारकः घासः जायते स्म तेन पशूनाम् उदरपूर्तिः अपि समीचीनतया भवति स्म अपि च ते स्वास्थ्य-लाभकरम् आहारम् अपि प्राप्नुवन्ति स्म । सितम्बर-मासस्य अन्ते बकरवालसमुदायस्य जनाः पुनः एकदा स्ववस्तूनि आहृय अन्यत्र गन्तुं सज्जाः भवन्ति स्म । एतस्मिन् क्रमे ते पुनः स्वशीतकालिकानि क्षेत्राणि प्रति अर्थात् अधस्तनभागं प्रति गच्छन्ति स्म । यदा पर्वतशिखरेषु हिमपातः भवति स्म सः च सघनावस्थां प्रति गच्छति स्म तदा ते अधस्तनानाम् उपत्यकानां शरणं गच्छन्ति स्म ।

पार्श्वस्थेषु पर्वतेषु एव पशुचारकाणां कश्चित् भिन्नः समुदायः निवसति स्म । हिमाचलप्रदेशस्य असौ समुदायः गद्दी इति पदेन कथ्यते । एते जनाः अपि ऋतोः अनुसारं स्वस्थानानि परिवर्तयन्ति स्म । ते अपि शिवालिकासु पर्वतोपत्यकासु स्वपशून् निबिडस्तम्बेषु गुल्मेषु च चारयन्तः शैत्यकालं यापयन्ति स्म । अप्रैल-मासे आगते सति ते उत्तरं प्रति चलन्ति स्म अपि च सम्पूर्णग्रीष्मकालं ते लाहौल

चित्रम् – 2 – मध्य-गढवालस्य उत्तुङ्ग-पर्वतेषु कश्चित् गुज्जर-मण्डपम् ।

गुर्जराः मेषपालकाः च बुग्याल इत्यस्मिन् प्राप्यमाणेन (रिंगल) पर्वतीयवंशेन अपि च घासनिर्मितेषु मण्डपेषु निवसन्ति । एतेषां मण्डपानां प्रयोगः कार्यस्थलस्य रूपेण अपि भवति स्म । अत्र गुर्जराः घृतं निर्मान्ति स्म अपि च तस्य विक्रयणं कुर्वन्ति स्म । सद्यः विगतवर्षेभ्यः ते बसयानैः ट्रकयानैः अपि दुग्धं नयन्ति । एतादृशानि मण्डपानि (10,000) दशसहस्र-फुटपरिमित-उच्चस्थानाद् आरभ्य (11,000) एकादशसहस्रं फुटपरिमितेषु उच्चकेषु स्थानेषु भवन्ति । महिष्यः ततोऽधिकम् उच्चकं स्थानं न गन्तुं शक्नुवन्ति ।

स्रोतः क इति

(1850) पञ्चाशदधिकाष्टादशशत-तमे दशके जी.सी. बार्न्सः कांगडा-महोदयः गुज्जरजनानां वर्णनम् अनेन प्रकारेण अकरोत् –

पर्वतोपत्याकानां निवासिनः गुज्जरसमुदायस्य जनाः विशुद्ध-पशुचारक-समुदायस्य जनाः सन्ति । ते प्रायः नाममात्रं कृषिकार्यं कुर्वन्ति । गद्दीजनानां पार्श्वे अजाः मेषाः च भवन्ति गुज्जराणां च पार्श्वे गावः महिष्यः च भवन्ति अर्थात् ते तासां पालनं कुर्वन्ति । एतादृशाः जनाः वनसमीपस्थेषु क्षेत्रेषु निवसन्ति अपि च दुग्ध-घृतादिकस्य पशूभ्यः लब्धानाम् उत्पादानां विक्रयणं कृत्वा स्व-उदरपूर्तिं कुर्वन्ति । गृह्यपुरुषाः पशून् चारयितुं नयन्ति अनेकधा च सप्ताहं यावत् अपि गृहं प्रति न आयान्ति । एतस्मिन् काले ते वनेषु स्वपशुसङ्घेन सहैव तिष्ठन्ति । महिलाः प्रतिदिनं स्वशिरसि कण्डोलान् स्कन्धे च दुग्धघटान् निधाय विपणिं गच्छन्ति । तासां महिलानां दीर्घघटेषु दुग्धं नवनीतं घृतादिकं च भवति । ताः तावन्ति एव वस्तूनि विक्रेतुं विपणिं प्रति नयन्ति येषां विक्रयणेन तासां दैनन्दिनजीवनस्य निर्वहणं भवितुं शक्नुयात् । ग्रीष्मकाले गुर्जरजनाः स्वपशु-समूहान् आदाय प्रायः उपरि भागे स्थितानि क्षेत्राणि प्रति गच्छन्ति तत्र तेषां महिष्यः केवलं प्रावृषः हरितघासं एव न प्राप्नुवन्ति अपितु अनुष्णशीतकालिकस्य च ऋतोः अनुसारम् अपि ते पशवः आत्मानम् अनुकूलयन्ति तत्र च ताः महिष्यः विषाक्तमक्षिकाभिः अपि मुक्ताः भवन्ति यतो हि मक्षिकाः समतलक्षेत्रेषु आधिक्येन भवन्ति ताः च मक्षिकाः महिषीः बाहुल्येन दंशन्ति ।

जी.सी.बार्न्सः, सेटलमेण्ट-रिपोर्ट-आफ-काङ्गडा, इति, 1850-55 इति ।

चित्रम् – 3 – उर्णायाः कर्तनस्य प्रतीक्षा । हिमाचलप्रदेशस्थितस्य पालमपुरस्य पार्श्वे वर्तते उह्ल इति उपत्यका ।

इत्यत्र स्पीति इति स्थाने च एव यापयन्ति स्म । यदा हिमस्य द्रवीकरणं भवति स्म अपि च उत्तुङ्गाः सङ्कटमार्गाः उद्घटिताः भवन्ति स्म तदा तत्र अनेकेषु पर्वतेषु स्थितघासस्य समतल-क्षेत्राणि प्रति प्राप्नुवन्ति स्म । सितम्बरमासं यावत् ते पुनः प्रति गन्तुम् आरभन्ते स्म । प्रत्यावर्तनकाले ते लाहौलस्य स्पीतेः च ग्रामेषु एकदा पुनः स्वल्पकालाय तिष्ठन्ति स्म । एतस्मिन् अन्तरे ते ग्रीष्म-कालिकानां सस्यानां कर्तनम् अपि च शारदीय-सस्यानां च वपनं कृत्वा अग्रेसराः भवन्ति स्म । इतः ते स्व-पशुसङ्घं स्वीकृत्य शिवालिकाः उपत्यकाः शारदीय-चारणक्षेत्राणि च गच्छन्ति स्म अपि च अग्रिमे अप्रैल-मासे अजान् मेषान् च स्वीकृत्य पुनः ग्रीष्मकालिकानि पशुचारण-स्थलानि प्रति प्रस्थानं कुर्वन्ति स्म ।

आयान्तु, अधुना किञ्चित् पूर्वं प्रति चलेम । गढवालस्य कुमांऊ इत्यस्य च गुर्जर-पशुचारकाः शरत्काले **भाबर** इत्यस्य शुष्कवनानि प्रति अपि च ग्रीष्मकाले उपरितनघासस्य क्षेत्राणि **बुग्याल** इत्येतं प्रति गच्छन्ति स्म । एतेषु बहवः हरितानां पशुचारणानाम् अन्वेषणाय एकोनविंशतितमे शताब्दे जम्मूतः उत्तरप्रदेशस्य उपत्यकाः प्रति आगतवन्तः अपि च कालानन्तरम् अत्र एव उषितवन्तः ।

शैत्यकालस्य ग्रीष्मकालस्य च अनुरूपं प्रत्येकं चारणस्थलं परिवर्तितं भवति स्म इति, एतादृशस्य परिवर्तनस्य प्रचलनं हिमालयीये पर्वतीयभागे ये पशुचारक-समुदायाः निवसन्ति तेषु दृश्यते स्म । अत्रत्याः भोटिया, शेरपा, किन्नौरी च इति समुदायानां जनाः अपि एतादृशाः एव पशुचारकाः आसन् । एते सर्वे समुदायाः ऋतूनां परिवर्तनानाम् अनुसारम् आत्मानम् अनुकूलयन्ति स्म अपि च पृथक् पृथक् क्षेत्रेषु यानि पशुचारणस्थलानि भवन्ति स्म तेषां समीचीनप्रयोगं कुर्वन्ति स्म । यदा एकस्य पशुचारणस्य हरितिमा समाप्ता भवति स्म अथवा प्रयोगानुगुणं न न शिष्टा भवति स्म तदा ते कञ्चित् अन्यत् पशुचारणस्थलं प्रति गच्छन्ति स्म । अनेन गमनागमनेन पशुचारणस्थलानि अत्यधिकप्रयोगाद् अपि रक्षितानि भवन्ति स्म अपि च तेषु पुनः हरीतिमायाः नूतनजीवनस्य च समावेशः भवति स्म ।

नूतनाः शब्दाः

भाबर इति ... गढवालस्य कुमाऊँ इत्यस्य च क्षेत्रे उपत्यकानाम् अधोभागस्य पार्श्वे प्राप्यमाणं शुष्कं क्षेत्रम् अथवा शुष्कवन्य-क्षेत्रम् ।
बुग्याल इति ... उत्तुङ्गपर्वतीयभागे स्थितानि घासक्षेत्राणि ।

चित्रम् – 4 – गद्दीजनाः मेषेभ्यः ऊर्णं निष्कासयन्ति ।
सितम्बर्-मासंयावत् गद्दीजनाः उपरितनक्षेत्रेभ्यः अधोभागान्प्रति आगन्तुम्आरभन्ते। मार्गे किञ्चित् कालं यावत् स्थित्वा ते निजानां मेषाणाम् ऊर्णम् अवतारयन्ति । ऊर्णस्य कर्तनात् पूर्वं मेषीः स्नापयित्वा स्वच्छीक्रियन्ते ।

1.2 अधित्यकासु समतलक्षेत्रेषु मरुस्थलेषु

पशुचारकाः केवलं पर्वतेषु एव न तिष्ठन्ति स्म । ते अधित्यकासु समतलक्षेत्रेषु मरुस्थलेषु च अपि अधिक-सङ्ख्यायां विद्यमानाः आसन् ।

धङ्गर इति महाराष्ट्रस्य कश्चित् प्रख्यातः पशुचारक-समुदायः अस्ति । विंशतितमशताब्दस्य आरम्भे एतस्य समुदायस्य जनसङ्ख्या प्रायः (4,67,000) सप्तषष्टिसहस्राधिकं चतुर्लक्षं परिमितम् आसीत् । तेषु अधिकतराः मेषपालकाः अथवा पशुचारकाः आसन् यद्यपि केचन जनाः कम्बलानाम् आच्छादकानां च निर्माणं कुर्वन्ति स्म अपरञ्च केचन महिष-पालनम् अपि कुर्वन्ति स्म । धङ्गर इति मेषपालकाः प्रावृषः काले महाराष्ट्रस्य मध्य-अधित्यकासु निवसन्ति स्म । एतत् किञ्चित् अर्धशुष्कं क्षेत्रम् आसीत् यत्र वृष्टिः अतीव अल्पपरिमाणेन भवति स्म अपि च मृदा अपि अधिका उर्वरा न आसीत् । सर्वतः केवलं कण्टकिल-गुल्माः एव भवन्ति स्म । यवनाल-प्रभृतीनि शुष्कसस्यानि अतिरिच्य अत्र किमपि अन्यत् न जायते स्म । प्रावृषि इदं क्षेत्रं धङ्गर-जनानां पशूभ्यः किञ्चित् विशालं पशुचारण-स्थलरूपेण परिणतं भवति स्म । अक्टूबर्-माससस्य समीपवर्ति-समये धङ्गर-जनाः यवनालस्य कर्तनं कुर्वन्ति स्म अपि च पशुचारणस्थलीनाम् अन्वेषणाय पश्चिमं प्रति प्रस्थानं कुर्वन्ति स्म । केवलं मासं यावत् पदातिगमनात् परं ते स्वसमूहेन च सह कोङ्कणस्य क्षेत्रं गत्वा तत्र निवसन्ति स्म । सुवृष्टेः उर्वराभूमेः च कारणात् एकस्मिन् भूभागे पर्याप्तं कृषिकार्यं भवति स्म । कोङ्कणीयाः कृषकाः अपि एतेषां पशुचारकाणां सहृदयतया स्वागतं कुर्वन्ति स्म । यस्मिन् काले धङ्गरजनाः कोङ्कणं प्राप्नुवन्ति स्म तस्मिन् काले कोङ्कणीयाः कृषकाः शारदीयशस्यं कर्तित्वा स्वक्षेत्राणि चैत्रशस्याय पुनः तैः भूमि उर्वरा करणीया भवति स्म ।

चित्रम् – 5 – पश्चिमराजस्थानस्य थार-मरुस्थले चरन्तः राइका इति समुदायस्य उष्ट्राः ।
अत्र प्राप्यमाणैः कण्टकिलैः गुल्मैः केवलम् उष्ट्राः एव जीवितुं शक्नुवन्ति, परन्तु पर्याप्तभोजनं प्राप्तुं तैः व्यापकक्षेत्रे चरणीयं भवति स्म ।

धङ्गर इति जनानां पशवः शारदीयशस्यस्य कर्तनात् परं क्षेत्रेषु अवशिष्टानि स्थाणु-रूपाणि तृणानि खादन्ति स्म । तेषां गोमयेन च उर्वरकम् अपि क्षेत्राणां कृते उपलब्धं भवति स्म । कोङ्कणीयाः कृषकाः धङ्गरजनेभ्यः तण्डुलान् अपि यच्छन्ति स्म तान् ते पुनः स्वीयान् अधित्यका-भागान् प्रति नयन्ति स्म यतो हि तत्र एतादृशानि अन्नानि अतिन्यूनानि भवन्ति स्म । प्रावृषः वृष्टेः आरम्भस्य समनन्तरमेव धङ्गर-जनाः कोङ्कणं तटीयं क्षेत्रं च परित्यज्य शुष्काः अधित्यकाः प्रत्यागच्छन्ति स्म यतो हि अवयः आर्द्रां प्रावृषः स्थितिं न सोढुं शक्नुवन्ति ।

कर्नाटक-आन्ध्रप्रदेशयोः अपि शुष्काः मध्य-अधित्यकाः घासेन पाषाणैः च आवृत्ताः आसन् । अत्र पशूनां मेषाणाम् अजानां मेषपालकानां चैव वासः भवति स्म ।

नूतनाः शब्दाः

(रबी) चैत्रशस्यम् इति – शैत्यकालिकानि सस्यानि येषां कर्तनं मार्च-मासात् परम् आरभते । (खरीफ) – शारदीय-शस्यम् – सितम्बर्-अक्टूबर्-मासयोः यानि शस्यानि कर्त्यन्ते इति । (ठूंठ) – स्थाणुः – पादपानां कर्तनात् परं भूमौ यानि अवशिष्ट-शस्य-मूलानि भवन्ति तानि अत्र ठूंठ इति शब्देन अभिधीयन्ते ।

अत्र गोलासमुदायस्य जनाः गवां महिषीणां च पालनं कुर्वन्ति स्म अपरञ्च कुरुमा इत्यस्य कुरुबा इति समुदायस्य च जनाः मेषीः अजाः च पालयन्ति स्म हस्तशिल्परचितान् कम्बलान् विक्रीणन्ति स्म । एतादृशाः जनाः वनानां लघु-केदाराणां च समीपे निवसन्ति स्म । ते स्वीयपशूनां सम्भालनेन च सहैव अन्यानि कार्याणि अपि कुर्वन्ति स्म। पर्वतीयपशुचारकाणां विपरीतम् अत्रत्यानां पशुचारकाणाम् पूर्वस्थानात् अपरस्थानं प्रति गमनागमनं शरत्कालेन ग्रीष्मकालेन च न निश्चीयते स्म । एते जनाः प्रावृषः शुष्कवातावरणस्य च कारणात् स्वीय-स्थानानां परिवर्तनं कुर्वन्ति स्म । शुष्कमासेषु ते तटीयक्षेत्राणि प्रति गच्छन्ति स्म अपरञ्च प्रावृषः आरम्भात् समानान्तरमेव ते पुनः प्रत्यागच्छन्ति अथवा (निवर्तन्ते) स्म । प्रावृषि यथा तटीयक्षेत्रेषु यादृश्यः आर्द्र-वातावरणीया स्थिति जायते स्म एषा अवस्था अथवा एतत् वातावरणं महिषीभ्यः न रोचते स्म । एतस्यां परिस्थितौ अन्येषां पशूनां शुष्क-अधित्यकाः प्रति नयनम् आवश्यकम् आसीत् ।

पशुचारकेषु किञ्चित् प्रख्यातनाम बञ्जारा-जनानाम् अपि अस्ति । बञ्जारा-जनाः उत्तरप्रदेशस्य पञ्चनदस्य मध्यप्रदेशस्य महाराष्ट्रस्य च अनेकेषु क्षेत्रेषु निवसन्ति स्म । एते जनाः सुदूरदेशं यावत् गच्छन्ति स्म । अपि च अन्नस्य तृणादिकस्य च प्रतिवर्ते अथवा प्रतिदाने ग्रामीणेभ्यः पशून् अपरवस्तूनि च विक्रीणन्ति स्म । ते यत्र कुत्रापि गच्छन्ति ते स्वपशूभ्यः सुगोचारणभूमीनाम् अन्वेषणं कुर्वन्ति ।

स्रोतः ख इति

अनेकेषां पर्यटकानां विवरणैः वयं पशुचारकसमुदायस्य जनानां जीवनस्य विषये सूचनां प्राप्नुमः । उदाहरणार्थम् एकोनविंशतिशताब्दस्य आरम्भे एव बुकाननः मैसूरस्य स्वयात्रायाः काले गोला-समुदायस्य विषये विवरणं वृतान्तं वा प्रस्तुतवान् । सः स्वीयानुभवस्य आधारेण अलिखत् – तेषां कुटुम्बाः वनानां प्रान्तभागेषु लघुग्रामेषु निवसन्ति । अत्र ते अल्प-भूमौ कृषिकार्यं कुर्वन्ति, स्वल्पपशून् पालयन्ति अपि च पार्श्वस्थानि उपनगराणि गत्वा दुग्धस्य उत्पादान् विक्रीणन्ते । तेषां कुटुम्बेषु बहुजनाः भवन्ति । प्रत्येकं गृहे सप्तः अष्टौ वा युवकाः सरलतया लप्स्यन्ते । तेषु द्वित्राः जनाः वनेषु पशून् चारयन्ति अपरे च स्वक्षेत्राणि सम्भालयन्ति अपि च उपनगरेषु प्रज्वाल्यानि काष्ठानि छदिसां कृते च धान्यतृणादिकानि प्रापयन्ति ।

फ्रांसिसे-हेमिल्टन-बुकाननः, ए-जर्नी-फ्राम-मद्रास-थ्रू-दि-कंट्रिज-आफ-मैसूर इति, कनारा-एण्ड-मालाबार इति (लन्दनम्,1807) ।

क्रियाविधिः

स्रोतः क इत्येतं ख इत्येतं च पठन्तु

- एतेषां स्रोतसाम् आधारेण सङ्क्षेपेण ज्ञापयन्तु यत् पशुचारक-कुटुम्बानां स्त्रियः पुरुषाः च कानि कानि कार्याणि कुर्वन्ति स्म ?
- भवतां मतानुसारं पशुचारकाः वनानां समीपस्थेषु क्षेत्रेषु एव किमर्थं निवसन्ति स्म ?

राजस्थानस्य मरुस्थलेषु राइका-समुदायः निवसति स्म । एतस्मिन् क्षेत्रे वृष्टेः कोऽपि विश्वासः न आसीत् । तत्र कदाचित् वृष्टिः यदि भवति स्म तर्हि अल्पीयसी एव इति । अतः कृषेः उत्पादनम् अपि प्रतिवर्षं कदाचित् अपक्षीयते स्म कदाचित् च वर्धते स्म । अनेकेषु भूभागेषु तु दूरं दूरं यावत् किमपि शस्यम् एव न भवति स्म । एतस्मात् कारणात् राइकाजनाः कृषिकार्येण सह पशुचारण-कार्यम् अपि कुर्वन्ति स्म । प्रावृषि तु बाडमेरस्य जैसलमेरस्य जोधपुरस्य बीकानेरस्य च राइकाजनाः निजग्रामेषु एव तिष्ठन्ति स्म । यतो हि एतस्मिन् काले ते तत्र एव पशुभ्यः तृणादिकं प्राप्नुवन्ति स्म । परन्तु गोचारणभूमीः अन्वेष्टुं ते अन्यानि क्षेत्राणि प्रति अपि निर्गच्छन्ति स्म अपि च वास्तविके वर्षाकाले एव प्रत्यागच्छन्ति स्म । राइकाजनानां कश्चित् वर्गः उष्ट्रान् पालयति स्म अपरञ्च केचन अजानां मेषाणां च पालनं कुर्वन्ति स्म ।

इत्थं वयं द्रष्टुं शक्नुमः यत् पशुचारक-समुदायानां जीवनम् अनेकविषयेषु विचार्य एव अग्रे सरति स्म ।

चित्रम् – 6 - स्वीयेन उष्ट्रेण सह कश्चित् उष्ट्रपालकः ।
इदं राजस्थाने जैसलमेरस्य समीपस्थं थार-मरुस्थलम् अस्ति । एतस्य क्षेत्रस्य उष्ट्रपालकाः मारू, राइका, च इति नामभ्यां तयोः ग्रामः च ढण्डी इति कथ्यते ।

चित्रम् – 7 – पश्चिमे राजस्थाने बलोतरा-स्थितः उष्ट्रमेलापकः ।

उष्ट्रपालकाः अत्र उष्ट्राणां क्रयणाय विक्रयणाय च आयान्ति । मेलापके मारू राइका च इति अनयोः समुदाययोः जनाः उष्ट्राणां प्रशिक्षणे स्वीय-वैशिष्ट्यस्य अपि प्रदर्शनं कुर्वन्ति । एतस्मिन् मेलापके गुर्जरप्रान्तात् अश्वाः अपि आनीयन्ते ।

तैः एतत् तथ्यं प्रति सावधानं भवितव्यं भवति स्म यत् तेषां (रेवड) यूथाः एकस्मिन् क्षेत्रे कियन्ति दिनानि यावत् स्थातुं शक्नुवन्ति अपि च ते कुत्र जलं गोचारणभूमिं च प्राप्तुं शक्नुवन्ति इति विषये अपि तैः जागरूकैः भाव्यम् आसीत् । तैः न केवलं एकस्मात् क्षेत्रात् अपरक्षेत्र-गमनस्य उचितः कालः चेतव्यः भवति स्म अपितु इदम् अपि द्रष्टव्यं भवति स्म यत् ते कैः क्षेत्रैः निर्गन्तुम् अनुमताः भविष्यन्ति अपि च केषां क्षेत्राणां मार्गेण ते न गन्तुं शक्नुवन्ति इति । यात्राकाले ये तत्रत्याः स्थानीयाः कृषकाः तत्र भवन्ति स्म तैः कृषकैः अपि सुसम्बन्धाः तैः स्थापनीयाः भवन्ति स्म यस्मात् च तेषां पशवः तत्रत्यानां स्थानीय-कृषकाणां क्षेत्रेषु चरितुं शक्नुयुः अपि च तेषां क्षेत्राणाम् उर्वराशक्तिं वर्धयेयुः इति । स्व-आजीविकायाः सञ्चालनाय तैः कृषिकार्यं वाणिज्यं पशुचारणं च इति एतानि सर्वाणि कार्याणि करणीयानि भवन्ति स्म ।

आयान्तु, अधुना पश्येम यत् औपनिवेशिक-शासनकाले अर्थात् आङ्ग्लीयानां काले पशुचारकाणां जीवनं कथं परिवर्तितम् ?

चित्रम् – 8 – पुष्करस्य उष्ट्रमेलापकम् ।

चित्रम् – 9 – मारू-राइका इति एतयोः समुदाययोः वंशावल्याः बोधकः ।
वंशावल्याः वक्ता समुदायस्य इतिहासं बोधयति । एतादृशीभिः मौखिक-परम्पराभिः पशुचारक-समुदायाः स्वपरिचयस्य अनुभवं प्राप्नुवन्ति । एताभिः परम्पराभिः वयम् इदं ज्ञातुं शक्नुमः यत् कश्चित् समूहः स्वीयम् अतीतकालं कथं पश्यति ।

चित्रम् – 10 - पशुचारकाः गोचारणभूमीः अन्वेष्टुं भ्रमन्ति । तेषां ग्रामाः कच्छस्य मरूभूमौ स्थिताः सन्ति ।

॥ इति प्रथमः पाठः ॥

2 औपनिवेशिक-शासनं पशुचारकाणां च जीवनम्

औपनिवेशिक-शासनस्य काले पशुचारकाणां जीवने गभीराणि परिवर्तनानि आगतानि । तेषां गोचारणभूमयः अपि सङ्कीर्णाः, इतस्ततः गमनागमनस्य अपि प्रतिबन्धः आसीत् अपि च तेभ्यः राजस्वस्य आहरणम् अपि आरब्धं तस्मिन् च वृद्धिः अपि अभवत् । कृषिकार्ये तेषां भागः अधुना न्यूनः जायमानः अभवत् , तेषां व्यवसायेषु अपि च शिल्पकलासु अपि कुप्रभावः जातः ।

आयान्तु पश्यामः यत् एतत् सर्वं किमर्थम् अभवत् ?

प्रथमः विषयः - आङ्ग्लसर्वकारः गोचारणभूमीनां परिवर्तनं कृषिभूमेः रूपेण कर्तुम् इच्छति स्म । भूमिमाध्यमेन यत् राजस्वं प्राप्यते स्म तेषाम् आयस्य तत् किञ्चित् महत् स्रोतः आसीत् । कृषेः क्षेत्रफलस्य वर्धनेन सर्वकारीय-आयस्य वर्धनं भवितुं शक्नोति स्म । एतावत् एव न , अनेन (पटसन) शणस्य कार्पासस्य गोधूमस्य अन्येषां च कृषकीयवस्तूनाम् उत्पादनस्य अपि वर्धनं भवितुं शक्नोति स्म, यस्य च इङ्ग्लैण्डदेशे अतीव आवश्यकता आसीत् । आङ्ग्ल-अधिकारिणः अकृषि-भूमेः किमपि प्रयोजनं नास्ति इति ते अवगच्छन्ति स्म तस्मात् न तु ते राजस्वस्य अर्जनमेव कर्तुं पारयन्ति स्म, न च उत्पादनम् एव प्राप्तुं शक्नुवन्ति स्म । एतस्मात् कारणात् ते तादृशीं भूमिं व्यर्थां मन्यन्ते स्म । अतः तादृशी भूमिः अपि कृषियोग्या अवश्यमेव भवेत् इति आङ्ग्लाधिकारिणः चिन्तयन्ति स्म । इदम् एव तथ्यं मनसि निधाय ते एकोनविंशतितमस्य शताब्दस्य मध्यकाले देशस्य विभिन्नेषु भागेषु अकृष्टभूमिविषयकान् नियमान् निर्मातुम् आरब्धवन्तः । एतेषां नियमानां माध्यमेन सर्वकारः अकृष्टभूमिं स्वाधीनां कृत्वा केभ्यश्चित् विशिष्टजनेभ्यः दातुम् आरब्धवान् । एतादृशेभ्यः जनेभ्यः अनेकविधानि राज्यानि दत्तानि अपि च अकृष्टभूमिः अपि कृषियोग्या भवेत् इति तदर्थं कार्यस्य आरम्भः जातः । एतादृशाः केचन जनाः ग्रामप्रमुखरूपेण नियुक्ताः । अनेन प्रकारेण अधिकतरा भूमिः या अधिगृहीता सा गोचारणभूमिः आसीत् यस्याः भूमेः प्रयोगं पशुचारकाः नियमितरूपेण कुर्वन्ति स्म । अनेन प्रकारेण कृषेः विस्तारेण गोचारणभूमिः सङ्कीर्णा अथवा न्यूना जाता अपि च पशुचारकाणां कृते समस्याः जाताः ।

द्वितीयः विषयः - एकोनविंशतिशताब्दस्य मध्यकालं यावत् देशस्य विभिन्नेषु प्रान्तेषु वनाधिनियमाः अपि पारितुम् आरब्धाः । एतेषाम् अधिनियमानाम् आश्रयेण सर्वकारेण एतादृशानि वनानि आरक्षितानि इति घोषितानि यत्र देवदारुवृक्षस्य शालवृक्षस्य च बहूमूल्यं काष्ठं जायते स्म । एतेषु वनेषु पशुचारकाणां प्रवेशे प्रतिबन्धः स्थापितः । अनेकानि वनानि संरक्षितानि सन्ति इति घोषितानि । एतेषु वनेषु पशुचारकाणां गोचारणाय केचन परम्परागताः अधिकाराः तु प्रदत्ताः परन्तु तेषाम् गमनागमने पुनरपि प्रतिबन्धः एव आसीत् । औपनिवेशिकाः अधिकारिणः मन्यन्ते स्म यत् पशुचारणेन वन्यपादपाः अपि च वृक्षाणां किसलयाः अपि नष्टाः भवन्ति । तेषां दृष्ट्या पशूनां यूथाः पादपान् उद्हरन्ति अपि च किसलयान् अपि खादन्ति यस्मात् च नूतनवृक्षाणां वर्धनम् अवरुद्धं भवति ।

वनाधिनियमैः पशुचारकाणां जीवनम् एव परिवर्तितम् । यद्यपि वनानि तेषां कृते बहुमूल्यतृणादिकस्य स्रोतांसि आसन् तथापि अधुना ते तानि वनानि प्रति गन्तुं प्रतिबन्धिताः ।

स्रोतः ग इति

एच.एस.गिब्सनः, वनोपसंरक्षकः, दार्जिलिंगम्, इत्यनेन (1913) त्रयोदशाधिकनवदशशत-तमे ख्रिस्ताब्दे लिखितम् -

... पशुचारणाय प्रयुक्तवनानां प्रयोगः अन्य-कार्यार्थं न कर्तुं शक्यते अपि च ततः गृह्यकाष्ठानि, इन्धनकाष्ठानि च अपि न एकत्र कर्तुं शक्यते इति ये च मुख्याः वन्योत्पादाः सन्ति ...

क्रियाविधिः

कल्पनां कुर्वन्तु यत् वनेषु पशुचारणस्य प्रतिबन्धः अस्ति । अस्मिन् तथ्ये निम्नलिखितस्य दृष्ट्या टिप्पणीं कुर्वन्तु –

- कश्चित् वनाधिकारी
- कश्चित् पशुचारकः

नूतनः शब्दः

परम्परागताधिकारः – परम्परायाः रीतेः च आधारेण लभ्यमानाः अधिकाराः ।

यानि क्षेत्राणि प्रविष्टुं ते स्वतन्त्राः आसन् अथवा आज्ञापिताः आसन् तत्र एव तेषां गहन-निरीक्षणं भवति स्म । वनानि प्रवेष्टुं तैः आज्ञापत्रं स्वीकर्तव्यं भवति स्म । वनेषु तेषां प्रवेशस्य पुनरागमनस्य अर्थात् निवर्तनस्य च तिथिः पूर्वतः एव निश्चिता भवति स्म अपि च ते वनेषु अल्पकालाय एव स्थातुं शक्नुवन्ति स्म । कुत्रचिद् अपि वने प्रभूतं तृणादिकं स्यात्, घासः अपि भूरिशः स्यात्, सर्वत्र गहन-हरितिमा एव च स्यात् तथापि अधुना पशुचारकाः तत्रचिरकालं यावत् न स्थातुं शक्नुवन्ति स्म । । तैः वनप्रदेशात् शीघ्रं निर्गन्तव्यं भवति स्म यतो हि वनविभागीयाः अनुबन्धाः समयसीमा-आधारिताः आसन्। अनुमतिपत्रे पूर्वतः एव लिख्यते स्म यत् अधिनियमानुसारं कियत् कालं यावत् पशुचारकः वने स्थास्यति इति । यदि ते समयसीमायाः उल्लङ्घनं कुर्वन्ति स्म तर्हि तैः दण्डशुल्कम् अर्पणीयं भवति स्म ।

तृतीयः विषयः - आङ्ग्लाधिकारिणः यायावर-जनान् सन्देहदृष्ट्या पश्यन्ति स्म । ये जनाः प्रतिग्रामं गत्वा वस्तूनां विक्रेतृषु शिल्पकारेषु वणिक्षु स्वयूथाय नूतनानां गोचारणभूमेः अन्वेषकेषु अपि च ऋतोः अनुगुणं निवासपरिवर्तकेषु पशुचारकेषु च ते अधिकारिणः न विश्वसन्ति स्म । ते आङ्ग्लाधिकारिणः इच्छन्ति स्म यत् ग्रामीणजनता ग्रामेषु एव वासं कुर्यात्, तेषां निवासेषु क्षेत्रेषु च अपि तेषाम् अधिकाराः सुनिश्चिताः भवेयुः इति । एवम्प्रकारिकायाः जनसङ्ख्यायाः परिचयप्राप्तिः अपि च नियन्त्रणं सरलम् आसीत् या स्थायिरूपेण एकस्मिन् एव स्थाने निवसति । एतादृशाः जनाः शान्तिप्रियाः सन्ति अपि च अधिनियमपालकाः सन्ति इति आङ्ग्लीयाः मन्यन्ते स्म, यायावराः जनाः अपराधिनः सन्ति इति मन्यते स्म । (1871) एकसप्तत्यधिकाष्टादशशत-तमे वर्षे औपनिवेशिकः सर्वकारः अपराधि-जनजाति-अधिनियमस्य (Criminal Tribes Act) घोषणाम् अकरोत् । एतस्य अधिनियमस्य अनुसारं शिल्पिनां वणिजां पशुचारकाणां च अनेके समुदायाः अपराधिसमुदायाः इति सूच्यां स्थापिताः । ते प्राकृतिक-रूपेण जन्मना चैव अपराधिनः इति घोषिताः । एतस्य अधिनियमस्य क्रियान्वयनेन एतादृशाः समुदायाः निर्दिष्टाः यत् ते केषुचित् विशिष्टेषु अधिसूचितेषु ग्रामेषु वसतिषु च वासं करिष्यन्ति ते ग्रामाः तेषां कृते एव आरक्षिताः भविष्यन्ति इति । एतादृशाः अपराधि-समुदायाः अनुमतिपत्रं विना कुत्रापि इतस्ततः गमनागमनम् अटनं वा न करिष्यन्ति इति प्रतिबन्धः अपि स्थापितः । ग्राम्य-आरक्षकाः सदैव तेषां निरीक्षणं कुर्वन्ति स्म ।

चतुर्थः विषयः - स्वीयम् आयं वर्धयितुम् आङ्ग्लीयाः राजस्वस्य आहरणस्य यथाशक्यं प्रत्येकं मार्गम् अङ्गीकृतवन्तः । आङ्ग्लीयाः उद्घोषितवन्तः यत् ते अधुना भूमेः जलकुल्यानां लवणस्य क्रय-विक्रय–सम्बन्धि-वस्तूनां तथा च पशूनाम् अपि राजस्वं ग्रहीष्यन्ति इति । यदि पशुचारकाणां पशवः गोचारणभूमिषु चरन्ति तर्हि प्रत्येकं पशोः परिमाणेन अपि राजस्वं स्वीकरिष्यन्ति इति । देशस्य अधिकतरेषु गोचारणक्षेत्रेषु एकोनविंशतिशताब्दस्य मध्यकालात् एव पशुचारणराजस्वं स्वीक्रियते स्म । प्रतिपशु राजस्वस्य मात्रा वेगेन वर्धिता अपि च राजस्व-ग्रहण-व्यवस्था अनुदिनं दृढतां गता । (1850) पञ्चाशदधिकाष्टादशशत- तमदशकात् आरभ्य (1880) अशीत्यधिकाष्टादशशत-तमदशकानां मध्ये राजस्वग्रहणस्य कार्यं सुव्यवस्थितरूपेण लीलामय-क्रयणेन अनुबन्ध-धारकेभ्यः समर्प्यते स्म । अनुबन्ध-धारणाय संवित्कर्मी सर्वकाराय यत् धनं प्रयच्छन्ति स्म तस्य आहरणाय अपि च वार्षिकाय आयाय लाभाय च सर्वकारः यावत् राजस्वम् इच्छति स्म तावत् एव तेभ्यः ग्रहीतुं शक्नोति स्म । (1880) अशीत्यधिकाष्टादशशत-तम-दशकं यावत् सर्वकारः स्व-कर्मिणां माध्यमेन

स्रोतः घ इति

(1920) विंशत्यधिकनवदशशत-तमे दशके रायल-कमीशन-आन-एग्रीकल्चर इत्यनेन स्वसमाख्यया लिखितम् – यत् –

वर्धमान-जनसङ्ख्यायाः कारणात् सेचन-सौविध्यानां विस्ताराय रक्षायाः उद्योगस्य च कृते कृषि-प्रायोगिक-उद्योगानां च विस्ताराय सर्वकारेण गोचारण-भूमीनाम् अधिग्रहणं कृतं तस्मात् गोचारणाय उपलब्धेषु क्षेत्रेषु महती न्यूनता जाता अस्ति । सम्प्रति, पशुपालकाः पशूनां महतः यूथान् न स्थापयितुं शक्नुवन्ति यतो हि ते अस्मिन् कार्ये काठिन्यानि अनुभवन्ति । एतस्मात् कारणात् च तेषाम् आये अपि महती न्यूनता जाता अस्ति । तेषां च पशूनां गुणवत्ता पशूनां च खाद्यस्य अपि गुणवत्ता पतिता अस्ति ते च निरन्तरम् अधमर्णाः जायन्ते ।

द-रिपोर्ट-आफ-द-रायल-कमीशन-आन-एग्रीकल्चर-इन-इण्डिया, इति (1928) अष्टाविंशत्यधिकनवदशशततमः ख्रिस्ताब्दः ।

क्रियाविधिः

कल्पनां कुर्वन्तु यत् भवन्तः एकोनविंशतितमस्य शताब्दस्य उत्तरार्धे 1890तमे ख्रिस्ताब्दस्य नातिदूरे विद्यन्ते । भवन्तः यायावर-पशुचारकाणां शिल्पिनां वा केनचित् समुदायेन सम्बद्धाः सन्ति । भवन्तः सूचनां प्राप्तवन्तः यत् भवतां समुदायः अपराधी इति घोषितः अस्ति ।

- सङ्क्षेपेण बोधयन्तु यत् इदं ज्ञात्वा भवन्तः किम् अनुभवम् अकरिष्यन् अपि च भवन्तः किम् अकरिष्यन्।
- स्थानीय-जनपद-आयुक्ताय पत्रं विलिख्य बोधयन्तु यत् भवतां दृष्ट्या अयम् अधिनियमः कथम् अन्यायपूर्णः अस्ति अपि च अनेन भवतां जीवने एतस्य कः दुष्प्रभावः भविष्यति इति ।

प्रत्यक्षरूपेण पशुचारकेभ्यः एव राजस्वस्य आहरणम् आरब्धवान् । प्रत्येकम् अपि पशुचारकाय किञ्चित् अनुमतिपत्रं दत्तम् । काम् अपि गोचारणभूमिं प्रवेष्टुं पशुचारकैः अनुपत्रं प्रदर्श्य आदौ राजस्वम् अर्पणीयं भवति स्म। पशुचारकस्य पार्श्वे कति पशवः सन्ति अपि च तेन कियत् राजस्वम् अर्पितम् अस्ति, एतत् तथ्यं विवरणं वा अधिकारिणः स्वस्य पार्श्वे अङ्कयन्ति स्म।

2.1 एतैः परिवर्तनैः पशुचारकाणां जीवनं केन प्रकारेण प्रभावितम् ?

एतेषाम् कुत्सितानाम् अधिनियमानां कारणात् गोचारणभूमेः महान् अभावः जातः । यथा यथा अधिकाधिकानि गोचारणस्थलानि सर्वकारीये अधिग्रहणे जातानि तानि च कृषिक्षेत्राणां रूपेण परिवर्तितुम् आरब्धानि तथा तथा गोचारणभूमेः परिमाणं सङ्कीर्णतां प्रति गन्तुम् आरब्धम्। अनेन एव प्रकारेण, वनानाम् आरक्षणस्य परिणामः अयम् अभवत् यत् मेषपालकाः पशुपालकाः च अधुना स्वपशून् वनेषु पूर्ववत् स्वतन्त्रतया न चारयितुं शक्नुवन्ति स्म।

यदा गोचारण-स्थलानि कृषिक्षेत्ररूपेण परिवर्तितुम् आरब्धानि तदा अवशिष्टेषु गोचारण-स्थलेषु चरणशील-पशूनां सङ्ख्या निरन्तरं वर्धितुम् आरब्धा । एतस्मात् कारणात् तत्रत्यानि पशुचारणस्थलानि पशुभिः सदैव पूरितानि भवन्ति स्म। अधुना पर्यन्तं तु यायावर-पशुचारकाः स्वपशून् कानिचन दिनानि यावत् एव एकस्मिन् क्षेत्रे चारयन्ति स्म पुनः ते केषाञ्चित् दिनानाम् अनन्तरम् अन्यानि क्षेत्राणि प्रति गच्छन्ति स्म। क्रमशः अनेन परिवर्तनेन पूर्वतनानि पशुचारणस्थलानि अपि पुनः हरितिमा-पूर्णानि भवन्ति स्म। परन्तु पशुचारकाणाम् गमनागमने अधुना प्रतिबन्धः आसीत् तस्मात् अपि च गोचारणस्थलानाम् अत्यधिकेन निरन्तरप्रयोगेन च गोचारणस्थलानां स्तरस्य अवनमनं निरन्तरम् अभवत्।

चित्रम् 11 – भारते पशुचारकसमुदायः ।
एतस्मिन् चित्रे केवलं तेषाम् एव पशुचारक-समुदायस्य क्षेत्राणाम् उल्लेखः कृतः येषां विषये एतस्मिन् अध्याये चर्चा कृता अस्ति । तान् अतिरिच्य अपि अस्माकं देशे अन्ये अनेके पशुचारक-समुदायाः अपि निवसन्ति ।

पशुभ्यः अधुना न्यूनपरिमाणेन तृणादिकं लभ्यते स्म । परिणामतः पशूनां स्वास्थ्यं सङ्ख्या च अपि क्षीणा जाता । तृणादिकस्य न्यूनतायाः कारणात् अपि च प्रायः यत् दुर्भिक्षं भवति स्म तस्मात् कृश-कलेवराः अपि च बुभुक्षिताः पशवः अपि अत्यधिक-सङ्ख्यया मरितुम् आरब्धवन्तः ।

2.2 गोचारकाः एतेषां परिवर्तनानां सम्मुखीकरणं कथं कृतवन्तः ?

तेषां परिवर्तनानां विषये पशुचारकाणां प्रतिक्रिया अनेकरूपैः पुरतः समायाता । केचन पशुचारकाः तु स्वपशूनां सङ्ख्याम् एव न्यूनीकृतवन्तः । अधुना बहून् पशून् चारयितुं महान्ति दीर्घाणि च क्षेत्राणि अवशिष्टानि न आसन् । यदा पुरातनानां पशुचारण--स्थलानां प्रयोगः कठिनः आसीत् तदा केचन पशुचारकाः नूतनानि पशुचारण-स्थलानि अन्विष्टवन्तः । उदाहरणार्थम् – उष्ट्रपालकाः मेषपालकाः च राइका इति समुदायस्य जनाः (1947) सप्तचत्वारिंशदधिकनवदशशत-तम-वर्षस्य अनन्तरं न तु सिन्धप्रान्तं प्रवेष्टुं शक्नुवन्ति स्म न च सिन्धुनद्याः तटवर्ति-स्थानेषु स्वपशून् एव चारयितुं शक्नुवन्ति स्म । भारतपाकदेशयोः मध्ये या सीमा निश्चिता तस्मात् ते सीमारेखायाः पारे न गन्तुं शक्नुवन्ति स्म । स्पष्टम् अस्ति यत् अधुना तैः पशून् चारयितुं नूतनस्थानानि अन्वेष्टव्यानि आसन् । अधुना ते हरियाणा-प्रान्तस्य क्षेत्राणि गन्तुम् आरब्धवन्तः यत्र शस्य-कर्तनात् परं क्षेत्राणि रिक्तानि भवन्ति स्म ते अधुना एतादृशेषु क्षेत्रेषु स्वपशून् चारयितुं शक्नुवन्ति स्म । तस्मिन् एव काले क्षेत्राणां कृते उर्वरकस्य अपि आवश्यकता भवति स्म ताम् आवश्यकताम् अपि पशवः पूरयन्ति स्म यतो हि पशूनां मलेन मूत्रेण च उर्वरकस्य आवश्यकता पूर्तिं गच्छति स्म ।

परवर्ति-काले केचन धनिकाः पशुचारकाः भूमिं क्रीत्वा एकस्मिन् स्थाने उषितुम् आरब्धवन्तः । तेषु केचन नियमितरूपेण कृषिकार्यम् आरब्धवन्तः अपरञ्च केचन वाणिज्यं कर्तुम् आरब्धवन्तः । येषां पशुचारकाणां समीपे विपुलं धनं नासीत् ते श्रेष्ठिभ्यः कुशीदेन धनम् ऋणं वा स्वीकृत्य जीवनं साधयन्ति स्म । अनया प्रक्रियया अनेकेषां पशवः अपि तेभ्यः परिहियन्ते स्म अपि च ते श्रमिकवत् जीवनं यापयन्ति स्म । ते क्षेत्रेषु उपनगरेषु च श्रमं कुर्वाणाः दृश्यन्ते स्म ।

एतासां पूर्वोक्तानां सर्वासां घटनानाम् अनन्तरम् अपि पशुचारकाः न केवलम् अद्य जीविताः सन्ति अपितु सद्यतनेषु दशकेषु अनेकेषु स्थानेषु तेषां सङ्ख्या अपि वर्धिता अस्ति । यदा अपि कस्मिंश्चित् क्षेत्रे तेषां प्रवेशः प्रतिबन्धितः तदा ते स्वदिशां परिवर्तयन्ति, पशूनां संख्यां न्यूनीकुर्वन्ति स्म अपि च विश्वस्य दृष्ट्या तेन सह सामञ्जस्यं कर्तुं साधयितुं वा अन्यानि कार्याणि अपि कर्तुम् आरब्धवन्तः । अनेके परिस्थिति-वैज्ञानिकाः अपि मन्यन्ते यत् शुष्कक्षेत्रेषु पर्वतीयक्षेत्रेषु च जीवितुं वासाय च पशुचारण-प्रक्रिया एव सर्वाधिक-व्यवहारिकी अस्ति अथवा अयम् एव व्यवहारिकमार्गः अस्ति

वस्तुतः पशुचारकाणाम् एतादृशानि परिवर्तनानि केवलम् अस्माकं देशे एव न आरोपितानि आसन् । विश्वस्य अनेकेषु क्षेत्रेषु नूतनानाम् अधिनियमानां वास-व्यवस्थायाः च पृथक् उपायानां कारणात् ते आधुनिकविश्वे जायमानानां परिवर्तनानाम् अनुसारं स्व-जीवनं परिवर्तितुम् अपि बाध्याः जाताः । आधुनिके विश्वे अस्मिन् जातपरिवर्तनानि सम्मुखीकर्तुम् अन्येषां देशानां पशुचारकाः कान् नूतनान् मार्गान् आविष्कृतवन्तः आश्रितवन्तः च इति ?

॥इति द्वितीयः पाठः ॥

3 अफ्रीकायाः पशुचारकाणां जीवनम्

आयान्तु, अधुना अफ्रीकां प्रति चलामः यत्र विश्वस्य अर्धाधिका पशुचारकजनानां सङ्ख्या निवसति। अद्य अपि अफ्रीकायाः प्रायः सपादकोटिमिताः जनाः आजीविकायाः कृते कथञ्चित् पशुचारणीयासु गतिविधिषु एव आश्रिताः सन्ति। एतेषु बेदुईन्स, बरबेर्स, मासाई, सोमाली, बोरान, तुर्काना च इति प्रसिद्धाः समुदायाः सम्मिलिताः सन्ति। एतेषु अधिकतराः अधुना अर्धशुष्क-घासानां क्षेत्रेषु अथवा शुष्कमरुस्थलेषु निवसन्ति यत्र वर्षाधारितं कृषिकार्यम् अतीव कठिनम् अस्ति। अत्रत्याः पशुचारकाः गाः वृषभान् उष्ट्रान् अजाः अवीः गर्दभान् च पालयन्ति। ते च जनाः दुग्धं पशुचर्म ऊर्णं च विक्रीणन्ते। केचन पशुचारकाः वाणिज्यं यातायातसम्बद्धं च कार्यम् अपि कुर्वन्ति। केचन पशुचारणेन सहैव कृषिकार्यम् अपि कुर्वन्ति। केचन जनाः यदा अनुभवन्ति यत् पशुचारणवृत्त्या आयः अत्यल्पः अस्ति इति तया च जीवननिर्वहणं न भवति तदा ते किमपि कार्यं कुर्वन्ति।

भारतवर्षस्य इव अफ्रीकीयपशुचारकाणां जीवने अपि औपनिवेशिके काले अपि च उत्तर-औपनिवेशिके काले च गभीराणि परिवर्तनानि आगतानि। वस्तुतः एतानि परिवर्तनानि कानि आसन्?

चित्रम् – 12 – मासायि-लैण्ड (भूमिः) यस्याः पृष्ठे किलिमंजारो इति पर्वताः दृश्यन्ते।
परिवर्तमान-परिस्थितीनां कारणात् मासाई-जनाः कणिशः, तण्डुलः आलुकं पुष्पशाकम् इत्यादिप्रभृतिषु खाद्यपदार्थेषु आश्रिताः भवन्ति यानि खाद्यान्नानि तेषां क्षेत्रे न उत्पद्यन्ते। परम्परागतरूपेण ते एतानि वस्तूनि न इच्छन्ति स्म अथवा तेभ्यः एतानि वस्तूनि न रोचन्ते स्म। मासाई-जनाः मन्यन्ते यत् शस्यस्य उत्पादनाय भूमेः कर्षणं प्रकृतिविरुद्धम् अस्ति यदि भवन्तः भूमेः कर्षणम् आरभन्ते तर्हि सा भूमिः पशुचारणार्थम् उपयुक्ता न भवति।
सौजन्यम् – द-मासाई-एसोशिएशन इति।

चित्रम् 13 – अफ्रीकायाः पशुचारकः समुदायः ।
लघुनि चित्रे कीनियायां तञ्जानियां च मासाई-जनानां क्षेत्रं दर्शितम् अस्ति ।

एतानि परिवर्तनानि वयं पशुचारकाणां विशिष्टसमुदायस्य माध्यमेन अवगन्तुं प्रयतिष्यामहे । आयान्तु एतदर्थं मासाई-समुदायं चिनुमः । मासाई-पशुपालकाः मूलतः पूर्व-अफ्रीकायाः निवासिनः सन्ति । एतेषु प्रायः (3,00,000) त्रिलक्षं सङ्ख्याकाः कीनियायाः दक्षिणे भागे अपि च प्रायः (1,50,000) सार्धैकलक्षं सङ्ख्याकाः मासाई-पशुपालकाः तञ्जानियायां निवसन्ति । अधुना वयं द्रक्ष्यामः यत् नूतनैः अधिनियमैः प्रतिबन्धैः च कथं तेषां भूमिः एव न तेभ्यः परिहृता अपितु तेषां पर्यटने अपि अनेके प्रतिबन्धाः बलात् स्थापिताः । एतेषाम् अधिनियमानां कारणात् शुष्कदिनेषु तेषां जीवनम् अपि गहनतया परिवर्तितम् । अपि च तेषां सामाजिकसम्बन्धाः अपि नूतनरूपेण परिवर्तिताः ।

3.1 गोचारणभूमीनां किम् अभवत् ?

मासाई-जनानां महती समस्या इयम् आसीत् यत् तेषां पशुचारणभूमिः अनुदिनं सङ्कीर्णतां गच्छति । औपनिवेशिकात् शासनकालात् पूर्वं मासाई-भूमेः भूभागः उत्तरकीनियायाः आरभ्य तञ्जानियायाः घासस्य क्षेत्राणि यावत् प्रसृतः आसीत् । एकोनविंशतितमशताब्दस्य अन्तिमे काले यूरोपस्य साम्राज्यवादिशक्तिभिः अफ्रीकायाः अधिग्रहणाय जनसंहारस्य आरम्भः कृतः अपि च अनेकानि क्षेत्राणि उपनिवेशेषु परिवर्त्य स्वाधीनानि कृतानि । (1885) पञ्चाशीत्यधिकाष्टादशशत-तमे ख्रिस्ताब्दे ब्रिटिशकीनियायाः जर्मन-ताङ्गान्यिकायाः च मध्ये काञ्चित्

ताङ्गान्यिकायाः विषये

ब्रिटेनेन प्रथमविश्वयुद्धस्य काले तस्य क्षेत्रस्य अधिग्रहणं कृतम् यत् क्षेत्रम् अधुना ईस्ट-अफ्रीका इति कथ्यते स्म । (1919) नवदशाधिकनवदशशत-तमे वर्षे ताङ्गान्यिका, ब्रिटिशनियन्त्रणे जातम् । (1961) एकषष्ट्यधिकनवदशशत-तमे वर्षे तत् स्वतन्त्रं जातम् अपि च (1964) चतुःषष्ट्यधिकनवदशशत-तमे वर्षे जञ्जीबारस्य विलयात् परं तञ्जानियायाः नूतनं नामकरणं कृतम् ।

अन्ताराष्ट्रियसीमारेखाम् विलिख्य मासाई-लैण्डस्य द्वौ पृथक् पृथक् समानौ भागौ कृतौ। परवर्ति-वर्षेषु सर्वकारः आङ्ग्लीयानां निवासाय समीचीनानि पशुचारणस्थलानि स्वाधीनानि कृतवान्। मासाई-जनाः दक्षिण-कीनियायाः अपि च उत्तर-तञ्जानियायाः लघुक्षेत्रे एव एकत्र कृताः। औपनिवेशिकशासनात् पूर्वं मासाई-जनानां पार्श्वे यावती भूमिः आसीत् तस्याः प्रायः (60) षष्टि-प्रतिशतं भागः तेभ्यः परिहृतम्। ते एतादृशे शुष्के क्षेत्रे निगृहीताः यत्र न तु सुवृष्टिः भवति स्म न चैव हरितिमायुक्तानि पशुचारणस्थलानि एव आसन्।

एकोनविंशतिशताब्दस्य अन्तिमवर्षेभ्यः ब्रिटिश-औपनिवेशिक-सर्वकारः पूर्वीय-अफ्रीकायाम् अपि स्थानीयकृषकान् स्वकृषेः क्षेत्रफलस्य आधिक्येन विस्ताराय प्रेरितवान्। यथा यथा कृषिक्षेत्रस्य विस्तारः जातः तथा तथा गोचारण-स्थलानि क्षेत्रेषु परिवर्तितुम् आरभन्त। आङ्ग्लीयानाम् आगमनात् पूर्वं मासायिजनाः आर्थिकस्तरेण राजनैतिकस्तरेण च स्वकृषक-प्रतिवेशिनाम् अभिभवाय समर्थाः आसन्। औपनिवेशिक-शासनस्य अन्तकालस्य समाप्तेः आगमनं यावत् इदं समीकरणं सर्वथा वैपरीत्यं गतम् आसीत्।

अनेकानि गोचारण-स्थलानि मृगया-स्थलरूपेण जातानि। कीनियायां मासाई-मारा-पार्क इति, साम्बरू-नैशनल-पार्क इति च तथा तञ्जानियायां सेरेन्गेटी-पार्क-सदृशं मृगयास्थलम् अनेन एव प्रकारेण अस्तित्वं प्रति आगतानि आसन्। एतेषु आरक्षित-वनेषु पशुचारकाणाम् गमनागमनं प्रतिबन्धितम् आसीत्। एतेषु क्षेत्रेषु न तु ते मृगयां कर्तुं शक्नुवन्ति स्म न च स्वपशून् एव चारयितुं शक्नुवन्ति स्म। एतादृशेषु अनेकेषु आरक्षित-वनेषु अधुनापर्यन्तं मासायिजनाः स्वीयान् पशून् चारयन्ति स्म। उदाहरणरूपेण सेरेन्गेटी-नैशनल-पार्क इत्यस्य क्षेत्रफलं (14,760) षष्ट्यधिक-सप्त-शतोत्तर-चतुर्दश-शतं वर्ग-किलोमीटर-परिमितात् अपि अधिकं क्षेत्रफलं मासायि इत्येतेषां गोचारणभूमीनाम् अधिग्रहणं कृत्वा निर्मितम् आसीत्।

चित्रम् – 14 – घासं विना पशवः (पशवः,अजाः,मेष्यः) कुपोषणग्रस्ताः भवन्ति यस्य अभिप्रायः अयम् अस्ति यत् पशुचारकेभ्यः कुटुम्बेभ्यः बालकेभ्यः च भोजनस्य न्यूनता भवति समुचितरूपेण तेषां कृते भोजनव्यवस्था न भवति। शुष्कग्रस्तं क्षेत्रम् अपि च अतीव भोजनाभाव-ग्रस्तं क्षेत्रम् अम्बोसेली-नैशनल-पार्क इत्यस्य पार्श्वस्थं क्षेत्रम् अस्ति, यस्य पर्यटनेन प्राप्तः आयः गतवर्षे प्रायः (24) चतुर्विंशति-कोटि-कीनियनशिलिंग प्रायः (35)पञ्चत्रिंशत्-लक्षम् अमेरिकीय-डालरपरिमित-मुद्रा आसीत्। किलिमञ्जारो-जल-परियोजना अपि एतस्मात् क्षेत्रात् भूत्वा एव गच्छति परन्तु अत्रत्याः निवासिनः समुदायाः न तु पानीयं जलं प्राप्नुं, न चैव सेचनजलाय एतस्याः परियोजनायाः जलस्य प्रयोगं कर्तुं शक्नुवन्ति। सौजन्यम् – द-मासाई-एसोसिएशन इति।

चित्रम् 15 – मासायिनाम इति मा इति शब्दात् निर्गतः अस्ति। मा-साई इत्यस्य अभिप्रायः भवति मदीयाः जनाः इति। परम्परागतरूपेण मासाई इति यायावराः अपि च पशुचारक-समुदायस्य जनाः भवन्ति एतादृशाः जनाः आजीविकायै दुग्धे मांसे च आश्रिताः भवन्ति। उच्च-तापमानस्य अल्पवृष्टेः च कारणात् तत्रत्या स्थितिः शुष्का पांशुभिः च अतीव घर्मवती भवति। एतस्मिन् अर्ध-शुष्क-विषुवत-वृत्तीये क्षेत्रे शुष्कतायाः स्थितिः सामान्या अस्ति। एतस्मिन् समये अनेके पशवः म्रियन्ते। सौजन्यम् – द मासायि-एशोसिएशन इति।

स्रोतः च इति

अफ्रीकायाः अन्येषु स्थानेषु अपि पशुचारकाः एतादृशीनां समस्यानाम् एव सम्मुखीकरणं कर्तुं बाध्याः जाताः । दक्षिण-पश्चिम-अफ्रीकायां स्थिताः नामीबिया इत्यस्य काओकोलैण्ड इत्यस्य मध्ये गमनागमनं कुर्वन्ति स्म।

ते जनाः पार्श्वस्थेषु विपणिषु पशूनां चर्म, मांसम् अन्यवस्तूनि च विक्रीणन्ते स्म। नूतन-भौगोलिक-सीमाभिः सुदूरक्षेत्रेषु तेषाम् गमनागमने प्रतिबन्धः स्थापितः यतः तेषां पूर्ववत् इव द्वयोः क्षेत्रयोः गमनागमनं सर्वथा प्रतिबन्धितम्।

नामीबिया इत्यत्र स्थितस्य काओकोलैण्ड इत्यस्य यायावर-पशुपालकानां दूषणम् आसीत् –

वयम् अतीव कष्टपतिताः स्मः। वयं केवलं रोदनं कुर्मः। वयं कारासु निपातिताः। वयं तु एतत् अपि न जानीमः यत् केन अपराधेन वयं निग्रहीताः। वयं कारायां स्मः। अस्माकं पार्श्वे वसितुं किमपि स्थानं नास्ति। वयं दक्षिणतः मांसं न आनेतुं शक्नुमः। चर्माणि बहिः न प्रेषयितुं शक्नुमः। ओवाम्बोलैण्ड इति अधुना अस्माकं कृते पिहितम् अस्ति। वयं चिरकालं यावत् ओवाम्बोलैण्ड इत्यत्र उषितवन्तः। वयं स्वपशून् स्वमेषान् अजाः च तत्र नेतुम् इच्छामः। परन्तु सीमाः पिहिताः सन्ति। एताः सीमाः अस्मान् मारयन्ति। जीवनं कठिनम् अस्ति।

नामीबिया-स्थितानां काओकोलैण्ड इत्यस्य पशुचारकाणां स्व-व्यथाकथनम्, नामीबिया, 1949.

माइकेल-बालिगः "द कालोनियल-एनकेप्स्युलेशन-आफ-द-नार्थ-वेस्टर्न-नामीबियन-पास्टोरल-इकानामी" अफ्रीका, 68(4),1998 इत्यस्मात् उद्धृतम्।

स्रोतः छ इति

औपनिवेशिक-अफ्रीकायाः अनेकेषु स्थानेषु आरक्षकाणां नियुक्तिः पशुचारकाणाम् गमनागमनस्य विवरणम् अवलोकयितुम् अपि च ते आङ्ग्लीयानां क्षेत्राणि न प्रविशेयुः इति एतदर्थं तत्र प्रबन्धनं कृतम् आसीत् । नामीबियायां काओकोलैण्डस्य पशुचारकाणाम् गमनागमनस्य प्रतिबन्धाय दक्षिण-पश्चिम-अफ्रीकायाः केनचित् न्यायाधीशेन आरक्षकेभ्यः एतादृशः एव निर्देशः दत्तः आसीत् -
"यावत् पर्यन्तं काचित् कुस्थितिः न जायते तावत्पर्यन्तम् एतेभ्यः मूलनिवासिभ्यः क्षेत्रे प्रवेष्टुम् अनुमतिपत्रं न दातव्यम् इति । एतस्य आदेशस्य उद्देश्यम् एतद् आसीत् यत् क्षेत्रस्य प्रवेष्टारः मूलनिवासिनः प्रतिबन्धिताः भवेयुः अपि च ते नियन्त्रणे भवेयुः इति तेभ्यः यात्रि-अनुमतिपत्रं न कस्यामपि स्थितौ दातव्यम् इति" ।
' काओकोलैण्ड-परमिट्स्-टू-एंटर' न्यायाधीशेन ऊट्जो कामान्जाब इति एतयोः आरक्षकालय-प्रमुखाभ्यां लिखितं पत्रम्, (24) नवम्बर-मासः (1937) सप्तत्रिंशदधिकनवदशशततमख्रिस्ताब्दः ।'

शोभनानां पशुचारणस्थलानां जलसंसाधनानां च अधिकारक्षेत्रात् बहिर्गमनत्वात् तस्मिन् लघुक्षेत्रे अतीव दुष्प्रभावः तथा च एतस्यां दुस्स्थितौ मासाई-जनाः निपातिताः । एतस्मिन् लघुक्षेत्रे पशुचारणस्य परिणामतः गोचारण-भूमेः स्तरस्य अधःपतनम् आरब्धम् । पशुखाद्यस्य न्यूनता सदैव तत्र भवति स्म । पशूनाम् उदरपूर्तिः कथं स्यात् इति समस्या स्थायिरूपेण जाता ।

3.2 सीमानां पिधानं जातम्

एकोनविंशति-शताब्दे पशुचारकाः गोचारणभूमीः अन्वेषयन्तः सुदूरं यावत् गच्छन्ति स्म । यदा एकस्य स्थानस्य पशुचारण-स्थलानि घासरहितानि जलरहितानि च भवन्ति स्म तदा ते स्वपशूसमूहान् आदाय कमपि अन्यं स्थानं प्रति गच्छन्ति स्म । परन्तु एकोनविंशतिशताब्दस्य अन्तिमदशकेभ्यः औपनिवेशिक-सर्वकारः तेषां गमनागमनविषये अनेकप्रकारकान् प्रतिबन्धान् कर्तुम् आरभत ।

मासायिजनानाम् इव अन्येषां पशुचारकाणाम् अपि विशेषारक्षितक्षेत्राणां सीमासु निगडनं कृतम् । अधुना एते समुदायाः एतेषाम् आरक्षित-क्षेत्राणां च सीमानां पारम् अपारं च न गन्तुं शक्नुवन्ति स्म । एते विशिष्ट-अनुमतिपत्रं विना स्वपशून् आहृत्य बहिः न गन्तुं शक्नुवन्ति स्म । परन्तु अनुमतेः ग्रहणम् अपि सरलं कार्यं नासीत् । एतदर्थं तैः विविध-बाधाः नष्टव्याः भवन्ति स्म अपि च ते पीड्यन्ते स्म । यदि कश्चित् नियमानां पालनं न करोति स्म तर्हि सः कठोरदण्डेन दण्ड्यते स्म । पशुचारकाः आङ्ग्लजनानां क्षेत्रेषु याः विपणयः आसन् तासु विपणिषु अपि तेषां प्रवेशः निषिद्धः । अनेकेषु क्षेत्रेषु तु ते अनेकप्रकारकाणां वाणिज्यिक-कार्याणि अपि न कर्तुं शक्नुवन्ति स्म । बहिर्भागतः आगताः आङ्ग्लीयाः यूरोपीयाः औपनिवेशिकाः अधिकारिणः च तान् भयानकान् नृशंस-स्वभावयुक्तान् च मन्यन्ते स्म । तेषां दृष्टौ ते जनाः एतादृशाः जनाः आसन् यैः सह अल्पः एव व्यवहारः उचितः आसीत् । परन्तु एतैः स्थानीयजनैः सह अधिक-सम्बन्धहीनता अपि न कर्तुं शक्यते स्म । अन्ततः सामग्रीः साधयितुं राजमार्गान् निर्मातुं नगराणि विकसयितुं च आङ्ग्लीयाः कृष्णवर्णीयानां जनानां श्रमे एव विश्वसन्ति स्म ।

नूतनसीमाभिः पशुचारकाणां जीवनम् अतिशीघ्रम् एव परिवर्तितम् । नूतन-बाधानाम् आश्रयेण ते भृशं पीडिताः ते च लघुक्षेत्रेषु आत्मानं काराबद्धान् इव अनुभवितुम् आरब्धवन्तः । एतस्मात् तेषां पशुचारणात्मक-वाणिज्यिक-गतिविध्योः अतीव कुप्रभावः जातः । अधुना पर्यन्तं पशुचारकाः न केवलं पशून् चारयन्ति स्म अपि तु विविधप्रकारकान् उद्योगान् अपि कुर्वन्ति स्म । औपनिवेशिक-शासनस्य अन्तर्गतम् आरोपितानां प्रतिबन्धानां कारणात् तेषां वाणिज्यिक-कार्यस्य पिधानं तु न अभवत्

परन्तु अधुना तस्य अनेकविधं नियन्त्रणं अवश्यमेव कृतम्।

3.3 यदा पशुचारण-स्थलानि शुष्यन्ति

अनावृष्टेः आविश्वं पशुचारकाः प्रभाविताः भवन्ति । यस्मिन् काले वृष्टिः न भवति अपि च पशुचारण-स्थलानि शुष्यन्ति यदि तस्मिन् वर्षे पशवः कमपि हरितघास-पूर्णक्षेत्रं प्रति न नीयन्ते तर्हि तेषां पुरतः दुर्भिक्षस्य सङ्कटम् उत्पद्यते। अतः पराम्परागत-रूपेण पशुचारकाः यायावराः जनाः भवन्ति, ते इतस्ततः भ्रमन्ति। अनेन एव यायावर-जीवनेन ते दुर्भिक्षकालस्य अपि विरोधं कर्तुं पारयन्ति अपि च सङ्कटात् आत्मानं रक्षन्ति।

परन्तु औपनिवेशिकस्य शासनस्य स्थापनायाः परं मासायिजनाः कस्मिंश्चित् निश्चिते क्षेत्रे निगडिताः आसन्। तेषां कृते किञ्चित् क्षेत्रम् आरक्षितम् आसीत् अपि च पशुचारण-स्थलानि अन्वेष्टुं ते इतस्ततः न भ्रमितुं शक्नुवन्ति स्म यतो हि ते तत् कर्तुं ते प्रतिबन्धिताः। ते सम्पन्न-पशुचारणस्थलेभ्यः वञ्चिताः अपि च कस्याश्चित् अर्धशुष्कपट्टिकायाः आश्रयं कृत्वा वसितुं बाध्याः कृताः यत्र शुष्कतायाः आशङ्का सदैव भवति स्म। यतो हि सङ्कटकाले अपि ते जनाः अधुना स्वपशून् आदाय तादृशं स्थानं प्रति न गन्तुं शक्नुवन्ति स्म यत्र ते शोभनं पशुचारण-स्थलं प्राप्तुं शक्नुयुः। अतः शुष्केषु वर्षेषु मासायिजनानाम् अनेके पशवः बुभुक्षया रोगैः च म्रियन्ते स्म। (1930) त्रिंशदधिकनवदशशततमं ख्रिस्ताब्दं यावत् केनचित् निरीक्षणेन अवगतं यत् कीनियायां मासायिजनानां पार्श्वे (7,20,000) विंशतिसहस्राधिकं सप्तलक्षं सङ्ख्याकाः पशवः, (8,20,000) विंशतिसहस्राधिकम् अष्टौ लक्षं मेष्यः अपि च (1,71,000) एकसप्ततिसहस्राधिकलक्षं गर्दभाः आसन्। (1933-1934) त्रयस्त्रिंशदधिकनवदशशततमवर्षात् आरभ्य चतुस्त्रिंशदधिकनवदशशततमवर्षपर्यन्तं तत्र दुर्भिक्षद्वयं जातं तस्मात् अनावृष्टेः परम् एतेषु पशुषु अर्धाधिकाः पशवः मृतवन्तः आसन्।

यथा यथा चरणस्य स्थलं सङ्कुचितम् अनावृष्टेः स्थितिः भयानकी जाता। पौनः पुन्येन जातस्य दुर्भिक्षस्य अनावृष्टेः च कारणात् पशुचारकाणां पशूनां सङ्ख्यायाः अजस्रं पतनम् अभवत्।

3.4 सर्वे जनाः न समानरूपेण प्रभाविताः

औपनिवेशिके काले अफ्रीकायाः अन्येषां स्थानानाम् इव मासायिलैण्ड इत्यस्मिन् अपि आगतैः परिवर्तनैः सर्वे पशुचारकाः समानरूपेण न प्रभाविताः। औपनिवेशिकशासनात् पूर्वं मासायिसमाजः द्वयोः सामाजिकश्रेण्योः विभक्तः आसीत् – वरिष्ठजनरूपेण (ऐल्डर्स) अपि च योद्धृरूपेण (वारियर्स) च। वरिष्ठजनः शासनं सञ्चालयन्ति स्म। समुदाय-सम्बद्ध-विषयेषु विचाराय विमर्शाय महत्त्वपूर्णनिर्णयान् कर्तुं च ते यथाकालं सभायाः आयोजनं कुर्वन्ति स्म। योद्धृषु अधिकतराः युवकाः एव भवन्ति स्म ये प्रामुख्येन युद्धाय समुदायस्य च रक्षणाय सज्जीक्रियन्ते स्म। ते समुदायं रक्षन्ति स्म अपि च अन्येषां समुदायानां च पशून् आहृत्य आनयन्ति स्म। यत्र पशवः एव सम्पत्तिरूपेण भवेयुः तत्र आक्रमणं कृत्वा अन्येषां पशूनाम् आहरणं महत्त्वपूर्णं कार्यं भवति स्म। पृथक् पृथक् पशुचारक-समुदायानां शक्तिः एतादृशैः आक्रमणैः एव निश्चीयते स्म। युवानः योद्धृवर्गस्य भागरूपेण तदा एव स्वीक्रियन्ते स्म यदा ते अन्येषां समुदायानां

चित्रम् 16 – योद्धारः गहनस्य रक्तवर्णस्य शुका इत्येतां चकासमान-मौक्तिकानाम् आभूषणानि धरन्ति स्म अपि च स्टील इत्यस्य नोकयुक्तं पञ्चफुटपरिमितं कुन्तम् अपि ते स्थापयन्ति स्म । अतिसूक्ष्मरूपेण सज्जीकृताः तेषां केशाः गुरू इति वर्णेन रञ्जिताः भवन्ति । उदयन्तं सवितारं सम्माननियितुं ते पूर्वाभिमुखाः तिष्ठन्ति । योद्धारः स्वीयस्य समुदायस्य रक्षां कुर्वन्ति बालकाश्च पशून् चारयन्ति। शुष्के वातावरणे ते योद्धारः बालकाः च द्वौ एव पशून् चारयन्ति। सौजन्यम् – द-मासायि-एसोसिएशन इति।

चित्रम् – 17 – अद्य अपि योद्धा इति भवितुं युवकैः नैकानि अनुष्ठानानि कर्तव्यानि भवन्ति इति । यद्यपि इदं प्रचलनं पूर्ववत् नास्ति । एतदर्थं युवकैः प्रायः मासचतुष्टयं यावत् स्व-समुदायिक-क्षेत्रस्य भ्रमणं करणीयं भवति । एतस्याः यात्रायाः अन्ते ते निरीक्षकाणाम् इव धावित्वा स्व-युद्ध-आखातेषु प्रविशन्ति । एतस्य समारोहस्य अवसरे युवकाः शिथिल-वस्त्राणि धरन्ति अपि आ दिनं नृत्यन्ति । अनेन अनुष्ठानेन सहैव जीवनस्य कञ्चित् नूतनं चरणं प्राप्नुवन्ति । बालिकाभिः एतादृशेषु अनुष्ठानेषु भागः न ग्रहीतव्यः भवति । सौजन्यम् – द मासायि-एशोसिएशन इति ।

पशून् आहृत्य अपि च युद्धे साहसस्य शौर्यस्य च प्रदर्शनं कृत्वा स्वपुरुषत्वं प्रतिष्ठापयन्ति स्म । पुनरपि ते वरिष्ठजनानां मार्गदर्शने अथवा अधीनत्वे एव कार्यं कुर्वन्ति स्म ।

मासायि-सामुदायिक-प्रकरणानां निरीक्षणाय आङ्ग्लसर्वकारेण अनेके एतादृशाः निर्णयाः स्वीकृताः यैः आगामिषु वर्षेषु अनेके गहन-प्रभावाः जाताः । तैः अनेकमासायि-उपसमूहानां प्रमुखाः निश्चिताः आसन् स्व-स्व-समुदायस्य सर्वेषां प्रकरणानां दायित्वं तेभ्यः अर्पितम् आसीत् । ततः परं वरिष्ठजनानां योद्धॄणां च परम्परागत-सत्ता अतीव शिथिला जाता ।

यथा यथा कालः अतीतः, औपनिवेशिक-सर्वकारेण नियुक्ताः प्रमुखाः सम्पत्तेः एकत्रीकरणं कर्तुम् आरब्धवन्तः । तेषां पार्श्वे नियमितः आयः आसीत् येन च ते पशून् सौन्दर्य-प्रसाधनानि भूमिं च क्रेतुं शक्नुवन्ति स्म । ते स्वीयान् निर्धनप्रतिवेशिभ्यः करम् अर्पयितुम् ऋणरूपेण धनं यच्छन्ति स्म । तेषु अधिकतराः परवर्तिकाले नगराणि गत्वा उषितवन्तः अपि च तत्र वाणिज्यम् आरब्धवन्तः । तेषां भार्याः बालाः च ग्रामेषु एव उषित्वा पशूनां पालनं कुर्वन्ति स्म । ते पशुचारणद्वारा अन्यानि कार्याणि कृत्वा च धनं प्राप्नुवन्ति स्म । यदि तेषां पशवः कथञ्चित् विकलिताः भवेयुः तर्हि ते पशून् क्रेतुं शक्नुवन्ति स्म ।

ये पशुचारकाः केवलं स्वपशूनां माध्यमेन जीवनं साधयन्ति स्म तेषां स्थितिः पृथक् आसीत् । तेषां पार्श्वे विपरीतकालस्य अर्थात् विपन्नस्थितेः अपाकरणाय प्रायः साधनानि न भवन्ति स्म । युद्धस्य दुर्भिक्षस्य च काले तेषां सर्वा सम्पत्तिः नष्टा भवति स्म । तदा तैः कार्यस्य प्राप्तये अन्वेषणाय च पार्श्वस्थानां नगराणाम् आश्रयः ग्रहीतव्यः भवति स्म । कश्चित् अङ्गार-प्रज्वालनस्य कार्यम् आरभते स्म अन्यः च किञ्चित् पृथक् कार्यं करोति स्म । येषां भाग्यम् अथवा येषां दैवम् अनुकूलतया फलति स्म ते राजमार्गकार्यं भवननिर्माणकार्यं च प्राप्नुवन्ति स्म ।

अनेन प्रकारेण मासायिसमाजे द्वयोः स्तरयोः परिवर्तनानि जातानि । प्रथमम्, वरिष्ठजनानां योद्धॄणां च मध्ये वयसः आधारितं परम्परागत-अन्तरं पूर्णतया समाप्तिं न गतं स्यात् परन्तु अस्तं व्यस्तम् अर्थात् अव्यवस्थितं तु अवश्यमेव अभवत् । द्वितीयम् – सम्पन्नविपन्नानां पशुचारकाणां मध्ये कश्चित् नूतनः भेदभावः उत्पन्नः ।

निष्कर्षः

अनेन प्रकारेण वयं पश्यामः यत् आधुनिके विश्वे आगतैः परिवर्तनैः विश्वस्य पृथक् पृथक् समुदायेषु विभिन्नाः प्रभावाः जाताः । नूतनैः अधिनियमैः सीमाभिः च तेषां गमनागमनस्य धारा एव परिवर्तिता। यथा यथा पशुचारण-स्थलानि समाप्तानि, पशूनां चारणं किञ्चित् कठिनं कार्यम् अभवत् यानि पशुचारण-स्थलानि अवशिष्टानि आसन् ते अपि अत्यधिक-प्रयोग-कारणात् व्यर्थानि जातानि । शुष्क-वातावरण-काले तेषां समस्याः पूर्वापेक्षया अपि अधिकाः वर्धिताः यतो हि तदा तेषां पशवः अधिकमात्रया मरितुम् आरब्धवन्तः आसन् । अधुना तेषां गमनागमने अनेके प्रतिबन्धाः कृताः आसन् अतः ते नूतन-पशुचारण-स्थलानाम् अन्वेषणम् अपि न कर्तुं शक्नुवन्ति स्म ।

पुनरपि पशुचारकाः परिवर्तमान-कालस्य अनुरूपम् आत्मानं कुर्वन्ति । ते स्वीयस्य वार्षिक-गमनागमनस्य मार्गम् अपि परिवर्तन्ते, अपि च ते पशूनां सङ्ख्याम् अपि न्यूनीकुर्वन्ति, नूतनक्षेत्राणि प्रवेष्टुं यथाशक्यम् आदानं प्रदानं च कुर्वन्ति, अपि च क्षतिपूर्तिराशेः कृते राज्यस्य साहाय्यस्य च कृते सर्वकारं राजनैतिकरूपेण प्रभावयन्ति । ते तादृशेषु क्षेत्रेषु स्वाधिकाराणां रक्षार्थम् अजस्रं सङ्घर्षं कुर्वन्ति यतः तान् निष्कासयितुं सर्वकारीयाः जनाः प्रयत्नं कुर्वन्ति अपि च वनानां संरक्षणस्य प्रबन्धनस्य च स्वीयं भागम् अभियाचन्ते ।

पशुचारकाः अतीतस्य अवशेषरूपेण न सन्ति । ते तादृशाः जनाः न सन्ति येभ्यः आधुनिके विश्वे किमपि स्थानं नास्ति इति । पर्यावरणवादिनः अर्थशास्त्रिणः च अधुना एतत् तथ्यं गभीरतया अवगन्तुम् आरब्धवन्तः यत् यायावर-पशुचारकाणां जीवनशैली विश्वस्य अनेकेषु पर्वतीयक्षेत्रेषु शुष्कक्षेत्रेषु च जीवनस्य यापनाय सर्वाधिकाः उपयुक्ताः सन्ति ।

चित्रम् – 18 – जयपुरस्थे राजमार्गे राइका इति समुदायस्य मेषपालकाः ।
महद्भिः राजमार्गैः व्यापकरूपेण यातायात-साधनानि तद्यथा ट्रक बस इत्यादीनि यानानि चलन्ति तस्मात् मेषपालकाः नूतन-क्षेत्र-गमनस्य यां प्रक्रियाम् अङ्गीकुर्वन्ति सा इति नूतनानुभवरूपेण वर्तते ।

क्रियाविधिः

1. कल्पयन्तु यत् 1950 तमख्रिस्ताब्दीयः कालः अस्ति अपि च षष्टिवर्षीयः राइका इति समुदायस्य पशुपालकः अस्ति। भवान् स्वीयां पौत्रीं बोधयति यत् स्वतन्त्रतायाः परं भवतां जीवने कानि परिवर्तनानि आगतानि। भवान् तां किं बोधयिष्यति ?
2. कल्पनां कुर्वन्तु यत् भवन्तः कयाचित् प्रसिद्धपत्रिकया उपनिवेशवादात् पूर्वम् अफ्रीकायां मासाई-जनानां स्थितेः विषये लेखितुम् उक्ताः। तत् लेखं लिखन्तु तस्मै च सुशीर्षकम् अपि यच्छन्तु।
3. एकादशे त्रयोदशे च चित्रे चिह्नित-पशुचारक-समुदायेषु केषाञ्चित् समुदायानां विषये इतोऽपि सूचनाः एकत्र कुर्वन्तु।

क्रियाविधिः

प्रश्नाः

1.स्पष्टं कुर्वन्तु यत् यायावर-समुदायैः पौन-पुन्येन एकस्मात् स्थानात् अपरं स्थानं प्रति किमर्थं गन्तव्यं भवति ? इदम् अपि बोधयन्तु यत् एतैः अधिनियमैः पशुचारकाणां जीवने के प्रभावाः जाताः ?

- अकृष्टभूमेः नियमावली
- वनाधिनियमः
- अपराधिक-जनजाति-अधिनियमः
- चारणकरः

मासाई-समुदायस्य जनेभ्यः गोचारणस्थलानि किमर्थं परिहृतानि ? कारणं ज्ञापयतु।

4. आधुनिकविश्वेन भारतस्य पूर्व-अफ्रीकीय-पशुचारक-समुदायानां च जीवनशैल्यां यानि परिवर्तनानि उत्पादितानि तेषु अनेकाः समानताः आसन्। एतादृशयोः द्वयोः परिवर्तनयोः विषये लिखन्तु ये भारतीयपशुचारकाणां मासाई-मेषपालकानां च मध्ये समानरूपेण विद्यमाने आस्ताम्।

॥ इति तृतीयः पाठः ॥

॥ सहैव इति पञ्चमोध्यायः ॥

कृषकाः कृषिजीविनः च

गतयोः द्वयोः अध्याययोः भवन्तः वनानां गोचारणस्थलानां च विषये पठन्ति स्म, अपि च तेषां विषये अपि ये एतैः स्रोतोभिः आजीविकां प्राप्नुवन्ति। भवद्भिः झूम इत्यस्य कृषकाणां पशुचारकाणां जनजातीय-समूहानां च विषये पठितम्। भवद्भिः अवगतं यत् कथं वनानां गोचारण-स्थलानां च नियन्त्रणम् आरब्धं तेषां च प्रतिबन्धैः ते जनाः प्रभाविताः ये तेषां संसाधनानाम् आश्रिताः आसन् इति।

अस्मिन् अध्याये भवन्तः विभिन्न-देशानां कृषिजीविनां समुदायानां विषये पठिष्यन्ति इति। अत्र भवन्तः एकतः तु इङ्ग्लैण्डस्य लघुकृषकाणां (कॉटेजर), अमेरिकायाः गोधूम-उत्पादकानां बङ्गप्रान्तस्य च अफेनस्य कृषकाणां विषये सूचनां प्राप्स्यन्ति तत्रैव अपरतः भवन्तः अवगमिष्यन्ति यत् आधुनिककृषेः आरम्भस्य विभिन्नग्रामीणसमुदायानाम् उपरि कीदृशः प्रभावः जातः। इदम् अपि यत् विश्वव्यापि-पूञ्जिवादिना विपण्या सह सम्बन्धेन विश्वस्य पृथक् पृथक् क्षेत्रेषु के प्रभावः भवन्ति। एतेषां विभिन्न-स्थानानां तोलनेन भवन्तः इदम् अपि अवगमिष्यन्ति यत् एतेषां स्थानानाम् अपि इतिहासः परस्परं पृथक् सन् अपि कस्याश्चित् प्रक्रियायाः रूपेण कियत् समानतापूर्णम् आसीत्। आयान्तु एतस्याः यात्रायाः आरम्भम् इङ्लैण्डदेशात् एव कुर्याम यत्र कृषिक्रान्त्याः आरम्भः आसीत्।



1 इङ्ग्लैण्डदेशे आधुनिकक्षेत्रस्य आरम्भः

जूनमासस्य प्रथमदिनाङ्के काचित् घटना प्रवृत्ता । इङ्ग्लैण्डस्य उत्तरपश्चिम-क्षेत्रीयेण केनचित् कृषकेण सहसा दृष्टं यत् तस्य ब्रजे रात्रौ प्रज्वलनात् धान्यतृणादिभिः सह सम्पूर्णं क्षेत्रं ज्वलित्वा भस्मनि परिवर्तितम् । परवर्तिमासेषु एतादृश्यः घटनाः अन्येषु मण्डलेषु अपि घटिताः आसन् । कुत्रचित् केवलं धान्यतृणादिकम् एव ज्वलति स्म कुत्रचित् च सम्पूर्णं फार्महाउस इत्येव भस्मसात् भवति स्म । पुनः अगस्त-मासस्य अष्टाविंशतितमे दिनाङ्के (1830) त्रिंशदधिकाष्टादशशत-तमे च ख्रिस्ताब्दे इङ्ग्लैण्डदेशस्य पूर्व-केण्ट इत्यस्मिन् श्रमिकाः कञ्चित् थ्रेशिग-यन्त्रं त्रोटयित्वा नाशितवन्तः । तदनन्तरं द्वे वर्षे यावत् उपद्रवाः निरन्तरम् अभवन् तेषु भेदनस्य त्रोटनस्य च एतादृश्यः घटनाः सम्पूर्णे इङ्ग्लैण्डदेशे प्रसृताः । तस्मिन् काले तत्र प्रायः 387थ्रेशिंग इति यन्त्राणि त्रोटितानि । कृषकाः आह्वानपूर्णानि पत्राणि प्राप्तुम् आरब्धवन्तः ते आदिष्टाः यत् ते एतेषां यन्त्राणां प्रयोगं न कुर्युः इति यतो हि यन्त्रप्रयोक्तृभिः एतादृशानां यन्त्राणां प्रयोगात् श्रमिकाणाम् आजीविका तेभ्यः कृषकेभ्यः ह्रीयते । अधिकतरेषु क्षेत्रेषु कैप्टेन-स्विंग इति नामधेयस्य जनस्य हस्ताक्षराणि भवन्ति स्म । भूस्वामिनः भीतवन्तः यत् कदाचित् सशस्त्रसमूहः रात्रौ तान् अभिलक्ष्य आक्रमणं न कुर्यात् इति । एतस्मात् कारणात् अनेकैः भूस्वामिभिः तु स्वयन्त्राणि स्वयमेव नष्टीकृतानि । प्रतिक्रियावशात् सर्वकारः दृढं क्रियान्वयनम् अकरोत् । येषु जनेषु सन्देहः आसीत् यत् ते उपद्रवे संलिप्ताः सन्ति ते शीघ्रमेव निगृहीताः । (1976) षट्-सप्तत्यधिकनवदशशत-तमे ख्रिस्ताब्दे जनान् अधिकृत्य अभियोगः चालितः, तत्र नव जनाः मृत्युदण्डेन दण्डिताः (505) पञ्चाधिकपञ्चशतं जनाः देशात् निष्कासिताः तेषु (450) पञ्चाशदधिकचतुःशतं जनाः आस्ट्रेलियादेशं प्रेषिताः । प्रायः (644) चतुश्चत्वारिंशदधिकषट्शतं जनाः कारागारे निपातिताः ।

क्षेत्रेषु विद्यमानं कैप्टन स्विंग इति कश्चित् मिथं नाम आसीत् । तर्हि स्विंग इति नाम्ना उपद्रवकारिणः वास्तविकतायां के आसन् ? ते थ्रेशिंग इति यन्त्राणि त्रोटयितुं किमर्थं संलग्नाः आसन् ? ते कं विषयम् अधिकृत्य विरोधं कुर्वन्ति स्म ? एतेषां प्रश्नानाम् उत्तराणि अवगन्तुम् अस्माभिः अष्टादशे नवदशे च शताब्दे इङ्ग्लैण्डदेशीये कृषिकार्ये जातानि परिवर्तनानि द्रष्टव्यानि भविष्यन्ति ।

नूतनशब्दः

(बाडाबन्दी) व्रजबन्धम् – पारम्परिकायाम् अनाच्छादितभूमौ व्रजकरणस्य ऐतिहासिकप्रक्रिया ।

(कॉमन्स) - पारम्परिक-समाजानां सामूहिक-जल-जङ्गल-भूमयः ।

स्रोतः क

एतादृशानि भय-उत्पादकानि पत्राणि अधिकपरिमाणेन प्रेष्यन्ते स्म । बहुधा एतादृशानां पत्राणां भाषा अतीव शिष्टा भवति स्म अपरञ्च अनेकधा अतीव क्लिष्टभाषायाः अपि प्रयोगः क्रियते स्म । कानिचन पत्राणि अतीव लघूनि भवन्ति स्म । उदाहरणेन अवगच्छामः –

श्रीमन्

वयं भवन्तम् इदं ज्ञापयितुम् इच्छामः यत् यदि भवद्भिः निजं थ्रेशिंग इति यन्त्रं स्वयं न त्रोटितं तर्हि तु वयं स्वीयान् जनान् तत्र प्रेषयित्वा कार्यं कारयिष्यामः ।

सर्वेषां जनानां पक्षतः –

स्विंगः

इ.जे.हाब्सबामः जार्ज-रूदे च , कैप्टेन-स्विंग इत्यस्मात् ।

1.1 मुक्त-क्षेत्राणां कॉमन्स इत्यस्य च कालः

अष्टादश-शताब्दस्य अन्तिमेषु वर्षेषु एकोनविंशतितमस्य शताब्दस्य च आरम्भिके काले इङ्ग्लैण्डस्य ग्रामेषु क्षेत्रेषु अभूतपूर्व-परिवर्तनानि जातानि । पूर्वम् इङ्ग्लैण्डस्य ग्रामीणक्षेत्रं आधिक्येन प्रकटरूपेण भवति स्म । तदा न तु भूस्वामिनां निजसम्पत्तिः आसीत् न च एव तेषां क्षेत्राणां व्रजबन्धनमेव कृतम् आसीत् । कृषकाः स्वग्रामस्य पार्श्वस्थभूमौ एव अन्नस्य उत्पादनं कुर्वन्ति स्म । वर्षस्य आदौ कस्याश्चित् सभायाः आयोजनं क्रियते स्म यत्र प्रत्येकम् अपि जनाय भूमेःभागाः दीयन्ते स्म । भूमेः एतादृशाः भागाः अथवा खण्डाः समानरूपेण उर्वराः न भवन्ति स्म केचन च असङ्घटिताः भवन्ति स्म । आवण्टनकाले प्रयासः अयं भवति स्म यत् प्रत्येकम् अपि कृषकः सुभूमिं कुभूमिं च अपि प्राप्नुयात् । कृषकीयभूमिम् अतिरिच्य सामूहिकभूमिः अपि भवति स्म । कॉमन्स इत्यस्य, इयं सामूहिकभूमिः सर्वेषां ग्रामीणानाम् अधिकारे भवति स्म । तत्र ते स्वपशून् अजाः मेषीः च चारयन्ति स्म, इन्धनकाष्ठानि चिन्वन्ति स्म, भोजनाय कन्दमूलानि

च एकत्र कुर्वन्ति स्म । वनेषु ते मृगयां कुर्वन्ति नदीषु तडागेषु च मत्स्यान् गृह्णन्ति स्म । विपन्नेभ्यः तु सामूहिकभूमिः जीवनस्य साधनरूपेण आधारभूतं साधनं च आसीत् । अस्याः भूमेः बलेन एव ते जनाः स्वीये आये न्यूनतां पूरयन्ति स्वीयान् पशून् च पालयन्ति । यदा कस्मिंश्चित् वर्षे शस्यं नष्टं भवति स्म तदा इयं भूमिः एव तान् सङ्कटात् मोचयति स्म ।

इङ्ग्लैण्डदेशस्य केषुचित् भागेषु मुक्तभूमेः सामूहिकभूमेः च इयम् अर्थव्यवस्था षोडश शताब्दात् एव परिवर्तितुम् आरभत । षोडश-शताब्दे यदा ऊर्णस्य मूल्यं विश्वविपण्यां वृद्धिं गतं तदा सम्पन्नाः कृषकाः ऊर्णस्य उत्पादनं वर्धयितुं प्रयासं कर्तुम् आरब्धवन्तः । एतदर्थं तैः मेषजातेः परिष्कारार्थं श्रेष्ठगोचारणस्थलानाम् आवश्यकता आसीत् । परिणामः अयं जातः यत् सामूहिकभूमेः परिष्कारं कृत्वा तैः अधिग्रहणम् आरब्धम् यतः कस्यचित् एकस्य सम्पत्तिः अपरात् अथवा सामूहिकभूमेः पृथक् भवेत् इति । सामूहिकभूमौ पर्णकुटीरान् कृत्वा अथवा निर्माय ये ग्रामीणाः निवसन्ति स्म ते ततः निष्कासिताः अपि च व्रज-बन्धित-क्षेत्रेषु तेषां प्रवेशः प्रतिबन्धितः । अयम् एव व्रजबन्धनस्य आरम्भः आसीत् ।

अष्टादशशताब्दस्य मध्यकालं यावत् व्रजान्दोलनस्य गतिः अतीव मन्दा आसीत् । आरम्भे अङ्गुलिगण्यैः भूस्वामिभिः एव आत्मना व्रजस्य आरम्भः कृतः आसीत् ।

राज्यस्य चर्चस्य च कापि प्रेरणा अत्र न आसीत् । परन्तु अष्टादश-शताब्दस्य अपरस्मिन् भागे व्रज इति विषयकम् आन्दोलनम् इङ्ग्लैण्डस्य सर्वेषु ग्रामीणक्षेत्रेषु प्रसृतम् । अनेन च आन्दोलनेन इङ्ग्लैण्डस्य भूदृश्यम् आमूलं परिवर्तितम् । (1750) पञ्चाशदधिकसप्तदशशत-तमख्रिस्ताब्दात् आरभ्य (1850) पञ्चाशदधिकाष्टादशशत-तमस्य वर्षाणां काले षष्टिलक्षं एकड़परिमित-भूमौ व्रजाः संयोजिताः । ब्रिटेनस्य संसदा सक्रियभूमिकायाः निर्वहणं निर्वहनं कुर्वता एतादृशेभ्यः व्रजेभ्यः वैधतां प्रदातुं (4,000) चतुःसहस्रम् अधिनियमाः पारिताः ।

स्रोतः ख इति

स्विंग-महोदयेन कठोरभाषया प्रेषितस्य पत्रस्य उदाहरणम् –

श्रीमन्,

भवतः नाम (ब्लैक-बुक) कृष्णदैनन्दिन्याम् अङ्कितस्य हार्ट्स इत्यस्य सूच्यां स्थापितम् । भवान् भवादृशाः अन्ये जनाः च परामृश्यन्ते यत् --- स्वीयं विचारं ज्ञापयन्तु इति ।

भवान् प्रत्येकम् अवसरे जनतायाः विरोधी सिध्यति । भवता यथा करणीयम् आसीत् अधुनापर्यन्तं न तथा भवता कृतम् अस्ति ।

स्विंग इति



चित्रम् – 1 – कैप्टेन-स्विंग-आन्दोलनम् (1830-32)इति ख्रिस्ताब्दस्य काले विभिन्नेषु काउंटिय इत्येतेषु त्रोटितानि थ्रेशिंग इति यन्त्राणि इति ।
ई.जे.हाब्सबामः तथा च जार्ज-रूदे इत्यस्य पुस्तकम् कैप्टन-स्विंग इत्यस्मिन आधारितम् ।

1.2 अन्नं प्रति वर्धमाना अभियाञ्चा

भूमेः व्रजकरणस्य एतादृशी त्वरा किमर्थम् आसीत् ? अपि च, एतादृशस्य व्रजकरणस्य अभिप्रायः कः आसीत् ? नूतनवज्राः पुरातनव्रजेभ्यः कथं भिन्नाः आसन इति । यत्र षोडश शताब्दे व्रजेषु मेषपालनस्य विकासः कृतः तत्रैव अष्टादश-शताब्दस्य अन्तिमेषु वर्षेषु व्रजकरणस्य उद्देश्यम् अन्नोत्पादनस्य वर्धापनम् आसीत् । एतस्य च सन्दर्भः अपि पृथक् आसीत् – कस्यचित् नूतनकालस्य सूचनम् इति । अष्टादश शताब्दस्य मध्यकालात् इङ्ग्लैण्डस्य जनसङ्ख्या तीव्रतया वर्धिता । (1750)पञ्चाशदधिकसप्तदशशत-तमवर्षात् (1900) नवदशशत-तमख्रिस्ताब्दस्य आभ्यन्तरे च इङ्ग्लैण्डस्य जनसङ्ख्या चतुर्गुणिता वर्धिता ।(1750) पञ्चाशदधिकसप्तदशशत-तमे ख्रिस्ताब्दे सम्पूर्णजनसङ्ख्या सप्ततिलक्षम् आसीत् सा च (1850) पञ्चाशताधिकाष्टादशशततमे ख्रिस्ताब्दे (2.1) कोटिपरिमितम् अपि च (1900) नवदशशत-तमे ख्रिस्ताब्दे कोटित्रयपर्यन्तं प्राप्नोत् इति । स्पष्टमस्ति यत् अधुना अधिकस्य अन्नस्य आवश्यकता आसीत् । तस्मिन् एव काले इङ्ग्लैण्डस्य औद्योगिकीकरणम् अपि जायमानम् आसीत् । अनेके जनाः वसितुं कार्यार्थं च ग्रामेभ्यः नगराणि प्रति गन्तुम् आरब्धवन्तः आसन् इति । खाद्यान्नेभ्यः ते विपण्याम् एव आश्रिताः आसन् ।अनेन प्रकारेण नगरीयजनसङ्ख्या वर्धिता तथैव खाद्यान्नानां विपणिः अपि निरन्तरं विकसिता प्रसृता च खाद्यान्नानाम् अभियाञ्चया सहैव तेषां मूल्यानि अपि वर्धितानि ।

अष्टादश-शताब्दस्य उत्तरार्धे फ्रांस-इङ्ग्लैण्डदेशयोः मध्ये युद्धस्य आरम्भः जातः । एतस्मात् कारणात् यूरोपीय-खाद्यान्नानाम् आयात-सहितं वाणिज्यं बाधितम् । परिणामतः इङ्ग्लैण्डदेशे खाद्यान्नानां मूल्यानि अतीव वर्धितानि । अनेन च उत्साहिताः सन्तुष्टाः च भूस्वामिनः स्व-व्रजीकृत-भूमिषु अधिकपरिमाणेन अन्नानाम् उत्पादनं कृतवन्तः । तेषां धनकोषाः धनेन पूर्णानि जातानि अपि च ते व्रजीकरण-अधिनियमस्य पारणस्य क्रियान्वयनाय च संसदं प्रभावितं कृतवन्तः ।



चित्रम् 2 – इङ्ग्लैण्ड्-वेल्स इति अनयोः गोधूममूल्यानां सामान्यप्रमाणम् - 1771-1850 इति ।

नूतनशब्दाः -

(बुशेल) – इति क्षमतायाः परिमापनम्
शिलिङ्ग इति – इङ्ग्लैण्डदेशस्य कस्याश्चित् मुद्रायाः नाम । (20) विंशति-शिलिङ्ग इति = 1पौण्ड इति ।

क्रियाविधिः

(ग्राफ) बिन्दूरेखाचित्रं सावधानं पश्यन्तु । अवजानन्तु यत् मूल्यरेखा (1790) नवत्यधिकसप्तदशशत-तमे दशके कथं वेगेन उद्गच्छति (1815) पञ्चदशाधिकाष्टादश-शततमात् ख्रिस्ताब्दात् परं नाटकीय-प्रकारेण अधः पतितुम् आरभते । किं भवन्तः बिन्दूरेखाचित्रे आगतानां न्यूनाधिकपरिवर्तनानां विषये अवगन्तुं शक्नुवन्ति यत् एतानि कथं भवन्ति ।

चित्रम् -3 – एकोनविंशतिशताब्दस्य आरम्भे सफोक इत्यस्य ग्रामीणक्षेत्रम् ।

आङ्ग्लीय-चित्रकारस्य जॉन कॉन्सटेबल-वर्यस्य कृतिः । कॉन्सटेबलस्य पिता अन्नस्य महान् व्यापारी आसीत् । कॉन्सटेबलस्य बाल्यकालः पूर्व-इङ्ग्लैण्डस्य ग्रामीणक्षेत्रे सफोक इत्यस्मिन् व्यतीतः । एतस्मिन् क्षेत्रे व्रजकरणस्य कार्यम् एकोनविंशति-शताब्दात् बहुपूर्वम् एव पूर्णतां गतम् आसीत् । कॉन्सटेबलेन रचितानि चित्राणि ग्रामीणं मुक्तजीवनं भावपूर्ण-रूपेण प्रदर्शयन्ति । तस्य चित्राणि एतादृशस्य जीवनस्य विषये बोधयन्ति यदा ग्रामस्य सरलम् आनन्ददायकं च जीवनम् अतीतकाले गतम् आसीत् तद् वस्तुतः अधुना प्रायः न लभ्यते स्म, अनधिकृत-क्षेत्राणां च व्रजीकरणं जायते स्म । एतस्मिन् चित्रे वयं क्षेत्रेषु जातान् व्रजान् द्रष्टुं शक्नुम । परन्तु एतस्मात् इदं न ज्ञायते यत् तात्कालिक-भूदृश्यं कथं परिवर्तते स्म । कॉन्सटेबलस्य चित्रेषु सामान्येन वयं परिश्रमशीलां जनतां न पश्यामः । यदि प्रथमे चित्रे च दृष्टिपातं कुर्मः तर्हि अवगच्छामः यत् सफ़ोक इति क्षेत्रं तादृशैः क्षेत्रैः आवृतम् आसीत् यत्र स्विंग-वर्येण उपद्रवाणां काले अत्यधिकानि श्रेशिंग इत्यस्य यन्त्राणि त्रोटितानि आसन् इति ।

1.2 व्रजबन्धनस्य युगम्

इङ्ग्लैण्डस्य इतिहासे (1780) अशीत्यधिकसप्तदशशत-तमात् दशकात् पूर्वतनानां कस्मात् अपि कालात् अधिकः नाटकीयः दृश्यते । इतः पूर्वं प्रायः एतत् भवति स्म यत् जनसङ्ख्यायाः वर्धनात् खाद्यान्न-सङ्कटं गभीरं भवति स्म । परन्तु एकोनविंशति-शताब्दे इङ्ग्लैण्डदेशे एवं न अभवत् । येन वेगेन जनसङ्ख्या वर्धिता तेन एव परिमाणेन खाद्यान्नस्य स्व-आवश्यकतानाम् अशीति-प्रतिशतम् इङ्ग्लैण्डदेशः स्वयम् उत्पादयति स्म । शिष्टः आयातः क्रियते स्म ।

खाद्यान्न-उत्पादने जाता इयं वृद्धिः कृषेः अभियान्त्रिक्यां जातस्य कस्यचित् नूतनस्य परिवर्तनस्य परिणामः न आसीत् । अपरञ्च केवलं नूतनभूमौ कृषिकार्यस्य आरम्भः एव जातः । भूस्वामिभिः मुक्तक्षेत्राणां सार्वजनिक-वनानां पङ्किलभूमेः पशुचारणभूमेः च स्थाने दीर्घाकाराणि क्षेत्राणि निर्मितानि आसन् ।

तस्मिन् कालं यावत् कृषकाः कृष्यर्थं तेषामेव सरल-आभियान्त्रिकीणां प्रयोगं कुर्वन्ति स्म यया अष्टादशशताब्दस्य प्रारम्भे एव कृषकाः (शलजम) शिखाकन्दस्य त्रिपत्र-घासस्य च कृष्यर्थं प्रयोगं कर्तुम् आरब्धवन्तः । ते शीघ्रमेव अनुभूतवन्तः यत् एतैः शस्यैः भूमेः उत्पादकक्षमता वर्धते । तथा च शिखाकन्दं



चित्रम् – 4 – संसदीय-अधिनियमानाम् अन्तर्गतं सार्वजनिकभूमेः व्रजकरणम्, अष्टादश-एकोनविंशति-शताब्दौ ।

ई.जे.हाब्सबामः तथा च जार्ज-रूदे इत्यस्य पुस्तकं कैप्टेन-स्विंग इत्यस्मिन् आधारितम् ।

पशवः अपि रुच्या भक्षयन्ति स्म । अतः ते शिखाकन्दस्य त्रिपत्र-घासस्य च कृषिं नियमितरूपेण कर्तुम् आरब्धवन्तः । परवर्तिभिः अध्ययनैः ज्ञातं यत् एतैः सस्यैः भूमौ नाइट्रोजन इत्यस्य मात्रा अपि वर्धते सा च शस्यवर्धनाय महत्त्वपूर्णा आसीत् । वास्तविकतायां निरन्तरं कृषिकरणेन भूमेः नाइट्रोजन इत्यस्य मात्रा न्यूना भवति यस्मात् कारणात् भूमेः उर्वरता न्यूनीभवति । शिलाकन्दस्य त्रिपत्रघासस्य च कृषिकार्येण भूमौ नाइट्रोजन इत्यस्य मात्रा पुनः वर्धते स्म अपि च भूमिः पुनः उर्वरा भवति स्म । अनेन प्रकारेण एकोनविंशतितम-शताब्दस्य प्रारम्भिकेषु वर्षेषु कृषेः परिष्काराय कृषकाः एतेषाम् उपायानाम् एव नियमितरूपेण प्रयोगम् आरब्धवन्तः ।

अधुना व्रजकरणम् इति किञ्चित् दीर्घकालिकस्य निवेशस्य रूपेण दृश्यते स्म अपि च मृदायाः उर्वरतां वर्धयितुं जनाः शस्य-चक्रस्य प्रयोगं कृत्वा शस्यानि वपन्ति स्म । व्रजकरणेन सम्पन्नाः भूस्वामिनः स्व-कृषि-उत्पादनं वर्धितवन्तः अनेन ते विपण्याः आवश्यकतानुरूपम् अन्नानि उत्पादयितुं साफल्यम् अपि प्राप्तवन्तः ।

1.3 निर्धनानां का स्थितिः जाता ?

व्रजकरणेन भूस्वामिनां धनकोशाः तु पूरिताः परन्तु तेषां जनानां किम् अभवत् ये आजीविकायाः कृते कॉमन्स इत्यस्मिन् आश्रिताः आसन् ? व्रजत्वात् व्रजान्तरिकभूमिः भूस्वामिनां सम्पत्तिरूपेण भवति स्म । निर्धनाः अधुना जङ्गले ज्वाल्यानि कष्ठानि न एव आहर्तुं शक्नुवन्ति स्म, न च सामूहिकभूमौ स्वपशून् एव चारयितुं शक्नुवन्ति स्म । ते न तु अधुना सेवफलानि अथवा कन्दानि मूलानि च चेतुं शक्नुवन्ति स्म, न चैव मांसार्थं मृगयां कर्तुं शक्नुवन्ति स्म । अधुना तेषां पार्श्वे शस्यकर्तनात् परम् अवशिष्ट-स्थाणु-रूपाणि सङ्ग्रहणरूपविकल्पः अपि नासीत् । प्रत्येकम् अपि वस्तुनि भूस्वामिनाम् अधिग्रहणं जातम् आसीत्, प्रत्येकम् अपि वस्तुनः विक्रयणं भवति स्म, मूल्यम् अपि अत्यधिकं भवति स्म, तस्मात् निर्धनानां सामर्थ्यं तत् क्रेतुं तु न आसीत् एव ।

यत्र कुत्रापि अत्यधिकं व्रजकरणम् अभवत्, विशेषतया इङ्ग्लैण्डस्य मध्यवर्तिक्षेत्रेषु पार्श्वस्थेषु प्रान्तेषु च निर्धनाः भूमेः अधिकारात् वञ्चिताः अथवा बहिष्कृताः । तेषां पारम्परिक-अधिकाराः शनैः शनैः नश्यमानाः आसन् । स्व-अधिकारात् वञ्चिताः भूमेः च बहिष्कृताः जनाः आसन् ते वृत्तिम् अन्वेष्टुम इतस्ततः गन्तुम् आरब्धवन्तः । मध्यवर्ति-क्षेत्रेभ्यः ते दक्षिणप्रान्तान् प्रति गन्तुम् आरब्धवन्तः। मध्यक्षेत्रे सर्वाधिका सघनकृषिः भवति स्म, तत्र च कृषिजीवि-श्रमिकाणां पर्याप्ता अभियाञ्चा आसीत् । परन्तु कुत्रापि निर्धनाः कामपि सुरक्षितां नियमितां च वृत्तिं न प्राप्नुवन्ति स्म ।

पुरातनकाले सामान्यरूपेण श्रमिकाः भूस्वामिभिः सहैव निवसन्ति स्म । ते स्वामिभिः सह भोजनं कुर्वन्ति स्म अपि च आवर्षं तेषां सेवां शुश्रूषां च कुर्वन्ति स्म । इयं परम्परा 1800तमख्रिस्ताब्दं यावत् समाप्तिं गच्छति स्म । अधुना श्रमिकेभ्यः कार्यस्य वेतनं दीयते स्म तत्र च कार्यम् अपि शस्यकर्तनकाले एव भवति स्म । भूस्वामिनः स्व-आयं वर्धयितुं श्रमिकाणां दैनन्दिनपारिश्रमिके न्यूनतां कर्तुम् आरब्धवन्तः । कार्यम् अनिश्चितं भवति स्म, वृत्तिः असुरक्षिता अपि च आयः अस्थिरः आसीत् । वर्षस्य व्यापकभागे निर्धनानाम् अवृत्तिक-जनानां सङ्ख्या च निरन्तरं वर्धिता ।

क्रियाविधिः

महिलासु बालेषु च कः प्रभावः जातः ?
गोपालनस्य इन्धनकाष्ठानां च एकत्रीकरणस्य सार्वजनिकभूमेः फलानां बदरीणां च आहरणात् पूर्वं प्रायः महिलाः बालाः च एव कुर्वन्ति स्म ।
किं भवन्तः वक्तुं शक्नुवन्ति यत् व्रजकरणस्य बालकानां स्त्रीणां च पारस्परिकसम्बन्धेषु कः प्रभावः जातः स्यात् ?

1.4 थ्रेशिंग इति यन्त्रस्य विकासः प्रयोगः च

येषु दिनेषु नेपोलियनः इङ्ग्लैण्डं विरुध्य युद्ध्यते स्म, तेषु दिनेषु खाद्यान्नस्य मूल्यम् अत्यधिकम् आसीत् तदा कृषिजीविनः स्वीयं प्रभूतम् उत्पादनं वर्धितवन्तः । श्रमिकाणां सङ्ख्या न्यूना न भवेत् इति भयात् ते विपण्यां नूतनानि थ्रेशिंग इति यन्त्राणि आधिक्येन क्रीतवन्तः । कृषिजीविनः प्रायः श्रमिकाणाम् आलस्यात् मदिरापानात् श्रमचौर्य-स्वभावात् च पूर्वं दुःखिनः आसन् तस्मात् ते तान् दूषयन्ति स्म ।ते अनुभूतवन्तः यत् यन्त्रकारणात् श्रमिकाणां साहाय्यस्य आवश्यकता नास्ति ते तत्र तेषाम् आश्रिताः न भविष्यन्ति इति ।

युद्धस्य समाप्तेः परम् अनेके सैनिकाः स्वग्रामान् क्षेत्राणि च प्रत्यागतवन्तः । अधुना तेषां कृते नूतना वृत्तिः अपेक्षिता आसीत् । परन्तु तस्मिन् काले एव अन्नस्य आयातकार्यं वर्धितम् अन्नस्य च मूल्यं न्यूनं जातं कृषिकार्यं च मन्दं जातम् । (द्वितीये चित्रे मूल्यानां रेखाबिन्दुचित्रं पश्यन्तु) । व्यग्रैः भूस्वामिभिः कृषियोग्यभूमेः न्यूनता कृता अपि च ते अभियाचनां कृतवन्तः यत् अधुना खाद्यान्नस्य यः आयातः भवति तस्य प्रतिबन्धः स्यात् इति । ते श्रमिकाणां दैनिकीं सङ्ख्यां च न्यूनीकृतवन्तः । निर्धनाः धनिकाः च जनाः कार्यम् अन्वेष्टुं प्रतिग्रामं भ्रमन्ति स्म अपि च येषां पार्श्वे अस्थायिकार्यम् इव किमपि कार्यम् आसीत्, ते अपि कदाचित् आजीविकारहिताः न भवेयुः इति आशङ्किताः भवन्ति स्म ।

एषः एव सः कालः आसीत् यदा ग्रामे एव कैप्टन-स्विंग इत्यस्य कारणात् उपद्रवाः जाताः । निर्धनानां दृष्टौ थ्रेशिंग-यन्त्रं दुस्समयस्य प्रतीकभूता आसीत् ।

निष्कर्षः

अनेन प्रकारेण इङ्ग्लैण्डे आधुनिककृषेः आगमनात् अनेकविधानि परिवर्तनानि आगतानि । मुक्तक्षेत्र-व्यवस्था समाप्ता कृषकाणां च पारम्परिक-अधिकाराः अपि समाप्ताः । धनाढ्याः कृषकाः उत्पादने वृद्धिं कृत्वा अन्नं च विपण्यां विक्रीय पर्याप्तं लाभम् अर्जितवन्तः ते अपि अधुना समृद्धाः जाताः । ग्रामीणाः निर्धनाः बहुसङ्ख्यायां नगराणि प्रति पलायितुम् आरब्धवन्तः । केचन जनाः मध्यवर्ति-क्षेत्राणि परित्यज्य दक्षिणप्रान्तान् प्रति गन्तुम् आरब्धवन्तः यत्र आजीविका-प्राप्तेः सम्भावना आसीत् केचन च अन्यानि नगराणि प्रति गन्तुम् आरब्धवन्तः । श्रमिकाणाम् आयस्य कोऽपि आधारः अधुना न आसीत् अपि च वृत्तिः असुरक्षिता जाता अपि च आजीविकायाः स्रोतांसि अपि अस्थिराणि जातानि ।

॥ इति प्रथमः पाठः ॥

स्रोतः ग इति

व्रजकरणात् सार्वजनिकभूमौ कृषकाणाम् अधिकारः समाप्तः जातः एतस्मिन् सन्दर्भे कश्चित् कृषकः स्थानीय-भूस्वामिने इदं पत्रम् अलिखत् -

यदि कश्चित् निर्धनः जनः सार्वजनिकभूमेः भवतः एकाम् अवीं नयेत् तर्हि अधिनियमीयव्यवस्था तम् अधिकृत्य क्रियान्वयनं करिष्यति इति । परन्तु यदि भवान् शताधिक-निर्धनानां अजमेषाणां चरणस्य भूमिम् आहरति तर्हि अधिनियमः किमपि न करोति । यदि निर्धनः भवतः किमपि वस्तु अपहरेत् तर्हि सः मृत्युदण्डेन दण्ड्यते इति अपरञ्च यदि भवान् तस्य जनस्य आजीविकायाः एव अपहरणं करोति तर्हि भवन्तं विरूध्य वैधानिकदण्डव्यवस्था न भवति ? निर्धनः इदं तथ्यम् इत्थम् अवगच्छेत् - -- यत् अधिनियमः तेषां हिते नास्ति सर्वकारः च तेषां कृते किमपि न करोति ?

जे.एम.नीसन,कॉमनर्स इति, कॉमन-राइट्स, एनक्लोजर्स-एण्ड-सोशल-चेंज इति,1700-1820(1993) इत्यस्मात् उद्धृतम् ।

स्रोतः घ इति

एतस्य विपरीतम् अनेके लेखकाः व्रजकरणस्य लाभानाम् अतीव प्रशंसां कृतवन्तः ।

मुक्तक्षेत्राणां व्रजबन्धितभूमेः च मध्ये कामपि तुलनां न कर्तुं शक्यते । व्रजकरणस्य व्यवस्था निश्चितरूपेण मुक्तक्षेत्रव्यस्थायाः अपेक्षया श्रेष्ठाः अस्ति । मुक्तक्षेत्राणां प्रकरणे कृषिजीवी शृङ्खलाभिः बद्धः इव भवति । सः मृदायां मूल्येषु च किमपि परिवर्तनं न आनेतुं शक्नोति । तस्य स्थितिः तादृशस्य अश्वस्य इव भवति यः अन्यैः अश्वैः सह बद्धः भवति । अर्थात् तेभ्यः पृथक् भूत्वा न किमपि कर्तुं शक्नोति अपि च तेषां मध्ये एव कूर्दनादिकं कर्तुं शक्नोति ।

जान-मिडिल्टनः, अष्टादशशताब्दस्य कश्चित् लेखकः ।

क्रियाविधिः

इति स्रोतसं घ इति स्रोतसं च पठित्वा निम्नलिखितप्रश्नानाम् उत्तराणि यच्छन्तु -

- ग इति स्रोतसि कृषकः किं वक्तुम् इच्छति ?
- जान-मिडिल्टन-वर्यः कं तर्कम् उपस्थापयितुम् इच्छति ?
- इति 1.1 खण्डात् 1.4 इति खण्डपर्यन्तं पुनः पठित्वा मुक्तक्षेत्राणां पक्षे अथवा विपक्षे प्रदत्त-तर्काणां सारं सङ्क्षेपेण प्रस्तुवन्तु । भवन्तः कं तर्कम् उचितम् इति अवगच्छन्ति ?

2 “रोटिकायाः कण्डोलः” सैकताः अकृष्टा च भूमिः

आयान्तु, अधुना किञ्चित् अटलाण्टिकस्य पारम् अमेरिकादेशं प्रति चलेम । आयान्तु, पश्येम यत् अत्र आधुनिककृषेः विकासः कथम् अभवत् , कथम् अमेरिकादेशः वैश्विक-समुदायस्य कृते रोटिकायाः कण्डोलरूपेण विकासं प्राप्तवान् अपि च एतेषां परिवर्तनानाम् अमेरिकादेशस्य ग्रामीणेषु जनेषु कः प्रभावः जातः ?

यदा अष्टादश-शताब्दस्य अन्ते इङ्ग्लैण्डदेशे सामूहिकभूमेः व्रजीकरणं क्रियते स्म तदा पर्यन्तम् अमेरिकादेशे व्यापकपरिमाणेन स्थायि-कृषिकार्यस्य विकासः न जातः आसीत् । अत्र अशीतिकोटि-एकड-परिमित-भूमौ वनानि आसन् अपि च षष्टि-कोटि-एकड-परिमित-भूमेः केवलं घासः जायते स्म । पञ्चमात् चित्रात् भवन्तः तात्कालिकस्य प्राकृतिक-हरितिमायाः विषये अनुमानं कर्तुं शक्नुवन्ति ।



चित्रम् – 5 – श्वेत-आप्रवासिनां पश्चिमप्रसारात् पूर्वम् अमेरिकायां वनानां घासस्य च समतल-क्षेत्राणां स्थितिः ।

बेकरस्य पुस्तकम् इकनॉमिकज्योग्रफ़ी, खण्डं - 2 इति, (1926) षड्-विंशत्यधिकनवदशशत-तमे ख्रिस्ताब्दे सङ्कलितात् एग्रीकल्चरल-रीजन्स आफ नार्थ अमेरिका इत्यस्मात् पुस्तकात् उद्धृतम् । वनानां प्रायः अर्धं घासक्षेत्राणां च तृतीयः अंशः कृष्यर्थं स्वच्छं जातम् अस्ति अर्थात् तद् रिक्तं जातम् अस्ति । मानचित्रे भवन्तः एकोनविंशति-शताब्दस्य प्रारम्भिककाले अमेरिकायाः विभिन्नानां समुदायानां मूलनिवास-क्षेत्राणि अपि द्रष्टुं शक्नुवन्ति।

चित्रम् – 5 – श्वेत-आप्रवासिनां पश्चिमप्रसारात् पूर्वम् अमेरिकायां वनानां घासस्य च समतल-क्षेत्राणां स्थितिः ।
बेकरस्य पुस्तकम् इकनॉमिकज्योग्रफ़ी, खण्डं - 2 इति, (1926) षड्-विंशत्यधिकनवदशशत-तमे ख्रिस्ताब्दे सङ्कलितात् एग्रीकल्चरल-रीजन्स आफ नार्थ अमेरिका इत्यस्मात् पुस्तकात् उद्धृतम् । वनानां प्रायः अर्धं घासक्षेत्राणां च तृतीयः अंशः कृष्यर्थं स्वच्छं जातम् अस्ति अर्थात् तद् रिक्तं जातम् अस्ति । मानचित्रे भवन्तः एकोनविंशति-शताब्दस्य प्रारम्भिककाले अमेरिकायाः विभिन्नानां समुदायानां मूलनिवास-क्षेत्राणि अपि द्रष्टुं शक्नुवन्ति।

तस्मिन् काले अमेरिकीय-भूदृश्यस्य अधिकतरभागः श्वेत-आदिवासिनां नियन्त्रणे नासीत् । (1780) अशीत्यधिकसप्तदशशततमं दशकं यावत् श्वेतामेरिकीयानां वस्तयः निवासाः वा पूर्वतटस्य कस्याञ्चित् लघुसङ्कीर्णां पट्टिकां यावत् सीमिताः आसन् । यदि भवन्तः तस्मिन् काले अमेरिकायाः यात्रां प्रति अगमिष्यन् तर्हि भवन्तः अमेरिकायाः मूलनिवासिनां बहून् समूहान् तत्र अलप्स्यन्त । एतेषु केचन यायावराः आसन् अपि च केचन स्थायिरूपेण निवसन्ति स्म । अनेके समूहाः केवलं मृगया खाद्यपदार्थान् च सङ्गृह्य मत्स्यान् च गृहीत्वा आजीविकां साधयन्ति स्म अपरञ्च केचन जनाः कणिशस्य फलिनां तमालस्य कूष्माण्डस्य च कृषिं कुर्वन्ति स्म । अन्ये समूहाः पशूनां ग्रहणे कुशलाः आसन् अपि च षोडश-शताब्दात् एव वनबिलावस्य फर इत्येतं यूरोपीय-व्यापारिभ्यः विक्रीणन्ति स्म । पञ्चमे चित्रे अष्टादश-शताब्दस्य प्रारम्भिकवर्षेषु विभिन्नसमुदायानाम् अवस्थितिः दर्शिता अस्ति ।

चित्रम् – 6 – (1920) विंशत्यधिकनवदशशततमे ख्रिस्ताब्दे अमेरिकायाः कृषिक्षेत्राणां स्थितिः ।
(1920) विंशत्यधिकनवदशशततमे इति दशके प्रकाशिते बेकर इत्यस्य पुस्तके इकनॉमिक-ज्यॉग्राफ़ी इत्यस्मिन् सङ्कलित-लेखानाम् आधारेण ।

नवदश-शताब्दस्य अन्तिमकाले इदं भूदृश्यं सर्वथा परिवर्तितम् आसीत् । श्वेताः अमेरिकीयाः जनाः पश्चिमभागं प्रति प्रसृताः आसन् ते तत्रत्यभूमिं च कृषियोग्यां कृतवन्तः । अनया प्रक्रियया ते मूलसमुदायान् तेषां स्थानेभ्यः विस्थापितान् कृत्वा पृथक् पृथक् कृषकीयक्षेत्राणि निर्मितवन्तः आसन्। कृषि-उत्पादनस्य वैश्विकविपण्याम् अमेरिकादेशस्य अतीव प्रभावः जातः । एतादृशं परिवर्तनं कथं जातम् ? अमेरिकावासिनः एते नूतनाः जनाः के आसन् ? कृषिविषयकस्य अनेन प्रसारेण अमेरिकादेशस्य मूलनिवासिनाम् अर्थात् भारतीयमूलस्य जनसमुदायस्य जीवने कः प्रभावः जातः ।

2.1 पश्चिमं प्रति प्रसारः गोधूमस्य च कृषिः

अमेरिकादेशे कृषिविस्तारस्य सम्बन्धः श्वेतजनानां पश्चिमक्षेत्रं गत्वा तत्र च ये वासं कृतवन्तः तैः जनैः सह अस्ति । (1775) पञ्चसप्तत्यधिकसप्तदशशत-तमख्रिस्ताब्दात् आरभ्य (1783) त्र्यशीत्यधिकसप्तदशशततमं ख्रिस्ताब्दं यावत् जातस्य अमेरिकीय-स्वतन्त्रता-सङ्ग्रामस्य संयुक्तराज्य-अमेरिकायाः सङ्घटनस्य अथवा निर्माणात् परं श्वेत-अमेरिकीयाः जनाः पश्चिमक्षेत्राणि प्रति गन्तुम् आरब्धवन्तः । टॉमस-जेफ़र्सन इत्यस्य (1800) अष्टादशशत-तमे ख्रिस्ताब्दे अमेरिकादेशस्य राष्ट्रपतेः नियुक्तेः प्राक् प्रायः सप्तलक्षं श्वेताः जनाः, सङ्कीर्णमार्गैः अपलेशियन-अधित्यक-क्षेत्रं गत्वा तत्र च उषितवन्तः । पूर्वतटात् यदा दृश्यते स्म तदा अमेरिकादेशः सम्भावनापूर्णः दृश्यते स्म । तत्रत्यानि अकृष्यक्षेत्राणि निर्जनस्थानानि च कृषियोग्यभूमौ परिवर्तितुं शक्यन्ते स्म, वनेभ्यः इन्धनकाष्ठानां निर्यातः कर्तुं शक्यते स्म, चर्मणः कृते पशूनां मृगया कर्तुं शक्यते स्म, अपि च उपत्यकाभिः सुवर्णस्य खनिजपदार्थानां च आहरणं पर्याप्तमात्रया



चित्रम् – 7 – (1775) पञ्चसप्तत्यधिकसप्तदशशत-तमवर्षात् आरभ्य (1920) विंशत्यधिकनवदशशततमे वर्षाभ्यन्तरे श्वेत-अप्रवासिनां पश्चिमं प्रति प्रसारः ।

कर्तुं शक्यते स्म । परन्तु एतस्य अभिप्रायः आसीत् यत् पूर्वम् अत्रत्याः निवासिनः बहिर्भागे निष्कासनीयाः । संयुक्तराज्य-अमेरिकायाः सर्वकारः अपि (1800) अष्टादश-शत-तमात् ख्रिस्ताब्दात् अनन्तर-तम-दशकेषु औपचारिक-नीतिं निर्माय अमेरिकीय-भारतीय-जनानाम् आदौ मिसीसिपी-नद्याः पारं परवर्तिनि च काले इतोऽपि पश्चिमं प्रति बलात् निष्कासनम् आरब्धम् । अनया प्रक्रियया अनेकानि युद्धानि सञ्जातानि, मूलनिवासिनां जनानां संहारः कृतः तेषां च ग्रामाः अपि पश्चात् प्रज्वालिताः । भारतीयाः अपि प्रतिरोधं कृतवन्तः ते अनेकयुद्धेषु विजयम् अपि प्राप्तवन्तः परन्तु अन्ततः ते सन्धिं कर्तुं बाध्याः जाताः स्वगृहाणि परित्यज्य च ते पश्चिमं प्रति पलायनं कर्तुम् अपि बाध्याः जाताः ।

मूलनिवासिनां स्थाने नूतनप्रवासिनः वसितुम् आरब्धवन्तः । प्रवासिनां बहवः समूहाः निरन्तरम् आगताः ।

अष्टादशशताब्दात् पूर्वतनं दशकं यावत् एते प्रवासिनः अपलेशियन इति अधित्यकायाम् उषितवन्तः आसन् अपि च (1820-1850) विंशत्यधिकाष्टादशशततमवर्षात् पञ्चाशताधिकाष्टादशशततमवर्षाभ्यान्तरे ते मिसीसिपी इति उपत्यकाम् अपि प्रविष्टवन्तः । ते वनानि कर्तयित्वा स्थाणून् च उत्पाट्य क्षेत्राणां भवनानां च निर्माणं कृतवन्तः । पुनः तैः अवशिष्ट-वनानि अपि कर्तितानि तत्र च ते व्रजीकरणं कृतवन्तः । एतस्यां भूमौ ते कणिशस्य गोधूमस्य च कृषिं कर्तुम् आरब्धवन्तः ।

आरम्भिकेषु वर्षेषु एतस्याम् उर्वराभूमौ कृषकाः सुशस्यानि उप्तवन्तः । यदा एकस्मिन् स्थाने विद्यमान-भूमौ कृषेः उत्पादनं न्यूनं भवति स्म तदा कृषकाः उत्तमभमिम् अन्वेष्टुं नूतनानि स्थानानि प्रति गच्छन्ति स्म । मिसीसिपी-नद्याः पारे स्थितेषु विशालक्षेत्रेषु प्रवासिन्याः जनसङ्ख्यायाः प्रसारः (1860) षष्ट्यधिकाष्टादशशततमात् ख्रिस्ताब्दात् परं जाता घटना अस्ति । परवर्तिदशकेषु इदं समग्रक्षेत्रम् अमेरिकादेशस्य गोधूमोत्पादनस्य किञ्चित् व्यापकक्षेत्रं जातम् आसीत् । अधुना किञ्चित् गोधूम-उत्पादक-कृषकाणां विषये विस्तरेण वार्तालापः

चित्रम् – 8 – सीमान्तक्षेत्रेषु साड इति गृहम् ।
घासक्षेत्राणां स्वच्छताकाले आप्रवासिकृषकाः एतादृशानि गृहाणि निर्मान्ति स्म । एतस्मिन् क्षेत्रे गृहाणां निर्माणाय काष्ठानाम् अभावः आसीत् ।
सौजन्य- फ्रेड-हल्ट-स्ट्रैंड-हिस्ट्री-इन-पिक्चर्स-क्लेक्शन, एनडीआईआरएस-एन-डीएसयू इति फारगो इति ।

नूतन-शब्दः

(साड) घासस्य मृदायाः च मिश्रणम् ।

भवेत् । पश्यामः यत् एतैः कृषकैः केन प्रकारेण घासस्य क्षेत्राणि अमेरिकायाः रोटिकायाः कण्डोल इति रूपेण परिवर्तितानि । ते कासां कासां समस्यानां साम्मुख्यं कर्तुं बाध्याः जाताः अपि च एतस्याः प्रक्रियायाः के परिणामाः आसन् ?

चित्रम् 9 - अवकाशकाले विश्रान्तिं कुर्वाणः कश्चित् कृषक-कुटुम्बः ।
डकोता इत्यस्य विशाल-क्षेत्राणां नवदश-शताब्दस्य प्रथमदशके विलिखितं चित्रम् ।
(सौजन्यम् – फ्रेड-हल्ट-स्ट्रैंड-इन-पिक्चर्स-क्लेक्शन, एन-डीआई-आर-एस-एन-डीएसयू.फारगो) इति ।

2.2 गोधूमोत्पादक-कृषकाः

एकोनविंशतिशताब्दस्य अन्तिमवर्षेषु अमेरिकायाः गोधूमोत्पादने अभूतपूर्वा वृद्धिः अभवत् । तस्मिन् काले अमेरिकायाः नगरवासिनां जनसङ्ख्या निरन्तरं वर्धते स्म अपि च निर्यातविपणिः अपि अनुदिनं प्रसारं गच्छति स्म । अभियाञ्चायाः वर्धनेन सहैव गोधूमस्य मूल्यानि अपि वर्धन्ते स्म । एतस्मात् गोधूमकृषकाः उत्साहिताः आसन् तस्मात् ते अपि बाहुल्येन गोधूमोत्पादनं प्रति आधिक्येन गतवन्तः । रेलवे-संस्थायाः प्रसारेण खाद्यान्नानि गोधूमोत्पादकक्षेत्रेभ्यः निर्याताय पूर्विषु तटेषु नयनं सरलम् अभवत् । विंशति-तम-शताब्दस्य अनारम्भात् पूर्वं गोधूमस्य याचनायाः वृद्धिः अभवत्, प्रथमविश्वयुद्धकाले च गोधूमस्य वैश्विकविपण्याः इतोऽपि वर्धनम् अभवत् । रूसीयगोधूमस्य आपूर्तिविषयकः प्रतिबन्धः जातः तस्मात् कारणात् यूरोपीयाः जनाः गोधूमाय अमेरिकादेशस्य एव आश्रिताः आसन् इति । अमेरिकायाः राष्ट्रपतिः विल्सनः कृषकान् आहूतवान् यत् ते समयानुगुणं वर्तन्ताम् इति , राष्ट्रपतिः अवदत् यत् पर्याप्तं गोधूमस्य उत्पादनं कुर्वन्ति अनेन एव वयं जेष्यामः इति ।

(1910) दशाधिक-नवदश-शततमे ख्रिस्ताब्दे अमेरिकायाः 4.5 कोटि-एकड़-परिमितभूमौ गोधूमस्य कृषिः क्रियते स्म । नव वर्षेभ्यः परं गोधूम-उत्पादनस्य क्षेत्रफलं वर्धित्वा 7.4कोटि-एकड़परिमिता अर्थात् प्रायः (65) पञ्चषष्टि-प्रतिशतम् अधिकम् अभवत् । एतेषु अधिकतरवृद्धिः विशाल-समतलीय-क्षेत्रेषु अभवत् आसीत् यत्र प्रतिदिनं नूतनेषु क्षेत्रेषु कृषिकार्यं क्रियते स्म । गोधूम-उत्पादनं बहुधा महतां कृषकाणाम् अधिग्रहणे आसीत् अनेकेषां महतां कृषकाणां पार्श्वे तु सहस्रद्वयं सहस्रत्रयं वा एकड़परिमिता भूमिः भवति स्म ।



चित्रम् – 10 – सचल-हलम्
सावधानं पश्यन्तु यत् हलस्य अग्रभागः एकस्मिंन् लघुचक्रे लग्नः अस्ति । एतस्मिन् पृष्ठभागे कश्चित् हस्तकला भवति स्म यस्य साहाय्येन हलम् अग्रे पृष्ठे च चालयितुं शक्यते स्म । एतस्मिन् हले अश्वाः अथवा वृषभाः योज्यन्ते स्म ।(पश्यन्तु चित्रम् - 13) ।

2.3 नूतनप्रविधेः आगमनम्

गोधूमोत्पादने जाता विलक्षणवृद्धिः नूतनप्रविधेः परिणामरूपेण आसीत् । नवदश-शताब्दे नूतनप्रवासिनः यथा यथा क्रमशः भूमेः अधिग्रहणं कृतवन्तः तथा तथा ते नूतन-आवश्यकतानाम् अनुगुणं स्व-प्रविधौ अपि परिवर्तनं कृतवन्तः । यदा ते जनाः मध्यपश्चिमयोः घासस्य क्षेत्राणि प्राप्तवन्तः तदा तेषां ते साधारणहलाः शक्तिहीनाः जाताः येषां हलानां प्रयोगं ते पूर्वस्मिन् तटे निरन्तरं कुर्वन्ति स्म । एतस्याः दृढभूमेः कर्षणाय अनेकविधानि हलानि विकासितानि । स्थानीयस्तरे विकासितेषु एतेषु हलेषु कानिचन हलानि द्वादशफुट-परिमितानि दीर्घाकाराणि च भवन्ति स्म । एतेषां हलानाम् अग्रिमभागः लघुचक्रेषु आधारितः भवति स्म, तानि हलानि च षड् अश्वाः अथवा वृषभाः कर्षन्ति स्म । विंशतिशताब्दस्य आरम्भे विशाल-समतलीय-क्षेत्राणां कृषकाः एतस्याः दृढभूमेः कर्षणाय ट्रैक्टर इत्यस्य अपि च डिस्क – इत्यनेन युक्तहलानां साहाय्येन गोधूमस्य कृषिं कर्तुं सज्जां कुर्वन्ति स्म ।

शस्यस्य पाकात् परं तस्य कर्तनस्य क्रमः भवति स्म । (1830) त्रिंशताधिकाष्टादशशततम-वर्षात् पूर्वं शस्यस्य कर्तनाय लवित्रस्य प्रयोगं कुर्वन्ति स्म ।



चित्रम् 11 – साइरस-मैक्कार्मिक-द्वारा (1831) एकत्रिंशताधिकाष्टादशशततमे ख्रिस्ताब्दे रचितं रीपर इति ।

चित्रम् – 12 – नवदशशताब्दस्य मध्यकालात् पूर्वं एतादृशानाम् एव लवित्राणां प्रयोगः घासस्य कर्तनाय क्रियते स्म ।

चित्रम् – 13 – यान्त्रिकयुगात् पूर्वम् अकृष्टभूमिः कृष्यर्थम् इत्थं सज्जीक्रियते स्म ,
चित्रे द्वादश-हलानां समूहे अनेके अश्वाः युक्ताः दृश्यन्ते ।
(सौजन्यम् – फ्रेड-हल्टस्ट्रैंड्-हिस्ट्री-इन-पिक्चर्स्-क्लेक्शन, (एन-डीआई-आर-एस-एन-डीएसयू.फारगो) ।

चित्रम् – 14 – ड्रिलयन्त्रैः ट्रैक्टरयन्त्रैः च बीजानां वपनम् । उत्तरी-डकोटा इत्यस्य कृषिक्षेत्रभवनम् । 1910 ।
अत्र त्रीणि ड्रिलयन्त्राणि पैकरयन्त्राणि च दृश्यन्ते । एतादृशानि यन्त्राणि ट्रैक्टर इतियन्त्रम् अनुबध्यन्ते स्म । ड्रिलयन्त्राणि 10-12 फुटलम्बतराणि भवन्ति स्म । प्रत्येकं ड्रिल इत्यस्मिन् (20) विंशति-परिमितं डिस्क इति संलग्नानि भवन्ति स्म । डिस्क इत्यस्य कार्यं भूमेः वपनाय सज्जीकरणाय च करणीयं भवति स्म । पैकर्स इत्याख्य-यन्त्राणि उप्तबीजानाम् उपरि मृत्पातनस्य कार्यं कुर्वन्ति स्म । चित्रे सूदूरं यावत् प्रसृता रोपितभूमिः दृश्यते ।
सौजन्यम् – एफ-ए-पजानदक-चित्र-सङ्ग्रहः, एन-डी-आई-आर-एस-एन-डीएस-यू.फारगो इति ।

चित्रम् – 15 – उत्तर-डकोटा इत्यस्य विशालक्षेत्राणां स्वच्छताकार्यक्रमः, 1910 ।
एतस्मिन् चित्रे मिनियापोलिस-वाष्प-ट्रैक्टर इति दर्शितम् अस्ति । ट्रैक्टर-यानस्य पृष्ठे जॉनडीरे इत्याख्यं हलम् बद्धम् अस्ति अपि च तस्मिन् धातोः फाल इति संलग्नाः सन्ति । एतेषां फाल इत्येतेषां साहाय्येन भूमेः भेदनं सरलतया कर्तुं शक्यते स्म । घासस्य दृढमूलानाम् उत्पाटनाय एतादृशानि हलानि अतीव सहायकानि आसन् । यन्त्रस्य पृष्ठे गभीर-कुण्डानि द्रष्टुं शक्यन्ते । वामतः भूमौ दूरं यावत् घासः प्रसृतः अस्ति । एतेषां यन्त्राणां प्रयोगः गोधूमोत्पादकाः महान्तः कृषकाः एव कर्तुं पारयन्ति स्म । (सौजन्यम् – फ्रेड-हल्टस्ट्रैंड –हिस्ट्री इन पिक्चर्स-क्लेक्शन, एन-डी-आई-आर-एस-यू. फारगो इति) ।

अयं कञ्चित् एतादृशं कार्यम् आसीत् तत् कार्यं शताधिकाः स्त्रियः पुरुषाः च सहैव नियुज्य कुर्वन्ति स्म। परन्तु (1831) एकत्रिंशताधिकाष्टादशशततमे ख्रिस्ताब्दे सायरस-मैक्कार्मिकः एतादृशस्य एव उपकरणस्य आविष्कारम् अकरोत् यत् एकस्मिन् एव दिने एतावत् कार्यं करोति स्म तावत् कार्यं तु (16) षोडश-जनाः लवित्रेण सह कर्तुं शक्नुवन्ति स्म। अनेन प्रकारेण विंशतिशताब्दस्य आरम्भात् प्राक् अमेरिकायाः अधिकतराः कृषकाः शस्यस्य कर्तनाय कम्बाइन्ड-हार्वेस्टर्स इत्यस्य प्रयोगं कर्तुम् आरब्धवन्तः आसन्। एतेषां यन्त्राणां साहाय्येन (500) पञ्चशतम् एकडपरिमितक्षेत्रस्य कर्तनस्य कार्यं केवलं पक्षाभ्यन्तरे एव कर्तुं शक्यते स्म।

विशाल-क्षेत्राणां धनिकानां कृषकाणां कृते इदं यन्त्रम् अतीव महत्त्वपूर्णम् आसीत्। गोधूमस्य मूल्यम् अधिकं जायते स्म। तस्य आवश्यकता एव समाप्तिं न गच्छति स्म। एतेषां यन्त्राणां प्रयोगेण भूमेः विशालखण्डेषु सस्यस्य कर्तनस्य स्थाणु-निष्कासनस्य घासस्य अपसारणस्य भूमेः पुनः कर्षणाय खननाय बीज-वपनाय क्षेत्रस्य सज्जीकरणाय च क्रियते स्म एतैः च कार्यम् अतीव सरलं जातम् आसीत्। एतत् सर्वं कार्यं यन्त्राणि अतीव वेगेन कुर्वन्ति स्म। एतदर्थं मानव-श्रमस्य अपि अतीव आवश्यकता न भवति स्म। विद्युता चलन-शीलानि एतानि यन्त्राणि एतावन्ति उपयोगीनि आसन् यत् तेषां साहाय्येन केवलं चत्वारः जनाः एव मिलित्वा एकस्याम् ऋतौ (2000) द्विसहस्रं परिमितात् एकड़भूमेः (4000) चतुःसहस्रम् एकड़परिमितभूमौ शस्यस्य उत्पादनं कर्तुं शक्नुवन्ति स्म।

2.4 निर्धन-जनतायाः दशा

एतैः यन्त्रैः निर्धन-कृषकाणां वृत्तेः नाशः कृतः। अनेके कृषकाः अनया आशया एतानि यन्त्राणि क्रीतवन्तः आसन् यत् गोधूमस्य मूल्ये पूर्वापेक्षया वेगेन वृद्धिः पूर्ववत् एव आसीत्। एतादृशेभ्यः कृषकेभ्यः वित्तकोशाः सारल्येन ऋणं यच्छन्ति स्म। परन्तु ऋणस्य प्रत्यर्पणम् अतीव कठिनम् आसीत्। यदा कृषकाः ऋणं प्रत्यर्पयितुं समर्थाः न भवन्ति स्म तदा तेषां भूमयः तेभ्यः परिह्रियन्ते स्म। अनेन अभिप्रायः स्पष्टः आसीत् यत् कृषकैः नूतनस्य कार्यस्य अन्वेषणं करणीयं भवति स्म।

परन्तु एतस्मिन् काले आजीविकायाः प्राप्तिः काठिन्येन भवति स्म। विद्युता सञ्चालित-यन्त्राणाम् आगमनेन श्रमिकाणाम् आवश्यकता अतीव न्यूना जाता। अनेन सहैव (1920) विंशत्यधिक-नवदश-शततम-दशकस्य मध्यकालं यावत् नवदश-शताब्दस्य अन्तिमवर्षेषु विंशतितम-शताब्दस्य आरम्भिकवर्षेषु च आर्थिकतीव्रता समाप्ता आसीत्। महायुद्धात् परम् उत्पादनस्य स्थितिः इयं जाता यत् विपणिः गोधूमेन पूर्णा आसीत् परन्तु क्रेतारः अन्वेषणेन अपि न लभ्यन्ते स्म। अधिकतर-कृषकाणां कृते अयं सङ्कटकालः आसीत्। गोधूमस्य भाण्डागाराणि वर्धन्ते स्म। भाण्डागाराणि खाद्यान्नेन पूरितानि भवन्ति स्म। स्थितिः तावत्पर्यन्तं गता आसीत् यत् भाण्डागारेषु स्थापित-अन्नानि पशून् जनाः भोजयन्ति स्म। गोधूमस्य समर्थित-मूल्यानां पतनं जातम् आसीत् तस्मात् विपणिः नष्टा जाता आसीत्। (1930) त्रिंशदधिक-नवदश-शततमे दशके यस्याः महामन्दतायाः अर्थात् अपचितेः प्रायः चर्चा भवति स्म तस्याः पृष्ठभूमौ एताः एव परिस्थितयः कार्यं कुर्वन्ति स्म। एतस्याः मन्दतायाः प्रभावः प्रायः सर्वत्र दृश्यते स्म।

चित्रम् 16 – पश्चिमकंसास इत्यत्र कृष्ण-झञ्झावातः, अप्रैल्-मासस्य चतुर्दशदिनाङ्कः (1935) पञ्चत्रिंशदधिकनवदशशततमः ख्रिस्ताब्दः।

2.5 'रोटिकायाः कण्डोलतः' 'सैकतस्य कटोरिकां' यावत्

विशालक्षेत्रेषु गोधूमस्य सघन-कृषि-द्वारा अनेकाः समस्याः प्रादुर्भूताः। (1930) त्रिंशदधिक-नवदश-शततमे दशके दक्षिणस्य समतल-क्षेत्रेषु झञ्झावातानाम् आरम्भः जातः। एतेषां

झञ्झावातानाम् उत्तुङ्गता (7,000)सप्तसहस्रं फीटपरिमितात् आरभ्य (8,000)अष्टौ सहस्रं फीटपरिमितं यावत् भवति स्म । एते पङ्किलाः झञ्झावाताः भवन्ति स्म अतः सर्वत्र महान् विनाशः जायते स्म। (1930) त्रिंशदधिकनवदशशत-तमस्य वर्षस्य सम्पूर्णदशकम् एव एतादृशैः झञ्झावातैः आक्रान्तम् आसीत् । एतस्मिन् सम्पूर्णे काले एतादृशं किमपि दिनं नासीत् यस्मिन् सैकत-झञ्झावातैः विनाशः न कृतः स्यात् इति सम्पूर्णे वर्षे एव एतादृशी स्थितिः आसीत् इति। यथा एव गगने तमः सञ्जायते स्म तदा सैकताः एतादृशाः झञ्झावाताः सम्पूर्णानि नगराणि क्षेत्राणि च सर्वतः आवृण्वन्ति स्म । झञ्झावातात् सर्वम् अन्धकारमयं जायते स्म । फुप्फुसेषु धूलिकणाः पङ्कः च प्रविशति स्म तस्मात् अत्यधिकाः पशवः मृताः। सैकत-झञ्झावातैः सर्वाणि क्षेत्राणि भिन्नानि भवन्ति स्म अपि च तेषां प्रान्तभागाः विदीर्णाः भवन्ति स्म। इदं सैकतं नद्याः तले अनेन प्रकारेण संश्लिष्टं भवति स्म यत् मत्स्याः श्वासोच्छवासम् अपि न कर्तुं शक्नुवन्ति स्म । समतलक्षेत्रेषु सर्वत्र चटकानां पशूनां च अस्थयः विकीर्णानि भवन्ति स्म। (1920) विंशत्यधिकनवदशशततमे दशके अधुना गोधूमस्य उत्पादनम् आधिक्येन कर्तुं ट्रैक्टरयानानि यन्त्राणि च अधुना सैकत-चयेषु परिवर्तितानि तस्मात् तानि सर्वथा नष्टानि । एतानि यन्त्राणि तावता परिमाणेन नष्टानि यत् अधुना एतेषां पुनः समीकरणम् अपि न भवितुं शक्नोति स्म।

एतस्य विनाशस्य कारणं किम् आसीत् ? सैकताः झञ्झावाताः किमर्थम् उत्पन्नाः ? झञ्झावात-उत्पत्तेः एकं कारणं तु एतत् आसीत् यत् (1930) त्रिंशदधिकनवदशशत-तमस्य दशकस्य आरम्भिकवर्षेषु अनावृष्टिः जाता आसीत् । अनेकानि वर्षाणि यावत् अवृष्टेः कारणात् तापमानः निरन्तरं वर्धितः। परन्तु सैकतस्य एते सामान्याः झञ्झावाताः कृष्णवर्णीयानां भयानक-झञ्झावातानां रूपे एतस्मात् कारणात् परिणताः यतो हि भूमेः कस्मिंश्चित् विशाले भूभागे निरन्तरं कृषिकार्यं कृतम् इति तस्मात् कारणात् भूमेः उपरि तलं पर्याप्तं भिन्नं विदीर्णं च । भूमौ घासस्य चिह्नानि अपि न आसन् । एते कृषकाः ट्रैक्टरयानस्य साहाय्येन एतां भूमिं गोधूमस्य कृष्यर्थं सज्जीकुर्वन्ति स्म । सैकत-झञ्झावाताः एतस्मात् एव असन्तोलनस्य कारणात् उत्पन्नाः आसन् । इदं सम्पूर्णं क्षेत्रं सैकते कस्मिंश्चित् विशालकण्डोले परिवर्तितम् इति । अर्थात् समृद्धेः स्वप्नः काचित् भयावहा वास्तविकता इति जाता आसीत् । प्रवासिनः अनुभवन्ति स्म यत् ते सम्पूर्णां भूमिं स्वाधीनां कृत्वा तां गोधूमस्य शोभन-शस्यरूपेण परिवर्तयिष्यन्ति इति अपि च कोटिपतयः भवन्ति इति। परन्तु त्रिंशत्तमे दशके ते एतत् तथ्यम् अवगतवन्तः यत् पर्यावरणस्य सन्तोलनस्य सम्माननं करणीयम् इति आवश्यकम् अस्ति इति।

चित्रम् – 17 – ड्राउट-सर्वायवर्स इति – एलेक्जैंडर-होग इत्यस्य रेखाचित्रम् (1936)। होगः स्वचित्रेषु सैकतैः झञ्झावातैः जायमानं विनाशं मृत्युताण्डवं च दर्शयति । लाइफ़ इति पत्रिकया प्रकाशितम् आसीत् यत् होगः सैकत-कटोरिकायाः चित्रकारः अस्ति इति।

॥ इति द्वितीयः पाठः ॥

3 भारतीयाः कृषकाः अफेनस्य च कृषिः

आयान्तु, अधुना भारतं प्रति गच्छामः पश्यामः च यत् अष्टादश-शताब्दस्य अन्तिमेषु वर्षेषु नवदश-शताब्दस्य च आरम्भे भारतस्य ग्रामीण-क्षेत्रेषु किं भवति स्म।

यथा भवन्तः जानन्ति, प्लास्याः युद्धात् (1757) परं भारते शनैः शनैः आङ्ग्लीयशासनं स्थापितम् जातम् । औपनिवेशिशासनस्य काले भारतस्य ग्रामीणक्षेत्रेषु आमूलं परिवर्तनानि आगतानि। आङ्ग्लसत्तायै राजस्वं सर्वकारीयस्य आयस्य कश्चित् महत् स्रोतः आसीत् इति । सर्वकारः स्व-आयं वर्धापयितुं भूराजस्वस्य काचित् नियमितां व्यवस्थां कर्तुम् इच्छति स्म। एतस्याः नीतेः अन्तर्गतं राजस्वस्य मितेः कृषिकार्य-विस्तारस्य प्रयासाः कृताः । क्रमशः यथा कृषिक्षेत्रस्य विस्तारः जातः तथा तथा वनानि पशुचारण-स्थलानि च न्यूनानि जातानि। कृषकाः पशुचारणस्थलेषु च आश्रिताः समुदायाः एतस्मात् कारणात् अनेकसमस्याभिः ग्रस्ताः जाताः । आङ्ग्लसत्तायाः अधिनियमानाम् अन्तर्गतम् अधुना कृषकाः वनानां स्वैच्छिकप्रयोगं न कर्तुं शक्नुवन्ति स्म । सर्वकारेण वनानाम् अन्येषां च प्राकृतिकसंसाधनानाम् उपयोगे अनेकविधाः प्रतिबन्धाः स्थापिताः आसन्। कृषकैः राजस्वम् अर्पणीयम् इति कारणात् कृषकाः सदैव अवसादग्रस्ताः भवन्ति स्म।

औपनिवेशिके काले भारतस्य ग्रामीणक्षेत्रैः विश्वविपण्याः आवश्यकतानुसारम् अनेकेषां नूतन-शस्यानाम् उत्पादनं प्रारब्धम् । नवदश-शताब्दस्य आरम्भिकेषु वर्षेषु नीलसदृशानां व्यवसायिक-शस्यानां कृषिः एतस्याः एव अन्ताराष्ट्रिय-आवश्यकतायाः परिणामतः आरब्धा आसीत् । शताब्दस्य उत्तरार्धं यावत् अत्रत्याः कृषकाः इक्षोः कार्पासस्य जूट (पटसन इत्यस्य) गोधूमस्य एतादृशानि एव निर्यात-आधारितानि शस्यानि उत्पादयितुम् आरब्धवन्तः आसन्। एतानि शस्यानि यूरोपस्य नगरीयजनसङ्ख्यायाः आवश्यकताम् इङ्ग्लैण्ड-स्थितस्य लङ्काशायरस्य मैनचेस्टरस्य च वस्त्रोद्योगानाम् आवश्यकताः पूरयितुं च उत्पाद्यन्ते स्म।

भारतीय-कृषकाणाम् अनेन अन्ताराष्ट्रिय-वाणिज्येन व्यापारेण च सह सम्बद्धतायाः अनुभवः कीदृशः आसीत् इति, एतत् तथ्यं वयम् अफेनस्य कृषेः माध्यमेन अवगमनस्य प्रयासं करिष्यामः इति। अनेन वयं कृषकजनेषु औपनिवेशिक-शासनस्य के प्रभावाः जाताः इति अवगन्तुं साहाय्यं प्राप्स्यामः । सहैव वयम् इदम् अपि अवगमिष्यामः यत् एतस्मिन् काले उपनिवेशेषु विपणिव्यवस्था केन प्रकारेण कार्यं करोति स्म।

3.1 चायस्य रुचिः – चीनदेशेन सह वाणिज्यम्

भारते अफेन-उत्पादनस्य इतिहासः इङ्ग्लैण्डस्य चीनस्य च पारस्परिक-वाणिज्येन घनिष्ठरूपेण सम्बद्धः अस्ति । अष्टादश-शताब्दस्य अन्तिमवर्षाणां काले ईस्ट-इण्डिया-समवायः चीनतः चायं कौशेयं च क्रीत्वा इङ्ग्लैण्डदेशे तयोः विक्रयणं करोति स्म । चायस्य लोकप्रियतायाः वर्धनेन सह चायस्य वाणिज्यम् अनुदिनं महत्त्वं गतम् । (1785)पञ्चाशीत्यधिक-सप्तदश-शत-तमख्रिस्ताब्दस्य नातिदूरे इङ्ग्लैण्डदेशे 1.5 कोटि-पौण्डपरिमितस्य चायस्य आयातः क्रियते स्म। (1830) त्रिंशदधिकाष्टादशशत-तमं ख्रिस्ताब्दं यावत् इयं सङ्ख्या एककोटि-पौण्ड-परिमितं यावत् प्राप्नोत्। वास्तविकतायां तत्कालं यावत् ईस्ट-इण्डिया-कम्पनी इत्यस्य लाभस्य आयस्य वा महान् भागः चायस्य वाणिज्यात् एव उपजायते स्म।

अस्मिन् वाणिज्ये एका समस्या आसीत् यत् इङ्ग्लैण्डदेशे तस्मिन् काले एतादृशस्य कस्यापि वस्तुनः उत्पादनं न क्रियते स्म यस्य विक्रयणं चीनस्य विपण्यां कर्तुं शक्येत इति। चीनस्य मञ्चू इति नामकः शासकः वैदेशिकवणिजः सन्देहदृष्ट्या पश्यति स्म । शासकाः भीताः आसन् यत् वणिजः स्थानीय-राजनीतौ हस्तक्षेपं करिष्यन्ति शासकसत्तायां च बाधां जनिष्यन्ति । निष्कर्षरूपेण वदामः चेत् मञ्चूशासकाः वैदेशिक-वस्तुभ्यः वस्तुभ्यः चीनदेशीयानि वाणिज्य-द्वाराणि उद्घाटयितुं न इच्छन्ति स्म।

अन्ततः एतादृश्यां स्थितौ पश्चिम-देशानां वणिजः चायस्य वाणिज्यं कथं निरन्तरं कर्तुं शक्नुवन्ति स्म। वाणिज्यं नियमितरूपेण भवेत् इति काचित् महती समस्या आसीत्। वणिजः चायस्य प्रतिदाने रजत-नाणकानि प्रयच्छन्ति स्म। रजतस्य निर्यातः इति इङ्ग्लैण्डदेशे सम्मानदृष्ट्या न दृश्यते स्म। एतत्करणम् इङ्ग्लैण्डस्य कोशागारस्य रिक्तीकरणम् एव आसीत्। इङ्ग्लैण्डदेशे एषः कश्चित् सार्वजनिकचिन्तायाः विषयः जातः आसीत्। जनानां मनःसु इयं भावना दृढा जायमाना आसीत् यत् कोषागारे रिक्ते सति देशे निर्धनतायाः विस्तारः भविष्यति अपि च राष्ट्रिय-सम्पत्तिः अपि अपहृता भविष्यति। अस्मात् कारणात् वणिजः रजतस्य स्थाने अपरं विकल्पम् अन्वेष्टुं प्रयासरताः आसन् । ते कस्यचित् एतादृशस्य वस्तुनः अन्वेषणं कुर्वन्ति स्म यस्य विक्रयणं चीन-विपण्यां कर्तुं शक्येत इति।

अफेन इति कश्चित् एतादृशः एव उत्पादः आसीत् । चीनदेशे अफेनस्य आरम्भः षोडश-शताब्दस्य प्रारम्भे पुर्तगालिभिः कृतः आसीत् परन्तु अफेनस्य



चित्रम् – 18 – त्रिकोणीय-वाणिज्यम् इति।
आङ्ग्लवणिजः भारतात् अफेनं नीत्वा चीनदेशे विक्रीणन्ते स्म चीनदेशात् इङ्ग्लैण्डदेशं प्रति चायस्य निर्यातं कुर्वन्ति स्म । भारत-इङ्ग्लैण्डदेशयोः मध्ये द्विपक्षीयं वाणिज्यं भवति स्म । नवदश-शताब्दस्य आरम्भे भारतात् इङ्ग्लैण्डं प्रति जायमाने हस्तशिल्पस्य निर्याते पतनं जातः, एतस्य च स्थाने असाधित-सामग्र्याः (कौशेयस्य कार्पासस्य च) तथा च खाद्यान्नानां निर्यातः वर्धितः । इङ्ग्लैण्डदेशः स्व-निर्मितसामग्रीं भारते प्रेषयितुम् आरब्धवान् परिणामतः भारतस्य हस्तशिल्पोत्पादानाम् अपि ह्रासः आरब्धः।

प्रयोगः मुख्यतः औषधिरूपेण क्रियते स्म । अनेकेषु औषधेषु एतस्य प्रयोगः क्रियते स्म। चीनस्य शासकाः अफेनस्य आसक्तिम् अभिलक्ष्य चिन्तिताः आसन्। तत्रत्याः शासकाः औषधम् अतिरिच्य अफेनस्य उत्पादने विक्रयणे च प्रतिबन्धं स्थापितवन्तः आसन् इति । परन्तु राजकीय-प्रतिबन्धात् अनन्तरम् अपि अष्टादश-शताब्दस्य मध्ये पश्चिमस्य वणिजः चीनदेशे अफेनस्य अवैधं वाणिज्यम् आरब्धवन्तः । पश्चिमस्य वणिजः चीनस्य दक्षिण-पूर्व-जलपोत-स्थानकेषु अफेनम् आनयन्ति स्म अपि च ततः स्थानीय-मध्यस्थानाम् अथवा सहायकानां माध्यमेन देशस्य आन्तरिकभागान् प्रति प्रेषयन्ति स्म । (1820) विंशत्यधिकाष्टादशशततमस्य ख्रिस्ताब्दस्य समीपे अफेनस्य प्रायः (10,000) दशसहस्रं क्रेट इति अवैधरूपेण चीनं प्रति आनीयन्ते स्म। पञ्चदशवर्षाणाम् अनन्तरम् अवैधानिकप्रकारेण आनीयमानस्य एतस्य अफेनस्य मात्रा (35,000) पञ्चत्रिंशत् सहस्रं क्रेट इत्यस्य सङ्ख्यायाः पारे गता आसीत्।

क्रियाविधिः

मानचित्रे प्रदर्शितानां शरचिह्नानाम् अनुसारं बोधयन्तु यत् कस्मात् देशात् कस्य वस्तुनः निर्यातः कं देशं प्रति च भवति स्म।

चित्रम् – 19 – चीनदेशात् भारतदेशं प्रति आगतस्य जलपोतस्य चित्रम् ।
थॉमस-डेनियलस्य कृतिः । डेनियलः स्वभातृव्येन विलियम-डेनियलेन सह (1786)षडाशीत्यधिकसप्तदशशत-तमे ख्रिस्ताब्दे भारतम् आगतवान् । तौ द्वौ अपि आदौ चीनदेशं गतवन्तौ । तौ तत्र कानिचन दिनानि उषित्वा कैण्टन-दक्षिणचीनमार्गेण च भारतं प्राप्तवन्तौ । तेषां जलपोतः भारतस्य कस्मिंश्चित् जलपोतस्थानके पञ्जीकृतम् आसीत् । परन्तु अनेन जलपोतेन पूर्वदेशैः सह वाणिज्यं क्रियते स्म । चीनेन सह अवैध-वाणिज्याय एतादृशानाम् एव जलपोतानां प्रयोगः क्रियते स्म ।

स्रोतः च इति

(1839) एकोनचत्वारिंशदधिकाष्टादशशत-तमे ख्रिस्ताब्दे चीनस्य शासकः, लिन-जे-शू इत्येतं कैंटनस्य विशेषायुक्तरूपेण नियुक्तवान् । लिन-जे-शू-वर्याय अफेनस्य वाणिज्ये प्रतिबन्धस्य दायित्वं दत्तम् आसीत् । सः (1839) एकोनचत्वारिंशदधिकाष्टादशशत-तम-ख्रिस्ताब्दस्य वसन्तर्तौ कैंटनं प्राप्तवान् । जे-शूवर्यः पदासीने सति अपि अफीमस्य वाणिज्ये संलग्नाः (1600) षोडश-शतं जनाः आसन् तान् सः निगृहीतुम् आदिष्टवान् इति । अपि च सः (11,000) एकाधिकदशसहस्रं पौण्डपरिमितम् अफेनम् अधिकृतवान् इति । तदनन्तरं लिन-जे-शू-वर्यः वैदेशिक-शिल्पशालाः आदिष्टवान् यत् ते स्वीयम् अफेनस्य भाण्डागारं रिक्तं कुर्युः इति । एतस्य आदेशात् परम् अफेनस्य (20,000) विंशतिसहस्रं (क्रेट) चतुष्कोणीयकण्डोलानि नष्टीकृतानि । जे-शू-वर्यस्य कैटन इत्यस्मिन् विदेशिवाणिज्ये प्रतिबन्धात् इङ्ग्लैण्डः चीनं विरुध्य युद्धस्य घोषणाम् अकरोत् । अफेनयुद्धे (1837-42) चीनः पराजयं प्राप्तवान् अपि च सः कञ्चित् अपमानजनकं सन्धिं स्वीकर्तुं बाध्यः जातः । सन्धेः प्रतिभूतीनाम् अनुसारम् अफेनस्य वाणिज्याय वैधानिकमान्यता प्रदत्ता अपि च चीनस्य वाणिज्यिक-द्वाराणि विदेशिवाणिज्याय उद्घाटितानि । युद्धात् पूर्वं लिन-महोदय-द्वारा महामहिष्यै लिखितस्य पत्रस्य कश्चन अंशः अत्र प्रस्तुतः -

चीने ये जनाः अफेनस्य क्रयणं विक्रयणं च कुर्वन्ति स्म अथवा तस्य सेवनं कुर्वन्ति स्म ते मृत्युदण्डेन दण्डनीयाः । यदि वयं अफेनविक्रेतॄणाम् एतेषां नृशंसजनानाम् अपराधानां निरीक्षणं कुर्याम अपि च तेषां गतिविधिभिः देशस्य याः हानयःसन्ति तासां विषये देशस्य जनतां वदामः निरीक्षणं च कुर्याम तर्हि एतादृशानां जनानां कृते मृत्युदण्डः समुचितः एव प्रतिभाति न कुतश्चित् असाधुरिति प्रतिभाति ।

भवतां देशः चीनात् षष्टिसहस्रं सप्ततिसहस्रं वा ली(ली-त्रयम् इति एकमीलसमं भवति) इति परिमितं दूरम् अस्ति । ततः अपि एतादृशानां नृशंसजनानां जलपोताः अफेनस्य वाणिज्याय चीनं प्रति आयान्ति अपि च प्रभूतं लाभम् आयं च अर्जयन्ति इति । चीनस्य सम्पदः एते नृशंसवणिजः स्वहितार्थं दोहनं कुर्वन्ति । अस्यार्थः अयमस्ति यत् एतैः नृशंसवणिग्भिः अर्जितधनं वास्तविकतायां चीनस्य सम्पत्तिः अस्ति । एतादृशानां जनानां अस्मिन् विषये कोऽपि अधिकारः नास्ति यत् एतस्य वाणिज्यस्य प्रतिवर्ते ते चीनस्य जनतां विषाक्त-औषधं सेवयेयुः । अहम् एतत् प्रष्टुम् इच्छामि यत् भवतां नैतिकता क्व गता अस्ति । अहं श्रुतवान् यत् इङ्ग्लैण्डदेशे अफेनस्य सेवने दृढः प्रतिबन्धः अस्ति । एतस्य कारणम् इदम् अस्ति यत् भवतां देशः अफेनस्य कुप्रभावान् अवगच्छति । यदि भवन्तः स्वदेशस्य हानिं न कर्तुम् इच्छन्ति तर्हि अन्येषां देशानां हानिं कर्तुम् अपि भवताम् अधिकारः नास्ति । कामं, चीनदेशः एतया विभीषिकया ग्रस्तः किमर्थम् अस्ति ?
स्रोतः – सूयू-तेंगः, जॉनफ़ेयरबैंकः च, चाइनाज़-रेस्पान्स-टू-द-वेस्ट इति (1954) ।

अनेन प्रकारेण इदम् अभवत् यत् यत्र इङ्ग्लैण्डदेशे चीनात् आयातं चायं जनानां मध्ये महतीं प्रसिद्धिं प्राप्तुम् आरभत तत्रैव चीनस्य जनता अफेने आसक्ता जाता। एषा आसक्तिः समाजस्य सर्वेषां जनानाम् आसीत्- आपणिकानां सर्वकारीय-कर्मचारिणां सैनिकानाम् उच्चवर्गीयाणां जनानां भिक्षुकाणां च आसीत्। (1839) एकोनचत्वारिंशदधिकाष्टादशशततमे ख्रिस्ताब्दे कैण्टनस्य विशेषायुक्तस्य लिन-जे-शू-महोदयस्य अनुसारं चीने चत्वारिंशत् लक्षं जनाः अफेनस्य सेवनं कुर्वन्ति स्म। कैंटन-निवासिनः कस्यचित् आङ्ग्लचिकित्सकस्य अनुसारं प्रायः एककोटिः विंशतिलक्षं च जनाः अफेने प्रसक्ताः जाताः। एकतः चीनदेशः अफेनसेविनां जनानां देशः जातः तत्रैव इङ्ग्लैण्डस्य चाय-वाणिज्यम् अनुदिनं वृद्धिं प्राप्नोति स्म। अफेनस्य अनेन अवैध-वाणिज्येन प्राप्तराशेः प्रयोगः चायस्य क्रयणाय क्रियते स्म।

क्रियाविधिः

कल्पनां कुर्वन्तु यत् चीनस्य शासकाः भवन्तं प्रति अवदन् यत् अफेनस्य दुष्प्रभावाः के के सन्ति इति तेषां विषये एकं पत्रं सज्जीकुर्वन्तु इति। अवगन्तुं प्रयासं कुर्वन्तु यत् अफेनस्य सेवनस्य मनुष्ये के के प्रभावाः जायन्ते। एकं पत्रं सज्जीकुर्वन्तु अपि च तस्मै आकर्षकं शीर्षकम् अपि यच्छतु इति।

3.2 आङ्ग्ल-वणिजः अफेनं कुतः प्राप्नुवन्ति स्म ?

अफेनस्य वाणिज्ये भारतीय-कृषकाणां भूमिकायाः आरम्भः एतस्मात् एव आरभते। बङ्गविजयात् परम् आङ्ग्लीयाः स्वाधीनभूमौ अफेनस्य कृषिम् आरब्धवन्तः। यथा क्रमशः चीने अफेनस्य विपणिः विस्तारं गता तथा तथा बङ्गस्य जलपोतेभ्यः अफेनस्य निर्यातः अपि वर्धितुम् आरब्धवान्। (1767) सप्तषष्ट्यधिकसप्तदशशत-तमख्रिस्ताब्दात् पूर्वं भारतात् केवलं (500) पञ्चशतं सङ्ख्याकाः मञ्जूषाः (द्वि मन इति समं) अफेनस्य निर्याताः क्रियन्ते स्म। केवलं चत्वारि वर्षाणि यावत् इयं मात्रा त्रिगुणिता जाता। शतं वर्षानन्तरम् अर्थात् (1870) सप्तत्यधिकाष्टादशशत-तमख्रिस्ताब्दस्य आगमनात् किञ्चित् पूर्वं प्रायः प्रतिवर्षं प्रायः (50,000) पञ्चाशत्-सहस्रं परिमितानाम् अफेन-मञ्जूषाणां निर्यातः भवितुम् आरब्धम् आसीत्।

नूतनशब्दाः

मन- भारस्य मापः कश्चित् इति
1 मन- (40)चत्वारिंशत्-सेर-परिमितम् इति। (1) एक-सेर-परिमितम् इति (1) एक-किलोग्रामपरिमितात् किञ्चित् न्यूनं भवति।

अनुदिनं वाणिज्यं यथावत् स्थापयितुम् अफेनस्य आवश्यकतायाः वर्धापनं कर्तव्यम् आसीत् परन्तु इदं कार्यं सरलं नासीत्। अन्ततः कृषकाः अफेनस्य कृष्यर्थं सज्जीक्रियन्ते स्म ? कृषकाः अफेनस्य वपनाय सज्जाः न आसन्। एतस्य अनेकानि कारणानि आसन्। सर्वादौ कृषकैः अफेनस्य कृषिः सर्वाधिक-उर्वराभूमौ करणीया भवति स्म। विशेषतया एतादृश्यां भूमौ, या भूमिः ग्रामस्य पार्श्वे भवति स्म। सामान्यतया एतादृश्याम् उर्वराभूमौ कृषकाः द्विदलस्य उत्पादनं कुर्वन्ति स्म। सुभूमौ उर्वराभूमौ च अफेनस्य कृषिकरणेन द्विदलस्य कृषेः विनाशः जातः। कृषकाः अधुना द्विदलस्य कृषिम् अनोर्वराभूमौ कर्तुं बाध्याः आसन् इति। कुभूमौ द्विदलस्य उत्पादनं नाममात्रम् आसीत् अर्थात् अल्पतरम् आसीत् उत्पादनम् अपि न्यूनं जातम्। अपरतः बहूनां कृषकाणां पार्श्वे भूमिरेव नासीत्। अफेनस्य कृष्यर्थम् एतादृशैः कृषकैः भूस्वामिभ्यः राजस्वम् अपि दातव्यं भवति स्म। ते एतादृशेभ्यः भूस्वामिभ्यः अनुबन्धे भूमिं कृषिं कर्तुं स्वीकुर्वन्ति स्म, तत्र च अफेनस्य कृषिं कुर्वन्ति स्म। ग्रामस्य पार्श्वे या भूमिः भवति स्म तस्याः राजस्वम् अपि अधिकं भवति स्म । तृतीयम् – अफेनस्य कृषिकार्यम् अतीव काठिन्येन भवति स्म। अफेनस्य सुकुमारतरान् पादपान् जीवयितुं अतीव श्रमस्य आवश्यकता आसीत्। अफेनस्य वपनात् परं कृषकाः अन्येषां शस्यानां विषये अवधानं न कर्तुं शक्नुवन्ति स्म। अन्ततः सर्वकारः ये कृषकाः अफेनस्य उत्पादनं कुर्वन्ति स्म तेभ्यः न्यूनमूल्येन एव तत् क्रीणन्ति स्म। कृषकाणां कृते सर्वकारीयमूल्येन अफेनस्य उत्पादनं हानिप्रदं वाणिज्यम् आसीत् इति।

क्रियाविधिः

कल्पनां कुर्वन्तु यत् भवन्तः अफेनस्य कृषेः विरोधिनां कृषकाणां नेतृत्वं कुर्वन्ति। भवद्भिः ईस्ट-इण्डिया-समवायस्य स्थानीय-अधिकारिभिः सह एतस्मिन् सन्दर्भे वार्ता करणीया। वार्तालापः कथम् अग्रे वर्धिष्यते ? कक्षायाः विद्यार्थिनां समूहद्वयं कृत्वा चर्चां कुर्वन्तु।

3.3 कृषकाः अफेनस्य कृषिं कुर्युः एतदर्थं ते कथं सज्जीकृताः ?

कृषकेभ्यः अफेनस्य कृषिं कर्तुम् अग्रिमधनराशिः दीयते स्म । बङ्गालस्य बिहारस्य च ग्रामीण-क्षेत्रेषु निर्धन-कृषकाणां कश्चित् महान् समूहः एतादृशः आसीत् यः सदैव सङ्कटापन्नः भवति स्म । भूस्वामिने राजस्वदानम् अपि च आत्मनः कृते भोजन-वस्त्रादीणां प्रबन्धनं तेषां कृते कठिनकार्यम् आसीत् । (1780) अशीत्यधिकसप्तदशशत-तमख्रिस्ताब्दात् परं ग्रामप्रमुखाः एतेभ्यः कृषकेभ्यः अफेनस्य उत्पादनाय अग्रिमराशिं दातुम् आरब्धवन्तः । ऋण-सौविध्यस्य कारणात् कृषकाः आत्मनः तात्कालिक-आवश्यकताः पूरयितुं समर्थाः भवन्ति स्म अपि च पूर्वं यत् ऋणं तैः स्वीकृतं भवति स्म तस्य प्रत्यर्पणम् अपि ते कर्तुं समर्थाः भवन्ति स्म । परन्तु एतस्याः ऋणव्यवस्थायाः केचन नकारात्मकाः प्रभावाः अपि आसन्, ऋणे स्वीकृते सति एव कृषकाः ग्रामप्रमुखस्य सर्वकारस्य च क्रीतदासैः श्रमिकैः इव भवन्ति स्म । सहायकाः कृषकान् यावत् धनराशिं प्रापयन्ति स्म एते सहायकाः ग्रामप्रमुखेभ्यः अग्रिम-धनराशिं यच्छन्ति स्म अपि च ग्रामप्रमुखः पुनः एतेभ्यः कृषकेभ्यः धनं यच्छति स्म । कृषकेण यदि एकदा ऋणं ग्रहीतं तर्हि सः पुनः अफेनम् उप्तुं विवशः जायते स्म । एतया व्यवस्थया कृषकैः निश्चित-क्षेत्रेषु तत्रापि परिमितक्षेत्रे एव अफेनस्य कृषिः करणीया भवति स्म । शस्यम् अफेनस्य सहायकैः कर्त्यते स्म । एकदा यदा अफेनस्य बीजवपनं कृतं ततः परं शस्यस्य कृषकस्य अधिकारः न भवति स्म । कृषकः तस्यां भूमौ पुनः किमपि द्वितीयं शस्यं न उप्तुं शक्नोति स्म । तत् च शस्यं स कुत्रापि अन्यत्र अपि न विक्रेतुं सः स्वतन्त्रः न भवति स्म । शस्यस्य मूल्यनिश्चयः अपि सहायकेन एव क्रियते स्म एतत् च मूल्यं सदैव न्यूनतमम् एव भवति स्म ।

अफेनस्य कृषिं कृत्वा कृषकाणाम् आयः न्यूनः भवति स्म परन्तु एतस्याः समस्यायाः समाधानम् अफेनस्य मूल्यवृद्धिं कृत्वा कर्तुं शक्यते स्म । परन्तु एतस्मिन् सन्दर्भे सर्वकारस्य चिन्तनं सकारात्मकं नासीत् । सर्वकारः एव इच्छति स्म यत् अफेनस्य उत्पादनं न्यूनातिन्यूनधनेन भवेत् इति अपि च कलकत्तायाः अफेन-सहायकेभ्यः अफेनम् अधिकमूल्येन विक्रयणं भवेत् इति । कलकत्तास्थिताः एते अभिकर्तारः एतम् अफेनं चीनदेशं प्रेषयितुं व्यवस्थां कुर्वन्ति स्म । अफेनस्य एतस्य क्रयस्य विक्रयस्य च अन्तरं सर्वकारस्य वित्तलेखायाम् अङ्कितं भवति स्म । अन्यैः शब्दैः वदामः चेत् एतत् एव सर्वकारस्य राजस्वं भवति स्म । अफेनोत्पादकेभ्यः कृषकेभ्यः एतावत् न्यूनं मूल्यं दीयते स्म यत् अष्टादश-शताब्दस्य आरम्भात् किञ्चित् पूर्वं कृषकाः समुचितमूल्यस्य याचनां कर्तुम् आरब्धवन्तः आसन् इति अपि च ते अग्रिमधनराशिं न स्वीकर्तुम् इच्छन्ति स्म । वाराणस्याः पार्श्वस्थेषु क्षेत्रेषु अफेनोत्पादकाः कृषकाः दुःखीभूत्वा अफेनस्य कृषिम् एव न कृतवन्तः । एतस्याः कृषेः स्थाने ते इक्षोः आलुकस्य च कृषिम् अङ्गीकृतवन्तः । अनेकैः वणिग्भिः स्वशस्यानि यायावर-वणिजः विक्रीतानि आसन् । एतादृशाः वणिजः कृषकेभ्यः समुचितमूल्यं यच्छन्ति स्म ।

(1773)त्रिसप्तत्यधिकसप्तदशशत-तमं ख्रिस्ताब्दं यावत् सर्वकारः अफेनस्य वाणिज्ये आधिपत्यं स्थापितम् । सर्वकारम् अतिरिच्य कोऽपि बाह्यजनः वाणिज्यं न कर्तुं शक्नोति स्म । (1820) विंशत्यधिकाष्टादशशततम-दशके आङ्ग्लसर्वकारः अवगतवान् यत् तेषां क्षेत्रेषु अफेनस्य उत्पादनम् अपचितिं गतम् । यद्यपि ब्रिटिश-इत्यतः अतिरिक्तक्षेत्रेषु अफेनस्य कृषिः पर्याप्तविकासं गच्छति

स्रोतः छ इति

(1833)त्रयस्त्रिंशदधिकाष्टादशशत-तमे ख्रिस्ताब्दे इलाहाबादस्य अफेनाभिकर्ता अलिखत् -

परिषद् मन्यते यत् कृषकाः अफेनस्य उत्पादनं न इच्छन्ति । गतद्वयोः वर्षयोः यमुनायाः दक्षिण-जनपदानां निवासिनां कृषकाणां सम्पर्के आसम् अपि च मया इदम् अपि अनुभूतं यत् अत्रत्याः सर्वे कृषकाः अस्याः व्यवस्थायाः रुष्टाः सन्ति । तेभ्यः एषा व्यवस्था न रोचते । एतस्मिन् विषये मया अनेकेषां क्षेत्राणां निरीक्षणं कृतम् अस्ति अपि च मम अनुभूतिः इयम् अस्ति यत् अफेनस्य कृषिं कृषकाः अभिशापवत् मन्यन्ते । ते अफेनस्य कृषिं स्वेच्छया नैव, अपि तु दण्डभयेन कुर्वन्ति । इयं कृषिः जनपदायुक्तस्य आदेशेन आरब्धा आसीत् इति । जनाः वदन्ति यत् राजसेवकाः तैः सह समुचितव्यवहारं न कुर्वन्ति ते अपशब्दानां प्रयोगं कुर्वन्ति । कृषकाणां परामर्शः अयम् अस्ति यत् अफेन-कृषिद्वारा तेषां हानिः जाता अस्ति ।

बिनॉय-चौधरी महोदयस्य पुस्तकात् ग्रोथ-ऑफ़-कमर्शियल-एग्रीकल्चर-इन-बङ्गाल इत्यस्मात् उद्धृतम् ।

स्म। मध्यभारतं राजस्थान-प्रभृतिषु च ब्रिटिश इत्यतः अतिरिक्तक्षेत्रेषु अफेनस्य उत्पादनं निरन्तरं चलति स्म। एतेषु क्षेत्रेषु स्थानीय-वणिजः कृषकेभ्यः समीचीनं मूल्यं यच्छन्ति स्म। (1820) विंशत्यधिकाष्टादशशत-तमे दशके एते वणिजः सशस्त्रं सैन्यबलैः सह वाणिग्वृत्तिं कुर्वन्ति स्म। आङ्ग्लीयानां दृष्टौ एतत् वाणिज्यम् अवैधानिकम् आसीत्। ते एतत् चौर्यम् इति मन्यन्ते स्म अपि च एतस्य प्रतिबन्धम् इच्छन्ति स्म। सर्वकारः अफेनस्य उपरि निजाधिपत्यं निरन्तरं कर्तुम् इच्छति स्म, अतः तेन राज्येषु नियुक्ताः स्वीयाः अभिकर्तारः आदिष्टाः यत् ते एतेषां वणिजाम् अफेनस्य अधिग्रहणं कुर्वन्तु इति अपि च शस्यानि अपि नष्टीकुर्वन्तु इति।

यावत्पर्यन्तम् अफेनस्य उत्पादनं चलति स्म तावत्पर्यन्तं ब्रिटिशसर्वकारः कृषकाणां स्थानीयवणिजां च मध्ये सङ्घर्षः जायते स्म।

परन्तु अनेन विचारेण अस्माभिः एषः निष्कर्षः अपि न स्वीकरणीयः यत् औपनिवेशिक-भारते सर्वेषां कृषकाणां स्थितिः अफेनस्य कृषकैः इव आसीत् इति। औपनिवेशिक-भारते अन्येषां कृषकाणां स्थितौ वयं कस्मिंश्चित् पृथक् अध्याये चर्चां करिष्यामः इति।

निष्कर्षः

एतस्मिन् अध्याये भवन्तः पठितवन्तः यत् आधुनिके काले विश्वस्य विभिन्न-ग्रामीण-क्षेत्रेषु महत्त्वपूर्णानि परिवर्तनानि जातानि। यदा वयम् एतेषां परिवर्तनानां विषये चिन्तयामः तर्हि अस्माभिः एतत् अपि अवधातव्यं यत् एतादृशानि परिवर्तनानि सर्वत्र समानानि न आसन् इति। एतैः परिवर्तनैः केचन वर्गाः लाभान्विताः अभवन् केचन च हानिं प्राप्तवन्तः। आधुनिकीकरणस्य इतिहासः केवलं वैभवपूर्णः एव नासीत्। एषः इतिहासः केवलं वृद्धेः विकासस्य च काचित् विशिष्टकथारूपेण एव आसीत् इति न वक्तुं शक्यते। एतस्मिन् काले जनाः स्वमूलस्थानं परित्यज्य आजीविकायाः अन्वेषणे अन्यानि स्थानानि गन्तुं बाध्याः जाताः। अयं कालः निर्धनतायाः पर्यावरणीयसङ्कटस्य सामाजिकविद्रोहस्य औपनिवेशिकीकरणस्य दमनस्य च कालः अपि आसीत्। अस्माभिः एतेषां परिवर्तनानां विभिन्नपक्षाणाम् अवगमनाय प्रयासः करणीयः यतो हि आधुनिकविश्वे कृषकजनता कृषकाः च एतस्याः स्थितेः साम्मुख्यं पृथक् पृथक् प्रकारेण कृतवन्तः।

चित्रम् – 20 – नवदशशताब्दे अफेनस्य मञ्जूषाः गाजीपुर-रेलस्थानकं प्रति नयन्तः कृषकाः।

क्रियाविधिः

क्रियाविधिः

1. (1650) पञ्चाशदधिकषोडशशत-तमात् ख्रिस्ताब्दात् (1930)त्रिंशदधिकनवदशशत-तमख्रिस्ताब्दाभ्यन्तरे कृषिक्षेत्रे जातानि महत्त्वपूर्णपरिवर्तनानि दर्शयितुं काञ्चित् कालरेखां सज्जीकुर्वन्तु इति।
2. अधोलिखितसारण्याम् अस्मिन् अध्याये उल्लिखितघटनानाम् आधारेण सूचनाः पूरयन्तु। स्मरन्तु यत् कस्मिंश्चित् देशे एकाधिक-परिवर्तनानि अपि द्रष्टुं शक्यन्ते।

देशः	परिवर्तनम्	कस्य हानिः जाता	कः लाभं प्राप्तवान्

प्रश्नः

1. अष्टादशशताब्दे इङ्ग्लैण्डस्य ग्रामीणजनता मुक्तक्षेत्रीय-व्यवस्थां कया दृष्ट्या पश्यति स्म। संक्षेपेण व्याख्यां कुर्वन्तु। एतां व्यवस्थाम् –
   - कस्यचित् सम्पन्न- कृषकस्य
   - कस्यचित् श्रमिकस्य
   - कस्याश्चित् कृषकमहिलायाः च दृष्ट्या अवलोकनस्य प्रयासं कुर्वन्तु।
2. इङ्ग्लैण्डे जातव्रजीकरण-आन्दोलनस्य कारणानां सङ्क्षेपेण व्याख्यां कुर्वन्तु ।
3. इङ्ग्लैण्डस्य निर्धन-कृषकाः श्रेशिंग इति यन्त्राणां विरोधं किमर्थं कुर्वन्ति स्म ?
4. कैप्टेनस्विंग इति कः आसीत् ? इदं नाम कस्य तथ्यस्य प्रतीकभूतम् आसीत् अपि च तत् केषां वर्गाणां प्रतिनिधित्वं करोति स्म ?
5. अमेरिकादेशः नूतनानाम् आप्रवासिनां पश्चिमप्रसारेण कथं प्रभावितः जातः ?
6. अमेरिकायां शस्यस्य कर्तनयन्त्रैः के लाभाः काः च हानयः सञ्जाताः ?
7. अमेरिकायां गोधूमस्य कृषौ जाता उन्नतिः पुनश्च तेन उत्पन्नं पर्यावरण-सङ्कटम् अस्मान् किं शिक्षयतः ?
8. आङ्ग्लीयाः अफेनस्य कृषिं कर्तुं भारतीय-कृषकान् बलपूर्वकं किमर्थं योजयन्ति स्म।
9. भारतीयकृषकाः अफेनस्य कृषिकार्यं प्रति किमर्थम् उदासीनाः आसन् ?

॥ इति षष्ठोऽध्यायः ॥

खण्डः III

दैनिकजीवनम्, संस्कृतिः राजनीतिः च

भवन्तः अनेन तृतीयखण्डेन दैनिकजीवनस्य इतिहासेन सह परिचिताः भविष्यन्ति।
अत्र भवन्तः क्रीडायाः वेशभूषायाः च इतिहासं पठिष्यन्ति। इतिहासः केवलः विश्वस्य महतीनां नाटकीय-घटनानां कथारूपेण नास्ति। अयम् अस्माकं दैनिकजीवने जायमानाभिः घटनाभिः अपि सम्बद्धः अस्ति। अस्माकं पार्श्वस्थानां प्रत्येकम् अपि वस्तूनां कश्चित् इतिहासः अस्ति - यानि वस्त्राणि वयं धरामः यत् भोजनं च कुर्मः यानि औषधानि च सेवामहे यत् सङ्गीतं च शृणुमः यत् साहित्यं च पठामः यया क्रीडया च क्रीडामः। एतानि उपर्युक्तानि सर्वाणि अपि वस्तूनि साधनानि च कालक्रमेण जातानि सन्ति अथवा परिवर्तितानि सन्ति। तानि दैनिकवस्तूनि भवन्ति येषां वयं प्रयोगं कुर्मः तस्मात् कारणात् वयं तानि अभिलक्ष्य विशिष्टावधानं न कुर्मः इति। वयम् एकाग्रचेतसा न किञ्चित् अपि तेषां विषये विचारयामः यत् शतं वर्षेभ्यः प्राक् तेषु वस्तुषु किञ्चिद् वस्तु आसीत् अथवा न आसीत् इति अथवा पृथक् पृथक् समाजीयाः जनाः भोजनस्य वस्त्रस्य च विषये कथं विभिन्नप्रकारेण चिन्तयन्ति।

सप्तमाध्यायः इतिहासस्य क्रीडायाः च विषये अस्ति। अस्मिन् भवन्तः एतादृशस्य खेलस्य इतिहासस्य विषये पठिष्यन्ति येन खेलेन विगतैः कैश्चित् दशकैः अस्मद्देशीयाः जनाः उन्मत्ताः इव कृताः सन्ति। क्रिकेट-सम्बद्ध-वार्त्ताः वार्त्तापत्रेषु बाहुल्येन भवन्ति। क्रिकेटक्रीडाम् आयोज्य राष्ट्राणां मध्ये मैत्रीभावनायाः विस्तारः क्रियते, अपि च क्रिकेट्-क्रीडकाः अस्माकं देशस्य राजदूताः इति मन्यन्ते। इदं तथ्यं वर्तते यत् इयं क्रिकेटक्रीडा भारतस्य ऐक्यस्य प्रतीकभूता अस्ति। परन्तु किं भवन्तः जानन्ति यत् सर्वकालात् इत्थं नासीत् इति ? एतस्मिन् अध्याये भवन्तः एतस्याः क्रिकेटक्रीडायाः दीर्घायाः कठिनयात्रायाः दिग्दर्शनं प्राप्स्यन्ति इति।

कस्मिंश्चित् युगे प्रायः सार्धैकशतवर्षेभ्यः पूर्वं क्रिकेटक्रीडा आङ्ग्लीयानां क्रीडा आसीत्। एतस्याः आविष्कारः इङ्ग्लैण्डदेशे अभवत् अपि च नवदश-शताब्दस्य विस्टारियायि-समाजस्य संस्कृतेः च रङ्गे रञ्जितः। एतां क्रिकेटक्रीडाम् आङ्ग्लीयाः मन्यन्ते स्म यत् एषा समग्र-प्रियमूल्यानां समानतायाः न्यायस्य अनुशासनस्य भद्रतायाः च वाहिका अस्ति इति। विद्यालयेषु क्रिकेटक्रीडायाः समावेशः कृतः, इयं शारीरिकशिक्षायाः बृहत्तम-कार्यक्रमस्य अन्तर्गतं समायोजिता अनया च बालकाः आदर्शनागराः भविष्यन्ति इति मनसि विचारः आसीत् इति। बालिकाः बालकानां खेलं क्रीडितुम् अधिकृताः न आसन् इति। आङ्ग्लीयैः इयं क्रिकेटक्रीडा उपनिवेशे अपि समाविष्टा। औपनिवेशिक-स्वामिनः अचिन्तयन् यत् ते एव एनां क्रीडां एतस्याः वास्तविक-स्वरूपानुसारं वास्तविक-भावनया च क्रीडितुं शक्नुवन्ति। परिणामतः यदा उपनिवेशस्य दासाः जनाः क्रिकेटं क्रीडितुम् आरब्धवन्तः अपि च प्रायः आङ्ग्लीयेभ्यः अपि समीचीनतरं ते क्रीडितुम् आरब्धवन्तः एतावत् एव नैव अनेकधा तान् अभिभवितुम् अपि साफल्यम् अवाप्तवन्तः तदा आङ्ग्लीयाः गभीररूपेण चिन्ताग्रस्ताः जाताः। अनेन प्रकारेण क्रिकेटक्रीडा उपनिवेश-वादस्य राष्ट्रवादस्य च राजनीतेः सम्बद्धा जाता।

उपनिवेशानाम् अन्तः क्रीडायाः स्वीयः इतिहासः अपि क्लिष्टः अव्यवस्थितः च अस्ति। यथा भवन्तः सप्तमाध्याये पठिष्यन्ति, क्रिकेटं जातेः क्षेत्रस्य समुदायस्य राष्ट्रस्य च राजनीतेः सम्बद्धः जातम्। राष्ट्रियखेलस्य रूपेण क्रिकेटस्य विकासः अनेक-दशकानाम् ऐतिहासिक-विकासस्य परिमाण-रूपेण आसीत्।

क्रिकेट्-क्रीडायाः परं वयं परिधानस्य विषये अवगमिष्यामः तत्र अष्टमाध्याये एषा चर्चा वर्तते इति। भवन्तः द्रक्ष्यन्ति यत् परिधानस्य इतिहासेन वयं विभिन्न-समाजानाम् इतिहासस्य बहून् विषयान् अवगच्छामः इति। जनाः यानि वस्त्राणि धरन्ति तेषु तात्कालिक-समाजस्य रीतीनां नीतीनां परम्पराणां च प्रभावः भवति। तस्मात् एव वयं सुन्दरतायाः मर्यादायाः उचितस्य अनुचितस्य आचारस्य व्यवहारस्य तेषां च चिन्तनस्य विषये अपि जानीमः। समाजस्य परिवर्तनेन एताः रीतयः परम्पराः चापि परिवर्तन्ते। परन्तु समाजस्य रीतीनां वेशभूषायाः च परिवर्तनस्य च मूले अनेकाः समस्याः सङ्घर्षाः च भवन्ति इति। एतेषां सर्वेषां वस्तूनाम् अपि कश्चित् इतिहासः अस्ति, इदं सर्वं स्वाभाविकरूपेण अस्ति एवमेव क्षणाभ्यन्तरे एव सर्वम् एतत् न जातम् इति।

अष्टमाध्याये उपर्युक्तेन एवंविधेन एव इतिहासेन सह भवतां परिचयः भविष्यति । भवन्तः पठिष्यन्ति यत् कथं भारतीय-वेशस्य परिवर्तनं जातम् अपि च कथं देशेषु जातैः सामाजिक-आन्दोलनैः आर्थिकपरिवर्तनैः च जनाः प्रभाविताः। भवन्तः एकदा पुनः द्रक्ष्यन्ति यत् परिधानम् अपि कथं जातिवर्गयोः च उपनिवेश-वादिन्याः राष्ट्रवादिन्याः राजनीतेः गभीरतया सम्बद्धम् अस्ति। परिधानस्य इतिहासविषये किञ्चित् सावधानं पश्यन्ति चेत् भवन्तः अवगमिष्यन्ति यत् कथं स्वदेशी इति विचारसम्बद्धा राजनीतिः वयनचक्रं च इति प्रतीकरूपेण सन्ति अनेन वयं नूतनम् अपि अभिप्रायम् अवगमिष्यामः इति। एवमपि शक्यते यत् अनेन वयं महात्म-गान्धिनम् अपि समीचीनतया अवगन्तुम् अवसरं प्राप्नुयाम इति, यतो हि सः तादृशः एकलः एव जनः आसीत् यः न केवलं वस्त्रराजनीतिं प्रति अतीव जागरूकः आसीत् अपि तु सः एतस्मिन् विषये प्रभूतं लिखितवान् अपि।

यदि भवन्तः पूर्वोक्तयोः द्वयोः वस्तुनोः इतिहासम् अवगन्तुं प्रयत्नं करिष्यन्ति तर्हि शक्यते यत् भवन्तः स्वीयजीवनस्य एतादृशानां पक्षाणाम् इतिहासं स्वयम् आविष्करिष्यन्ति अधुना पर्यन्तं च यान् पक्षान् साधारणान् इति मत्वा भवन्तः न विचारितवन्तः तान् अपि भवन्तः अधुना स्वयम् अवगन्तुं प्रयत्नं करिष्यन्ति इति।

इतिहासः क्रीडा च – क्रिकेट्-क्रीडायाः कथा

क्रिकेट्-क्रीडा इङ्ग्लैण्डदेशे पञ्चशतं वर्षेभ्यः पूर्वं विभिन्न-नियमानाम् अन्तर्गतं क्रीड्यमानेन कन्दुक-दण्डादीनां संयोगेन याः क्रीडाः क्रीड्यन्ते ताभ्यः प्रादुर्भूता एषा क्रीडा वर्तते। बैट इति आङ्ग्लभाषायाः कश्चित् पुरातनः शब्दः अस्ति यस्य प्रत्यक्षतः लोकभाषायाम् अर्थः अस्ति डण्डा अथवा कुन्दा इति। सप्तदशशताब्दे कस्याश्चित् क्रीडायाः रूपेण अस्याः क्रिकेट् इति क्रीडायाः ख्यातिः जाता आसीत् अपि च इयं क्रीडा एतावती प्रसिद्धिं गता आसीत् यत् रविवासरे क्रिकेट्-प्रेमिणः जनाः ख्रिस्तधर्मालयम् अगत्वा क्रिकेट्-क्रीडां क्रीडितुं गच्छन्ति स्म तस्मात् ते दण्डशुल्केन दण्ड्यन्ते स्म। अष्टादशशताब्दस्य मध्यकालं यावत् ताडन्याः आकारः यष्टि-क्रीडा-दण्डवत् अधोमुखी भवति स्म। तत्र स्पष्टं कारणम् इदम् आसीत् यत् कन्दुकः अवलम्ब्य भुजयोः अधःस्थानात् क्षिप्यते स्म अपि च ताडन्याः अधोभागस्य वक्रता लगुडधारकः कन्दुकेन सह सम्पर्कं साधयितुं सारल्यम् अनुभवति स्म।

चित्रम् –1 - अद्य विद्यमानं प्राचीनतमः लगुडः।
एतस्य लगुडस्य वक्राकारप्रान्तं पश्यन्तु यः यष्टि-क्रीडा-दण्डवत् प्रतीयते।

इङ्ग्लैण्डस्य ग्रामात् आरब्धा इयं क्रीडा कथं कदा च महतां नगराणां विशाल-क्रीडाङ्गणेषु क्रीड्यमाना काचित् आधुनिक-क्रीडारूपेण जाता। अयम् इतिहासस्य कश्चित् रोचकविषयः अस्ति यतो हि इतिहासस्य कश्चित् रोचकप्रयोगः तु अयम् एव अस्ति यत् सः वर्तमाननिर्माणस्य कथाम् अस्मान् बोधयेत् इति। क्रीडा अस्माकं वर्तमान-जीवनस्य कश्चित् महत्त्वपूर्णः भागः वर्तते। क्रीडया वयं मनोरञ्जनं कुर्मः, परस्परं स्पर्धामहे, स्वस्थाः भवामः, स्वीय-सामाजिकपक्षस्य अभिव्यक्तिं च कुर्मः। यदि अद्यत्वे लक्षशः कोटिशः च भारतीयाः सर्वं परित्यज्य भारतीयदलस्य एकदिवसीयं निकषद्वन्द्वं च द्रष्टुं निमग्नाः भवन्ति तदा एतस्य विषयस्य अवगमनम् आवश्यकं प्रतिभाति यत् दक्षिण-पूर्व-इङ्ग्लैण्डे आविष्कृता एषा लगुडकन्दुकक्रीडा अन्ततः भारतीयमहाद्वीपं कथम् आगता अपि च अत्रत्यजनेषु कथं लोकप्रिया जाता। एतस्याः स्पर्धायाः क्रीडायाः च कथा एतस्मात् कारणात् अपि रोचिका अस्ति यत् एकतः यत्र उपनिवेशवादस्य राष्ट्रवादस्य च व्यापक-कथा अनया क्रीडया सम्बद्धा अस्ति अपरतः धर्म-जाति-राजनीतिभिः अपि एतस्य महत्त्वं विस्तारितम्।

क्रिकेटस्य अस्मिन् इतिहासे आदौ वयम् इङ्ग्लैण्डदेशे एतस्य विकासस्य इतिहासं द्रक्ष्यामः अपि च तात्कालिक-प्रचलित-शारीरिकस्फूर्तेः प्रशिक्षणस्य संस्कृतेः अपि परिशीलनं करिष्यामः। पुनः ततः परं वयं भारतस्य क्रिकेट्-क्रीडायाः इतिहासस्य विषये अध्येष्यामः अत्र कदा जनैः एषा क्रीडा अङ्गीकृता अपि च कदा एतस्याम् आधुनिकपरिवर्तनानि जातानि इति एतान् विषयान् अभिलक्ष्य चर्चयिष्यामः। प्रत्येकं खण्डे वयं द्रक्ष्यामः यत् क्रीडायाः इतिहासः केन प्रकारेण सामाजिक-इतिहासेन सह सम्बद्धः अस्ति।

चित्रम् – 2 – लार्डस् इति, इङ्ग्लैण्ड-क्रिकेट-प्राङ्गणस्य केनचित् चित्रकारेण रचितं चित्रम्, (1821) एकविंशत्यधिकाष्टादश-शत-तमः ख्रिस्ताब्दः इति।

1 इङ्ग्लैण्डदेशे क्रीडायाः रूपेण क्रिकेट् इत्यस्य ऐतिहासिकः विकासः

अष्टादश-नवदश-शताब्दयोः इङ्ग्लैण्डस्य सामाजिकेन राजनैतिकेन च इतिहासेन क्रिकेट्-क्रीडायै विचित्रं स्वरूपं प्रदत्तं, यतो हि अयं क्रिकेट्-क्रीडायाः आरम्भिककालः आसीत् । उदाहरणार्थम् इदं किञ्चित् निकषस्पर्धायाः एव वैचित्र्यम् अस्ति यत् क्रीडा पञ्च दिनानि यावत् चलेत् अपि च कश्चित् परिणामः अपि आगच्छेत् इति । कस्याश्चिद् अपि आधुनिकस्पर्धायाः समाप्तौ इतः अर्धकालः अपि न लगति । पाद-कन्दुक-क्रीडा प्रायः सार्धैक-होरया समाप्तिं याति । कन्दुक-लगुडादिभिः क्रीड्यमानानां बेसबॉलप्रभृतीनाम् आधुनिकयुगस्य दृष्ट्या दीर्घकालिकीषु क्रीडासु अपि तावति काले नव पक्षाः समाप्तिं यान्ति यावति काले क्रिकेट् इत्यस्य लघुसंस्करणे अर्थात् एकदिवसीय-स्पर्धायाः एकः एव पक्षः भवितुं पारयति इति ।

क्रिकेट् इत्यस्य कश्चित् रोचकं वैशिष्ट्यम् इदम् अस्ति यत् प्राङ्गणस्य दैर्घ्यं तु निश्चितं (22) द्वाविंशतिः गजपरिमितम् इति भवति परन्तु क्रीडाङ्गणस्य आकारः प्रकारः च समानः न भवति । यष्टिक्रीडा-पादकन्दुक-प्रभृतिषु अन्यासु दलीयासु स्पर्धासु क्रीडाङ्गणस्य आयामः निश्चितः भवति परन्तु क्रिकेट्-क्रीडायां तथा नास्ति । ऐडीलेड-ओवल-सदृशं क्रीडाङ्गणं गोलाकारं भवितुं शक्नोति । अपि च चेन्नई-नगरस्य इत्यस्य चेपॉक-स्टेडियम इव प्रायः गोलाकारम् अपि इति । मेलबर्न-नगरस्य क्रिकेट्-प्राङ्गणे षट्कं भवितुं कन्दुकेन दूरं यावत् गन्तव्यं भवति परन्तु देहल्याः फिरोजशाहकोटला इत्यस्मिन् क्रीडाङ्गणे अल्पप्रयासेन एव कन्दुकः सीमारेखायाः पारं गत्वा पात्यते ।

एतयोः द्वयोः वैचित्र्ययोः मूले ऐतिहासिक-कारणानि सन्ति । नियमबद्धासु क्रीडासु क्रिकेटः प्रथमस्थानम् आसीत् अर्थात् सॉकर-यष्टि-क्रीडासदृशीनाम् अन्यासां क्रीडानाम् अपेक्षया क्रिकेट् आत्मानं नियमबद्धम् अकरोत् इति अपि च वेशभूषा अपि सुनिश्चिता निर्मिता च । क्रिकेट्-विषयकाः अधिनियमाः सर्वादौ (1744) चतुश्चत्वारिंशदधिक-सप्तदशशत-तमे ख्रिस्ताब्दे रचिताः । तेषाम् अनुसारं हाजिर-शरीफ इत्येतेषु द्वौ (प्रिंसिपल) नायकौ निर्णायकौ च दलं चेष्यन्ते तौ द्वौ निर्णायकौ कस्यापि अन्तिमविवादस्य शमनाय अधिकृताः भविष्यन्ति । स्टम्प इति (22) द्वाविंशति-इञ्चपरिमिताः तुङ्गाः भविष्यन्ति इति तेषां मध्ये गिल्लियाः (6) षड्-इञ्चपरिमिताः भविष्यन्ति । कन्दुकस्य भारः पञ्चतः षड् औंसपरिमिताभ्यन्तरे भविष्यति अपि च मध्यं स्टम्प इत्यस्य दूरता (22) द्वाविंशति-गजपरिमिता भविष्यति । लगुडस्य आकारस्य प्रकारस्य च विषये कोऽपि प्रतिबन्धः नासीत् इति ।

इत्थम् अनुभूयते यत् (40) चत्वारिंशत्-नॉच इत्यस्य अथवा (रन) धावनाङ्काः पर्याप्तं भवन्ति स्म प्रायः एतत् एतस्मात् कारणात् यत् कन्दुकक्षेपकाः वेगेन लगुडधारकस्य नग्न-गुल्फयोः कन्दुकं क्षिपन्ति स्म । विश्वस्य प्रथमक्रिकेट्-क्लब इति हैम्बल्डन-नगरे (1760) षष्ट्यधिक-सप्तदशशत-तमे दशके निर्मितः अपि च मेरिलिबॉन-क्रिकेट्-क्लब (एम-सी-सी) इति संस्थायाः स्थापना (1787) सप्ताशीत्यधिकसप्तदशशत-तमे वर्षे अभवत् । तस्मात् अग्रिमे वर्षे एव एमसीसी इत्यनेन क्रिकेट-

चित्रम् – 3 – मेरिलिबॉन-क्रिकेट्-क्लब(एमसीसी) इत्यस्य (पैविलियन) दर्शकदीर्घा इति, (1874) चतुःसप्तत्यधिकाष्टादशशत-तमः ख्रिस्ताब्दः ।

नियमेषु परिष्काराः कृताः अपि च सः तेषाम् अभिभावकः जातः ।एमसीसी इत्यस्य परिष्कारेभ्यः क्रीडायाः प्रारूपे अनेकानि परिवर्तनानि जातानि यानि अष्टादशशताब्दस्य द्वितीये भागे प्रवर्तितानि आसन् ।

(1760-1770) षष्ट्यधिकसप्तदशशततमे सप्तत्यधिकसप्तदशशततमे च दशके कन्दुकक्षेपणस्य विधायां परिवर्तनं जातं पूर्वं तु कन्दुकस्य भूमौ अवलम्बन-आलोडनपुरस्सरं च क्षेपणं भवति परन्तु अधुना वायौ क्षिप्त्वा पुनः अग्रे तस्य प्रेषणं क्रियते स्म । अनेन कन्दुक-क्षेपकाः कन्दुकस्य दैर्घ्यस्य विकल्पं तु प्राप्तवन्तः एव, ते अधुना वायौ विशिष्टतया तं परिभ्राम्य लगुडधारकम् अपि वञ्चयितुं शक्नुवन्ति स्म अपि च पूर्वापेक्षया वेगेन अपि कन्दुकं क्षेप्तुं शक्नुवन्ति स्म । अनेन स्पिन-स्विंग इति द्वयोः कन्दुक-क्षेपणविध्योः प्रचलनस्य आरम्भः जातः । प्रत्युत्तरे लगुडधारकैः स्व-समयनिर्धारणस्य, कन्दुके प्रहारस्य च चयनविषये निपुणता अर्जनीया आसीत् । तस्मात् परिणामः एकः तु अयं जातः यत् अधुना वक्राकार-लगुडस्य स्थाने सरल-लगुडस्य प्रयोगः जातः । एतैः सर्वैः कारणैः कुशलता प्रविधिः च इति द्वौ एव महत्त्वपूर्णौ जातौ अपरञ्च नतोन्नत-क्रीडाङ्गणानां शुद्धशक्तेः च भूमिका न्यूना जाता ।

कन्दुकस्य भारः अधुना सार्धपञ्च-औंस-परिमितात् षड्-औंस-परिमितः अभवत् अपि च लगुडस्य प्रथिमा चतुर-इञ्च-परिमिता कृतः । इदं सर्वं तदा अभवत् यदा केनचित् लगुडधारकेन स्वस्मिन् सम्पूर्णपारी इत्यस्मिन् विकेट इत्यस्य समान-मापवता लगुडेन क्रीडिता । प्रथमं लेग-बिफोर-विकेट इति अर्थात् पगबाधा-नियमः (1774) चतुस्सप्तत्यधिक-सप्तदशशत- तमे ख्रिस्ताब्दे प्रकाशितः । प्रायः तस्मिन् एव काले तृतीयस्य स्टम्प इत्यस्य प्रचलनम् अपि अभवत् । (1780) अशीत्यधिक-सप्तदश-शततमं ख्रिस्ताब्दं यावत् महतीनां स्पर्धानाम् (मैच) अवधिः दिनत्रयस्य अभवत् अपि च अस्मिन् एव वर्षे षड्-सीवन इति युक्तः क्रिकेट्-कन्दुकः अपि अस्तित्वं प्राप्नोत् इति ।

नवदश-शताब्दे अनेकानि परिवर्तनानि जातानि । वाइड-कन्दुक इत्यस्य नियमः अपि प्रवर्तितः, कन्दुकस्य उचितः-व्यासः निश्चितः,व्रणाद् रक्षणाय पैड इत्यादीनां हस्तप-सदृशानां रक्षोपकरणानां प्रवर्तनं तेषां च प्रयोगः आरब्धः, बाउण्ड्री इत्यस्य अपि आरम्भः जातः । अपरञ्च पूर्वं प्रत्येकं धावनाङ्कः धावित्वा एव पूरणीयं भवति स्म अपि च महत्त्वपूर्णम् एतत् तथ्यम् आसीत् यत् ओवर-आर्म-बोलिंग इति वैधानिकम् अस्ति इति निश्चितम् । परन्तु अष्टादशशताब्दे क्रिकेट इति पूर्व-औद्योगिक-क्रीडा आसीत्, या औद्योगिकक्रान्तेः अर्थात् नवदशशताब्दस्य अपरस्मिन् भागे परिपक्वा अभवत् इति । स्वीयस्य अस्य विशिष्टस्य इतिहासस्य कारणात् क्रिकेट-क्रीडायां भूतवर्तमानकालयोः वैशिष्ट्यानि अपि सम्मिलितानि सन्ति ।

क्रिकेट-क्रीडायाः ग्राम्यमूलानां पुष्टिः निकषस्पर्धायाः अवधेः अपि भवति । आरम्भे क्रिकेट्-स्पर्धायाः समयसीमा न भवति स्म । स्पर्धा तावत्पर्यन्तं प्रवर्तते स्म यावत्पर्यन्तं सम्पूर्णदलम् आउट इति न भवति स्म अर्थात् एकं दलम् अपरं दलं सर्वथा बहिष्कृतं न कुर्यात् इति । ग्रामीण-जीवनस्य गतिः मन्दा आसीत् अपि च क्रिकेट-क्रीडायाः नियमाः औद्योगिकक्रान्तेः पूर्वं रचिताः आसन् इति । आधुनिक-शिल्पशालायाः अभिप्रायः आसीत् यत् जनाः होराणां, दैनिकस्य, सप्ताहस्य च गणनया कार्याय धनं प्राप्नुवन्ति स्म, पादकन्दुक-यष्टिक्रीडा-सदृशानां क्रीडानां संहिताः औद्योगिकक्रान्तेः परं निर्मापिताः परिणामतः तेषाम् औद्योगिकनागरजीवनस्य क्रमं मनसि निधाय एव कठोराः समयसीम्नः रचिताः आसन् ।

तेन एव प्रकारेण क्रिकेटस्य क्रीडाप्राङ्गणेषु आकारस्य स्पष्टता पूर्वं नासीत् तस्मात् ज्ञायते स्म यत् एतस्याः क्रीडायाः आरम्भः ग्राम्यपरिवेशात् जातः इति । क्रिकेटः मूलतः ग्रामस्य कॉमन्स



चित्रम् 4 – एमसीसी-द्वारा निश्चितानां संशोधितानां क्रिकेट-नियमानां स्वरूपे नियमितरूपेण प्रकाशनं भवति स्म । लगुडधारकस्य अपि नियमाः औपचारिकरूपेण निश्चयः क्रियते स्म ।

नूतनः शब्दः

संहिता - स्पष्टरूपेण निश्चित-नियमानां विधानानां च औपचारिकरूपेण सूत्रबद्धीकरणम् ।

इत्यस्मिन् क्रीड्यते स्म । कॉमन्स इति एतादृशानि सार्वजनिकानि मुक्तक्रीडाङ्गणानि आसन् येषु सम्पूर्णसमुदायस्य सामूहिक-अधिकारः भवति स्म। कॉमन्स इत्यस्य आकारः प्रत्येकं ग्रामे पृथक् पृथक् भवति स्म अतः तस्य न तु बाउण्ड्री एव निश्चितम् आसीत् न च चतुष्कं कुत्र स्यात् इति। यदा कन्दुकः जनसम्मर्दं प्रविशति स्म। तदा जनाः क्षेत्ररक्षकाय मार्गं यच्छन्ति स्म यतः सः आगत्य कन्दुकं पुनः नयेत् इति। यदा सीमारेखा क्रिकेटस्य नियमावल्याः भागभूता जाता तदा अपि विकेट इत्यस्मात् तस्य दूरता न निश्चिता आसीत् इति । नियमे तु एतावत् एव उल्लिखितः यत् निर्णायकः द्वौ अपि नायकौ परामृश्य क्रीडायाः क्षेत्रस्य सीमानिश्चयं करिष्यति इति।

क्रीडायाः उपकरणानि पश्यामः चेत् अवगम्यते यत् कालक्रमेण परिवर्तनेन सह क्रिकेटः स्वग्रामीण-इङ्ग्लैण्ड-मूलानि प्रति हितचिन्तकः आसीत्। क्रिकेटस्य सर्वाधिक-आवश्यक-उपकरणानि प्रकृतौ एव उपलब्धाभिः पूर्व-औद्योगिक-सामग्रीभिः निर्मीयन्ते । लगुडं स्टम्प, गिल्ली इति एतानि सर्वाणि अपि काष्ठमयानि भवन्ति अपरञ्च चर्मणा रज्जुना (ट्वाइन) अपि च काग(कार्क)इत्यनेन कन्दुकः निर्मितः भवति। अद्यत्वे अपि लगुडं कन्दुकः च हस्ताभ्याम् एव निर्मीयेते,शिल्पशालायां (यन्त्रेण)न। लगुडस्य सामग्री निस्सशयं कालक्रमेण परिवर्तिता । कदाचित् लगुडः अच्छिन्नकाष्ठखण्डेन निर्मीयते स्म। परन्तु अधुना एतस्य द्वौ भागौ भवतः – ब्लेड अथवा फट्टा इति यः विलो (बैद) इति नामकेन वृक्षेण निर्मीयते अपि च अपरेः हत्था इति यः बेंत इत्यनेन निर्मीयते। (वेत्रं) बेन्त इति तदा उपलब्धं यदा यूरोपीय-उपनिवेशकाराः समवायाः च आत्मानम् एशियायां स्थापितवन्तः। गोल्फ,टेनिस इति एतयोः विपरीतं क्रिकेटे प्लास्टिक-फायबर-सीसकादीनां धातूनां वा औद्योगिक-कृत्रिम-सामग्रीणां च प्रयोगः अस्वीकृतः । यदा आस्ट्रेलियायाः क्रिकेट-क्रीडकः डेनिस-लिली एल्युमीनियम इत्यस्य लगुडस्य खेलनाय प्रयोगं कर्तुम् इष्टवान् तदा निर्णायकैः सः अवैधः इति घोषितः।

चित्रम् 5 – एतस्मिन् चित्रे लार्ड्स इत्यस्मिन् (1848) अष्टाचत्वारिंशदधिकाष्टादश-शत-तमे ख्रिस्ताब्दे जायमानायाः कस्याश्चित् स्पर्धायाः घोषणा क्रियते।
चित्रे मनोरञ्जनाय ये क्रीडकाः क्रीडन्ति ते जेण्टलमेन(भद्रपुरुषः) , व्यवसायरूपेण च ये क्रीडकाः क्रीडन्ति ते प्लेयर्स इति उक्त्वा सम्बोध्यन्ते । नवदश-शताब्दे जायमानानां स्पर्धानां विज्ञापनानि रङ्गमञ्चस्य भित्तिपत्राणि इव प्रतीयन्ते स्म अपि च तैः एतस्य खेलस्य नाटकीय-स्वरूपस्य अवगमनं भवति।

अपरतः सुरक्षायै यानि वस्तूनि उपयुज्यन्ते तेषां प्रविधौ साक्षात् परिवर्तनानि जातानि। वल्केनाइज्ड-रबड इत्यस्य अन्वेषणात् परं पैड इति धारणस्य प्रचलनं (1848) अष्टाचत्वारिंशदधिकाष्टादशशततमे ख्रिस्ताब्दे अभवत्, शीघ्रमेव हस्तपाः अपि निर्मिताः अपि च धातोः सिन्थेटिक इत्यस्य अपि च अभार-सामग्र्या निर्मितेन हेल्मेट शिरस्त्राणेन वा विना तु आधुनिकक्रिकेटस्य कल्पनाम् अपि न कर्तुं शक्नुमः।

चित्रम् – 6 – महान् लगुडधारकः डब्ल्यू.जी.ग्रेस-महोदयः बल्लेबाजी इत्यस्यै आयाति,लार्ड्स्, 1895, सः क्रीडकान् विरुध्य जेंटलमेन इत्यस्मै क्रीडति स्म।

1.1 क्रिकेटः विक्टोरियायी इङ्ग्लैण्ड-देशः च

इङ्ग्लैण्डदेशे क्रिकेटस्य आयोजने आङ्ग्ल-समाजस्य योगदानं स्पष्टम् अस्ति। धनिकाः ये मनोरञ्जनाय क्रिकेटं क्रीडन्ति स्म ते आमोदाय क्रीडन्ति स्म ते आमोदक्रीडका कथ्यन्ते स्म अपि च ये स्वाजीविकायै क्रीडन्ति स्म ते व्यवसायिक्रीडकाः इति उच्यन्ते स्म प्रायः एतादृशाः क्रीडकाः धनिकाः न भवन्ति स्म। धनिकाः आमोदक्रीडकाः किमर्थम् आसन् तत्र कारणम् आसीत् - प्रथमम् – इयं क्रीडा तेषां कृते मनोरञ्जिका आसीत् अपि च आनन्दाय क्रीडनं राजसीप्रवृत्त्याः प्रतीकभूतम् आसीत् इति। अपरं कारणम् – तावत् धनं क्रीडनेन न प्राप्यते स्म येन धनाढ्याः सन्तुष्टाः भवितुं शक्नुयुः इति। व्यावसायि-क्रीडकेभ्यः तदेव धनं दीयते स्म यत् धनं मुख्यद्वारे दर्शक-चिटिका-रूपेण प्राप्यते स्म। एषा क्रीडा ऋत्वनुगुणं भवति स्म अतः आवर्षम् आजीविकायाः कृते धनम् अनया न प्राप्यते स्म। शीततौ अधिकतराः क्रीडकाः प्रायः आकरेषु कार्यं कुर्वन्ति स्म अपि च अन्यत्र श्रमं कुर्वन्ति स्म तेषु दिनेषु स्पर्धाः न भवन्ति स्म। स्वान्तःसुखिनां सामाजिकश्रेष्ठता क्रिकेटस्य परम्परायाः भागभूता जाता। रुचिमतां जनानां कृते भद्रपुरुष इति उपाधिः दत्तः व्यवसायि-क्रीडकानां कृते क्रीडक इति लघुनाम प्रदत्तम्। क्रीडाक्षेत्राणि प्रवेष्टुम् अपि तयोः पृथक् पृथक् द्वाराणि आसन्। रुचिमन्तः तु लगुडधारिणः भवन्ति स्म तत्रैव खेलने वास्तविक-श्रमस्य ऊर्जायाः च नियोजनं यथा – तीव्र-कन्दुक-क्षेपणम् आक्रीडिनां कार्यं भवति स्म।

नूतनशब्दः

चंदा इति – कस्मैचित् विशिष्टोद्देश्याय यथा क्रिकेटस्य कृते एकत्री-क्रियमाणः धनराशिः अथवा साहाय्य-राशिः।

स्रोतः कः इति

टॉमस-ह्यूज-वर्यः (1822-1896) तस्मिन् काले रग्बी-विद्यालये अध्ययनम् अकरोत् यस्मिन् काले थामस-आर्नल्ड-वर्यः तत्रत्यः प्रधानाचार्यः आसीत्। स्वविद्यालयीयानाम् अनुभवानाम् आधारेण सः कञ्चित् उपन्यासम् अलिखत् यस्य शीर्षकम् आसीत् – टाम-ब्राउन्स-स्कूलडेज़ इति। (1857) सप्तपञ्चाशदधिकाष्टादश-शत-तमे ख्रिस्ताब्दे प्रकाशितं तत् पुस्तकम् अतीव लोकप्रियम् आसीत् अपि च बाहुबलि-ख्रिस्तीयस्य (मस्क्युलर क्रिश्चिऐनिटी) प्रसारे साहाय्यं प्राप्तम् इति। ख्रिस्तीय-धर्मस्य एतस्याः धारायाः मतम् आसीत् यत् स्वस्थ-नागराः ख्रिस्तीय-आदर्शानां क्रीडानां च माध्यमेन धर्मं प्रति ते प्रेरणीयाः इति।

एतस्मिन् पुस्तके टॉम-ब्राउन-वर्यः गृहस्य स्मरणे रतः कश्चित् म्लानमुखः बालकः नास्ति अपितु कश्चित् वीरः विद्यार्थी भवति। सः नायकवत् ख्यातिम् अर्जयति अपि च शारीरिक-साहसस्य क्रीडाशीलतायाः कर्तव्यनिष्ठायाः देशभक्तेः च भावनाभ्यः सर्वे तस्य चर्चां कुर्वन्ति। इदं रूपान्तरणं तस्य निज-विद्यालयस्य अनुशासनात् खेलसंस्कृतेः च जायते।

एतस्य एव उपन्यासस्य अंशाः

भोः ब्राउन, – अधुना स्व-व्यंग्यबाणान् न प्रयुनक्तु ,अध्यापकः अवदत्। अहम् एतां क्रीडां वैज्ञानिकरूपेण अवगन्तुम् आरब्धवान्, अहो इयं कीदृशी शीलवती क्रीडा अस्ति ।

अस्ति वा नास्ति ? परन्तु इयं केवला क्रीडा एव नास्ति – टॉमः अवदत्

आम्, आर्थरः अवदत् – आ ब्रिटिश-युवक-वृद्धं जन्मसिद्धाधिकारवत् वर्तते यथा बन्दि-प्रत्यक्षीकरण-प्रक्रिया-सम्मत-न्यायः प्रत्येकं ब्रिटिशस्य अधिकारः अस्ति। अस्मात् वयम् अनुशासनस्य पारस्परिक-निर्भरतायाः च शिक्षां प्राप्नुमः, सा अमूल्या अस्ति, अध्यापकः निरन्तरम् अकथयत्, अहम् अनुभवामि यत् इयं क्रीडा निःस्वार्थिनी भवेत् इति। अत्र जनः एकादशे मिलति, सः एतस्मात् कारणात् न क्रीडति यत् जयो भवेत् इति। अपि तु तस्य समूहस्य जयः भवेत् इति।

इदं सर्वथा सत्यम् अस्ति, टॉमः अवदत् – अतः पाद-कन्दुक-क्रीडा क्रिकेटः च पुरातनानां पारम्परिक-क्रीडानाम् अपेक्षया अधिकाः लोकप्रियाः सन्ति। यतो हि अन्यासु क्रीडासु जनः केवलं स्वस्य जयाय क्रीडति न तु स्वपक्षस्य जयाय इति।

पुनः एकादश इत्यस्य नायकस्य विषये तु किं वदेम इति ! अस्माकं विद्यालयीय-संसारे एतस्य पदस्य गरिमा कीदृशः अस्ति। एतदर्थं प्रतिभायाः अपि आवश्यकता भवति, भद्रता दृढता चापि,अन्ये च बहवः गुणाः अपि आवश्यकाः भवन्ति इति।

टॉमस-ह्यूजः, टॉम-ब्राउन्स-स्कूलडेज़ इत्यस्मात् उद्धृतम्।

क्रिकेट-क्रीडायां सन्देहस्य लाभः (बेनेफिट्-आफ-डाउट) सदैव लगुडधारिणे एव दीयते स्म तस्य मूले कारणम् इदम् अपि आसीत् यत् क्रिकेट इति लगुड्-धारिणाम् एव क्रीडा एतस्मात् कारणात् जाता यतो हि नियमस्थापनकाले लगुडधारिणे (जेंटल-मेन)महत्त्वं दत्तम्। प्रमोदाय ये क्रीडकाः क्रीडन्ति स्म तेषां सामाजिक-श्रेष्ठतायाः एव परिणामः आसीत् यत् दलीयः नायकः पारम्परिकरूपेण लगुडधारी एव भवति स्म एतस्मात् कारणात् न यत् लगुडधारी प्रकृत्या श्रेष्ठः नायकः भवति स्म अपि तु एतस्मात् कारणात् यत् सः सामान्यरूपेण भद्रपुरुषः एव भवति स्म। कामं क्लब इत्यस्य दलं स्यात् अथवा राष्ट्रियदलं स्यात्, नायकः तु रुचिमान् क्रीडकः एव भवति स्म। (1930) त्रिंशदधिक-नवदश-शततमं दशकं प्राप्य प्रथमवारम आङ्ग्लदलस्य नायकदायित्वं केनचित् व्यवसायि-क्रीडकेन स्वीकृतं चेत् तस्य नाम आसीत् यार्कशायर इत्यस्य दलस्य लगुडधारी लेन-हटनः इति।

प्रायः उच्यते यत् वाटरलू इत्यस्य युद्धम् ईटन इत्यस्य क्रीडायाः क्षेत्रे जितम्। एतस्य अर्थः अयम् अस्ति यत् ब्रिटेनस्य सैन्य-साफल्यस्य रहस्यं तस्य निजविद्यालयस्य प्रशिक्षितबालकानां मूल्येषु आसीत् इति। आङ्ग्ल-आवासीये विद्यालये आङ्ग्लीयाः बालकाः राजस-इङ्ग्लैण्डस्य त्रयाणां मुख्यसंस्थानानां कृते प्रशिक्षिताः क्रियन्ते स्म तानि त्रीणि संस्थानानि आसन्- सेना प्रशासनिकसेवा ख्रिस्तालयः इत्येतानि। नवदश-शताब्दस्य आरम्भात् किञ्चित् पूर्वं टॉमस-आर्नाल्डः यः प्रसिद्धस्य रग्बी इति विद्यालयस्य प्रधानाचार्यः आसीत् अपि च तेन सह एव आधुनिक्याः निजविद्यालय-प्रणाल्याः अपि प्रणेता आसीत्, रग्बी क्रिकेट-सदृशीः क्रीडाः केवलं क्रीडाङ्गणीयाः क्रीडाः एव न आसन् इति सः मन्यते स्म अपितु आङ्ग्ल-बालकाः क्रिकेटः इत्यनेन अनुशासनम् उच्चनीचज्ञानं कौशलं स्वाभिमानं रीतिं नीतिं नेतृत्व-क्षमताम् अपि जानीयुः इति। एतादृशानां गुणानाम् आधारेण तु एव ब्रितानी इति साम्राज्य-निर्माणस्य सञ्चालनस्य च अपि दायित्वम् आसीत्। विस्टोरिया इति साम्राज्यस्य निर्मातारः अपरेषां देशानां जयः निःस्वार्थसमाजसेवा वर्तते इति ते मन्यन्ते स्म, यतोहि तेभ्यः पराजयात् परमेव तु पश्चवर्तिनः समाजाः ब्रितानी इति अधिनियमस्य पश्चिमज्ञानस्य च संपर्कम् आगत्य सभ्यतायाः तात्पर्यं ज्ञातुं शक्नुवन्ति स्म। क्रिकेट-क्रीडया अभिजातानाम् आङ्ग्लीयानाम् एतां छविं पोषयितुं साहाय्यं कृतम्, पूर्वं यत् मनोरञ्जनाय क्रीडा भवति स्म अनन्तरकाले तत् आदर्शरूपेण भूत्वा अर्थात् यत्र एषा क्रिकेट इति क्रीडा नहि लाभाय न वा जयाय अपितु केवलं क्रीडायै अपि च न्यायोचित-खेल-भावनायै क्रीड्यते स्म इति।

सत्यं तु एतत् अस्ति यत् नेपोलियन-वर्यं विरुध्य युद्धम् एतस्मात् कारणात् एव जये परिवर्तितं यतो हि स्काटलैण्डस्य वेल्स-नगरस्य च लौहोद्योगाः, लङ्काशायर-नगरस्य च शिल्पशालाः च सिटी ऑफ लन्दन इत्यस्य वित्तीयसंस्थाः तेषाम् उद्योगानां शिल्पशालानां च पर्याप्तं सहयोगम् अकुर्वन् इति। इङ्ग्लैण्डदेशस्य वाणिज्यसंस्थाः उद्योगाः च सम्पूर्णतयाः विकसिताः आसन् अपि च ते प्रामुख्यं भजन्ते स्म तस्मात् कारणात् ब्रिटेनः विश्वे महाशक्तिरूपेण जातः आसीत् इति परन्तु आङ्ग्ल-शासकीय-वर्गः एतत् एव चिन्तयन्ति स्म यत् आ विश्वे तेषां श्रेष्ठतायाः मूले आवासीय-विद्यालयेषु पठित्वा ये जनाः कार्याय सिद्धाः जाताः अपि च भद्रपुरुषाणाम् अस्याः क्रिकेट- क्रीडायाः क्रीडक-युव-वर्गः एव तत्र कारणम् अस्ति।

चित्रम् 7 – लार्ड्स इत्यमिन् क्रीडाङ्गणे ईटन-हैरो इति नामधेययोः प्रसिद्ध-निजविद्यालययोः मध्ये क्रिकेट्-स्पर्धा। इयं क्रीडा तु सर्वत्र समाना प्रतीयते परन्तु तां द्रष्टुं यः जनसम्मर्दः आयाति सः समानः न भवति इति। कन्दुक-क्षेपकाः शिरस्त्राण-धारिणः पुरुषाः अपि च आतपात् रक्षणाय पैरासोल इति धारिण्यः महिलाः याः स्पर्धां द्रष्टुम् आगतवत्यः, तासां चित्रणात् एतस्याः क्रीडायाः उच्चवर्गीयं सामाजिकचरित्रं स्पष्टतया दृश्यते। इलस्ट्रेटड-लन्दन-न्यून इति, (20) विंशति-दिनाङ्के जूलै-मासे,(1872) द्विसप्तत्यधिकाष्टादशशततम-ख्रिस्ताब्दात् सङ्कलितम्।

चित्रम् 8 – महिलाभ्यः क्रिकेटः नैव अपि तु क्रोकेटः इति ,
महिलाभ्यः कठिना प्रतिस्पर्धीया क्रीडा च समीचीना न मन्यते स्म । क्रोकेट् इति काचित् मन्दगतिका सौम्यक्रीडा आसीत् या विशिष्टरूपेण उच्चवर्गीय-महिलाभ्यः समीचना इति मन्यते स्म । क्रीडिकानां लम्बतराः गाउन इति, झल्लरीयुक्तपरिधानीयं शिरस्त्राणं च दृष्ट्वा एतस्याः क्रीडायाः स्वरूपस्य दिग्दर्शनं भवति ।

इलस्ट्रेटेड-लन्दन-न्यूज इति,(20)जूलै,1872इत्यस्मात् ।

स्रोतः ख इति

भागरूपेण न आसीत् । (1858) अष्टपञ्चाशदधिकाष्टादशशत-तमवर्षात् (1906) षडधिकनवदशशत-तमवर्षं यावत् चेलटेनहेम-महिला-महाविद्यालयस्य प्रधानाचार्या डोरोथी – बाएले विद्यालयस्य निरीक्षक-आयोगाय निवेदितवती बालकाः क्रिकेट् इत्यादिक्रीडाभिः यं शारीरिकव्यायामं कुर्वन्ति तस्मिन् स्थाने बालिकाभ्यः पदातिचलनस्य कूर्दनस्य च व्यवस्था भवेत् इति । कैथलीन, ई.मैक्क्राने, प्ले अप! प्ले अप! प्ले अप! ऐण्ड प्ले द गेम – स्पोर्ट् ऐट् द लेट् विस्टोरियन-गर्ल्स-पब्लिक-विद्यालयात् उद्धृतम् ।

(1890) नवत्यधिकाष्टादश-शततम-दशकस्य प्राप्तिं यावत् विद्यालयेषु क्रीडाङ्गणानाम् अपि व्यवस्था जायते स्म अपि च बालिकाः अपि ताभिः क्रीडाभिः क्रीडितुम् अवसरं प्राप्तुम् आरब्धवत्यः अधुना यावत् ताः क्रीडाः बालकाः एव केवलं क्रीडन्ति स्म । परन्तु अधुना अपि बालिकाः प्रतिस्पर्धात्मक-क्रीडाः क्रीडेयुः इति आशा ताभ्यः न क्रियते स्म । डोरोथी-बीएले (1893-1894) त्रिनवत्यधिकाष्टादशशततमवर्षात् चतुर्नवत्यधिकाष्टादशशततमवर्षपर्यन्तं विद्यालयपरिषदम् असूचयत् –

अहं मन्ये यत् बालिकाभिः शरीरविषये अतिक्रमणं न करणीयम् इति न चैव ताभिः क्रीडकीय-प्रतिस्पर्धासु आधिक्येन भागः ग्रहीतव्यः भवति । अतः वयम् अन्य-विद्यालयान् विरुध्य न क्रीडिष्यामः इति । मम चिन्तनानुसारं तु बालिकाः नतोन्नत-क्रीडाङ्गणेषु अक्रीडित्वा आधिक्येन वनस्पतिशास्त्रं भूगर्भशास्त्रादिकं च अधिकरुच्या पठेयुः इति ।

कैथलीन, ई.मैक्क्राने, प्ले अप! प्ले अप! ऐण्ड-प्ले द गेम इत्यस्मात् उद्धृतम् ।

क्रियाविधिः

नवदश-शताब्दस्य विद्यालयीय-पाठ्यक्रमस्य आधारेण तस्मिन् काले बालिकानां कीदृशम् आचरणं समीचीनम् इति मन्यते स्म ?

।।इति द्वितीयः पाठः ।।

2 क्रिकेट्-क्रीडायाः प्रसारः

यष्टिक्रीडा-पादकन्दुकादिप्रभृत्यः क्रीडाः तु अन्ताराष्ट्रियाः क्रीडाः जाताः परन्तु क्रिकेटः इति औपनिवेशिक-क्रीडा एव आसीत्, अर्थात् क्रिकेट-क्रीडा तेषु देशेषु एव प्रसृता ये देशाः कदाचित् ब्रिटिश-साम्राज्यस्य एव अङ्गभूताः आसन् इति। क्रिकेट-क्रीडायाः पूर्वायाः औद्योगिक्याः विचित्रतायाः कारणात् एतस्याः निर्यातः दुश्शक्यः आसीत् इति। इयं क्रिकेट-क्रीडा तेषु देशेषु एव स्थायिरूपं प्राप्नवती येषु देशेषु आङ्ग्लीयाः अधिग्रहणं कृत्वा चिरकालं यावत् शासनं कृतवन्तः। एतेषु उपनिवेशेषु दक्षिणाफ्रीका जिम्बाब्वे आस्ट्रेलिया न्यूजीलैण्डं वेस्ट-इण्डीज् कीनिया च सम्मिलिताः आसन् एतेषु चर्चित-देशेषु क्रिकेट्-क्रीडा एतस्मात् कारणात् लोकप्रिया जाता यतो हि तत्र आङ्ग्लीयाः एतया क्रीडितवन्तः अथवा पुनः तत्रत्येन अभिजातवर्गेण निज-औपनिवेशिक-स्वामिनां प्रकृतेः अनुकरणस्य प्रयासः कृतः भारते अपि तथैव अभवत् इति।

यद्यपि ब्रिटिश-राजतन्त्रीयाः अधिकारिणः उपनिवेशेषु इमां क्रीडाम् आनीतवन्तः परन्तु एतस्याः प्रसाराय ते वेस्ट-इण्डीज्-भारतप्रभृतिषु देशेषु प्रायः अत्र प्रसाराय प्रयत्नं कदाचित् एव कृतवन्तः स्युः इति। क्रिकेट-क्रीडा अत्र सामाजिकतायाः जातीय-वैशिष्ट्यस्य प्रतीकरूपेण आसीत्। अफ्रीकीय-कैरिबियायि-जनाः सदैव क्लब-क्रिकेट इति क्रीडितुं न तु प्रेरिताः न चैव निरुत्साहिनः कृताः। परिणामतः आङ्ग्लीयानाम् उद्यान-स्वामिनां तेषां च सेवकानाम् एव एतस्यां क्रीडायाम् अधिकारः आसीत्। वेस्ट्-इण्डीज-देशे प्रथमं अनाङ्ग्लीय-क्लब इति नवदश-शताब्दस्य अन्ते निर्मितम् अपि च अत्रापि सदस्याः अगाढवर्णयुक्ताः **मुलैट्टो** इति समुदायस्य आसन्। अनेन प्रकारेण कृष्णवर्णीयाः जनाः समुद्रीयेषु तटवर्तिषु स्थानेषु निर्जनवीथिषु उद्यानेषु चैव आधिक्येन क्रिकेट् इत्येतं

चित्रम् – 9 – औपनिवेशिक-भारतस्य क्रीडाङ्गणेषु मध्याह्नात् परं टेनिस इति क्रीडा,
अत्र चित्रकारेण प्रदर्शनस्य प्रयासः कृतः यत् इयं क्रीडा मनोरञ्जनस्य व्यायामस्य च दृष्ट्या उपयोगिनी आसीत्। महिलाः पुरुषाः च प्रतिस्पर्धितुं नैव अपितु मनोरञ्जनाय, सहैव क्रीडितुं शक्नुवन्ति स्म। ग्राफिक्, फरवरीमासस्य (1880) अशीत्यधिकाष्टादशतमवर्षात् उद्धृतमस्ति।

चित्रम् – 10 – हिमालयस्य पृष्ठभूमौ मनोरञ्जनाय स्पर्धमानाः स्पर्धाः।
एतस्मिन् चित्रे पैविलियन इत्यस्य पार्श्वे स्थितान् सेवकान् अतिरिच्य प्रायः कोऽपि भारतीयः नास्ति।

नूतन-शब्दः

मुलैट्टो इति – मिश्रितयूरोपीयाः अफ्रीकामूलीयाः च जनाः।

क्रीडन्ति स्म परन्तु क्लब इति क्रिकेट्-क्रीडायां (1930) त्रिंशदधिकनवदशशततमदशकं यावत् श्वेताभिजनानां वर्चस्वम् आसीत्।

वेस्ट्-इण्डीज्-देशे अभिजात-श्वेतानां विशिष्टवादि-नीतिषु सतीसु अपि कैरिबियायि-द्वीप-समूहे क्रिकेट इति लोकप्रियम् अभवत् । क्रिकेट इत्यस्मिन् साफल्यस्य अभिप्रायः जातिसमानता अपि च राजनैतिक-प्रगति इति जातः । स्वीय-स्वतन्त्रतायाः काले फोर्ब्स-बर्न-हैम-एरिक-विलियम्स-सदृशाः नेतारः क्रिकेट इत्यस्मिन् आत्मसम्मानस्य अन्ताराष्ट्रिय-प्रतिष्ठायाः च सम्भावनाः दृष्टवन्तः । यदा वेस्ट्-इण्डीज्-दलेन (1950) पञ्चाशदधिकनवदशशततम-दशके इङ्ग्लैण्डं विरुध्य स्वप्रथम-निकषस्पर्धा जिता तदा राष्ट्रीय-उत्सवस्य आचरणं कृतम् अनेन तैः प्रतिष्ठापितं यत् ते आङ्ग्लीयेभ्यः न्यूनतराः न सन्ति इति। एतस्मिन् महति जये द्वे विडम्बने आस्ताम्। प्रथमं येन इण्डीज्-दलेन जयः प्राप्तः तस्य नायकः श्वेताङ्ग्लीयः एव आसीत्। स्मर्तव्यं यत् (1960) षष्ट्यधिकनवदशशत-तमे ख्रिस्ताब्दे प्रथमवारं कश्चित् अश्वेतः फ्रैन्क-वारेलः इण्डीजस्य नेतृत्वस्य अवसरं प्राप्तवान् इति । अपरं वेस्ट्-इण्डीज्-दलं कस्यचित् एकस्य देशस्य नासीत् अपि तु तस्मिन् दले अनेके डीमीनियनों इत्यस्य क्रीडकाः अपि सम्मिलिताः आसन् अपि च एतानि राज्यानि अनन्तरकाले स्वतन्त्रदेशाः जाताः । रोचकं तथ्यं तु इदम् अस्ति यत् कैरिबियायि इति क्षेत्रस्य नेतृत्वकर्तृ-इण्डीज्-दलं वेस्ट्-इण्डियन इत्यस्य ऐक्यस्य सर्वेषां विफल-प्रयासानाम् एकमात्रम् अपवादरूपम् एव आसीत् इति।

चित्रम् 11 – हिमालयस्य कस्मिंश्चित् ग्रामे जनाः अस्थायिरूपेण क्रिकेट-क्रीडां क्रीडन्ति (1894), दशं चित्रस्य विपरीतम् अत्र क्रीडकाः हस्तनिर्मितैः विकेट् बल्ला च इत्येतैः क्रीडन्ति । ते काष्ठस्य सामान्यखण्डान् कर्तित्वा एव एतानि क्रीडोपकरणानि रचितवन्तः ।

चित्रम् – 12 – लैरी-कान्स्टैण्टाइनः, वेस्ट्-इण्डीजस्य विश्वप्रसिद्ध-क्रीडकेषु अन्यतमः ।

क्रिकेट-क्रीडायाः प्रशंसकाः जानन्ति यत् क्रिकेट-स्पर्धायाः दर्शनस्य अभिप्रायः एव अस्ति यत् भवन्तः कयोश्चित् पक्षयोः एकस्य प्रशंसकाः सन्ति इति । रणजी-ट्राफ़ी-स्पर्धायां यदा देहली-मुम्बयिदलयोः परस्परं स्पर्धाः स्यात् चेत् दर्शकस्य निष्ठायाः आधारः भविष्यति यत् सः कस्य नगरस्य निवासी अस्ति अपि च सः कं प्रशंसति इति । यदा भारतपाकदेशयोः मध्ये स्पर्धा स्यात् तदा भोपाले चैन्ने चेति राज्ययोः दर्शकानां भावनाः राष्ट्रिय-निष्ठाभिः निश्चिताः भवन्ति इति । परन्तु भारतीय-प्रथम-श्रेणी-क्रिकेट् इत्यस्य आरम्भिके इतिहासे दलानि भौगोलिक-आधारेण न वण्टयितुं शक्यन्ते स्म अपि तु एतत् ज्ञानं रोचकम् अस्ति यत् (1932) द्वाविंशत्यधिकनवदशशततमात् ख्रिस्ताब्दात् पूर्वं कस्यापि दलस्य निकष-स्पर्धायां प्रदर्शनस्य अधिकारः न दीयते स्म, तदा दलानां निर्माणं कथं भवति स्म अपि च राष्ट्रिय-क्षेत्रीय-दलानाम् अनुपस्थितेः प्रशंसकाः स्वसमर्थनं कस्मै भवेत् इति निश्चयं कथं कुर्वन्ति स्म ? आयान्तु,पश्यामः यत् इतिहासस्य पार्श्वे एतेषां प्रश्नानाम् उत्तराणि कानि सन्ति ? पश्यन्तु यत् भारते क्रिकेट् इति कथं विकासं प्राप्तवत् इति, काः च निष्ठाः ब्रितानीराजस्य काले भारतीयान् आत्मना सह आनयन्ति स्म काः च तेषां विभागं कुर्वन्ति स्म।

2.2 क्रिकेटः,जातिः धर्मः च

औपनिवेशिक-भारते क्रिकेटः जातेः धर्मस्य च आधारेण सङ्घटितम् आसीत् इति । भारते क्रिकेटस्य प्रथमसाक्ष्यं वयं (1721) एकविंशत्यधिक-सप्तदश-शततमे ख्रिस्ताब्दे प्राप्तवन्तः यत् आङ्ग्लपोत-यात्रिभिः कैम्बे इति स्थाने क्रीडितायाः

नूतनशब्दः

डोमीनियन इति – ब्रिटिश-साम्राज्यस्य अन्तर्गतानि परिगणितानि स्वशासितक्षेत्राणि।

स्पर्धायाः विवरणम् अस्ति । प्रथमं भारतीयं क्लब इति कलकत्ता-क्लब इति (1792) द्विनवत्यधिकसप्तदशशततम-तमख्रिस्ताब्दे निर्मितम् । सम्पूर्णे अष्टादश-शताब्दे क्रिकेट इति भारते ब्रिटिश-सैनिकाः सिविल-सेवकाः च एव क्रीडन्ति स्म ते केवलं श्वेतक्लब इत्येतेषु व्यायामशालासु च एव क्रीडन्ति स्म । एतादृशानां परिवृत्त-भित्तीनाम् आभ्यन्तरे क्रिकेट-क्रीडनेन आनन्दः तु जायते स्म एव, एतदतिरिच्य एतत् क्रीडनम् आङ्ग्लीयानां भारते प्रवासस्य तेषां भयात् मुक्तेः काठिन्यं दूरीकर्तुं चापि कारणम् आसीत् । इमां क्रीडां क्रीडितुं भारतीयानां कौशलं नास्ति अतः ते इमां क्रीडां न क्रीडितुं शक्नुवन्ति इति आङ्ग्लीयानां मतम् आसीत् परन्तु भारतीयाः क्रीडितवन्तः इति ।

भारते क्रिकेट् इत्यस्य आरम्भः सर्वादौ मुम्बयिमहानगरस्य जरतुश्ति-जनैः अर्थात् पारसी-जनानां केनचित् लघुसमुदायेन कृतः । वाणिज्यस्य माध्यमेन ते सर्वादौ आङ्ग्लीयानां सम्पर्के आगताः अपि च ते पारसीजनाः पश्चिमीकृतस्य भारतीयसमुदायस्य रूपेण (1848) अष्टाचत्वारिंशदधिकाष्टादशशत-तमे ख्रिस्ताब्दे आदौ क्रिकेट्-क्लब इत्यस्य स्थापना बम्बयिमहानगरे कृतवन्तः । यस्य नाम आसीत् – ओरिएण्टल – क्रिकेट्-क्लब इति । टाटा-वाडिया-सदृशाः पारसीव्यवसायिनः पारसी-क्लब इत्येतेषां प्रायोजकाः वित्तपोषकाः च आसन् । क्रिकेट-क्रीडक-श्वेत-प्रभु-वर्गेण उत्साहिनां पारसिनां किञ्चित् अपि साहाय्यं न कृतम् । श्वेतानां बॉम्बे-जिमखाना-क्लब इत्यस्य पारसी-क्रिकेट्-क्रीडकानां च मध्ये पार्क इत्यस्य उपयोगम् अभिलक्ष्य कलहः अपि अभवत् इति । पारसीजनानां कथनम् आसीत् यत् बाम्बे-जिमखाना इत्यस्य पोलो-दलस्य अश्वैः भूमेः मर्दनं कृतं तस्मात् क्रिकेट् इति क्रीडन-योग्यं क्रीडाङ्गणम् अधुना नास्ति इति । यदा एतत् स्पष्टम् अभवत् यत् औपनिवेशिक-अधिकारिणः स्वदेश-वासिनाम् एव पक्षपातं कुर्वन्तितदा पारसीजनैः स्वीया काचित् जिमखाना इति रचिता इति । परन्तु पारसीजनानां नस्लवादि-बॉम्बे-जिमखाना इत्यनयोः मध्ये एतस्याः स्पर्धायाः अन्तः समीचीनः जातः, पारसीदलेन बॉम्बे-जिमखाना-दलं (1889) एकोननवत्यधिक-अष्टादशशत-तमे वर्षे पराजितम् । एतत् भारतीय-राष्ट्रिय-काङ्ग्रेस-दलस्य स्थापनायाः चतुर्णां वर्षाणाम् अनन्तरम् अभवत् अपि च रोचकं तथ्यम् इदम् अस्ति यत् एतस्याः संस्थायाः प्रमुखनेतृषु दादाभायिनौरोजी यः तात्कालिकः महान् राजनेता बुद्धिजीवी च आसीत् स पारसी एव आसीत् ।

चित्रम् 13 – पारसिदलम्, प्रथमं भारतीयदलं येन (1886) षडशीत्यधिकाष्टादशशत-तमे वर्षे इङ्ग्लैण्डस्य यात्रा कृता, परम्परागत-क्रिकेट-परिधानेन सह ते पारसीयं शिरस्त्राणम् अपि धृतवन्तः ।

पारसी-जिमखाना-क्लब इत्यस्य स्थापनया काचित् नूतना आधारभूता परम्परा प्रचालिता अपरैः भारतीयैः अपि धर्मस्य आधारेण क्लब-निर्माणस्य आरम्भः कृतः । हिन्दुः मुसलमानः च इत्येतौ द्वौ एव (1890) नवत्यधिकाष्टादशशत-तमदशके हिन्दू-इस्लाम-जिमखाना इत्यस्य कृते धन-सङ्ग्रहणं कुर्वन्तः दृश्यन्ते स्म । ब्रिटिश-जनाः औपनिवेशिक-भारतं राष्ट्ररूपेण न मन्यन्ते स्म तेषां कृते तु भारतं विभिन्नानां जातीनां धर्माणां च समुच्चयः आसीत् इति यं ते उपमहाद्वीपस्य स्तरे एकीकृतवन्तः । नवदश-शताब्दस्य अन्ते अनेकाः भारतीयाः संस्थाः आन्दोलनानि जातिधर्मयोः आधारेण जातानि यतो हि औपनिवेशिक-सर्वकाराः अपि एतत् स्वीकुर्वन्ति स्म वर्धयन्ति च स्म, सामुदायिक-संस्थाभ्यः झटिति मान्यता प्रदीयते स्म । उदाहरणार्थम् इस्लाम-जिमखानाद्वारा

बम्बयि-महानगरस्य क्षेत्रस्य पार्श्वस्था या भूमिः अस्ति तां भूमिं स्वीकर्तुं प्रार्थनापत्रम् आगतम् अस्ति तम् अधिकृत्य विचारयन् बॉम्बे-प्रेसिडेंसी इत्यस्य गवर्नरः अलिखत् - अस्माभिः एतत् मत्वा वर्तितव्यं यत् शीघ्रमेव अस्माकं पार्श्वे कस्यचित् हिन्दु-जिमखाना इत्यस्मै एतादृशम् एव प्रार्थनापत्रम् आगमिष्यति ... एतादृशानां प्रार्थना-पत्राणाम् अस्वीकृतेः मम पार्श्वे कोऽपि उपायः नास्ति इति परन्तु अहं प्रत्येकं राष्ट्रीयतायाः जिमखाने इत्यस्य स्थापनायाः अनन्तरम् अग्रिम-आवेदनानि न स्वीकरिष्यामि । बलम् अस्माकम् इति । अनेन पत्रेण स्पष्टम् अस्ति यत् औपनिवेशिक-अधिकारिणः प्रत्येकं धार्मिक-समुदायं पृथक् राष्ट्रियता इति मन्यते स्म । इदम् अपि स्पष्टम् अस्ति यत् धार्मिक-प्रतिनिधित्वस्य नाम्ना स्वीकरणस्य सम्भावना अधिका दृश्यते स्म इति ।

(जिमखाना) क्रिकेट्-क्रीडायाः इतिहासेन प्रथम-श्रेण्याः क्रिकेट इति साम्प्रदायिक-आधारेण जातेः आधारेण च सङ्घटनस्य आरम्भः कृतः । औपनिवेशिक-भारतवर्षे प्रसिद्धतम-क्रिकेट्-स्पर्धालु-दलानि क्षेत्रस्य आधारेण न भवति स्म, यथा अद्यत्वे रणजी-स्पर्धायां भवति अपि तु धार्मिक-समुदायानां दृष्ट्या दलानि भवन्ति स्म । एतस्याः स्पर्धायाः नाम आरम्भे क्वाड्रैंग्युलर इति अथवा चतुष्कोणीया इति उच्यते स्म यतो हि चत्वारि दलानि यूरोपीय-पारसी-हिन्दू-मुस्लिमानां च भवन्ति स्म अपि च ताः एव क्रीडन्ति स्म । अनन्तरकाले एतत् एव पेण्टाङ्गयुलर इति अथवा पञ्चकोणीयम् इति जातम् अपि च द-रेस्ट-नाम इत्यस्य नूतनदले भारतीय-ख्रिस्तीयाः ते च अवशिष्टाः आसन् तेभ्यः प्रतिनिधित्वं दत्तम् इति । उदाहरणार्थं विजय-हजारे यः ईसायिजनः आसीत् सः द-रेस्ट इति दलस्य पक्षतः क्रीडति स्म ।

पत्रकारैः क्रिकेट-क्रीडकैः राजनेतृभिः च (1930-40) त्रिंशदधिकनवदशशततमं चत्वारिंशदधिकनवदशशततमं च दशकं यावत् एतस्याः पञ्चकोणीय-स्पर्धायाः जातेः सांप्रदायिकस्य च आधारे प्रश्नचिह्नानि स्थापितानि आसन् इति । बॉम्बे-क्रॉनिकल-नामकस्य वार्त्तापत्रस्य प्रसिद्ध-सम्पादकेन एस.ए.बेरेलवीमहोदयेन, आकाशवाण्याः टिप्पणकेन ए.एफ.एस-तलयारखानेन भारतस्य च लोकप्रिय-राजनेत्रा महात्म-गान्धिना पेण्टाङ्गयुलर-वर्यः समुदायस्य आधारेण विभाजकः इति उक्त्वा तस्य निन्दनं कृतम् । तेषां कथनम् आसीत् यत् एतादृशे काले यदा राष्ट्रवादिनः भारतीय-जनताम् एकत्र कर्तुम् इच्छन्ति स्म, अस्याः स्पर्धायाः किं प्रयोजनम् ? एतद्विपरीतं क्षेत्राधारित-राष्ट्रिय-क्रिकेट-विजेतृ-प्रतिस्पर्धा इत्यस्याः कस्याश्चित् नूतनस्पर्धायाः आयोजनम् आरब्धम् अनन्तरकाले सा रणजी-ट्रॉफी इति उक्ता इति, परन्तु पञ्चकोणीय-स्पर्धायाः स्थानम् एषा स्पर्धा गृह्णीयात् इति तदर्थं स्वतन्त्रतायाः प्रतीक्षा करणीया अभवत् । पञ्चकोणीयस्पर्धायाः आधारशिलायां ब्रितानीसर्वकारस्य भेदं कृत्वा शासनं कुरु इति नीतिः आसीत् । इयं काचित् औपनिवेशिक-स्पर्धा आसीत् इति यस्याः समाप्तिः ब्रिटिश-शासनेन सह एव अभवत् इति ।

चित्रम्- 14 – पालवङ्कर-बालू इति (1904),
अभूतपूर्व-क्रीडकः बालू इति दलात् बहिः न स्थापयितुं शक्यते स्म परन्तु सः दलितजातेः आसीत् तस्मात् सः दलीयः नायकत्वेन न स्थापितः ।

प्रथमा मञ्जूषा

क्रिकेटः,जातिः च

पालवङ्कर-बालू-महोदयस्य जन्म (1875) पञ्चसप्तत्यधिकाष्टादशशत-तमे ख्रिस्ताब्दे पूना-नगरे अभवत् । तस्मिन् काले भारतीयाः निकषस्पर्धां क्रीडितुम् आदिष्टाः न आसन् । एतस्मात् परम् अपि बालूः मन्दगत्याः कन्दुक-क्षेपकेषु श्रेष्ठः आसीत् । बालूः औपनिवेशिक-कालस्य महत्तमायां भारतीय-क्रिकेट्-स्पर्धायां क्वाड्रैंग्युलर इत्यस्यां हिंदूज़ इति दलस्य पक्षतः क्रीडति स्म । स्वीयदलस्य श्रेष्ठः क्रीडकः सन् अपि सः कदाचित् अपि नायकरूपेणः न चितः यतो हि सः दलितः आसीत् सवर्ण-चयनकर्तारः च तं विरुद्ध्य पक्षपातं कुर्वन्ति स्म । अनन्तरकाले तस्य भ्राता श्रीविट्ठलः हिन्दूज़-दलस्य नायकरूपेण नियुक्तः यः दलितवर्गस्य आसीत् । हिन्दूजस्य जयात् शिक्षा इयं लभ्यते यत् अस्पृश्यतायां समाप्तौ एव स्वराजस्य मार्गोद्घाटनं भविष्यति इति एषा एव महात्म-गान्धिनः अपि भविष्यवाणी अस्ति ।

रामचन्द्र-गुहा, ए-कॉर्नर-आफ-ए-फॉरेन-फील्ड इति ।

3 क्रीडायाः आधुनिक-परिवर्तनानि

आधुनिक-क्रिकेट-क्रीडान्तर्गतायाः निकषस्पर्धायाः एकदिवसीय-अन्ताराष्ट्रिय-स्पर्धायाः च ख्यातिः सर्वत्र प्रसरति, एतासु स्पर्धासु राष्ट्रियदलानि परस्परं स्पर्धन्ते। प्रसिद्धिं प्राप्य जनानां स्मृतिपटलेषु ये क्रिकेट-क्रीडकाः विलसन्ति ते स्वीय-राष्ट्रिय-दलानां क्रीडकाः भवन्ति। पञ्चकोणीय-चतुष्कोणीय-स्पर्धानाम् एतान् क्रीडकान् एव भारतीयप्रशंसकाः स्मरन्ति ये निकषस्पर्धायां क्रीडितुम् अवसरं प्राप्तवन्तः। यद्यपि पालवङ्कर-विट्ठलः पालवङ्कर-बालू-सदृशाः तेषां च समकालिकाः अन्ये क्रीडकाः अधुना विस्मारिताः यतो हि नायडूवर्यस्य खेल-जीवनं तु लम्बतरम् आसीत् परन्तु पालवङ्कर-विट्ठलः पालवङ्कर-बालूः च निकषस्पर्धायाः कालं यावत् सक्रियौ न

स्रोतः घ इति

महात्मगान्धिः औपनिवेशिकक्रीडा

महात्मगान्धिनः दृष्ट्या क्रीडादिकम् अतीव महत्त्वपूर्णम् अस्ति यतो हि अनया शरीरस्य मष्तिष्कस्सय च मध्ये सन्तुलनं जायते। परन्तु एतत् तथ्यम् अपि प्रायः सः कथयति स्म यत् क्रिकेट-यष्टिसदृश्यः क्रीडाः आङ्ग्लीयाः भारतम् आनीतवन्तः एताः क्रीडाः अस्माकं परम्परागत-क्रीडाः नाशयन्ति। तस्य मतम् आसीत् यत् क्रिकेट-यष्टि-क्रीडा-पादकन्दुकक्रीडा-टेनिस्-सदृश्यः च क्रीडाः सम्पन्नवर्गाणां क्रीडाः सन्ति। एतासु क्रीडासु औपनिवेशिक-मनोदशायाः दिग्दर्शनं भवति एताः क्रीडाः अस्माकं पारम्परिकीनां सामान्य-व्यायामानाम् अपेक्षया स्वल्पां शिक्षाम् एव यच्छन्ति।

महात्मगान्धिनः लेखेषु उद्धृतान् त्रीन् अशांन् पठन्तु अपि च टॉमस-आर्नाल्डस्य अथवा ह्यूजस्य च द्वारा शिक्षायाः क्रीडायाः च विषये कथितैः विचारैः तेषां तुलनां कुर्वन्तु –

आयान्तु, अधुना शरीरं प्रति अवधानं कुर्मः। प्रतिदिनं यदि वयं होरां यावत् टेनिस--पादकन्दुक-क्रिकेट-क्रीडाः च क्रीडामः किं तर्हि वयम् आभिः क्रीडाभिः अस्माकं शरीरं सम्पूर्णतया शिक्षितं सर्वथा च स्वस्थं वर्तते इति वक्तुं शक्नुमः वा ? इदं सत्यम् अस्ति यत् क्रीडाभिः शरीरं दृढं जायते। परन्तु वने यदि कश्चित् अश्वः स्वेच्छया धावति किं तर्हि तस्य शरीरं दृढम् इति वक्तुं शक्यते, आम्, परन्तु शिक्षितम् इति न वक्तुं शक्यते इति तथैव शरीरं सुदृढम् इति वक्तुं शक्यते परन्तु शिक्षितम् इति न वक्तुं शक्यते। शिक्षितं शरीरं नीरोगः भवति,दृढं भवति सौष्ठवयुक्तं भवति तस्य च पाणिपादम् इच्छितकार्यं कर्तुं शक्नुवन्ति। तस्य हस्तयोः लवित्रम् आखनकम् अयोघ्नादीनि सुशोभितानि भवन्ति अपि च एतौ हस्तौ एतेषां सर्वेषां प्रयोगम् अपि कर्तुं शक्नुवन्ति। त्रिंशत्-मील-परिमितां यात्रां कुर्वन्तः अपि शिक्षितशरीरं श्रान्तं न भवितुं शक्नोति एतादृशी शारीरिक-शिक्षा कथं प्राप्यते ? वयं वक्तुं शक्नुमः यत् आधुनिक-पाठ्यक्रमे अनया दृष्ट्या शारीरिक-शिक्षा न दीयते इति।

सत्याधारिता शिक्षा का ? 20,फरवरी 1926,सम्पर्णगान्धि-वाङ्मयम्, खण्डः 30 इति ,

परन्तु, यदि इयं वास्तविकता स्यात् यत् एतस्यां पवित्रभूमौ क्रिकेट-क्रीडायाः पादकन्दुक-क्रीडायाः च प्रचलनात् प्राक् भवतां स्वीयाः राष्ट्रियक्रीडाः स्युः इति तर्हि अहं भवद्भ्यः अनुरोधं करोमि यत् भवतां संस्थया ते पुनः प्रतिष्ठापनीयाः। अहं जानामि यत् भारतस्य पारस्परिकाः अनेके स्वदेशीयाः खेलाः सन्ति ते क्रिकेटस्य पादकन्दुक-क्रीडायाः इव रोचकाः उत्साहस्य वर्धकाः च सन्ति। तत्र भयम् अपि तावत् एव अस्ति परन्तु तेषां वैशिष्ट्यम् अस्ति यत् ते व्ययसाध्याः न सन्ति इति यतो हि तान् क्रीडितुं कोऽपि व्ययः एव न भवति इति।

महिंद-महाविद्यालयः, गैल इत्यस्मिन् भाषणम्, 24नवम्बरमासः1927तमख्रिस्ताब्दः,सम्पूर्ण-गान्धि-वाङ्मयम्, खण्डः 13,

मम दृष्टौ स्वस्थशरीरं तत् अस्ति यत् आत्मनः शासनं मन्यते अपि च तस्य सेवायाः साधनस्य रूपेण सदैव सन्नद्धं भवति। मम मतानुसारम् एतादृश-शरीराणि पादकन्दुक-क्रीडायाः क्षेत्रे न निर्मीयन्ते इति। ते तु अन्नस्य क्षेत्रेषु आवृत्तदीर्घक्षेत्रेषु च निर्मीयन्ते। अहं भवतः अनुरोधं करोमि यत् भवन्तः एतत् तथ्यं विचारयन्तु इति अपि च मया यत्किमपि भवतां समक्षे कथितम् अस्ति तत् सत्यम् अस्ति तस्य समर्थने असङ्ख्य-उदाहरणानि भवन्तः प्राप्स्यन्ति इति। अस्माकम् उपनिवेशेषु लब्धजन्मानः भारतीयाः पादकन्दुक-क्रीडायाः क्रिकेटस्य च एतस्मिन् उन्मादे प्रवहन्ति। कासुचित् विशिष्ट-स्थितिषु एतादृशीनां क्रीडानां स्वीयं महत्वं भवितुं शक्नोति इति। भवन्तः एतस्मिन् सरलतथ्ये किमर्थं न विचारयन्ति यत् मानवजातेः अति महान् भागः कृषकः अस्ति। तेषां शरीराणि मस्तिष्काः च शक्तिशालिनः सन्ति। ते एताः क्रीडाः सर्वथा न जानन्ति किन्तु ते एव संसारे सर्वश्रेष्ठाः सन्ति।

पत्रम् – लाजरस-को.17अप्रिल्-मासः,1915तमख्रिस्ताब्दः, सम्पूर्णगान्धिवाङ्मयम्, खण्डः 13 इति।

आस्ताम् इति। यद्यपि नायडूः अपि इङ्ग्लैण्डं विरुध्य (1932) त्रिंशदधिकनवदश-शत-तमे वर्षे प्रारभ्यमानाभ्यः क्रिकेट्-स्पर्धाः यावत् स्वीयेन पूर्वकौशलेन सम्पन्नः नासीत्, परन्तु देशस्य प्रथम-निकष-स्पर्धा-नायकत्वेन इतिहासे तस्य नाम अङ्कितम् अस्ति। अनेन प्रकारेण भारतेन स्वतन्त्रताप्राप्तेः सार्धैकदशकेभ्यः पूर्वमेव निकषस्पर्धायां प्रवेशः गृहीतः। इदम् एतस्मात् अशक्यत यतो हि (1877) सप्तसप्तत्यधिकाष्टादशशत-तमे ख्रिस्ताब्दे स्वीयारम्भात् एव निकष-क्रिकेटः इति ब्रिटिश-साम्राज्यस्य विभिन्नभागानां मध्ये क्रीड्यते स्म न तु संप्रभु-राष्ट्राणाम् आभ्यन्तरे इति। प्रथमा निकषस्पर्धा आस्ट्रेलिया-इङ्ग्लैण्डदेशयोः मध्ये क्रीडिता तदा आस्ट्रेलिया श्वेतानाम् उपनिवेश-मात्रम् आसीत् इति, स्वशासी-डोमीनियन-राज्यम् अपि आसीत्। तेन एव प्रकारेण वेस्ट-इण्डीज-नाम्ना प्रसिद्धिं प्राप्ताः कैरिबियायि-देशाः द्वितीय-विश्वयुद्धस्य चिरकालात् अनन्तरं यावत् ब्रिटिश्-उपनिवेशाः एव आसन् इति।

3.2 क्रीडाः वि- औपनिवेशीकरणं च

यूरोपीय-साम्राज्येभ्यः स्वतन्त्रतां प्राप्य स्वतन्त्र-राष्ट्रनिर्माणस्य प्रक्रिया एव वि-औपनिवेशीकरण इति शब्देन उच्यते इति। (1947) सप्तचत्वारिंशदधिकनवदशशत-तमख्रिस्ताब्दे भारतस्य स्वतन्त्रताकालात् आरभ्य एषः प्रक्रमः अग्रिमम् अर्धशताब्दं यावत् प्राचलत् इति। एतस्य प्रक्रमस्य प्रभावः वाणिज्ये सैन्यक्षेत्रे अन्ताराष्ट्रिय-राजनीतौ अन्ततः क्रीडायां च ब्रिटेनस्य पतनरूपेण अभवत् इति। परन्तु एतत् सहसा न अभवत् – क्रिकेट्-सङ्घटने उत्तर-साम्राज्यवादि-ब्रिटेनस्य प्रभावस्य नाशः, शनैः शनैः अभवत् इति।

भारतस्य स्वतन्त्रतया ब्रितानी-साम्राज्यस्य समाप्तेः आरम्भः तु स्वल्पः जातः आसीत् परन्तु क्रिकेटस्य अन्ताराष्ट्रिय-आयोजने साम्राज्यवादि-क्रिकेट्-कान्फ्रेन्स इत्यस्य नियन्त्रणं पूर्ववदेव आसीत्। अन्ताराष्ट्रियक्रिकेट्-परिषदि यस्य (1965) पञ्चषष्ट्यधिक-नवदशशत-तमे वर्षे नाम परिवर्त्य अन्ताराष्ट्रिय-क्रिकेट्-कान्फ्रेन्स इति अभवत्, एतस्य संस्थापक-सदस्यानां प्रभावः आसीत् तेषां सान्निध्ये एव कार्यकलापस्य वीटो अर्थात् सर्वाधिकाराः आसन् इति। इङ्ग्लैण्डस्य ऑस्ट्रेलियायाः च विशेषाधिकाराः (1989) एकोननवत्यधिकनवदशशततमे वर्षे समाप्ताः अपि च तदारभ्य ते सामान्याः सदस्याः जाताः।

विगत-शताब्दस्य पञ्चाशत्तमे षष्टितमे च दशके विश्वक्रिकेटस्य स्थितेः सूचना एतस्मात् तथ्यात् अवगम्यते यत् इङ्ग्लैण्डेन कॉमनवेल्थ इत्यस्य च अन्यैः देशैः तद्यथा आस्ट्रेलिया-देशेन न्यूजीलैण्डदेशेन च दक्षिणाफ्रीकासदृशैः देशैः सह निरन्तरं स्पर्धितम् यत्र न केवलं नीतिगतरूपेण जातीय-भेदभावपूर्णः व्यवहारः क्रियते स्म अपि तु निकषस्पर्धासु अश्वेतैः सह क्रीडायाः अनुमतिः न आसीत्। भारत-पाकिस्तान-वेस्ट-इण्डीज्-देशैः यद्यपि दक्षिणाफ्रीका-देशस्य बहिष्कारः कृतः परन्तु अन्ताराष्ट्रिय-क्रिकेट-परिषदि तेषां शक्तिः तावती नासीत् यत् स्पर्धातः तस्य प्रतिबन्धनं स्यात् इति। इदं तदा एव अभवत् यदा एशियायाम् अफ्रीकायां च उपनिवेश-वादात् सद्यः एव मुक्तदेशाः सहैव ब्रिटेनस्य उदारवादि-जनमतेन आङ्ग्लक्रिकेट्-अधिकारिषु प्रभावम् उत्पाद्य (1970) सप्तत्यधिकनवदशशत-तमे ख्रिस्ताब्दे ब्रिटेनीया दक्षिणाफ्रीकायाः यात्रां निरस्तीकारयितुं साफल्यम् अवाप्तम् इति।

॥इति तृतीयः पाठः॥

4 अद्यत्वे वाणिज्यं, सञ्चारमाध्यमानि क्रिकेट-क्रीडा च

तमे दशके अतीव परिवर्तिता, अयं कश्चित् कालः आसीत् यस्मिन् पारस्परिक-क्रीडाभिः सह परिवर्तमान-कालम् आत्मसात् कृतम् । यदि (1970) सप्तत्यधिकनवदशशत-तमे ख्रिस्ताब्दे अफ्रीकादेशः क्रिकेट्-क्रीडातः बहिष्कृतः, (1971) एकसप्तत्यधिकनवदशशत- तमख्रिस्ताब्दम् एतस्मात् कारणात् स्मरिष्यते यतो हि अस्मिन् एव वर्षे प्रथमा एकदिवसीयस्पर्धा मेलबर्न-नगरे स्पर्धिता इति । क्रिकेट्-क्रीडायाः इदं लघुसंस्करणम् एतावत् लोकप्रियम् अभवत् यत् (1975) पञ्चसप्तत्यधिकनवदशशत-तमे ख्रिस्ताब्दे प्रथम-विश्व-चषक-स्पर्धा क्रीडिता सा सफला च जाता । पुनः (1977) सप्तसप्तत्यधिकनवदशशत-तमे ख्रिस्ताब्दे यदा क्रिकेटः इति निकषस्पर्धानां शततमं वार्षिकोत्सवम् आयोजयति स्म तदा क्रीडा सर्वकालाय परिवर्तिता । एतस्मिन् परिवर्तने कस्यापि क्रीडकस्य अथवा प्रशासकस्य श्रमः न आसीत् अपि तु एकस्य व्यवसायिनः श्रमः आसीत् ।

केरीपैकर-नामकः आस्ट्रेलियायि-दूरदर्शनं मुगलः इति क्रिकेटस्य प्रसारणस्य विपणीय-सम्भावनाः अनुभूय आ विश्वं (51) एकपञ्चाशत् श्रेष्ठाः क्रीडकाः तेषां परिषदः अनुमतिं विना अनुबन्धेन स्वीकृतवान् अपि च सः द्वे वर्षे यावत् विश्व-शृङ्खला-क्रिकेटस्य नाम्ना समानान्तरायाः अनधिकृत-निकषस्पर्धानाम् एकदिवसीय-स्पर्धानां च आयोजनं कृतवान् । पैकरस्य इदं सर्कस (तदा एतत् एव उच्यते) वर्षद्वयोरनन्तरं पैक इति जातम्, परन्तु दूरदर्शन-दर्शकान् मनोरञ्जयितुं तेन कृतानि परिवर्तनानि स्थायिरूपेण जातानि इति अनेन च क्रीडायाः स्वरूपम् एव सर्वथा परिवर्तितम् ।

विभिन्न-वर्णानां वेशभूषाः शिरस्त्राणस्य क्षेत्ररक्षणस्य च प्रतिबन्धनानि विद्युद्-दीपं प्रज्वाल्य रात्रौ क्रिकेट्-क्रीडनम् इत्यादयः एतादृशाः तथ्याः सन्ति यानि पैकर इत्यस्मात् परं क्रिकेटस्य स्थायिभागरूपेण जातानि । महत्तमं तथ्यम् इदम् अस्ति यत् पैकर इत्यनेन स्पष्टीकृतम् यत् क्रिकेटस्य विपणिः वर्तते एतस्याः क्रयणं कृत्वा प्रभूतं धनम् अर्जयितुं शक्यते । दूरदर्शन-समवायेभ्यः दूरदर्शन-प्रसारणस्य अधिकारं विक्रीय क्रिकेट-परिषदः धनाढ्याः जाताः । दूरदर्शनसमवायाः विज्ञापन-समयाः व्यवसायिकसमवायेभ्यः विक्रीणीयेरन् इति ते एतावन्तं महान्तं दर्शकसमूहं कुतः अप्राप्स्यन् इति । निरन्तरं दूरदर्शन-प्रसारणात् परं क्रिकेट-क्रीडकाः (सेलेब्रिटी) विशिष्ट-व्यक्तिरूपेण जाताः, अपि च ते स्वक्रिकेट्-परिषदः अधिकं वेतनं प्राप्तुम् आरब्धवन्तः, तस्मात् अपि अधिकम् अर्जनं तु ते क्रीडकाः (टायर) चक्रम्, तैलं फेनलम्, कोकाकोला इत्यादीनां दूरदर्शन-विज्ञापनेभ्यः कुर्वन्ति स्म ।

दूरदर्शनप्रसारणात् क्रिकेट् इति परिवर्तितम् इति । एतस्य माध्यमेन क्रिकेटः प्राप्तिः लघुनगराणि ग्राम्यदर्शकान् च यावत् अभवत् । क्रिकेटः सामाजिकाधारे अपि व्यापकः अभवत् । महानगरेभ्यः ये बालाः दूरं तिष्ठन्ति तादृशाः बालकाः अपि स्पर्धाः द्रष्टुं न पारयन्ति स्म, अधुना ते स्व-नायकान् दृष्ट्वा शिक्षन्ते ।

उपग्रह- (सैटेलाइट) दूरदर्शनस्य प्रविधेः कारणात् अपि च बहु-राष्ट्रिय-समवायानाम् आविश्वं प्राप्तेः कारणात् क्रिकेटस्य वैश्विक-विपणिः जाता । सिडनी इति स्थाने जायामाना स्पर्धा अधुना साक्षात् सूरतनगरे द्रष्टुं शक्यते स्म । अनया स्वल्प-प्रक्रियया क्रिकेटस्य सत्तायाः केन्द्रम् एव परिवर्तितम् इति यस्य प्रक्रियायाः आरम्भः ब्रिटिश-साम्राज्यस्य पतनात् अनन्तरं जातः । सा वैश्वीकरणस्य स्व-तार्किकं परिणामं

यावत् प्राप्नोत् इति। यतो हि भारते क्रीडायाः सर्वाधिकाः दर्शकाः आसन् अयं च क्रिकेट-क्रीडकेषु देशेषु महत्तमा विपणिः आसीत्, अतः क्रीडायाः गुरुत्वकेन्द्रं दक्षिण-एशिया इति जातम्। प्रतीकात्मक-रूपेण आईसीसी इति संस्थायाः मुख्यालयस्य लन्दनात् टैक्स्-फ्री) शुल्कम् अदत्त्वा दुबयिदेशं प्रति आगमनं स्वाभाविकं प्रतिभाति इति।

आङ्ग्ल-ऑस्ट्रेलियायि-धुरिणा गुरुत्वकेन्द्रे परिवर्तनस्य किञ्चित् चिह्नम् इदम् अस्ति यत् सद्यः विगतेषु वर्षेषु क्रिकेटस्य नूतनप्राविध-प्रयोगाः भारतीय-उपमहाद्वीपस्य क्रीडकाः आरब्धवन्तः । पाकिस्तानदेशेन कन्दुक-क्षेपण-पद्धत्यै 'दूसरा' अपि च 'रिवर्स-स्विंग' इत्येतत् अस्त्रद्वयं दत्तम् इति। एतद् द्वयम् अपि महाद्वीपीय-परिस्थितिभ्यः आविष्कृतम् अस्ति इति , दूसरा एतस्मात् यत् भारयुक्तैः लगुडैः आक्रामकाः लगुड-क्रीडकाः अङ्गुलिभिः यत् स्पिन् इति भवति स्म तत् नाशयन्ति स्म अपि च रिवर्स-स्विंग इति एतस्मात् अपि मुक्तातपे धूलिधूसरितेषु जडक्षेत्रेषु च वेगेन कन्दुक-भ्रामणं कर्तुम् अशक्यत इति । एतौ द्वौ अपि प्रयोगौ आरम्भे इङ्ग्लैण्ड्-आस्ट्रेलियासदृशाः देशाः सन्देहदृष्ट्या दृष्टवन्तः ते अनुभूतवन्तः यत् एतेन तु गुप्तरूपेण क्रिकेटस्य नियमानां ह्रासः क्रियते इति। कालक्रमेण इदं प्रतिष्ठापितं यत् क्रिकेटस्य अधिनियमाः केवलम् आस्ट्रेलिया-आदि-देशानाम् आङ्ग्लपरिस्थितीनां च अनुसारं न निर्मापयितुं शक्यन्ते एतादृशानि साधनानि आविश्वं कन्दुकक्षेपकाः अङ्गीकृतवन्तः।

प्रायः सार्धैकशतं वर्षेभ्यः पूर्वं भारतस्य अग्रगण्यैः क्रिकेट-क्रीडकैः पारसीजनैः क्रीडायाः क्षेत्राय सङ्घर्षः करणीयः भवति स्म। वर्तमान-वैश्विक-विपणि-द्वारा भारतीय-क्रिकेट-क्रीडकाणां क्रीडा प्रसिद्धतमा कृता क्रीडकाः च धनाढ्याः कृताः आविश्वम् एव प्रतीयते यत् अधुना तेषां क्रीडकाणां रङ्गमञ्चः इव जातः स्यात्। एतस्य ऐतिहासिकस्य परिवर्तनस्य मूले कानिचन लघूनि कारणानि अपि आसन् यथा- रुच्या ये क्रीडन्ति स्म तेषां स्थाने वेतनभोगिनां व्यवसायिकानां च आगमनम् इति, निकष-स्पर्धानाम् अपेक्षया एकदिवसीय-स्पर्धा लोकप्रियतां भजते अपि च वैश्विक-वाणिज्ये प्रौद्योगिक्यां प्रमुख-परिवर्तनानां भवनम्। कालक्रमेण परिवर्तनस्य अवगमनम् एव इतिहासस्य कार्यम् अस्ति। अस्मिन् अध्याये वयं कस्याश्चित् औपनिवेशिक-क्रीडायाः इतिहासस्य माध्यमेन एतस्याः विस्तारः अवगतवन्तः,तथा **उपनिवेशोत्तरकाले** इयं क्रिकेट-क्रीडा आत्मानं कथं परिवर्तितवती इति अपि अवगतवन्तः।

नूतनशब्दः

उपनिवेशोत्तरम् – उपनिवेशोत्तरस्वतन्त्रतायाः परम् इति।

द्वितीया मञ्जूषा

यष्टिक्रीडा

आधुनिकयष्टिक्रीडायाः उदयः कदाचित् ब्रिटेने आधिक्येन क्रीड्यमानाभ्यः परम्परागत-क्रीडाभ्यः अभवत् । स्कॉट्-लैण्डे क्रीड्यमानाः शिण्टी, इङ्ग्लिश्-वेल्श्-क्रीडा, बेण्डी, आइरिश-हर्लिंग इति एताः क्रीडाः यष्टिक्रीडायाः पूर्वजरूपेण मन्तुं शक्यन्ते इति । अनेकासाम् अन्यासां क्रीडाणाम् इव भारतदेशे यष्टिक्रीडायाः आरम्भः औपनिवेशिक-काले ब्रिटिश्-सेनाद्वारा एव कृता आसीत् । आदौ यष्टिक्रीडा-क्लब् इत्यस्य स्थापना (1885-1886) पञ्चाशीत्यधिकाष्टादशशततमम् इत्यतः ख्रिस्ताब्दतः षडशीत्यधिकाष्टादशशततमख्रिस्ताब्दस्य च आभ्यन्तरे कलकत्तायाम् अभवत् । ओलम्पिक इति क्रीडानां प्रतिस्पर्धासु भारतेन प्रथमवारं (1928) अष्टाविंशत्यधिकनवदशशत-तमे वर्षे सम्मिलितम् इति । एतस्यां प्रतिस्पर्धायां आस्ट्रिया-जर्मनी-डेनमार्क्-स्विट्जरलैण्ड्-देशाः भारतेन पराजिताः भारतम् अन्तिमचक्रं च प्राविशत् । अन्तिमचक्रे भारतेन हालैण्ड्-देशः अपि शून्यस्य अपेक्षया गोलकत्रयेण पराजितः इति ।

यष्टिक्रीडायाः यः ऐन्द्रजालिकः इव ध्यानचन्दः आसीत् तत्प्रभृतीनां क्रीडकानां क्रीडाकौशलेन तीक्ष्णतया च अस्माकं देशाय ओलम्पिकक्रीडासु नैकस्वर्णपदकानि दापितानि। (1928) अष्टाविंशत्यधिकनवदशशत-तम-ख्रिस्ताब्दात् (1956) षट्पञ्चाशदधिकनवदशशत- तमख्रिस्ताब्दस्य आभ्यन्तरे भारतीयदलेन अजस्रं षड् ओलम्पिकक्रीडासु स्वर्णपदकानि जितानि । यष्टिक्रीडाजगति भारतीयतेजसः एतस्मिन् स्वर्णयुगे भारतेन ओलम्पिक-स्पर्धासु आहत्य (24) चतुर्विंशति-स्पर्धाः स्पर्धिताः अपि च सर्वासु साफल्यम् अवाप्तम् । एतासु स्पर्धासु भारतीय-क्रीडकैः (178) अष्टसप्तत्यधिकशतं गोलकानि (प्रत्येकस्यां स्पर्धायां सामान्यतः 7.43 गोलकानि इति) कृतानि, अपि च विपक्षिदलैः भारतीयदलं विरुध्य केवलं सप्तगोलकानि कर्तुम् एव साफल्यं प्राप्तम् । यष्टिक्रीडायां भारतेन अन्ये द्वे स्वर्णपदके 1964तमवर्षीये टोकियो-ओलम्पिक-स्पर्धासु अपि च (1980) अशीत्यधिकनवदशशत-तमीयासु मास्को-ओलम्पिक-स्पर्धासु प्राप्तम् इति ।

तृतीया मञ्जूषा

पोलो

पोलो इति क्रीडा सेनायाः धावन-शील-युवकानां च कृते सुशोभना इति मन्यते स्म । इङ्ग्लैण्डस्य पुरातन-स्पर्धासु एकस्याः विश्लेषणं कुर्वन् इलस्ट्रेटेड-लन्दन-न्यूज़ इत्यनेन कथितम् आसीत् –

व्यायामरूपेण --- अनया साहसपूर्ण-गरिम्णा सम्पन्न-क्रीडया सैनिकाः बल्लम इत्यस्य, असेः च अथवा अन्येषां सैन्य-शस्त्राणां प्रयोगेण इतोऽपि आधिक्येन दक्षतां प्राप्तुं शक्यन्ते । अनेन सहैव ते युद्धं दृढतया तीव्रतया च करणस्य तत्र च वामतः दक्षितः च भ्रमणस्य अपि अभ्यासः भविष्यति अनेन युद्धायनेषु अतीव उपयोगिनी इति भविष्यति ।

इलस्ट्रेटेड्-लन्दन्-न्यूज् इति (1872) द्विसप्तत्यधिकाष्टादशशततमात् उद्धृतम् इति ।

चित्रम् – 15 – पोलो इत्यस्य पश्चिमयात्रा,

पोलो इति मध्य-एशियायाः काचित् क्रीडा अस्ति,या भारतं प्राप्नोत् अपि च तां पश्चिमदेशान् प्रति औपनिवेशिकाः अधिकारिणः नीतवन्तः । सुल्तान-कुतुबुद्दीन-ऐबकस्य मृत्युः पोलो इति क्रीडां क्रीडन-समये अश्वात् पतन-कारणात् (1210) दशाधिकद्वादश-शततमे ख्रिस्ताब्दे अभवत् ।

क्रियाविधिः

1.अध्ययने लेखने च क्रीडानां महत्त्वविषये रग्बी-विद्यालयस्य प्रधानाचार्यस्य टॉमस-आर्नल्डस्य महात्म-गान्धिनः च मध्ये कस्याश्चित् काल्पनिक-वार्त्तालापस्य च विषये चिन्तयन्तु। द्वयोः कथनानि कानि अभविष्यन् ? सम्पूर्णं वार्त्तालापं लिखन्तु।

2.कस्याश्चित् स्थानीय-क्रीडायाः इतिहासस्य विषये ज्ञानं कुर्वन्तु। स्वीयौ मातृपितरौ अपि च वयोवृद्धान् पृच्छन्तु यत् यदा ते बाल्यावस्थायाम् आसन् तदा ते कथं क्रीडन्ति स्म । तुलनां कुर्वन्तु यत् सा तात्कालिकी क्रीडा किम् अधुना तेन एव प्रकारेण क्रीड्यते इति। यदि कानिचन परिवर्तनानि जातानि सन्ति तर्हि एतस्मिन् तथ्ये विचारयन्तु यत् तासां क्रीडाणां मूले कासाम् ऐतिहासिक-शक्तीनां योगदानं स्यात् इति।

क्रियाविधिः

प्रश्नाः

1. निकष-स्पर्धा विविधदृष्ट्या अद्भुता क्रीडा अस्ति। एतस्मिन् विषये चर्चां कुर्वन्तु यत् कया कया दृष्ट्या अन्य-क्रीडाभ्यः पृथक् अस्ति । ऐतिहासिक-रूपेण एकस्याः ग्रामीणक्रीडायाः रूपेण जायमानायां निकषस्पर्धायां कीदृश्यः विलक्षणताः प्रादुर्भूताः ?
2. एतादृशम् उदाहरणं प्रस्तुवन्तु यस्य आधारेण भवन्तः एतत् वक्तुं शक्नुयुः यत् नवदश-शताब्दे प्रविधेः कारणात् क्रिकेट-क्रीडायाः सज्जायाः सुरक्षायाः च उपकरणेषु कीदृशं परिवर्तनं जातम् इति । सहैव एतादृशानां उपकरणानां विषये किञ्चित् उदाहरणं यच्छन्तु यत्र किमपि परिवर्तनं न जातं स्यात् इति।
3. भारत-वेस्ट्इण्डीज्-देशयोः एव क्रिकेट-क्रीडा एतावती लोकप्रिया कथम् अभवत् ? किं भवन्तः वक्तुं शक्नुवन्ति यत् इयं क्रीडा दक्षिण-अमेरिकायाम् एतावती लोकप्रिया कस्मात् कारणात् न अभवत् ?
4. निम्नलिखितस्य सङ्क्षिप्तं व्याख्यानं कुर्वन्तु –
   - भारते प्रथमं क्रिकेट-क्लब् इति पारसीजनैः उद्घाटितम्।
   - महात्मगान्धी पेण्टाङ्गयुलर-प्रतिस्पर्धायाः आलोचकः आसीत्।
   - आईसीसी इत्यस्य नाम परिवर्त्य इम्पीरियल-क्रिकेट-कान्फ्रेंस् इत्यस्य स्थाने अन्ताराष्ट्रिय-क्रिकेट्-कान्फ्रेंस् इत्येतत् कृतम्।
   - आईसीसी इत्यस्य मुख्यालयः लन्दनस्य स्थाने दुबयि इति स्थाने स्थानान्तरितं कृतम् इति।
5. प्रविधेः क्षेत्रे जातैः परिवर्तनैः विशेषतया दूरदर्शनीय-प्रविधौ जातैः परिवर्तनैः समकालीनस्य क्रिकेटस्य विकासे कः प्रभावः अभवत् ?

?

॥इति चतुर्थः पाठः ॥

वेशस्य सामाजिकः इतिहासः

एतस्मिन् विषये कदाचित् एव अस्माकम् अवधानं भवति यत् यानि वस्त्राणि वयं धरामः तेषाम् अपि कश्चित् इतिहासः अस्ति । विभिन्न-वर्गाणां महिलाः पुरुषाः बालाः च किं धरेयुः इति आधृत्य प्रत्येकं समाजे केचित् नियमाः भवन्ति, अपि च कुत्रचित् तु एतेषां नियमानां दृढतया पालनम् अपि क्रियते । एतैः नियमैः विश्वे जनानां विशिष्टम् अभिज्ञानं वर्तते, एतैः नियमैः एव ते आत्मानं परिभाषयन्ति । एतैः च एव सौम्यस्य सुन्दरतायाः लज्जायाः मर्यादायाः च अस्माकं निकषाः जायन्ते । कालः परिवर्तिते सति एतादृशाः विचाराः अपि परिवर्तन्ते वस्त्रेषु च जात-परिवर्तनेषु एतेषां विचाराणां दर्शनं सरलतया कर्तुं शक्यते ।

आधुनिकविश्वस्य प्रादुर्भावस्य इतिहासः वस्त्रेषु वेशेषु च जातस्य नाटकीय-परिवर्तनस्य अपि इतिहासः अस्ति । अस्मिन् अध्याये वयम् आधुनिककाले अर्थात् नवदशे विंशतितमे च शताब्दे जातानां परिवर्तनानां विषये पठिष्यन्ति ।
एतौ द्वौ शताब्दौ किमर्थं महत्त्वपूर्णौ स्तः ?

अष्टादश-शताब्दे जनवादि-क्रान्तिभ्यः पुञ्जीवादविकासात् च पूर्वं यूरोपस्य अधिकतराः जनाः क्षेत्रीयं वेशं धारयन्ति स्म अपि च तेषां वस्त्राणां स्वरूपं वर्णं च तेषां क्षेत्रेषु उपलब्ध-वस्त्राणां प्रकारेण मूल्येन चापि निश्चितं भवति स्म । वेशस्य शैलयः अपि स्थानीय-समाजे जनानां सामाजिक-स्थितेः च निश्चिताः भवन्ति स्म – अनेन ज्ञायते स्म यत् भवन्तः कस्मात् वर्गात् सन्ति ? भवन्तः पुरुषाः वा महिला वा इति ।

अष्टादश-शताब्दात् परं विश्वस्य अधिकांश-भागाः यूरोपस्य उपनिवेशाः इति कृताः । जनतान्त्रिक-आदर्शानां प्रसारः जातः अपि च समाजाः औद्योगिकाः जाताः । एतासां प्रक्रियाणां फलतः जनानां वेशाः तेषां दृष्टिः च अपि सर्वथा परिवर्तिता इति । अधुना जनाः अन्य-संस्कृतिषु क्षेत्रेषु च उपलब्धां सामग्रीं शैलीं च अपि अङ्गीकर्तुं शक्नुवन्ति स्म अपि च आविश्वं जनाः पश्चिमीय-परिधानेन सज्जितुम् आरब्धवन्तः ।

भवद्भिः प्रथमे अध्याये दृष्टं यत् फ्रांसीसि-क्रान्त्या केन प्रकारेण सामाजिकस्य राजनैतिकस्य च जीवनस्य अनेके पक्षाः परिवर्त्य स्थापिताः । क्रान्तेः झञ्झावाते तात्कालिकी परिधान-संहिता या सम्प्चुअरी-लॉ इति उच्यते स्म, सा लुप्ता जाता । अन्ततः एते के अधिनियमाः आसन्?

1 सम्प्चुअरी इति अधिनियमः सामाजिकः भेद-भावः च

मध्यकालिके यूरोपे समाजस्य विभिन्नवर्गेषु परिधान-संहिताः प्रवर्तितुं वास्तविकतायाम् एव अधिनियमाः निर्मीयन्ते स्म अपि च अधिनियमे प्रायः सूक्ष्म-विषयेषु अपि अवधानं क्रियते स्म । प्रायः (1294) चतुर्नवत्यधिक-द्वादशशत-तम-ख्रिस्ताब्दात् फ्रांसीसि-क्रान्तिं (1789) एकोन-नवत्यधिक-सप्तदश-शत-तमवर्षं यावत्, फ्रांसीयेभ्यः जनेभ्यः अपेक्ष्यते स्म यत् ते सम्प्चुअरी इति अधिनियमानां पालनं कुर्युः इति । एतेषाम् अधिनियमानाम् उद्देश्यम् आसीत् समाजस्य निम्न-वर्गीयाणां व्यवहारस्य नियन्त्रणम् – ते विशिष्ट-परिधानं धर्तुं विशिष्टं व्यञ्जनं भोक्तुं विशिष्ट-पेयं पातुं(मुख्यतः मद्यपानं) विशिष्टक्षेत्रेषु च मृगयां कर्तुं च प्रतिबन्धिताः आसन् इति । अनेन प्रकारेण मध्यकालिके फ्रांसे वर्षाभ्यन्तरे कश्चित् कति वस्त्राणि क्रेतुं शक्नोति , क्रयणं केवलं तेषाम् आय-आधारितम् एव नासीत् अपि तु तेषां सामाजिकपदेन प्रतिष्ठया च निश्चितः भवति स्म । परिधानसामग्री अपि अधिनियम-सम्मता भवितव्या आसीत् । केवलं राजकुलीनाः एव बहुमूल्यानि वस्त्राणि धर्तुं शक्नुवन्ति स्म ।

एर्माइन, फर, कौशेयवस्त्रं मखमल इत्येतत् जरी इत्यस्य च वेशं केवलं राजानः राजकुलीनाः चैव धर्तुं शक्नुवन्ति स्म । कुलीन-सम्बद्धानां वस्त्राणां प्रयोगं सामान्यजनः न कर्तुं शक्नोति स्म यतो हि तस्य प्रतिबन्धः आसीत् इति ।

फ्रांसीय-क्रान्त्या एतस्य भेदभावस्य अन्तः कृतः । यथा भवन्तः प्रथमाध्यायं पठित्वा अवगतवन्तः, जैकोबिन इति क्लब् इत्यस्य सदस्याः आत्मानं सौं कुलात् इति एतस्मात् उक्तवन्तः यतो हि ये राजकुलीनाः प्रचलनयुक्तम् आजानुवेशं धरन्ति स्म तेभ्यः ते जैकोबिन् इति जनाः पृथक् सन्ति इति अर्थात् आत्मानं पृथक् दर्शयितुम् एव ते तथा कृतवन्तः । सौं कुलात् इत्यस्य शाब्दिकः अर्थः एव आसीत् इति ये आजानुवेशं रहिताः जनाः सन्ति इति । तदनन्तरं महिलाः पुरुषाः च उभौ एव शिथिलानि आराम-दायकानि च वस्त्राणि धर्तुम् आरब्धवन्तः । फ्रांसीय-त्रिवर्णीयस्य त्रीणि वर्णानि तानि यथा – नीलवर्णः श्वेतवर्णः रक्तवर्णः च इति त्रयः अपि अतीव लोकप्रियाः जाताः अपि च तद्युक्तवस्त्रधारणं देशभक्तनागरस्य प्रतीकरूपाः जाताः । जनैः वेशस्य रूपेण अपरे राजनैतिक-प्रतीकाः अपि धर्तुम् आरब्धाः इति स्वतन्त्रतायाः प्रतीकं रक्तशिरस्त्राणं, लम्बतरयुतकम् अपि च तिर्यक्-शिरस्त्राणं यत् काकेड् इति उच्यते स्म । परिधानस्य साधारणता-द्वारा समानतायाः भावः प्रकटितः भवति स्म ।



चित्रम् 1 – अष्टादश-शताब्दस्य इङ्ग्लैण्डस्य किञ्चित् उच्चवर्गीयं युगलम् इति,
आङ्ग्ल-कलाकारेण टामस-गेन्सबोरो-द्वारा (1727-1788) रचितं चित्रम् इति ।

नूतन-शब्दाः

एर्माइनम् इति – फर इत्यस्य कश्चित् प्रकारः इति ।
काङ्केड् – इति एकपक्षे कृत्वा यत् शिरस्त्राणं धार्यते इति ।

चित्रम् – 3- मध्यवर्गीया महिला,1791,

चित्रम् – 4 – फ्रांसीयक्रान्तेः स्वयंसेवकाः,

चित्रम् 2 – फ्रांसीय-क्रान्तिकाले किञ्चित् कुलीनयुगलम् ,
पश्यन्तु यत् (पोशाक)परिधानं कियत् भव्यं विस्तृतं च अस्ति । सावधानं किञ्चित् महिलायाः चूडामणिं शिरस्सज्जां प्रान्तभागान् च पश्यन्तु । तया गाउन इत्यस्य अन्तः कासेण्ट् इत्यपि धृतम् अस्ति । अनेन तस्याः कटिभागः सीमितः लघ्वाकारः च दृश्यते स्म तेन सा कृशकटियुक्ता दृश्येत इति । कुलीनपुरुषः तात्कालिकस्य प्रचलनस्य अनुसारं सैनिकवत् लम्बतरम् ओवरकोट् इति अपि च घुटन्ना इति एतत् कौशेय-स्टाकिंग् इति अपि च उच्चपार्ष्णियुक्तं पादत्राणं धृतवान् अस्ति । द्वाभ्याम् एव शोभायमानाः कृत्रिमकेशाः धृताः सन्ति अपि च द्वयोः एव मुखयोः कोमलः स्वल्पः च पाटलवर्णः अस्ति । एतत् एतस्मात् कारणात् यत् प्राकृतिक-त्वचः वर्णस्य दर्शनम् अशोभनीयं मन्यते स्म ।

चित्रम् 5 – कश्चित् सौं कुलात्-परिवारः, 1793 तमख्रिस्ताब्दः ।

प्रथमा मञ्जूषा

सर्वे सम्प्चुअरी इति अधिनियमाः सामाजिके निम्नोन्नतविषययोः बलाघातं न कुर्वन्ति स्म । एतेषु केचन अधिनियमाः तु आयातात् स्वदेशीयानाम् उत्पादानां रक्षायै निर्मिताः आसन् । उदाहरणार्थम् – षोडश-शताब्दीये इङ्ग्लैण्ड्-देशे , फ्रांसीयायाः इतालव्याः च सामग्र्याः आयातं कृत्वा निर्मितानि कौशेय-शिरस्त्राणानि पुरुषेषु अतीव लोकप्रियाणि आसन् इति । इङ्ग्लैण्ड-देशेन अधिनियमं विरच्य उच्चवर्गीयजनान् ऊनषड्वर्षीयान् च बालान् परित्यज्य सर्वेषां कृते रविवासरे अवकाशकाले च इङ्ग्लैण्ड-देशेन निर्मितानाम् ऊर्ण-शिरस्त्राणानां धारणम् अनिवार्यं कृतम् इति ।
अयम् अधिनियमः षड्-विंशतितम-वर्षाणि यावत् प्रवर्तितम् आसीत् अपि च अनेन इङ्ग्लैण्ड्-देशस्य ऊर्ण-वस्त्रोद्योगस्य विकासाय साहाय्यं जातम् ।

।।इति प्रथमः पाठः ।।

क्रियाकलापः

द्वितीय-चित्रात् आरभ्य पञ्चमं चित्रं यावत् पश्यन्तु । एतेषां चित्राणां भिन्नतया क्रान्तिकालीन-फ्रांसीय-समाजस्य तस्य संस्कृतेः च विषये किम् अभिज्ञानं भवति ?

2 परिधानं सौन्दर्यस्य च परिमाणानि

सम्प्चुअरी इत्यस्य अधिनियमानां समाप्तेः अयम् अभिप्रायः कदापि नासीत् यत् यूरोपीय-देशेषु प्रत्येकम् अपि जनः समान-परिधानस्य धारणम् आरब्धवान् स्यात् इति। फ्रांसीय-क्रान्त्या समतायाः प्रश्नः उत्थापितः आसीत् अपि च कुलीनेभ्यः विशिष्टाः अधिकाराः स्युः इति अपि च तेषाम् विशिष्टाधिकाराणां समर्थकानाम् अधिनियमानां समाप्तिः कृता। परन्तु सामाजिक-वर्गाणाम् आभ्यन्तरे अन्तरं यथावत् चलति स्म। स्पष्टम् अस्ति यत् निर्धनाः न तु धनिकवत् वस्त्राणि धर्तुं शक्नुवन्ति स्म न चैव तद्वत् भोजनम् एव कर्तुं शक्नुवन्ति स्म। अन्तरं केवलम् इदम् आसीत् यत् ते इत्थं कर्तुम् इच्छन्ति तर्हि अधुना अधिनियम-कारणात् तत्र कापि बाधा सम्भाव्यमाना नासीत् इति। इत्थं निर्धन-धनिकयोः परिभाषा तेषां वेशाधारिता अपि च केवलं तेषाम् आय-आधारिता च आसीत् पृथक् पृथक् वर्गैः स्व-स्व-वेशभूषा विकसिता यत्र सौन्दर्यस्य कुरूपतायाः उचितस्य अनुचितस्य शीलतायाः दुश्शीलतायाः च विचाराः मानकाः च तेषां पृथक् पृथक् आसन् इति।

पुरुष-परिधानस्य महिला-परिधानस्य च शैल्यः पृथक् पृथक् आसन्। विक्टोरियायी-इङ्ग्लैण्ड-देशे महिलाः बाल्याद् एव आज्ञाकारिण्यः सेविकाः सुशीलाः वराक्यः च भवेयुः इति ते तथा शिक्ष्यन्ते स्म। आदर्शरूपा नारी तु सा एव आसीत् या कष्टानि दुःखानि च सोढुं समर्था भवेत्। पुरुषाः धीराः गम्भीराः बलिनः स्वतन्त्राः आक्रामकाः च भवेयुः इति आशासते स्म परन्तु तद्विपरीतं महिलाः क्षुद्राः सुकुमार्यः निष्क्रियाः वराक्यः च इतिवत् ताः भवेयुः इति अपेक्ष्यते स्म। परिधानस्य प्रचलने परम्परायां चापि इयं वैभिन्न्यं स्पष्टतः दृश्यते स्म। बाल्याद् एव बालिकाः दृढबन्धैः बद्धैः सङ्कीर्णैः च वस्त्रैः परिधानैः च – **स्टेज़** इत्येतैः दृढतया बन्ध्यन्ते स्म। उद्देश्यम् एतत् एव आसीत् यत् तासां शरीरस्य विस्तारः आधिक्येन न भवेत् इति तेषां शरीरं कृशं भवेत् इति। यदाः ताः युवतीरूपं प्राप्नुवन्ति स्म तदा ताभिः शरीर-संलिप्तानि संश्लिष्टानि च **कार्सेट्** इति वस्त्राणि धरणीयानि भवन्ति स्म। सङ्कीर्णतया सूत्रैः सुबद्धाः कृशकटियुक्ताः स्त्रियः आकर्षण-युक्ताः शालीनाः सौम्याः च मन्यन्ते स्म। अनेन प्रकारेण 'विक्टोरियायी-महिलाः अबलाः भयशीलाः च सन्ति' इति कर्तुं परिधानेन महत्त्वपूर्णा भूमिका निर्वोढा।

2.1 महिलाः एताः शैलीः कथं स्वीकृतवत्यः ?

आदर्श-नार्याः एतादृशीं परिभाषाम् अनेकाः महिलाः मन्यन्ते स्म। एतादृशः संस्कारः तासां वातावरणे – तस्मिन् परिवेशे भवति स्म यस्मिन् परिवेशे ताः निवसन्ति स्म यत् साहित्यं ताः पठन्ति स्म अपि च यस्मिन् गृहे यस्मिन् च विद्यालये ताः पठन्ति स्म तत्र एतादृशी शिक्षा ताभ्यः दीयते स्म सर्वत्र एतत् वातावरणं व्यापृतम् आसीत् इति। बाल्ये एव ताः शिक्ष्यन्ते स्म यत् कृशकटि-धारणं तासां नारीसुलभकर्तव्यम् अस्ति। सहनशीलता स्त्रीत्वस्य अनिवार्यगुणः अस्ति। ताः आकर्षक्यः इति प्रतिभायेयुः अपि च स्त्री-उचितम् इति द्रष्टुं ताः कार्सेट् इति धरेयुः इति तासां कृते एतत् आवश्यकम् आसीत्। एतदर्थं शारीरिक-कष्टस्य यातनायाः च सहनं सामान्यम् इति मन्यते स्म।

परन्तु एतानि मूल्यानि सर्वाभिः महिलाभिः न स्वीकृतानि। नवदश-शताब्दस्य काले विचाराः अपि परिवर्तिताः। इङ्ग्लैण्ड्-देशे (1830) त्रिंशदधिकाष्टादशशत-तमदशकं यावत् महिलाभिः लोकतान्त्रिक-अधिकाराणां प्राप्तये युद्धस्य आरम्भः कृतः। सफ्रेज-आन्दोलनम् इत्यस्य बलवति जाते सति परिधान-परिवर्तनस्य कार्यक्रमः

चित्रम् 6 – उच्चवर्गीयस्य विवाहकार्यक्रमस्य दृश्यम्, आङ्ग्ल-चित्रकारस्य विलियम-होगार्थ (1697-1764) इत्यस्य कृतिः।

चित्रम् – 7 – कुलीन-कुटुम्बस्य बालिका, विलियम-होगार्थद्वारा रचितं चित्रम्,एतावति अल्पायुषि एव एतावति कृशकटिप्रदेशे भवद्भिः अवधानं दत्तं स्यात्। इदं सम्भवतः कार्सेट् इत्यस्य द्रार्ढ्यस्य परिणामः आसीत्। लम्बतरात् गाउन इत्यनेन तासां गतिः अवश्यमेव बाधिता स्यात् इति।

नूतनशब्दाः

स्टेज़ – इति शरीरं सरलीकर्तुं महिला-परिधानस्य कश्चित् भागः।

कार्सेट् इति – स्फूर्तिसम्पन्नं दृढं च महिला-बॉडिस इति। अनेन देहस्य आकृतिः जायते स्म।

सफ्रेज-आन्दोलनम् – मताधिकाराय सञ्चालितम् आन्दोलनम्। सफ्रेज-आन्दोलनकारिणः महिलाः अपि मतस्य प्रयोगं कुर्युः इति विषयस्य ते अपि समर्थकाः आसन् इति।

अपि प्राचलत्। महिला-सम्बद्ध-पत्रिकासु प्रकाशनं जातम् यत् सङ्कीर्ण-परिधानस्य धारणेन, कार्सेट् इत्यस्य च धारणेन कैः कैः रोगैः विरूपताभिः च ताः आक्रान्ताः भवन्ति इति । एतादृशानि परिधानानि शारीरिक-विकासस्य बाधकानि भवन्ति, एभिः रक्त-प्रवाहः अपि अवरुद्धः भवति। कोशिकाः अविकसिताः भवन्ति अपि च मेरु-दण्डः अपि नम्रीभवति। चिकित्सकाः अवदन् यत् महिलाः सामान्यरूपेण दौर्बल्य-विषयकं तथ्यं वदन्ति ताः वदन्ति यत् शरीरं शिथिलं भवति कदाचित् मूर्च्छा अपि जायते।

स्रोतः क इति

मेरी-सामरविलस्य नाम महिला-गणितज्ञासु अग्रगण्यम् अस्ति। स्वबाल्यकालस्य अनुभवान् सा इत्थं प्रस्तुतवती यद्यपि अहम् शारीरिक-संरचनया सरला शोभना स्वस्था च आसम् परन्तु अहं दृढे स्टेज इत्यस्मिन् दृढतया बद्ध्यते आव्रियते वा स्म, अग्रे स्टील इत्यस्य **अनुपदीना** (Busk) भवति स्म अपि च मम फ्रॉक इत्यस्य उपरि संलग्नाः रज्जवः (फीते) माम् तावता दृढेन बलेन च पृष्ठभागं प्रति आकर्षन्ति स्म यत् मम स्कन्धयोः पट्टिके एव परस्परं संलग्ने भवतः स्म। पुनः स्टील इत्यस्य लघुदण्डस्य कश्चित् अर्धवृत्तं मम चिबुकस्य अधः भवन् मम स्टेज् इत्यस्य स्टील-खपच्ची इत्यस्मिन् बद्धः भवति स्म। मया मम सखिभिः च एतस्याम् एव बद्धायां नोदितायां च दशायाम् अध्ययनं करणीयं भवति स्म।

मार्था-सामरविल इति, (सं) पर्सनल-रिफ्लेक्शन्स-फ्रॉम-अर्ली-लाइफ-टू-ओल्ड-एज-ऑफ-मेरी-सॉमरविल इति, लन्दनम्, 1873 इति।

गतिविधिः

क,ख इति स्रोतसी पठन्तु। आभ्यां भवन्तः विक्टोरियायी-समाजे परिधान-सम्बद्धानां विचाराणां विषये किम् अवगच्छन्ति ? यदि भवान् मेरीसॉमरविलस्य विद्यालयस्य प्रधानाचार्यः स्यात् तर्हि भवन्तः एतानि वस्त्राणि कया दृष्ट्या अद्रक्ष्यत् ?

स्रोतः ख इति

महिलासु प्रचलितवेशेन स्वास्थ्य-सम्बद्ध-भीतीनां विषये लिखन् तात्कालिकाः केचन अधिकारिणः तु व्यग्राः जाताः आसन् इति। कॉर्सेट् इत्येतत् अभिलक्ष्य एतत् आक्रमणं पश्यन्तु –
शरीरविज्ञानं कथयति यत् वायुः प्राणदायी अस्ति, अपि च ग्रीवायां रज्जुबन्धनेन दृढैः सूत्रैः च बन्धनेन कोऽपि अधिकः भेदः नास्ति इति ---- श्वासावरोधः तु द्वयोः एव स्थित्योः भवितुं शक्नोति। बहुधा तु सङ्कीर्णस्य स्टेज इत्यस्य धारणस्य अयम् एव परिणामः अस्ति यत् – दौर्बल्यं शैथिल्यं मरणं चेति।

महापञ्जीकारः, नाइन्थ-ऐन्युअल-समाख्या इति, 1857 तमख्रिस्ताब्दः।

नूतनशब्दः

बस्क इति --- काष्ठेन इस्पातेन ह्वेलस्य च अस्थिना निर्मिता पट्टिका या कॉर्सेट् इत्येतत् द्रढीकर्तुं तत् आश्रयितुं च अग्रे योज्यते स्म।

स्रोतः ग इति

किं भवन्तः जानन्ति यत् प्रसिद्धः आङ्ग्लीयः कवेः जॉन्-कीट्स-महोदयस्य (1795-1821) दृष्टौ आदर्श-महिला का आसीत् ? सा तस्याः दुग्ध-धवलायाः अव्याः इव आसीत् या निजसुरक्षायै पुरुषान् प्रति मिमियाती अर्थात् मेषशब्दं कुर्यात् इति।
स्वीये उपन्यासे वैनिटी-फ़ेयर (1848) इत्यस्मिन् थैकरे 'अमीलिया' इत्यस्य महिलापात्रस्य आकर्षणस्य इत्थं वर्णनं कृतवान् --
मम दृष्ट्या तस्याः दौर्बल्यम् एव तस्याः मुख्यम् आकर्षणम् आसीत्, कस्याश्चित् सुकुमारतायाः निर्बलतायाः मधुरतायाः च अनुभवः, यत् तस्याः प्राप्यते स्म, सः प्रत्येकम् अपि पुरुषस्य हृदये सहानुभूतेः संरक्षणस्य च भावम् उत्पादयति स्म।

गतिविधिः

अबलतायाः पराश्रयितायाः च एते विचाराः महिलानां परिधाने कथं परिलक्ष्यन्ते इति ?

अमेरिकायाम् अपि पूर्वतटस्थानां श्वेत-प्रवासिनां मध्ये एतादृशम् एव आन्दोलनं प्राचलत् इति । महिलानां पारम्परिक-वेशः अनेकैः कारणैः असमीचीनः इति उक्तम् । तत्रोक्तः यत् दीर्घ-स्कर्ट् (घाघरा,लहंगा) इति कुट्टिमस्य सम्मार्जनं कुर्वन्ति इति दृश्यते आत्मना सह ते अवकरम् एकत्र कुर्वन्ति तेन रोगाः भवन्ति । पुनः स्कर्ट् इति विशालं भवति तेषां च धारणं कठिनं भवति गमने चापि तेन काठिन्यं भवति तेन महिलाः व्यवसायिकार्यं कृत्वा आजीविकां न अर्जयितुं शक्नुवन्ति । परिधान-परिवर्तनेन महिलानां स्थितेः परिष्कारः भविष्यति इति कथितम् इति । वस्त्राणि यदि आराम-दायकानि भवेयुः तर्हि महिलाः अपि व्यवसायि-कार्यं कर्तुं शक्नुवन्ति , स्वतन्त्राः चापि भवितुं शक्नुवन्ति । राष्ट्रिय-महिला-मताधिकार-सभाद्वारा (1870) सप्तत्यधिकाष्टादशशत-तमदशके परिधानस्य परिष्काराय परिवर्तनाय च आन्दोलनं प्रचालितम् । तासां कथनम् आसीत् --- वस्त्राणि सरलानि भवेयुः. स्कर्ट् इति परिधानं लघ्वाकारं स्यात् अपि च कॉर्सेट् इति परिधानस्य त्यागं कुर्वन्तु इति । अनेन प्रकारेण अटलाण्टिक-महासागरस्य उभयोः भागयोः सर्वत्र सरलतया यानि परिधानानि परिधर्तुं शक्नुयुः इति तादृशानां वस्त्राणाम् आरम्भः जातः ।

चित्रम् 8 – संयुक्त-राज्य-अमेरिकायाः काचित् महिला, परिधान-परिष्कारात् पूर्वम् ।
पश्यन्तु यत् तस्याः लम्बतरं गाउन इति परिधानं कुट्टिमस्य सम्मार्जनम् इव करोति । परिवर्तकाः एतादृशस्य परिधानस्य आलोचनम् अकुर्वन् ।

द्वितीया मञ्जूषा

रैशनल-ड्रेस-रिफॉर्म-आन्दोलनम् (सरलीकरणं कुरु,परिधान-परिष्कार-आन्दोलनम्)

श्रीमती अमेलिया-ब्लूमर-वर्या प्रथमा अमेरिकीया परिष्कारिका आसीत् या पार्ष्णिं यावत् लम्बतरस्य ट्राउजर इत्यस्य स्थाने शिथिलस्य ट्यूनिक इति परिधानस्य प्रचलनम् आरब्धवती इति । ट्राउजर् इत्यस्य अन्यानि अपि नामानि आसन् यथा – ब्लूमर, रैशनल्स अथवा निकरबाकर्स इति । इङ्ग्लैण्ड्-देशे रैशनल-ड्रेस-सोसायटी इत्यस्य आरम्भः (1881) एकाशीत्यधिकाष्टादशशत-तमे ख्रिस्ताब्दे अभवत् इति, परन्तु अनेन केचन विशिष्टाः परिणामाः न प्राप्ताः । महिलानां परिधाने गुणात्मकं परिवर्तनं प्रथम-विश्वयुद्धस्य कारणात् अभवत् इति ।

सामाजिक-मूल्यानां परिवर्तनं कर्तुं परिवर्तकाः शीघ्रं साफल्यं न अवाप्तवन्तः । तेषाम् उपहासः आलोचना चापि अभवत् ते एतत् द्वयम् अपि सोढवन्तः । सङ्कीर्ण-मानसिकता-ग्रस्ताः जनाः सर्वत्र परिवर्तनस्य विरोधं कृतवन्तः । तेषां प्रलापः आसीत् यत् पारम्परिक-शैल्याः परिधानानि महिलाः त्यक्तवत्यः तस्मात् तासां सौन्दर्यं तु गतमेव तेन सहैव तासां महिलात्वं शीलत्वं चापि अपगतम् । निरन्तरम् एतेभ्यः आक्रमणेभ्यः त्रस्ताः महिला-परिवर्तकाः आन्दोलनं शमयित्वा गृहं प्रति गतवत्यः एकदा पुनः ताः पारम्परिक-परिधानस्य धारणम् आरब्धवत्यः ।

पुनरपि, नवदश-शताब्दस्य अन्तकालं यावत् जनानां मानसिकी दशा परिवर्तिता । अनेकविधानां विचाराणां परिवर्तनानां च प्रभाव-वशात् सौन्दर्यस्य विचारेषु परिधानस्य च शैलीषु आधारभूत-परिवर्तनानि जातानि । आधुनिक-कालेन सह नूतन-मूल्यानि अपि प्रचलने समाविष्टानि ।

॥इति द्वितीयः पाठः ॥

3 नूतनः कालः

एतानि नूतनानि मूल्यानि कानि आसन् ? अपि च परिवर्तनस्य वातावरणं कथं जातम् ? ब्रिटेने नूतनसामग्र्या नूतन-प्रौद्योगिक्याः च एतत् परिवर्तनं शक्यम् इति कृतम् । द्वयोः विश्वयुद्धयोः महिलानां कार्य-स्थितिषु आगत-परिवर्तनानां कारणात् अपि कानिचन परिवर्तनानि जातानि । आयान्तु किञ्चित् अतीतकालं पश्येम यत् एतानि परिवर्तनानि कानि आसन् इति ।

3.1 नूतना सामग्री

सप्तदश-शताब्दात् पूर्वम् अधिकतराणां ब्रिटिश-महिलानां समीपे सामान्यरूपेण फ्लैक्स इत्यस्य लिनेन इत्यस्य ऊर्णस्य च वस्त्राणि अल्पीयांसि भवन्ति स्म । तेषां प्रक्षालनम् अपि कठिनं भवति स्म । (1600) षट्-शततमख्रिस्ताब्दात् परं भारतवर्षेण सह यूरोपीय-जनानां वाणिज्य-व्यवहारः जातः भारतीयं वर्णित-बिन्दु-वस्त्राणि अनेकेषां यूरोपीय-गृह्य-कपाटिकानां भागभूतानि जातानि यतो हि एतादृशानि वस्त्राणि अल्पमूल्यानि आसन् अनेन सहैव स्थापनम् इपि एतेषां सरलम् आसीत् इति ।

पुनः औद्योगिकी क्रान्तिः जाता तस्मात् नवदश-शताब्दे ब्रिटेनेन कार्पासीय-वस्त्राणां प्रचुरया मात्रया उत्पादनं कृत्वा भारतेन सह अनेकेषु देशेषु निर्यातस्य आरम्भः कृतः । यूरोपस्य महते वर्गाय अधुना कार्पासीय-वस्त्राणाम् उपलब्धिः सरलतया अभवत् । विंशतितम-शताब्दस्य आरम्भिकं कालं यावत् कृत्रिम-तन्तुभिः निर्मितानि वस्त्राणि अधुना अनर्घतमानि सरलधाव्यानि धारणे चापि सरलानि आसन् इति ।

महिला-पत्रिकासु महान्ति भारयुक्तानि क्लिष्टानि च अन्तर्वस्त्राणि (1870) सप्तत्यधिकाष्टादशशत-तमदशकं यावत् शनैः शनैः परित्यक्तानि । वस्त्राणि अधुना सुखेन वाह्यानि लघूनि कृश-कलेवराणि च भवितुम् आरब्धवन्ति । परन्तु पुनरपि (1914) चतुर्दशाधिकनवदशशत-तमख्रिस्ताब्दं यावत् तु वस्त्राणि पार्ष्णिं यावत् भवन्ति स्म अपि च एतत् परिमाणं त्रयोदश-शताब्दात् निरन्तरं चलति स्म । परन्तु अग्रिमवर्षे (1915) पञ्चदशाधिकनवदशशत-तमख्रिस्ताब्दे एव स्कर्ट् इत्यस्य लम्बता सहसा न्यूना जाता,अधुना स्कर्ट जानुनि यावत् एव दीर्घा भवति स्म ।
इदं सर्वं सहसा कथम् अभवत् ?

चित्रम् 9 – विंशतितम-शताब्दस्य पूर्वार्धे परिवर्तमानं परिधानम्,
चित्रम् 9 – (क) मध्य-उच्चवर्गयोः महिलानां परिधानशैलयः अपि परिवर्तिताः अपि च झालर इत्यपि परिवर्तितम् ।
चित्रम् 9 (ख) – प्रथमविश्वयुद्धस्य काले ब्रितानि-अस्त्रशालायां कार्यं कुर्वन्त्यः महिलाः । तस्मिन् काले युद्धकारणात् अस्त्राणाम् आवश्यकता अधिका आसीत् तस्मात् अधिकानि अस्त्राणि उत्पादयितुं निर्मापयितुं च सहस्राधिकाः महिलाः कार्यं कर्तुं गृहात् बहिर्भागम् आगतवत्यः । आवश्यकतानुरूपं सहजतया परिधानस्य शैली अपि परिवर्तिता ।

3.2 महायुद्धम्

महिला-परिधानेषु अनेकानि परिवर्तनानि तु विश्वयुद्धानां कारणात् जातानि।
यूरोपे अनेकाः महिलाः स्वर्णस्य आभूषणानां बहुमूल्यवस्त्राणां च धारणं परित्यक्तवत्यः। उच्चवर्गीयाः महिलाः सामान्य-वर्गीयाभिः महिलाभिः सह मेलितुं ताभिः सह च व्यवहर्तुम् आरब्धवत्यः।

प्रथम-विश्वयुद्धस्य (1914-1918) काले वस्त्राणि आकारदृष्ट्या लघुतां प्राप्तवन्ति तत्र लघुतायाः अनेकानि व्यवहारिकानि कारणानि आसन् इति। ब्रिटेने (1917) सप्तदशाधिकनवदशशत-तमख्रिस्ताब्दस्य आगमनात् किञ्चित् पूर्वं (70,000) सप्ततिसहस्रं महिलाः अस्त्राणां शिल्पशालासु कार्यं कुर्वन्ति स्म। ताः ब्लाउज इत्यस्य ऊरुकस्य च कार्यवेशस्य उपरि स्कार्फ इति परिधरन्ति स्म। अनन्तरकाले अनेन वेशेन ओवर-ऑल इत्यनेन सह शिरस्त्राणस्य रूपं धृतम् इति। युद्धं चिरकालं यावत् प्राचलत् तस्मात् विचित्रवर्णाः गाढवर्णाः च लुप्यमानाः जायन्ते स्म स्तोकवर्णानां प्रचलनम् आरब्धम् अर्थात् वस्त्राणि सरलानि सामान्यानि च जातानि। स्कर्ट् इति परिधानं तु लघुतां गतम् एव, ट्राउजर इत्यपि पाश्चात्य-महिलायाः परिधानस्य महत्त्वपूर्ण-भागरूपेण जातम् इति। अनेन ताः गन्तुं चलितुं च स्वातन्त्र्यम् अनुभवन्ति स्म अपि च महत्त्वपूर्णं तथ्यं तु इदम् आसीत् यत् सारल्यस्य कृते तु महिलाभिः स्वकेशानां स्वरूपम् अपि लघु कृतम्।

विंशति-शताब्दे आगम्यमाने तु कठोरा ऋजुता-पूर्णा जीवनशैली गम्भीरतायाः व्यावसायिक-व्यक्तित्वस्य च पर्यायरूपा जाता इति। बालानां नूतनेषु विद्यालयेषु सामान्यं सरलं च परिधानं भवेत् इति विषये बलाघातः कृतः अपि च शृङ्गारयुक्तस्य उत्तेजकस्य च वेशस्य दमनं कृतं न तस्मै स्थानम् आसीत्। बालिकानां पाठ्यक्रमे अपि जिम्नास्टिक इत्यस्य क्रीडानां च प्रवेशः जातः। क्रीडायै कूर्दनाय च तासां कृते अपि विशेष-परिधानीयस्य आवश्यकता आसीत् येन तासां गतौ बाधा न भवेत् इति। अनेन एव प्रकारेण कार्यहेतोः बहिः च गन्तुम् अपि ताभ्यः सुखदानां सुविधा-जनक-वस्त्राणाम् आवश्यकता आसीत्।

अनेन प्रकारेण भवद्भिः अवज्ञातं स्यात् यत् परिधानस्य इतिहासः समाजस्य वृहत्तरेण इतिहासेन ग्रन्थितं गुम्फितं चास्ति। अस्माभिः इदम् अपि दृष्टं यत् परिधानस्य सौन्दर्यस्य च परिभाषा कथं समाजस्य प्रभुत्वशालि-संस्कृतेः प्रवृत्तेः च निश्चीयते, कथं च एतादृशाः विचाराः कालक्रमेण परिवर्तन्ते इति। इदम् अपि स्पष्टं स्यात् अधुना यत् कथं परिवर्तकानां रूढिवादिनां च मध्ये एतान् आदर्शान् चरितार्थी-कर्तुं सङ्घर्षाः जाताः, अपि च प्रविधेः अर्थव्यवस्थायाः च परिवर्तनेन तथा च आधुनिककालस्य प्रभावेण जनाः परिवर्तनस्य आवश्यकताम् अपि अनुभूतवन्तः।

॥इति तृतीयः पाठः॥

4 औपनिवेशिकभारते परिवर्तनानि

एतस्मिन् काले भारते किं भवति स्म ?

औपनिवेशिक-काले पुरुषस्य नार्याः च परिधानेषु महत्त्वपूर्णानि परिवर्तनानि जातानि । एकपक्षतः अस्य परिवर्तनस्य मूले पाश्चात्य-परिधानस्य शैल्याः ख्रिस्तधर्म-प्रचारकाणां च प्रभावः आसीत् , अपरपक्षतः च भारतीयैः प्रचारितस्य एतादृशस्य परिधानस्य अपि प्रभावः आसीत् यः स्वदेशीय-परम्परायां संस्कृतौ च अन्वितं स्यात् । वस्त्रं परिधानं च वस्तुतः राष्ट्रियान्दोलनस्य महत्त्वपूर्णं प्रतीकभूतं जातम् । नवदश-शताब्दे जातानां परिवर्तनानां विषये सिंहावलोकनं कुर्मः तर्हि विंशति-शताब्दस्य परिवर्तनस्य श्रेष्ठम् अभिज्ञानं भविष्यति । यदा नवदश-शताब्दे पश्चिम-वेशभूषायाः प्रचलनं यदा जातं तदा भारतवासिनां प्रतिक्रिया त्रिविधा आसीत् -

प्रथमा – बहवः जनाः विशेषतया पुरुषाः पाश्चात्य-परिधानस्य केषाञ्चन चितानां वस्तूनां प्रयोगम् आरब्धवन्तः । पश्चिमस्य नवप्रचलनस्य वस्त्राणि ये अङ्गीकृतवन्तः तेषु प्रथमः क्रमाङ्कः पश्चिम-भारतस्य धनिक-पारसीजनानाम् आसीत् इति । बैगी-ट्राउजर् अपि च फेण्टा, शिरस्त्राणेन सह कॉलरयुक्त-प्रावारम् तथा च पादत्राणे धार्यन्ते स्म । अपि च 'अहं भद्रपुरुषः स्याम्, इति तत्र न्यूना कापि न स्यात्' इति धिया हस्ते कश्चित् दण्डः अपि ध्रीयते स्म इति । एतस्य वर्गस्य जनानां कृते पश्चिम-परिधानम् आधुनिकतायाः प्रगतेः च प्रतीकरूपम् आसीत् इति ।

चित्रम् 10 – मुम्बयिमहानगरे पारसीजनाः, 1863 तमख्रिस्ताब्दः ,

पश्चिम-परिधानस्य आकर्षणं निम्न-जातीयेषु तेषु वर्गेषु अपि आसीत् ये ख्रिस्तधर्मम् अवलम्बितवन्तः आसन् । एतेषां कृते इदं मुक्तेः प्रतीकम् आसीत् इति । अत्रापि महिलानाम् अपेक्षया पुरुषैः इदं नवप्रचलनम् अङ्गीकृतम् इति ।

चित्रम् 11 – गोवायाम् ईसायिधर्मानुयायिनः, पाश्चात्यवेशधारकाः च जनाः, 1907 तमख्रिस्ताब्दः ।

द्वितीया - केषाञ्चित् जनानां निश्चितं मतम् आसीत् यत् पश्चिमसंस्कृतेः पारम्परिक्याः सांस्कृतिका-अस्मितायाः च नाशः भविष्यति । तेषां कृते पाश्चात्य-परिधानस्य धारणं कलियुगस्य आगमनम् इव आसीत् इति । अत्र मुद्रिते हास्यचित्रे व्यङ्ग्यचित्रे वा बङ्गीयपुरुषेण पाश्चात्यपादत्राणे धारिते, भारतीयं धौतवस्त्रं शिरस्त्राणं च धृतम् अस्ति अतः तस्य उपहासः कृतः अस्ति ।

तृतीया - कैश्चित् पुरुषैः एतस्य संशस्य समाधानम् इत्थम् अन्विष्टं यत् भारतीय-परिधाने अपरित्यक्ते अपि पाश्चात्य-परिधानस्य धारणम् आरब्धम् । नवदश-शताब्दस्य अन्तिमे भागे अनेकैः वङ्गीयैः अधिकारिभिः गृहात् बहिर्भागे कार्याय पाश्चात्य-शैल्यन्वितानां वस्त्राणाम् प्रयोगः आरब्धः, गृहे च प्राप्ते सति एव ते सुखदानि भारतीयपरिधानानि धरन्ति स्म । विंशति-शताब्दस्य मानवशास्त्री वेरियर-एल्विन-वर्यः स्मरति यत् पूनायां आरक्षकाः सेवाकार्यात् निवृत्ताः भूत्वा राजमार्गे एव वस्त्राणां परिवर्तनं कुर्वन्ति स्म अपि च गृहं यावत् केवलं ट्यूनिक इति अन्तर्वस्त्रं च धृत्वा एव पदातयः गच्छन्ति स्म ।

चित्रम् – 13 – भारतीय-शारीवारी इत्यस्यां प्रकाशितं किञ्चन व्यङ्ग्यचित्रम्, 1873 तमः ख्रिस्ताब्दः ।

चित्रम् – 12 – व्यङ्ग्यचित्रम् "द मॉडर्न पैट्रियट्" गननेन्द्रनाथ-टैगोरः, विंशतितम-शताब्दस्य आरम्भे,
इदं कस्यचित् एतादृशस्य मूर्खजनस्य व्यङ्ग्यपूर्णं चित्रं वर्तते यत् पाश्चात्य-परिधानस्य अनुकरणम् अपि करोति अपि च मातृभूमौ स्निह्यामि इत्यपि अधिकारपूर्वकं वदति । तस्मिन् काले अनेकेषु व्यङ्ग्यचित्रेषु धूमदण्डिकायाः सेवनं कुर्वतां पाश्चात्यवेश-धारिणां च स्थूल-जनानाम् उपहासः क्रियते स्म ।

बाह्यजगतः आभ्यन्तरजगतः च इदम् अन्तरम् अधुना अपि अनेके जनाः व्यवहरन्ति।

कैश्चित् अन्यैः जनैः पश्चात्यं स्वदेशीयं च परिधानं युगपद् एव धृत्वा, अस्मात् पौनःपुन्येन यत् परिवर्तनं करणीयं भवति स्म तस्मात् मुक्तिः प्राप्ता इति।

परन्तु वयं द्रक्ष्यामः यत् वेशस्य परिवर्तनस्य अस्मिन् इतिहासे अतीव अव्यवस्था वर्तते इति।

4.1 जातेः सङ्घर्षाः परिधान-परिवर्तनं च

यद्यपि भारते यूरोपीय-प्रकारकस्य सम्प्चुअरी अधिनियमाः न आसन्, परन्तु अत्र खाद्यपानस्य वेशभूषायाः वासस्य च स्वदृढाः सामाजिक्यः व्यवहार-संहिताः आसन् इति। प्रभुत्वशालिजातेः अधीनस्थजातेः च जनाः किं धरिष्यन्ति किं खादिष्यन्ति, इदं सर्वं जातिप्रथाद्वारा निश्चितम् आसीत् इति, एतासां च आचार-संहितानां मूले अधिनियमस्य शक्तिः आसीत्। अतः यदा अपि परिधाने परिवर्तनैः एतेषाम् आचाराणाम् उल्लङ्घनं जातम् इति, तदा हिंसक्यः सामाजिकप्रतिक्रियाः जाताः।

मै-मासे (1822) द्वाविंशत्यधिकाष्टादशशत-तमे ख्रिस्ताब्दे च दक्षिणभारतस्य त्रावणकोर-राज्ये प्रभुत्वसम्पन्न-जातेः नायर इति जनाः शनार इति जातेः महिलानासु आक्रमणं कृतवन्तः यतो हि ताभिः महिलाभिः स्वशरीरस्य उपरि भागे वस्त्राच्छादनस्य साहसं कृतवत्यः आसन् इति। अग्रिमेषु दशकेषु वस्त्रसंहिताम् अभिलक्ष्य अनेके हिंसकाः सङ्घर्षाः निरन्तरं जाताः।

शनार (अनन्तरकाले नाडर इति नाम्ना अपि ते अभिज्ञाताः) इत्यस्य समुदायस्य बहवः जनाः, अधीनजातयः मन्यन्ते स्म। इदम् एव कारणम् आसीत् यत् ते छत्रम् आधृत्य चलितुं पादत्राणं, स्वर्णाभूषणानि च धर्तुं प्रतिषिद्धाः आसन्। स्थानीया रीतिः आसीत् यत् पुरुषः स्यात् अथवा महिला स्यात् अथवा कश्चित् अपि जनः, प्रभुत्वसम्पन्न-जातेः जनानां समक्षे स्वशरीरस्य उपरि भागस्य आच्छादनं न करिष्यति इति। ख्रिस्त-धर्मप्रचारकाणां प्रभावात् धर्मान्तरिताः शनारमहिलाः (1820) विंशत्यधिकाष्टादशशत-तमदशके स्यूत-कञ्चुकैः वस्त्रैः च प्रभुत्व-सम्पन्न-जातीयकानां जनानम् इव स्वशरीराच्छादनस्य आरम्भं कृतवत्यः। अय्या-बैकुण्ठरसदृशैः हिन्दू-परिवर्तकैः अपि परिधान-परिवर्तनस्य एतस्यां प्रक्रियायां महत्त्वपूर्णा भूमिका ऊढा। अचिरात् एव "नायर"जातीयकाः जनाः एतत् दृष्ट्वा आन्दोलनम् आरब्धवन्तः अपि च ते प्रकटरूपेण एव एतादृशीः महिलाः आक्रम्य तासाम् उपरिभागस्थानां वस्त्राणाम् उत्पाटनं विदारणं वा आरब्धवन्तः। न्यायालयाय अपि परिधान-परिवर्तनस्य एतत् आन्दोलनं विरुध्य प्रार्थना-पत्राणि दत्तानि। इत्थम् एतस्मात् कारणात् अभवत् यतो हि शनार इति वर्गस्य जनाः तस्मिन् काले प्रभुत्वसम्पन्न-जातेः दासवत् सेवां शुश्रूषां च न करिष्यामः इति ते वक्तुम् आरब्धवन्तः।

आरम्भे त्रावणकोरस्य सर्वकारः (1829) एकोनत्रिंशदधिकाष्टादशशत-तमे ख्रिस्ताब्दे घोषणाम् अकारयत् यत् शनार-महिलाः स्वीयशरीरस्य उपरिस्थस्य भागस्य आवरणं मा कुर्वन्तु इति। परन्तु घोषणायां जातायां सत्याम् अपि शनार-ख्रिस्तमहिलाः शनार-हिन्दू-महिलाः अपि अङ्गवस्त्रम्, कञ्चुकम्, इत्यादीनाम् उपरि धार्यमाणवस्त्राणां धारणं न त्यक्तवत्यः ताः तानि यथावत् धरन्ति स्म।

त्रावणकोरे (1855) पञ्चपञ्चाशदधिकाष्टादशशत-तमे ख्रिस्ताब्दे दासप्रथायाः समाप्तेः प्रभुत्व-सम्पन्न-जातीयकाः जनाः कुण्ठिताः जाताः ते अनुभूतवन्तः यत् तेषां नियन्त्रणं समाप्तिं याति। अक्टूबर्-मासे (1859) एकोनषष्ट्यधिकाष्टादशशत-तमे ख्रिस्ताब्दे यदा एकस्मिन् दिने विपण्यां शनार-महिलानासु आक्रमणानि जातानि

(1921) एकविंशत्यधिकनवदशशत-तम-ख्रिस्ताब्दीयस्य जनगणनायाः कालं यावत् शनार-समुदायस्य सर्वेषां सदस्यानां कृते नाडर इति शब्दस्य प्रयोगः जायमानः आसीत् इति।

गतिविधिः

अय्या-बैकुण्ठर-सदृशानां तेषां समाजपरिवर्तकानां विषये इतोऽपि अवगन्तुं प्रयत्नं कुर्वन्तु, यैः परिधाने व्यापक-सामाजिक-परिवर्तनेषु च महत्त्वपूर्णा भूमिका ऊढा।

अपि च तासां वस्त्राणि अवतारितानि, तदा उपद्रवः तत्र जातः। गृहाणि लुण्ठितानि, ख्रिस्तालयाः प्रज्वालिताः। अन्ततः सर्वकारेण काचित् इतोऽपि घोषणा कृता यस्याः अन्तर्गतं शनार-महिलाः कामं ताः हिन्दूस्त्रियः भवेयुः उत ख्रिस्तीयाः महिलाः भवेयुः इति सर्वासां कृते एव प्रावारादिभिः शरीरस्य उपरितनभागः स्वेच्छया आच्छादनस्य आज्ञां प्राप्तवत्यः, परन्तु तथापि ताः तथा उपरितनं शरीरं न आच्छादयितुं शक्नुवन्ति स्म यथा उच्चजातेः महिलाः शरीरम् आच्छादयन्ति स्म।

4.2 ब्रिटिशशासनं परिधान-संहिताः च

भारतीय-वेशभूषायाः विषये आङ्ग्लीयानां काः प्रतिक्रियाः आसन् ? अपि च भारतीयानाम् आङ्ग्लव्यवहारं दृष्टिं च प्रति कीदृशाः विचाराः आसन् ?

पृथक् पृथक् संस्कृतिषु कस्यचिद् अपि परिधानस्य प्रायः पृथक् पृथक् अर्थाः स्वीक्रियन्ते। अतः अनेकेषु अवसरेषु भ्रान्तबोधः उत्पद्यते, सङ्घर्षाः च जायन्ते। परिधाने ब्रिटिशराजकाले आगतानि परिवर्तनानि एतादृशस्य सङ्घर्षस्य एव परिणामरूपेण आसन्।

अधुना उष्णीषं शिरस्त्राणं च एव पश्येम। यदा प्रारम्भे यूरोपीय-वणिजः भारतम् आगन्तुम् आरब्धवन्तः तदा तेषाम् अभिज्ञानं शिरस्त्राण-धारित्वेन भवति स्म अपरञ्च भारतीयानाम् उष्णीषवताम् इति। शिरसि धार्यमाणे द्वे अपि वस्तुनी न केवलं दर्शनेन भिन्ने आस्ताम् अपि तु तेषाम् अर्थाः अपि पृथक् पृथक् आसन्। भारते उष्णीषः आतपात् घर्मात् च रक्षणं तु करोति स्म एव सम्मानस्य अपि प्रतीकरूपेण आसीत् यस्य अवतारणं यदा कदापि न कर्तुं शक्यते स्म। पाश्चात्यरीतिः तु इयम् आसीत् यत् यः आदरणीयः भवति स्म केवलं तस्य पुरतः एव शिरस्त्राणस्य अवतारणं भवेत् इति। अस्याः सांस्कृतिक-भिन्नतायाः भ्रान्तिपूर्ण-बोधः जातः। यदा ब्रिटिश-अधिकारिणः भारतीयैः सह मिलन्ति स्म तदवसरे यदा भारतीयाः उष्णीषं न अवतारयन्ति इति पश्यन्ति स्म तदा आत्मानम् अपमानितान् इति अनुभवन्ति स्म। अपरतः बहवः भारतीयाः स्वक्षेत्रीयां राष्ट्रियां च अस्मिताम् अभिज्ञापयितुं एव उष्णीषं धरन्ति स्म।

एतादृशः एव सङ्घर्षः पादत्राणम् अभिलक्ष्य अपि अभवत्। नवदश-शताब्दे रीतिः आसीत् यत् आङ्ग्लीयाः अधिकारिणः भारतीय-शिष्टाचारस्य पालनं कुर्वन्तः भारतीय-नृपाणां राज्यशासकानां च राजसभाः प्रति पादत्राणम् अवतार्य गमिष्यन्ति इति। केचन आङ्ग्लीयाः अधिकारिणः भारतीयां वेशभूषाम् अपि धरन्ति स्म। परन्तु (1830) त्रिंशदधिकाष्टादशशत- तमे ख्रिस्ताब्दे सर्वकारीय-समारोहेषु ते आङ्ग्लाधिकारिणः भारतीयवेशं धृत्वा न गमिष्यन्ति इति आदेशः दत्तः, यतः आङ्ग्लीय-स्वामिनां सांस्कृतिकवेशस्य वैशिष्ट्यं, प्रामुख्यम् उत्तुङ्गतां च भजेत् इति।



चित्रम् 14 – यूरोपीयाः अतिथयः शाहजहाँ इत्यस्य राजसभां प्रति उपहारान् आनयन्तः सन्ति, आगरानगरम्,1633, पादशाहनामा इत्यस्मात् उद्धृतम्। चित्रस्य अधोभागे यूरोपीयजनानां शिरस्त्राणानि पश्यतु। सावधानं पश्यन्तु यत् राजसभासदाम् उष्णीषाणाम् एतेषाम् अतिथीनां च शिरस्त्राणानां मध्ये कियत् वैभिन्न्यं वर्तते।

नूतनशब्दः

अस्मिता – अभिज्ञानम्, आत्मबोधः।

चित्रम् 15 – सर.एम्. विश्वेश्वरैया इति। प्रसिद्ध-अभियन्तुः टैक्नोक्रैट् इत्यस्मात् अपि च (1912) द्वादशाधिकनवदशशत-तमख्रिस्ताब्दात् (1918) अष्टादशाधिकनवदशशत-तमख्रिस्ताब्दं यावत् मैसूर-राज्यस्य प्रधानामात्यः। सः पाश्चात्यशैल्यः थ्री-पीस- इति परिधानीयेन सह उष्णीषम् अपि धरति स्म।

तृतीया मञ्जूषा

शिरसि उष्णीषम्

पेटा इति नाम्नः विख्यातस्य मैसूरी इत्यस्य उष्णीषस्य प्रान्तभागे सुवर्णपट्टिका संलग्ना भवति स्म। इदम् उष्णीषं नवदश-शताब्दस्य अन्तिमे काले अनेके अधिकारिणः शिक्षकाः कलाकाराः च उष्णीषं धारयितुम् आरब्धवन्तः आसन्। ते प्रायः पाश्चात्यं परिधानीयम् उष्णीषं च द्वे अपि सहैव धरन्ति स्म तस्मात् एतत् अवज्ञायते स्म यत् एते राज्यस्य कर्मचारिणः सन्ति इति। अधुना मैसूरी इति उष्णीषं मुख्यरूपेण उत्सवेषु प्रतिष्ठितानाम् अतिथीनां च स्वागतकाले एव परिधीयते स्म।

परन्तु अपरतः आङ्ग्लीयाः भारतीयेभ्यः आशासते स्म यत् ते भारतीयपरिधान-संहितायाः पालनं कुर्युः अपि च कार्यालयस्य कर्मचारिणः भारतीयं परिधानं धृत्वा एव कार्यालयं गच्छेयुः इति । (1824 -1828) चतुर्विंशत्यधिकाष्टादशशततमख्रिस्ताब्दात् आरभ्य अष्टाविंशत्यधिकाष्टादशशततम-ख्रिस्ताब्दस्य आभ्यन्तरे राज्यपालः जनरल-एमहर्स्ट इति अस्मिन् विषये आग्रही आसीत् यत् तस्य पुरतः ये भारतीयाः आयान्ति समुपस्थिताः वा भवन्ति ते नग्नपादाभ्याम् एव आगच्छेयुः इति,परन्तु एषः आग्रहः दृढतया न प्रवर्तितः । नवदश-शताब्दस्य मध्यकालं यावत् यदा लार्ड-डलहौजी गवर्नर-जनरलः आसीत् तदा "पादुका-सम्मान"इति रीतिः दृढतया पालिता अपि च अधुना भारतीयाः यदा कामपि सर्वकारीयां संस्थां प्रविशन्ति स्म तदा तैः पादत्राणानि कार्यालयात् बहिर्भागे एव मोचनीयानि भवन्ति स्म । आम्, यूरोपीय-परिधानस्य धारकाः अस्मात् नियमात् अवश्यं मुक्ततां प्राप्तवन्तः आसन् । सर्वकारीय-सेवायां कार्यरताः भारतीयाः अस्मात् नियमात् त्रस्ताः वयम् इति अनुभूतवन्तः।

पादुका-सम्मान इति नियमस्य उल्लङ्घनस्य काचित् प्रसिद्धा घटना (1862) द्विषष्ट्यधिकाष्टादशशत-तमे ख्रिस्ताब्दे सूरतस्य न्यायालये प्रवृत्ता । सूरत-नगरस्य सैन्य-न्यायालये असेसर (राजस्वस्य आकलयितारः)इति पदे कार्यरतेन मनोकजीकोवासजी-एन्टी इत्यनेन सत्रन्यायाधीशस्य न्यायालये पादत्राणे अहं न मोक्ष्यामि इति उक्तम् । न्यायाधीशस्य अस्मिन् विषये आग्रहः आसीत् यत् तेन पादत्राणे अवतारणीये एव भविष्यतः इति परन्तु मनोकजी अपि अनवतारणे आग्रही आसीत् । तदा न्यायालयेन तस्य प्रवेशः प्रतिबन्धितः तस्मात् सः विरोधं कुर्वन् बम्बयिमहानगरस्य राज्यपालाय पत्रं लिखितवान् इति ।

आङ्ग्लीयानां कथनम् आसीत् यत् भारतीयाः कमपि पवित्रस्थलस्य गृहस्य वा प्रवेशनात् प्राक् पादत्राणे मुञ्चन्ति एव, तर्हि ते न्यायालये अपि तथैव किमर्थं न कुर्युः इति । एतस्मिन् विषये या चर्चा प्राचलत् तस्यां भारतीयैः उक्तं यत् पवित्रस्थालानां गृहाणां च विषयः पृथक् अस्ति इति । प्रथमः विषयः तु अयम् अस्ति यत् बाह्यभागे रेणुः अवकरः च भवति सः पादत्राण-संलग्नः भूत्वा अन्तः स्वच्छ-स्थानानि यावत् गमिष्यति तत्र प्रायः भूमौ एव उपविशन्ति शयनं च कुर्वन्ति इति । अपरं तथ्यम् इदम् अस्ति यत् चर्ममयं पादत्राणं तु अशुद्धं भवति एव । परन्तु न्यायालयसदृशं सार्वजनिक-क्षेत्रं तु गृहं नास्ति खलु ।

एतादृशस्य सङ्घर्षस्य अनन्तरम् अपि न्यायालये पादत्राणानां प्रवेशः भवेत् इति स्वीकृतौ प्राप्तौ तु अनेकवर्षाणि व्यतीतानि इति ।

स्रोतः घ इति

यदा सूरतस्य सैन्य-न्यायालयेन मनोकजी पादत्राणयोः विमोचनाय कथितः (1862) द्विषष्ट्यधिकाष्टादशशत-तमे ख्रिस्ताब्दे तदा सः न्यायाधीशम् अवदत् यत् सः स्वशिरस्त्राणम् अवतारयितुं शक्नोति परन्तु पादत्राणे न अवतारयिष्यति । सः अवदत् –

उष्णीषस्य अवतारणं न्यायालयस्य अपेक्षया मम कृते अधिक-अपमानस्य विषयः स्यात् परन्तु अहम् उष्णीषस्य अवतारणस्य आदेशं पालयितुं शक्नुयाम् यतोहि एतस्मिन् प्रकरणे चेतनायाः धर्मविषयकः च कोऽपि सन्दर्भः नास्ति । पादत्राणयोः माध्यमेन अहं कस्यापि सम्माननम् अपमाननं च न करोमि परन्तु शिरसि उष्णीषस्य धारणम् अस्माकं कृते सर्वान् प्रति सर्वाधिकं सम्मानपरकं तथ्यं भवति इति । गृहे वयम् उष्णीशं धृत्वा न तिष्ठामः परन्तु यदा अपि बहिः कस्यापि मान्यजनेन सह मेलनार्थं गच्छामः तदा स्व-सामाजिक-संस्काराणां कारणात् उष्णीशं धृत्वा एव गच्छामः । परन्तु स्व-सामाजिक-सम्मेलने वयं (पारसी) कस्यापि पुरतः पादत्राणानि न मोचयामः कामं सः जनः कियान् अपि मानी किं न स्यात् ...।

क्रियाकलापः

कल्पनां कुर्वन्तु यत् भवान् नवदश-शताब्दस्य मुस्लिमः अस्ति अपि च भवता शताब्दस्य अन्तिमे काले इलाहाबाद-उच्चन्यायालये प्रस्तुतेन भाव्यम् । भवान् कीदृशानि वस्त्राणि धरिष्यति ? किं तानि वस्त्राणि तेषां वस्त्राणाम् अपेक्षया बहुपृथक् प्रकारकाणि भविष्यन्ति यानि वस्त्राणि भवान् गृहे धरति ?

॥इति चतुर्थः पाठः॥

5 राष्ट्रियपरिधानस्य प्रारूपम्

नवदश-शताब्दस्य अन्तकालपर्यन्तं भारते सर्वत्र जनानां मनःसु वेगवत्यः राष्ट्रियभावनाः आसन् अपि च भारतवासिनः राष्ट्रियम् ऐक्यम् अभिव्यक्तीकर्तुं ये सांस्कृतिक-प्रतीकाः आसन् तान् व्यवहर्तुं प्रवर्तितुं च संलग्नाः जाताः । कलाकाराः राष्ट्रियशैल्याः कलायाः अन्वेषणं कुर्वन्ति स्म अपरञ्च कवयः राष्ट्रगानं रचयन्ति स्म । राष्ट्रियध्वजस्य प्रारूपं कीदृशं स्यात् इति विषये अपि चर्चायाः आरम्भः जातः । राष्ट्रियपरिधानस्य अन्वेषणं राष्ट्रस्य अभिज्ञानं प्रतीकात्मक-रूपेण परिभाषणस्य एतस्याः प्रक्रियायाः एव भागभूतम् आसीत् इति ।

भारतस्य अनेकेषु भागेषु उच्चवर्गस्य उच्चजातेः च स्त्रियः पुरुषाः च परिधानम् अभिलक्ष्य सावधानं प्रयोगं कृतवन्तः । बङ्गालस्य टैगोरकुलेन (1870) सप्तत्यधिकाष्टादशशत-तमदशकात् एव भारतीय-पुरुषाणां महिलानां च कृते राष्ट्रिय-परिधानीयस्य प्रारूप-निर्माणस्य प्रयासः कृतः । रबीन्द्रनाथटैगोरेण परामृष्टं यत् भारतीय-राष्ट्रिय-परिधाने भारतीयस्य आङ्ग्लीयस्य च परिधानस्य नैव अपि तु हिन्दू-मुस्लिम-परिधानस्य सामञ्जस्यं स्यात् इति । अनेन प्रकारेण कुड्मलीयं लम्बतरं प्रावारकम् अर्थात् चकपन इति पुरुषाणां कृते श्रेष्ठतमम् आसीत् इति मतम् । अनेन एव प्रकारेण पृथक् पृथक् क्षेत्राणां पारम्परिकवेशात् प्रेरणा प्राप्ता । भारतीय-प्रशासनिक-सेवायाः प्रथमः भारतीयः सदस्यः सत्येन्द्रनाथ-टैगोरस्य पत्नी ज्ञानदा-नन्दिनी देवी (1870) सप्तत्यधिकाष्टादशशत-तमदशके बम्बयिमहानगरतः कलकत्तानगरं प्रत्यागतवती । सा पारसीशैल्याः शाटिकाम् अङ्गीकृतवती, यस्याः प्रान्तभागः वामस्कन्धे ब्रूच इत्यनेन ग्रथितः भवति स्म अपि च तेन सह कञ्चोलिका महिला-पादत्राणे अपि ध्रियेते स्म । एषः वेशः शीघ्रमेव ब्रह्मसमाजस्य महिलाभिः अपि अङ्गीकृतम्, तदारभ्य च एषा ब्रह्मिका शाटिका इति प्रोक्ता । एतस्याः परिधानशैल्याः अचिरात् एव महाराष्ट्रस्य उत्तरप्रदेशस्य च ब्रह्मसमाजस्य जनेषु अपि अनुकरणस्य प्रचलनं जातम् ।

चित्रम् 17 – ज्ञानदानन्दिनी-टैगोरः (वामतः) स्वपतिना सत्येंद्रनाथटैगोरेण अन्यैः कुटुम्बजनैः च सह । सा पाश्चात्यशैल्याः निर्मितेन कञ्चुकेन सह शाटिकाम् अपि धृतवती अस्ति ।
सौजन्यम् – रबीन्द्रभवन-चित्र-आर्काइव्ज इति, विश्वभारतीविश्वविद्यालयः शान्तिनिकेतनम् ।

चित्रम् 18 – आर.सी.दत्तस्य पुत्री सरला । सा पारसीयां प्रान्तयुक्तां शाटिकां धृतवती, दुकूलस्य च उच्चगलयुक्तः कञ्चुकः धृतः अस्ति । पश्यन्तु यत् परिधानस्य शैल्यः केन प्रकारेण समग्रेषु क्षेत्रेषु सर्वासु च संस्कृतिषु परिवर्तन्ते स्म ।

चित्रम् – 16 – लेडी-बच्चूबायी (1890) प्रसिद्धः पारसी–सामाजिक-कार्यकर्त्री,
एषा कौशेयं गारा इत्येतत् धृतवती अस्ति, यस्मिन् हंसस्य पिओनी इति नामधेयस्य आङ्ग्लपुष्पस्य च सज्जा वर्तते ।
सौजन्यम् – पारसी जॉरैस्ट्रियन-प्रॉजेक्ट इति, नवदेहली ।

नूतनशब्दः

ब्रह्मसमाजः – नवदश-शताब्दस्य किञ्चन धर्म-परिष्कार-आन्दोलनम् इति ।

परन्तु अखिलभारतीय-परिधानशैलीं विकासयितुं ये प्रयासाः क्रियन्ते स्म ते न सफलाः जाताः । अद्य अपि गुर्जरस्य कोडागू इत्यस्य केरलस्य असमस्य च महिलाः विभिन्न-प्रकाराणां शाटिकाः धरन्ति ।

स्रोतः च इति

केचन जनाः महिलानां परिधाने परिवर्तनस्य प्रयासानां समर्थनं कृतवन्तः अपरञ्च केचन जनाः तेषां विरोधम् अपि कृतवन्तः इति ।

"कश्चित् अपि सभ्यदेशः तादृशानां वस्त्राणां विरोधी अस्ति यादृशानि वस्त्राणि अस्माकं देशस्य महिलाः अधुना धरन्ति । इदम् अति-लज्जायाः विषयः अस्ति । शिक्षिताः पुरुषाः एतस्मात् अतीव चिन्तिताः दुःखिनः च सन्ति । प्रायः प्रत्येकं जनः सभ्य-प्रकारकस्य नूतन-परिधानस्य च इच्छां करोति ... अस्माकं देशे अतीव सूक्ष्म-प्रकारकस्य पारदर्शि-प्रकारकस्य च वस्त्र-परिधानस्य प्रचलनं जातम् अस्ति यैः वस्त्रैः सम्पूर्णं शरीरम् एव दृश्यते । एतादृशस्य लज्जास्पदस्य वेशस्य कारणात् एव अधुना सभ्यजनानां सङ्गतिः न लभ्यते ... एतादृशानि वस्त्राणि अस्माकं नैतिक-उत्थाने बाधकानि भवितुं शक्नुवन्ति " ।

चित्रम् – 19 – त्रावणकोरस्य महाराज्ञी (1930),
पाश्चात्य-पादत्राणानां लम्बतरभुजयोः मर्यादितायाः कञ्चुलिकायाः विषये अवधानं कुर्वन्तु । विंशतितम-शताब्दस्य आरम्भे इयं शैली उच्चवर्गे सामान्या जाता आसीत् ।

स्रोतः छ इति

सी.केशवन-वर्यः स्वीयायाम् आत्मकथायां जीविता समरम इत्यस्यां ज्ञापयति यत् यदा नवदश-शताब्दस्य अन्तिमे काले तस्याः श्वश्वे प्रथमवारं यदा तस्याः ननान्दा कञ्चुलिका आनीय दत्तवती आसीत् तदा कीदृशी स्थितिः उत्पन्ना आसीत् –

"दर्शने समीचीना आसीत् परन्तु धारिते सति अहं कुतकूतम् इति अनुभवामि स्म । मया सा अवतारिता सावधानं तस्याः पुटीकरणं कृतम् अपि च उत्साहपूर्वकम् अहं तां कञ्चुलिकां स्व- मातुः समीपं नीतवती । सा कठोरनेत्राभ्यां माम् अवलोकितवती अपि च अवदत् – " त्वं तां कञ्चुलिकां धृत्वा कुत्र स्वेच्छाचारिताम् आचरितुं व्रजसि ? एतां पुटीकृत्य मञ्जूषायां च स्थापयतु -- " अहं स्वमातुः बिभेमि स्म । सा मम प्राणान् एव कदाचित् हरेत् । रात्रौ अहं तां कञ्चुलिकां पुनः धृतवती अपि च पतिम् अपि अदर्शयत् । सः अवदत् यत् सा मयि शोभते । अग्रिमे दिने प्रातःकाले अहं तां धृत्वा बहिर्भागम् आगतवती ।... मया न दृष्टं यत् पार्श्वतः मम माता आयाति । तदा मया माता नारिकेलस्य शाखां त्रोटयन्ती अवलोकिता । यदा अहं पृष्ठभागं प्रति भ्रमितवती सा सकोपं कम्पमाना मम पुरतः स्थिता आसीत् । ... सा अवदत्, "अवतारयतु एतां – अधुना किं त्वं यवन-महिला इव युतकं धृत्वा भ्रमिष्यसि इति ?"

क्रियाविधिः

एते द्वे उक्ती (स्रोतः च, छ चेति) प्रायः समान-कालिक्यौ स्तः, यद्यपि भारतस्य द्वयोः पृथक् पृथक् भागयोः स्तः तद्यथा एका बङ्गालतः अपरा च केरलतः । एतस्मात् भवन्तः महिला-परिधानस्य लज्जायाः च परस्परस्य सम्बन्धस्य विषये किं अवगच्छन्ति ?

5.1 स्वदेशीयम् आन्दोलनम्

भवद्भिः विंशतितम-शताब्दस्य प्राक्तने दशके बङ्गाले जातस्य स्वदेशीय-आन्दोलनस्य विषये पठितम् । यदि भवद्भिः अवधानं कृतं स्यात् तर्हि अवगतं स्यात् यत् एतस्य आन्दोलनस्य केन्द्रे परिधानस्य राजनीतिः आसीत् इति ।

सा राजनीतिः का आसीत् ?

भवतां ज्ञानं स्यात् यत् आङ्ग्लीयाः यदा प्रथमवारं वाणिज्याय अत्र आगतवन्तः तदा भारतीय-कार्पासीय-वस्त्रस्य आधिक्येन आवश्यकता आविश्वम् आसीत् इति । सप्तदश-शताब्दे आविश्वम् उत्पादानां चतुर्थांशः भारते एव निर्मितं भवति स्म । अष्टादश-शताब्दस्य मध्यकाले केवलं बङ्गाले एव दशलक्षं तन्तुवायाः आसन् । परन्तु ब्रिटेने जातया औद्योगिक-क्रान्त्या वयनस्य कर्तनस्य च कार्यस्य यन्त्रीकरणं कृतम्, असाधित-सामग्र्याः रूपेण कार्पासस्य नालस्य च आवश्यकताः वर्धिताः, अपि च अनेन सहैव

विश्व-अर्थव्यवस्थायां भारतस्य स्थानं परिवर्तितम्।

भारते ब्रिटेनेन शासनं कृतं तस्मात् ब्रिटेनस्य लाभद्वयं जातम् इति – भारतीयकृषकाः नीलसदृशानि शस्यानि प्ररोहितुं बाध्याः कर्तुं शक्यन्ते स्म अपि च अनर्घाः ब्रिटिश-उत्पादाः सरलतया अत्र निर्मित-स्थूलवस्त्राणां स्थाने स्थापयितुं शक्यन्ते स्म। परिणामः अयं जातः यत् आवश्यकतायाः अभावे भारतस्य तन्तुवायाः अत्यधिक-मात्रायाम् अवृत्तिकाः जाताः तस्मात् मुर्शिदाबाद-मछलीपत्तन–सूरत-प्रभृतीनां कार्पासीय-वस्त्रोद्योगानां पतनम् अभवत्।

परन्तु विंशतितम-शताब्दे अत्यधिकाः जनाः ब्रिटिश-वस्त्रोद्योगेषु निर्मित-वस्त्राणां बहिष्कारस्य आरम्भम् अकुर्वन् अपि च तेषां स्थाने असमं महार्घं दुर्लभं च खादी इति वस्त्रस्य धारणम् आरब्धवन्तः। इदं परिवर्तनं कथं जातम्?

ब्रिटिशराज्यं विरुध्य वर्धमानं विरोधं नियन्त्रयितुं लार्ड्-कर्जन-वर्यस्य (1905) पञ्चाधिक-नवदश-शततमे वर्षे बङ्गाल-विभाजनस्य निर्णयम् अकरोत्। बङ्ग-भङ्ग इत्यस्य प्रतिक्रियायां स्वदेशीयम् आन्दोलनं गतिमत् जातम्। आदौ तु जनाः प्रार्थिताः यत् ते समग्राणाम् एव वैदेशिक-उत्पादानां बहिष्कारं कुर्युः इति अपि च अग्निपेटिका-धूमदण्डिका-सदृशवस्तूनां निर्माणाय स्वयम् उद्योगान् स्थापयेयुः। जन-आन्दोलनेषु सम्मिलिताः जनाः सङ्कल्पं कृतवन्तः यत् ते औपनिवेशिक-राज्यस्य शासनस्य वा समाप्तिं कृत्वा एव विरताः भविष्यन्ति इति। स्वदेशीय- वस्त्रस्य प्रयोगः देशभक्तेः कर्तव्यम् इति जातम्। महिलाः अपि निवेदिताः यत् ताः कौशेय-वस्त्राणि काच-वलयानि च परित्यज्य क्षिपेयुः इति अपि च तेषां स्थाने शङ्खवलयानि धरेयुः। तान्तव-चक्रेण निर्मितं स्थूलवस्त्रं लोकप्रियं कर्तुं गानानि गीतानि, कविताः च रचिताः।

परिधाने परिवर्तन-विषयकः विचारः उच्चवर्गीय-जनेभ्यः अरोचत यतो हि साधनहीन-निर्धनेभ्यः नूतनवस्तूनां क्रयणम् अतिकठिनम् आसीत्। प्रायः पञ्चदश-वर्षेभ्यः परम् उच्चवर्गीयाः जनाः अपि पुनः यूरोपीय-परिधानम् एव धर्तुम् आरब्धवन्तः।

यद्यपि तस्मिन् काले बहवः जनाः राष्ट्रहितार्थं सम्भूय आगतवन्तः, परन्तु विपणिषु पूर्वतः एव अनर्घाणि ब्रिटिशवस्तूनि प्रति आह्वानं प्रायः अशक्यम् आसीत्।

एताः सीमाः अतिरिच्य स्वदेशीयस्य अनुभवेन महात्मगान्धी इयं शिक्षाम् अवश्यं प्राप्तवान् यत् ब्रिटिशराज्यं शासनं वा विरुध्य प्रतीकात्मक-युद्धे वस्त्रस्य कियती महत्त्वपूर्णा भूमिका भवितुं शक्नोति।

5.2 महात्मगान्धिनः परिधानप्रयोगाः

महात्मगान्धिनः सर्वपरिचिता छविः इयम् अस्ति, यत्र तस्य शरीरस्य उपरि भागे किमपि वस्त्रं नास्ति तेन धौतवस्त्रं धृतम् अस्ति चक्रेण च वयति। चक्रेण कर्तनं स्वदेशीयवस्त्रस्य च दैनिक-प्रयोगान् सः महाप्रतीक-रूपेण परिवर्तितवान्। स्वाश्रितजीवनस्य एतेषु प्रतीकेषु ब्रिटिशवस्त्रोद्योगेषु निर्मितवस्त्राणां विरोधः अपि प्रतिबिम्बितः भवति स्म।

क्रियाविधिः

यदि भवन्तः निर्धनकृषकः अभविष्यन् तर्हि किं प्रसन्नतया वस्त्रोद्योगैः निर्मितानां वस्त्राणां त्यागम् अकरिष्यन्?

चित्रम् 20 – महात्मगान्धिनः चिरपरिचितं चित्रम्, अनावृत्तवस्त्रशरीरं चक्रेण वयनं कुर्वाणः वर्तते।

महात्मगान्धिनः वस्त्र-सम्बद्ध-प्रयोगेषु भारतीय-उपमहाद्वीपे परिधानं प्रति परिवर्तमान-प्रवृत्तेः सारतत्त्वं निहितम् अस्ति । गुर्जरप्रान्ते वैश्यपरिवारे उत्पन्नत्वात् स्वबाल्ये एव सः युतकेन सह धौतवस्त्रम् अथवा पादयामं धरति स्म कदाचित् च प्रावारकम् अपि । यदा सः नवदशवर्षीयः आसीत् तदा (1888) अष्टाशीत्यधिकाष्टादशशत-तमख्रिस्ताब्दे सः यदा विधिशास्त्रम् अध्येतुं लन्दनम् अगच्छत् तदा तेन स्वीयाः शिखा कर्तयिता पाश्चात्यं परिधानं च सः अङ्गीकृतवान् यतः जनाः तं न उपहसेयुः इति । प्रत्यागमने अपि सः पाश्चात्यवेशम् एव धरति स्म सह एव उष्णीषम् अपि धृतवान् इति । दक्षिण-अफ्रीकायाः जोहानेसबर्ग-नगरे (1890) नवत्यधिकाष्टादशशत-तमदशके वाक्कीलतां कुर्वतः तस्य परिधानम् अपि पाश्चात्यम् एव आसीत् ।

परन्तु शीघ्रमेव तेन निर्णयः अकारि यत् परिधान-राहित्यम् एकविधा राजनैतिक-घोषणा अस्ति । कटिवस्त्रस्य कञ्चुकस्य च धारणस्य प्रथमः प्रयोगः तेन (1913) त्रयोदश-अधिकनवदशशत- तमख्रिस्ताब्दे डर्बने कृतम्, यदा कृष्णाङ्गार-आकरस्य श्रमिकान् प्रति गुलिका-प्रहारः कृतः तद्विरुध्य तेन स्वीयशिरसः मुण्डनं कारयित्वा तेन सार्वजनिकः शोकः प्रकटितः ।

भारते पुनः प्रत्यागते सति (1915) पञ्चदशाधिकनवदशशत-तमे ख्रिस्ताब्दे सः काठियावाडी-कृषकस्य वेशेन भवति स्म । (1921) एकविंशत्यधिकनवदशशत-तमे ख्रिस्ताब्दे सः लघु धौतवस्त्रम् अधरत् तत् च सः आजीवनम् अधरत् । वर्षाभ्यन्तरे स्वराज्यस्य प्राप्तिर्भवेत् इति उद्देश्येन तेन असहयोग-आन्दोलनं प्रारम्भः कृतः तस्य आन्दोलनस्य एकस्य वर्षस्य अनन्तरं सितम्बरमासस्य द्वितीये दिनाङ्के (1921) एकविंशत्यधिकनवदशशततमे ख्रिस्ताब्दे तेन घोषितम् –

"अहम् इच्छामि यत् अक्तूबर-मासस्य एकत्रिंशं दिनाङ्कं यावत् न्यूनातिन्यूनं स्वकीयं शिरस्त्राणम् अन्तर्वस्त्रं तु त्यजेयम् एव, केवलं धौतवस्त्रेण एव कार्यं साधयेयम्, अपि च देहरक्षणाय कदाचित् उत्तरीयं धरेयम् । "

चित्रम् 21 – सप्तवर्षीयः महात्मगान्धी,तस्य पुरातनतमं चित्रम् ।

चित्रम् 22 – चतुर्दशवर्षीयः महात्मगान्धी, स्वीयेन केनचित् मित्रेण सह ।

चित्रम् 23 – महात्मगान्धी (अग्रिमपङ्क्तौ,दक्षिणतः) लन्दने, 1890तमख्रिस्ताब्दः, एकविंशतितमवर्षीयः, सावधानं पश्यन्तु यत् अत्र सः पाश्चात्यपरिधानत्रये विराजते ।

चित्रम् 24 – जोहानेसबर्ग-नगरे 1900 तमख्रिस्ताब्दे अधुना यावत् सः पाश्चात्यपरिधाने, गलबन्धः अपि वर्तते इति ।

चित्रम् 25 – 1913 तमख्रिस्ताब्दः, दक्षिण-अफ्रीकायां सत्याग्रहकालिके परिधाने ।



चित्रम् 26 – कस्तूरबया सह महात्मगान्धी – दक्षिण-अफ्रीकातः प्रत्यावर्तनात् पूर्वम् । साधारणवेशे । सः अनन्तरतमे काले अमन्यत यत् मुम्बयी-महानगरस्य अभिजातवर्गस्य मध्ये सः असमीचीनम् अनुभूतवान् । सः अवदत् यत् सः दक्षिण-अफ्रीकायाः श्रमिकाणां सानिध्ये सः गृहवत् स्थितिम् अनुभूतवान् इति ।

अहम् एतादृशस्य परिवर्तनस्य परामर्शम् एतस्मात् दातुं पारयामि यतो हि पर उपदेश कुशल बहुतेरे परेषाम् उपदेशने कुशलाः नैके सन्ति ---। अर्थात् मम प्रयत्नः भवति यत् अहम् अन्यान् तत् किमपि कर्तुं, न कथयामि यदहं स्वयं न कर्तुं पारयेयम् इति। तावत्पर्यन्तं तेन इदं न निश्चितम् आसीत् यत् सः एतत् परिधानम् एव आजीवनं धरिष्यति इति अपि तु सः एकस्मै मासाय मासद्वयाय वा एतादृशं प्रयोगमात्रं कर्तुम् इच्छति स्म । परन्तु शीघ्रमेव सः एतस्मिन् स्वदेशीये परिधाने निर्धनान् प्रति निष्ठायाः भावम् अपश्यत्, अपि च सः कदापि किमपि विशिष्टं वस्त्रं धृतवान् इति। भारतीयभिक्षुकाणां साधूनां संन्यासिनां च वेशं सावधानं परित्यज्य सः निर्धनतम-भारतीयस्य वेशम् अङ्गीकृतवान् इति । श्वेतम् असमं स्वदेशीयं घनवस्त्रं तस्मै शुद्धतायाः साधारणतायाः निर्धनतायाः च प्रतीकरूपम् आसीत् इति। एतस्य धारणं राष्ट्रभक्तेः पर्यायरूपेण जातम् इति अपि च पाश्चात्य-वस्त्रोद्योगे उत्पादितानां वस्त्राणां विरोधः अपि आसीत्।

यदा (1931)एकत्रिंशदधिकनवदशशत-तमे ख्रिस्ताब्दे गोलमेज इति सम्मेलनाय गान्धी महोदयः इङ्ग्लैण्डदेशम् अगच्छत् तदा तेन तत्र लघुयुतकं धृतम् आसीत्। यदा बकिङ्घम-पैलेस इति गमनस्य क्रमः आगतः तदा तेन सन्धिः अस्वीकृतः अपि च सम्राजः जार्जपञ्चमस्य पुरतः धौतवस्त्रं धृत्वा एव उपस्थितवान्। यदा सः पत्रकारैः पृष्टः यत् सम्राजः सभां गन्तुं तेन पर्याप्त-वस्त्राणि न धृतानि आसन् तदा सः परिहासेन अवदत् यत् सम्राजा एव आवयोः द्वयोः वस्त्राणि धृतानि आसन् खलु ?

5.3 स्वदेशीयघनवस्त्रं धर्तुं सर्वेषां सामर्थ्यं नासीत्

महात्मगान्धिनः स्वप्नः आसीत् यत् सम्पूर्णाः राष्ट्रियाः स्वदेशीयघनवस्त्रं धरेयुः इति । सः अनुभवति स्म यत् स्वदेशीवस्त्रस्य प्रयोगेण जातिधर्मादीनां भेदाः नष्टीभविष्यन्ति इति । परन्तु किं तस्य गान्धिनः अनुकरणं सर्वेषां कृते सुलभ्यं सरलं च आसीत् ? किम् एतादृशम् ऐक्यं शक्यम् आसीत् ? बहवः जनाः तद्वत् समानवर्णीयं कृषकीयवस्त्रम् अङ्गीकर्तुं न शक्नुवन्ति स्म । सर्वे तथाविधम् एव न इच्छन्ति स्म । पश्यामः यत् गान्धिनः आह्वाने कीदृश्यः प्रतिक्रियाः समायाताः -

- इलाहाबादस्य सफलः अधिवक्ता राष्ट्रवादी च मोतीलालनेहरूः स्वीयं बहुमूल्यं पाश्चात्यपरिधानम् अत्यजत् भारतीयं धौतं वस्त्रं करांशुकं च धृतवान् । परन्तु तस्य वेशः स्थूलस्य असमवस्त्रस्य च न आसीत् अपितु सूक्ष्मवस्त्रेण निर्मीतः आसीत् ।
- जाति-प्रथायाः कारणात् शताब्देभ्यः वञ्चितवर्गाणां, पाश्चात्यशैलीनिर्मितानि वस्त्राणि प्रति, सहजतया आकर्षणम् आसीत् । अतः बाबासाहब-अम्बेडकरस्य सदृशाः राष्ट्रभक्ताः पाश्चात्यशैल्याः परिधानस्य त्यागः न कदापि कृतवन्तः । बहवः दलितवर्गीयाः जनाः (1910) (दशाधिक-नवदशशत-तमदशके सार्वजनिकेषु अवसरेषु पादत्राणानां पादकोशानां श्रीपीस इति आङ्ग्लवेशं च धर्तुम् आरब्धवन्तः यत् तेषां पक्षतः आत्मसम्मानस्य राजनैतिकं वक्तव्यम् आसीत् इति ।
- कयाचित् महिलया (1928) अष्टाविंशत्यधिकनवदशशत-तमे ख्रिस्ताब्दे महात्मगान्धिने पत्रं लिखितम् "एकस्मात् वर्षात् प्राक् मया भवान् श्रुतः तदा भवान् अवदत् यत् प्रत्येकं जनः स्वदेशीयघनं वस्त्रं धरेत् इति एतत् नितान्तम् आवश्यकम् अस्ति इति, तदा अहम् अपि स्वदेशीयघनवस्त्रं धर्तुम् इष्टवती तदर्थं सङ्कल्पं च कृतवती इति । परन्तु वयं निर्धनाः स्मः, मम पतिः कथयति यत् स्वदेशीय-घनवस्त्रं महार्घम् अस्ति । अहम् महाराष्ट्रिया महिला अस्मि अतः नवगजपरिमाणस्य शाटिकां धरामि ---(अपि च) मम वरिष्ठाः अभिभावकाः तस्याः शाटिकायाः परिमाणं षड्-गज इति कर्तुम् सिद्धाः न भविष्यन्ति इति ।
- सरोजनी नायडू कमलानेहरू-समाः महिलाः अपि श्वेतवर्णीयानां हस्तनिर्मितानां स्थूलवस्त्राणाम् अपेक्षया विचित्र-वर्णीयाः विशिष्टस्वरूपाः शाटिकाः एव धरन्ति स्म ।

निष्कर्षः

अनेन प्रकारेण वेशे परिवर्तनस्य इतिहासः एकतः सांस्कृतिकरुच्याः सौन्दर्यस्य च परिभाषायां परिवर्तनेन सम्बद्धः अस्ति, तत्रैव एषः आर्थिकस्य सामाजिक-परिवर्तनस्य सामाजिकस्य राजनैतिकस्य च सङ्घर्षस्य विषयैः अपि सम्बद्धः अस्ति । अतः वेशभूषायां यदा परिवर्तनं दृष्टिपथम् आगच्छेत् तदा अस्माभिः प्रष्टव्यं यत् एतानि परिवर्तनानि किमर्थं भवन्ति इति ? अनेन समाजस्य इतिहासस्य च विषये वयं किं जानीमः ? अनेन वयं रुचौ प्रौद्योगिक्यां विपण्यां उद्योगे च जातानां केषां परिवर्तनानां विषये अवगच्छामः ?

क्रियाकलापः

5.3 इति भागे एतस्य आशयस्य कानिचन कारणानि दत्तानि सन्ति यत् भारतस्य केषुचित् वर्गेषु जातिषु क्षेत्रेषु च स्वदेशीयघनवस्त्रस्य प्रसारः किमर्थं न भवितुम्अशक्यत । किं भवन्तः एतदतिरिच्य अन्यत् कारणम् अपि ज्ञापयितुं शक्नुवन्ति ?

गान्धि-शिरस्त्राणम्

(1915) पञ्चादशाधिकनवदशशत-तमे ख्रिस्ताब्दे महात्मगान्धी दक्षिण-अफ्रीकातः भारतं प्रत्यागतवान्, तस्मात् परं गान्धी काश्मीरीयं शिरस्त्राणं कदाचित् धरति स्म, अन्तरकाले सः अनर्घं श्वेतशिरस्त्राणं च धर्तुम् आरब्धवान् इति। एतादृशं शिरस्त्राणं सः स्वयं (1919) नवदशाधिकनवदशशत-तमख्रिस्ताब्दानन्तर-कालिकं वर्षद्वयं यावत् एतादृशं शिरस्त्राणं धरति स्म, पुनः सः तदपि अत्यजत्। परन्तु तावत्पर्यन्तं तत् राष्ट्रियवेशरूपेण जातम् आसीत् – परन्तु तत् आङ्ग्लीयान् विरुध्य अवज्ञायाः प्रतीकरूपेण जातम् आसीत्। उदाहरणार्थं ग्वालियर-राज्येन असहयोग-आन्दोलनस्य काले (1921) एकविंशत्यधिकनवदशशत- तमख्रिस्ताब्दे एतादृशस्य शिरस्त्राणस्य धारणं मास्तु इति प्रतिषेधस्य प्रयासः कृतः। खिलाफत-आन्दोलनस्य काले व्यापकसङ्ख्यया हिन्दुजनाः मुस्लिमजनाः च एतत् शिरस्त्राणं धरन्ति स्म। संथाल इति जनानां केनचित् समूहेन (1922) द्वाविंशत्यधिकनवदशशत-तमे ख्रिस्ताब्दे बङ्गालस्य आरक्षकान् प्रति आक्रमणं कृतम्। तेषाम् अभियाचनम् आसीत् यत् संथाल-कारावासिनाम् अभिमोचनं क्रियन्ताम् इति ते विश्वसन्ति स्म यत् गान्धि-शिरस्त्राणस्य कारणात् गुलिकाप्रहारैः तेषां स्वल्पा अपि हानिः न भविष्यति इति --- समूहस्य त्रयः सदस्याः खेत इत्यस्मिन् आसन् इति।

अनेके राष्ट्रभक्ताः गान्धिशिरस्त्राणं धृत्वा चलितुं गौरवम् अनुभवन्ति स्म अपि च अनेके जनाः तु अस्मात् कारणात् दण्डप्रहारान् अपि सोढुं बाध्याः जाताः कारागारं चापि अगच्छन्। प्रथमात् विश्वयुद्धात् परं खिलाफत इति आन्दोलने बलवति सति शिखायुक्तं तुर्कीशिरस्त्राणस्य धारणं भारतवर्षे उपनिवेशवाद-विरोधि-भावनायाः प्रतीकरूपेण अभवत्। यद्यपि अनेके हिन्दवः यथा हैदराबादस्य फैज इति अपि शिरस्त्राणं धरन्ति स्म, परन्तु शीघ्रमेव इदं केवलं मुस्लिम-जनानाम् अभिज्ञानरूपं जातम्।

चित्रम् 27 – उष्णीष-धारी महात्मगान्धी

चित्रम् 28 – अत्र गान्धी सुभूषितं काश्मीरीयं शिरस्त्राणं धृत्वा वर्तते।

चित्रम् 29 – गान्धि-शिरस्त्राणं धृत्वा वर्तते।

चित्रम् 30 – शिरोमुण्डनं कृत्वा वर्तते।

चित्रम् 31 – गान्धी (1931) एकत्रिंशदधिकनवदशशत-तमे ख्रिस्ताब्दे स्वीयायाः यूरोप-यात्रायाः अवसरे ,अधुना पर्यन्तं तस्य वस्त्राणि पाश्चात्य-सांस्कृतिक-वर्चस्वस्य विरोधस्य अभिव्यक्तिरूपेण जातानि आसन्।

क्रियाविधिः

1. कल्पनां कुर्वन्तु यत् भवान् कस्यचित् वणिजः चतुर्दशवर्षीयः पुत्रः अस्ति। एतम् विषयम् आधारीकृत्य लिखतु यत् फ्रांसे प्रवर्तितानां सम्प्चुअरी इति अधिनियमानां विषये भवन्तः किं चिन्तयन्ति ?
2. किं भवन्तः ज्ञापयितुं शक्नुवन्ति यत् अद्यत्वे उचित-अनुचितयोः वेशयोः विषये जनाः किं चिन्तयन्ति ? एतादृशे द्वे वस्त्रे बोधयन्तु तयोः धारणम् एकस्मिन् स्थाने अनुचितं मन्यते अपि च कस्मिंश्चित् अन्यस्मिन् स्थाने उचितं मन्यते इति।

प्रश्नाः

1. अष्टादश-शताब्दे परिधानशैलीषु सामग्रीषु च विषये आगतपरिणामानां कानि कारणानि आसन् ?
2. फ्रांसस्य सम्प्चुअरी इति अधिनियमाः कीदृशाः आसन् ?
3. यूरोपीय-परिधान-संहितायाः भारतीय-परिधान-संहितायाः च विषये केचन द्वे भिन्नते ज्ञापयतु।
4. 1805तमे ख्रिस्ताब्दे आङ्ग्लाधिकारी बेंजनिन-हाइन-वर्यः बङ्गलुरुमहानगरे निर्मीयमाणवस्तूनां सूचीं कृतवान् आसीत्, यस्यां निम्नलिखितोत्पादाः अपि सम्मिलिताः आसन् ---
   - भिन्नप्रकारकाणि महिलापरिधानानि।
   - स्थूल छींट् इति,
   - मखमल इति,
   - कौशेयवस्त्राणि,

   ज्ञापयन्तु यत् विंशतितम-शताब्दस्य प्रारम्भिक-दशकेषु एतेषु किम्प्रकारकाणि वस्त्राणि प्रयोगात् बहिः गतवन्ति स्युः, अपि च किमर्थम् ?
5. नवदश-शताब्दीये भारते महिलाः परम्परागत-वस्त्राणि किमर्थं धरन्ति स्म अपरञ्च पुरुषाः पाश्चात्य-परिधानानि धर्तुम् आरब्धवन्तः आसन् ? एतस्मात् समाजे महिलानां स्थितेः विषये किम् अवगमनं भवति इति ?
6. विंस्टन-चर्चिलः अवदत् आसीत् यत् महात्मगान्धी "राजद्रोही मध्यमवर्गीयः वाक्कीलः एव अस्ति इत्यस्मात् परम् किमपि नास्ति इति अपि च अर्धनग्न-साधोः नाटकं प्रदर्शनं वा करोति इति।
   चर्चिलः एतादृशं वक्तव्यं किमर्थम् अददात् अपि च अनेन महात्मगान्धिनः परिधानस्य प्रतीकात्मक-शक्तेः विषये किं ज्ञायते इति ?
7. समग्रराष्ट्रं स्वदेशीयघनवस्त्रं धरेत् इति गान्धिनः स्वप्नः आसीत् परन्तु भारतस्य काञ्चन् भागान् यावत् एव अयं स्वप्नः सीमितः किमर्थं जातः ?

॥इति पञ्चमः पाठः॥

कृतज्ञता-ज्ञापनम्

फोटोग्राफः चित्रं च इति

एतस्य पुस्तकस्य विषये वयं निम्नलिखितान् प्रति कृतज्ञतां विज्ञापयामः

संस्थानं चित्रसङ्ग्राहलयाः

सेण्ट्रल-स्टेट्-आर्काइव्ज-आफ-फिल्म-फोनो-डाक्यूमेण्ट्स-आफ्-द्-यूएस-एस-आर इति (ii:13)

सेटर्-फार-वीमेन्स-डिवेलपेंट्-स्टडीज्,ट्रेवलिंग्-एग्जिबिशन् "री-प्रेजेंटिंग्-इण्डियन्-वीमेन्-ए-विजुअल्-डाक्यूमेंट्री इति 1875-1947' (viii:16,17)

फारेस्ट-रिसर्च्-इंस्टिट्यूट्, वारसा,पोलैण्ड् इति (viii:8)

मायदानेक-म्यूजियम-आर्काइव्ज,लुबलिन,पोलैण्ड् इति (iii:22)

नार्थ-डकोटा-स्टेट्-यूनिवर्सिटी-लाइब्रेरीज इति (vi:8,9,13,14,15)

प्रकाशनविभागः,सूचना एवं प्रसारण-मन्त्रालयः, भारतसर्वकारः (गान्धिनः सम्बद्धानि अधिकांशचित्राणि)

रबीन्द्रभवन-फोटो-आर्काइव्ज्,विश्वभारती-विश्वविद्यालयः,शान्तिनिकेतनम्, (viii:16,17)

द-मासायि-एशोसिएशन् इति (vi:12,14,15,16,17)

द-युनाइटेड-स्टेट्स्-हालोकास्ट-मैमोरियल-म्यूजियम इति(ii:14,22)

यूनेस्को-पारजोर्-प्रोजैक्ट् इति (viii:18)

जर्नल्स

ग्राफिक्स्(vii:9)

इण्डियनशारीवारी (viii:13)

इण्डियन-फारेस्ट्-रिकार्ड्स्,खण्डः xv(vi:9)

इण्डियन-फारेस्ट्-र् इति (iv:10,11)

मैन-इन-इंडिया,1948(vi:18)

द-इल-स्ट्रेटेड्-लन्दन-न्यून इति (ii:2;vii:7,8,9,16)

व्यक्तिः

बरनेला,सञ्जयः (iv:11,12,15,16;v;8,10)

गुहा,रामचन्द्रः (vii:10,11,13,14)

माङ्गलिकः,मुकुलः (vi:1,2,5,6,7,9)

सबरवालः,वसन्तः (v:3,4)

सुन्दरः,नन्दनी (vi:6,13,14,17)

प्रकाशकाः लेखकाः च

बैलेंटाइन,बैटी एवं इयान-बैलेंटाइन,सं.,द-नेटिव-अमेरिकन्स : एन-इलस्ट्रेटेड्-हिस्ट्री,एटलांटाः टर्नक-पब्लिशिंग इं.,1993(iv:2)

बार्टलैट्,रिचर्ड ए,द न्यू कन्ट्री :ए सोशल-हिस्ट्री-आफ-द-अमेरिकन-फ्रंटियर्, 1776-1890,ओयूपी-न्यूयार्क इति (vi:10,11,12)

बेरेलोविच्,व्लादिमीर-एवं-लारेंट्-गेरवेर्-यो,रूसी-यू-आर-एसएस इति 1914-1991, (ii:10)

बर्ले,माइकेल एवं वुल्फगैंग-वाइपरमान,द-रेशियल-स्टेट्: जर्मनी 1933-1945, कैम्ब्रिज-यूनिवर्सिटी-प्रैस इति (iii : 13,15,16,25,31,32)

डेविडसन,यूजीन,द-मेकिंग-आफ्-एडोल्ड-हिटलर : द-बर्थ्-एण्ड्-राईज्-आफ्-नात्सिज्म्,युनिवर्सिटी-आफ-मिसूरी-प्रैस् इति, 1977(iii : 4,5,6)

गुहा,रामचन्द्रः,ए-कार्नर्-आफ्,ए-फारेन-फील्ड : द-इण्डियन्-हिस्ट्री-आफ्-ए-ब्रिटिश्-स्पोर्ट्,पिकेडार् इति , 2002 (vii 10,11,13,14)

कार्लेकरः,मालविका,सं.,विजुअलाइजिंग-इण्डियन-वीमैन इति 1875-1947,ओयूपी,नवदेहली।

मैकफरलेन,एलन,एवम् आइरिस्-मैकफरलेन,ग्रीन-गोल्डः द-एम्पायर-आफ्-टी, लन्दन-इब्युरी-प्रैस इति, 2003(vi:7)

मूरहाउस,ज्याफ्री,हाडेर् एवं स्टाउटन्, लार्ड्स,सेवन-ओक्स,1983 (vii:2,6)

मोयनाहन,ब्रायन,द-रशियन-सेंचरी,सेवन-डायल्स-इलस्ट्रेटेड्-डिविजन्,द-ओरयान्-पब्लिशिंग्-ग्रुप इति, 1999(ii : 5,7,8,19)

ओबोलेंस्की,चोले,द-रशियन्-एम्पायर : ए-पोर्टेट्-इन्-फोटोग्राफ्सस जोनाथन-केप्-लि.,लन्दनम्, 1980 (ii :6)

ओब्श्चैस्त्वो आई व्लास्त-वी 30-येगोदी,मास्को इति 1998 (ii : 15,16,17)

पेलुसो,नैन्सी,रिच्-फारेस्ट्स्,पुअर-पीपुल,बर्कले : युनिवर्सिटी-आफ्-कैलिफ़ोर्निया-प्रैस इति, 1992(iv : 15,21,24)

रीस्,लारेंस्,द-नात्सीज् : ए-वार्निंग-फ्राम-हिस्ट्री, द-न्यू-प्रैस् इति, न्यूयार्क, 1997, (iii : 7,17)

रूहे,पीटर्,गान्धी,फ़ायडन्, लन्दन इति, 2001 (viii : 23,31)

र्-यरुप्, रीनहार्ड्,सं.,टोपोग्राफ़ी आफ्-टैरर् : ए डॉक्यूमेंटेशन,वरलाग-विलमथ-ऐनहावल,बर्लिन इति, 1987 (iii : 1,3,18,27)

स्कॉट्,जेम्स,सीइंग-लाइक-ए-स्टेट्, न्यू-हैवन् : येल्-युनिवर्सिटी-प्रैस्, 1998 (iv:8)

स्टैबिंग,ई.पी.,द-फॉरेस्ट्स्-आफ्-इंडियाजॉन लेन, लन्दन (iv : 3,4,5,13,14,21)

टार्लो,एम्पा,क्लोदिंग-मैटर्स : ड्रेस-एंड-आइडेंटिटी-इन-इण्डिया, वाइकिंग-पेंग्विन-इण्डिया,1996(viii : 27,28,29,30)

द-टाइम्स-एटलस-आफ्-वर्ल्ड्-हिस्ट्री,सं.ज्यॉफ्री-बाराक्लफ़,हैमन्ड, 1985 (iv : 22)

वेग्नर्, ग्रेगरी-पॉल्,एण्टी-सेमिटिज़्म-ऐन्ड्-स्कूलिंग-अंडर्-द-थर्ड्-राइख्, रटलेज्-फ़ालमेर इति 2002 (iii : 23,24)

वेल्च्-डेविड,द-थर्ड्-राइख : पालिटिक्स-ऐन्ड्-प्रोपेगंडा,रटलेज्,लन्दन इति 1993, (iii : 10)

वूर्स्टर,डोनाल्ड, डस्ट-बाउल : द-सदर्न-प्लेन्स-इन-द 1930ज़,ओयूपी,न्यूयार्क 1979 (vi : 16,17)

पाठः

केचन अध्यायाः अथवा तेषां भागाः उल्लेखनीयरूपेण निम्नलिखिते आधारिताः सन्ति ---

गुहा,रामचन्द्रः, ए-कार्नर्-आफ्-ए-फारेन्-फील्ड् : द-इण्डियन-हिस्ट्री-आफ-ए-ब्रिटिश्-स्पोर्ट,पिकेडॉर्,2002 (vii)

मार्सेसी,माइक,एनीवन-बट्-इंग्लैण्ड्,वर्सो, 1995(vii)

पेलुसो,नेन्सी, रिच्-फॉरेस्ट्स्, पुअर-पीपुल,बर्कले : युनिवर्सिटी ऑफ् कैलिफोर्निया-प्रैस् इति, 1992 (iv : भागः 4)

वूर्स्टर,डोनाल्ड,डस्ट-बाउल : द-सदर्न-प्लेन्स –इन-द 1930ज,ओयूपीः न्युयार्क, 1979 (vi: भागः 2.5)

टिप्पणः – अस्माभिः सर्वेभ्यः कापीराइट- इत्यस्य धारकेभ्यः सूचना प्रेषिता अस्ति। यदि सम्बद्धप्रकाशकाय एतस्मिन् विषये कापि सूचना दीयते तर्हि तदाधारेण अग्रिमप्रकाशने आवश्यकः परिष्कारः करिष्यते।

0967

विद्यया ऽमृतमश्नुते

एन सी ई आर टी
NCERT

राष्ट्रियशैक्षिकानुसंधानप्रशिक्षणपरिषद्
NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING

ISBN 81-7450-571-7